'यह एक देव अन्य सब देवोंके साथ आ जावे।' इस विषयमें जो वक्तव्य है, वह स इद्देवेषु गच्छति।'' (ऋ०१।१।४) तथा '' स देवान् एह वक्षति।'' (ऋ०१।१।२) इनकी व्याख्या करते हुए कहा ही है।

[१] स देवान् इह आवक्षति = वह देवोंको यहां लाता है।
[२] स देवेषु इत् गच्छति = वह देवोंमें पहुंचता है।
[३] देवो देवेभिः आगमत् = देव देवोंके साथ आ जाय।

इन तीनों कथनोंमें एकही विशेष भाव है। एक आत्मा का अन्य देवोंके साथ जो संबंध है, वही यहां बताया है। इसका स्वरूप ठीक ठीक ध्यानमें आनेके लिये निम्न मंत्रोंका विचार करना आवश्यक है—

[१] अग्निर्देवेभिरागमत् ॥ (५।१२: ऋ० ३।१०।४)
[२] विश्वेभिः देवेभिर्याहि यक्षि च ॥ (ऋ० १।१४।१)
[३] देवेभिरग्न आगहि ॥ (ऋ० १।१४।२)
[४] क्षयं बृहन्त परिभूषति द्युभिर्देवेभिरग्निः॥ (ऋ०३।३।२)
[५] अग्निर्देवेभिर्मनुषश्च जंतुभिस्तन्वानो यज्ञं पुरुपेशसं धिया ॥ (ऋ०३।३।६)
[६] गमद्देवेभिरा स नो यजिष्ठः॥ (ऋ०३।१३।१)
[७] देवेभिर्देव सुरुचा रुचानः॥ (ऋ०३।१५।६)
[८] अग्ने विश्वेभिरग्निभिर्देवेभिर्महया गिरः॥ (ऋ०३।२४।४)
[९] अग्ने विश्वेभिरागहि देवेभिर्हव्यदातये ॥
[१०] देवेभिरग्ने अग्निभिरिधानः ॥ (ऋ०६।११।६)
[११] त्वमग्ने यज्ञानां होता विश्वेषां हितः। देभिर्मानुषे जने ॥ (ऋ०६।१६।१)
[१२] आ नो देभिरुप देवहूतिमग्ने याहि ॥ (ऋ०७।१४।३)
[१३] यो भानुभिर्विभावा विभात्यग्निर्देवेभिर्ऋतावाजस्रः। (ऋ० १०।६।२)

'(१) देवोंके साथ अग्नि आया है, (२) सब देवोंके साथ आओ और यजन करो, (३) हे अग्ने! तू देवोंके साथ आ, (४) अग्नि सब तेजस्वी देवोंके साथ बडे (श्रयं) निवासस्थानको भूषित करता है, (५) देवोंके साथ और मनुष्यके संतानोंके साथ बुद्धिसे विविध रूपवाला यज्ञ अग्नि फैलाता है, (६) पूज्य अग्नि देवोंके साथ हमारे पास आता है, (७) हे देव! अनेक देवोंके साथ तू तेजसे तेजस्वी है, (८) हे अग्ने! सब अग्निरूप देवोंके साथ वाणीको बढाओ, (९) हे अग्ने! सब देवोंके साथ अन्नदानके लिये आओ, (१०) हे अग्ने! तू सब अग्निरूप देवोंसे प्रदीप्त होता है, (११) हे अग्ने तू मानवी जनोंमें सब यज्ञोंका हितकारक और सब देवोंके साथ हवन करनेवाला है, (१२) हे अग्ने! सब देवोंके साथ हमारे यज्ञमें आओ, (१३) जो तेजस्वी अग्नि तेजस्वियोंके साथ चमकता है।'

इत्यादि मंत्रोंमें भी अनेक देवोंके साथ अग्निका रहना वर्णन किया है। ''अनेक अग्नियोंके साथ अग्नि (अग्निभिः अग्निः) आता है।'' यह इन मंत्रोंका वर्णन स्पष्टतासे सिद्ध कर रहा है कि, यहां अग्नि शब्द विशेष अर्थसे प्रयुक्त हुआ है, और केवल आगका ही वाचक नहीं है। इसी प्रकार देवतावाचक अन्य शब्दोंका भी उपयोग किया है। देखिये—

देवता इंद्र—

(१) स वह्निभिर्ऋक्वभिर्गोषु शश्वन् मितज्ञुभिः पुरुकृत्वा जिगाय। पुरः पुरोहा सखिभीः सखीयान् दृळ्हा रुरोज कविभिः कविः सन् ॥ (ऋ०६।३२।३)
(२) इन्द्र प्र णो धितावानं यज्ञं विश्वेभिः देवेभिः। तिरस्तवान विश्वते ॥ (ऋ०३।४०।३)
(३) प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर्विश्वतो अप्रतीतः ॥ (ऋ०३।४६।३)

देवता अश्विनौ—

(१) आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना ॥ (ऋ०१।३४।११)
(२) आ नो देवेभिरुप यातमर्वाक् सजोषसा नासत्या रथेन ॥ (ऋ०७।७२।२)
(३) आ...गतं ॥ देवा देवेभिरद्य सचनस्तमा ॥ (ऋ०८।२६।८)

इंद्र देवता के मंत्र (१) (पुरु-कृत्वा) विविध कर्म करनेवाला वह इंद्र (शश्वत्) सर्वदा (मित-ज्ञुभिः वह्निभिः ऋक्वभिः) घुटनोंके बल बैठनेवाले अग्निके समान तेजस्वी उपासकोंके साथ (गोषु) गौवों, इंद्रियों और भूमि आदिकोंके संबंधमें (जिगाय) विजय प्राप्त करता है । (पुरो-हा) शत्रुके नगरोंका नाश करनेवाला (सखिभिः कविभिः) मित्ररूप कवियोंके साथ (सखीयन् कविः) मित्रता करनेवाला कवि (दृढा पुरः) बलयुक्त नगरोंका (रुरोज) भेदन करता है ॥ (२) हे (विश्+पते इंद्र) प्रजापालक प्रभो! (नः पिता+वानं यज्ञं) हमारे उत्तम उपकारी यज्ञको (विश्वेभिः देवेभिः) सब देवोंके साथ (प्र तिरः) पूर्ण करो ॥ (३) यह इंद्र (रोचमानः) तेजस्वी होता हुआ (मात्राभिः) सब प्रमाणोंसे (प्र रिरिचे) विशेष तेजस्वी हुआ है और (देवेभिः) देवोंके साथ (विश्वतः) सब प्रकारसे (अ-प्रतीतः) पीछे हटनेवाला नहीं है ।

अश्विनी देवताके मंत्र = (१) (त्रिभिः एकादशैः देवेभिः) तीन गुणा ग्यारह देवोंके साथ, हे अश्विदेवो! यहां मधुपान के लिये आइये । (२) हे (नासत्या) अश्विदेवो! देवोंके साथ रथमें बैठकर वेगसे हमारे पास आइये । (३) हे (सचनस्तमौ देवौ) पूज्य देवो! अन्य देवोंके साथ यहां आइये ।

अग्नि, इंद्र और अश्विनी देवताओंके मंत्र ऊपर दिये हैं। उनको देखनेसे पता लग सकता है कि, वाक्य कैसे समान भावके ही हैं। देखिये—

अग्निदेवता—

देवो देवेभिः आगमत् ॥ (ऋ. १।१।५)
अग्निः देवेभिः आगमत् ॥ (ऋ. ३।१०।४)
अग्ने, अग्निभिः देवेभिः महय ॥ (ऋ. ३।२४।४)
भानुभिः देवेभिः अग्निः विभाति ॥ (ऋ. १०।६।२)

इंद्र देवता—

वह्निभिः सः गोषु जिगाय ॥ (ऋ. ६।३२।३)
पुरोहा सखिभिः सखीयान् रुरोज॥ (ऋ.६।३२।३)
कविभिः कविः पुरः रुरोज ॥ (ऋ. ६।३२।३)

अश्विनी देवता—

त्रिभिरेकादशैः देवैः आयातं ॥ (ऋ. १।३४।११)
नासत्यौ देवेभिः आयातं ॥ (ऋ. ७।७२।२)

देखिये ,भिन्न शब्दोंसे किस प्रकार एकही भाव व्यक्त किया गया है । ' इंद्र ' शब्द ' आत्मा ' अर्थ में सुप्रसिद्ध है, क्यों कि ' इंद्रिय ' शब्द इंद्रशक्तिका वाचक आजकलकी भाषामें भी अवयवोंके अर्थमें प्रयुक्त है, अर्थात् ' अनेक देवोंके साथ देवोंका राजा इंद्र शत्रुके किले तोडता है ' इस वर्णनमें ' आत्मा इंद्रियशक्तियोंके साथ विरोधकोंका नाश करता है ' यही भाव है । तात्पर्य, इंद्रवर्णनसे आत्मवर्णन होनेमें कोई शंका नहीं हो सकती । अश्विनीदेवोंके विषयमें किसीको. शंका होना स्वाभाविक है। परंतु **' नास+त्य '** शब्द **' नासिका में रहनेवाला '** प्राण इस अर्थमें प्रयुक्त होता है । **' नास+त्य '** यह विशेषण अश्विनी देवोंका है, इससे इनका स्थान नासिका है । इसलिये प्राणापान, श्वास-उच्छ्वास आदिकोंका वाचक यह शब्द है, इसमें शंका नहीं । यह प्राण अन्य देवोंके साथ शरीरमें आता है और यहां यज्ञ करता है, यह वर्णन पूर्वोक्त अग्निके वर्णन के साथ मिलानेसे पता लग सकता है कि, दोनों वर्णनोंसे एक ही यज्ञका भाव बताया गया है । **(देवो देवेभिः आगमत्)** ' एक देव अनेक देवोंके साथ यहां आता है, यहां यज्ञ करता है। देवोंसे यज्ञ कराता है, देवोंको हविर्भाग देता है, यज्ञसमाप्तिके पश्चात् देवोंके साथ चला जाता है । ' यह सब वर्णन यहांही इस शरीरमें देखनेका है । आत्मा इंद्रियशक्तियोंके साथ यहां आता है, इंद्रियोंसे कार्य कराता है, खाये हुए अन्नसे अंशरूप भोग प्रत्येक इंद्रियतक पहुंचाता है, इस अंशभोगसे इंद्रियस्थानीय देवतागण संतुष्ट होता है और वह इस आत्माको भी सुखी करता है । यह भाव निम्न गीतावचनमें देखिये—

देवान् भावयताऽनेन ते देवा भावयंतु वः ।
परस्परं भावयंतः श्रेयः परमवाप्स्यथ ॥
(भ. गी. ३।११)

' तुम इस यज्ञसे देवताओंको संतुष्ट करते रहो और वे देवता तुम्हें संतुष्ट करते रहें । इस प्रकार परस्पर एक दूसरेको संतुष्ट करते हुए दोनों परम श्रेय अर्थात् कल्याण प्राप्त कर लो । '

आत्मा और अन्य ३३ देव इतनेही पदार्थ इस जगत् में हैं। आत्मा स्वयंप्रकाशी सम्राट् है और ३३ देव आत्माके तेजसे प्रकाशित होनेवाले और आत्माके आदेशानुसार अपना नियत कार्य करनेवाले हैं। जहां आत्मा जाता है, वहां ये जाते हैं, जिस प्रकार सम्राट् के साथ ओहदेदारोंको जाना पडता है। अकेला आत्मा कुछ कर नहीं सकता और न सब देव आत्मशक्तिके विना कुछ कर सकते हैं। इस प्रकार अन्योन्य सहाय्यताकी आवश्यकता है। अन्योन्य संगतिका ही नाम यज्ञ है। परस्पर सहकारितासे बडे बडे कार्य हो सकते हैं। आत्मा और ३३ देवोंकी सहकारितासे ही यह शरीरका कार्य चल रहा है। इसका इतना महत्त्व है कि, इससे और आश्चर्यकारक घटना जगत्में दूसरी हैही नहीं। परस्पर सहकारितासे इतने आश्चर्यकारक कार्य होना संभव है। यदि एक देव यहां बिगड बैठा, तो सब बिगाड हो जाता है, तात्पर्य सबसे सहकार्यसेही आनंद होना संभव है।

तुलना।

मधुच्छंदा वैश्वामित्रः। अग्निः।

[१] राजन्तमध्वराणां॥ (८; ऋ० १।१।८)

प्रस्कण्वः काण्वः। अग्निः।

[२] राजन्तमध्वराणां॥ (१०३; ऋ० १।४५।४)

[३] पतिर्ह्यध्वराणामग्ने॥ (९४; ऋ० १।४४।९)

देवरातः, शुनःशेप अजीगर्तिः। अग्निः।

[४] सम्राजन्तमध्वराणां॥ (३८; ऋ० १।२७।१)

विश्वामित्रः। अग्निः।

[५] स केतुरध्वराणां॥ (५१२; ऋ० ३।१०।४)

सध्वंसः काण्वः। अश्विनौ।

[६] राजन्तौ अध्वराणां॥ (ऋ० ८।८।१८)

वत्सप्रिः। अग्निः।

[७] नेतारमध्वराणाम्॥ (१६०४; ऋ० १०।४६।४)

भिन्न ऋषि-दृष्ट मन्त्रोंमें वर्णन की समानता इस प्रकार है। अश्विनी देवोंका भी वर्णन इन्हीं शब्दोंसे हुआ है। इसका तात्पर्य यह कि द्रष्टा ऋषिकी भिन्नता और वर्णनीय देवताकी भिन्नता होनेपर भी '**प्रतिपाद्य विषयकी एकता**' है, अर्थात् जो 'यज्ञ' अग्निदेवताके मिषसे वेदमें बताया है, वही यज्ञ 'अश्विनौ' देवताके नामसे वर्णन किया है और इसी प्रकार अन्यान्य देवताओंके वर्णनोंसे उसी बातका दर्शन होता है। 'अग्नि यज्ञोंका राजा किंवा प्रकाशक अथवा नेता है,' यही आशय ऊपरके मन्त्रोंका है। यहां इसके द्वारा जो यज्ञ किया जाता है, उसका सविस्तर वर्णन इसी स्पष्टीकरण में इसीसे पूर्व बताया जाता है। उसको देखनेसे पाठकोंको स्वयं अनुभव हो सकता है कि, यह यज्ञोंका राजा कैसा है और किस रीतिसे यज्ञ कर रहा है।

'**ऋतस्य गोपा**' अर्थात् 'अनादि सत्य नियमोंका पालनकर्ता' यही है। 'ऋत और सत्य' ये दो अनादि-सिद्ध त्रिकालाबाधित सत्य नियम इस जगत् में सनातन हैं। इनका कोई उल्लंघन नहीं कर सकता। इनका संरक्षक यही आत्माग्नि है। इस विषयमें निम्न मंत्र देखिये—

[१] ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत॥ (ऋ० १०।१९०।१)

[२] ऋतं पिपर्त्यनृतं नि तारीत्॥ (ऋ० १।१५२।३)

[३] ऋतं चिकित्व ऋतमिच्चिकिद्धृतस्य धारा अनु तृन्धि पूर्वीः॥ (ऋ० ५।१२।२)

[४] ऋतं ऋताय पवते सुमेधाः॥ (ऋ० ९।९७।२३)

[५] ऋतमृतेन सपन्तेषिरं दक्षमाशाते॥ (ऋ० ५।६८।४)

'(१) प्रदीप्त तपसे ऋत और सत्य उत्पन्न हुए हैं, (२) ऋतका पालन करता है और अनृतको हटाता है, (३) ऋतके जाननेवाले ऋतके नियमको जानो, सनातन ऋतके प्रवाह फैलाओ, (४) उत्तम बुद्धिमान् ऋतके लिये ही ऋतको पवित्र करता है, (५) ऋत नियमसे ऋतका पोषण करनेवाले बहुत सामर्थ्य प्राप्त करते हैं।'

जिन दो अटल सत्य और सनातन नियमोंसे यह जगत् चल रहा है, वे 'ऋत और सत्य' ये दो नियम हैं। ऋतके विषयमें और देखिये—

[१] **हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषद्-तिथिर्दुरोणसत् ॥ नृषद् वरसदृतसद्व्योमस-दब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥**
(ऋ. ४।४०।५; कठ० ५।२)

[२] **प्रजापतिः प्रथमजा ऋतस्य** ॥ (महा.ना. उ.२।७)

[३] **अहमस्मि प्रथमजा ऋतस्य** ॥(तै.उ. ३।१०।६)

[४] **ऋतं तपः सत्यं तपः** ॥ (महा. ना. उ. ८।१)

[५] **ऋतं सत्यं परं ब्रह्म** ॥ (महा. ना. उ. १२।१)

'(१) (हं+सः) जिस प्राणका बाहिर आनेके समय 'ह' ध्वनि होता है और अंदर जानेके समय 'स' ध्वनि होता है, वह प्राण (शुचि+षद्)शुद्धमें रहनेवाला, (वसुः) निवासक, (अंतरिक्ष+सद्) हृदयके मध्यमें रहनेवाला, (होता) हवन करनेवाला, (वेदि-षद्) हृदय की वेदिमें रहनेवाला, (अ-तिथिः) जिसकी आनेजानेकी तिथि निश्चित नहीं है, (दुरोण-सत्) स्वस्थानमें रहनेवाला, (नृ+षद्) मनुष्यके अंदर-हृदयमें-रहनेवाला, (वर-सद्) श्रेष्ठ स्थान में रहनेवाला, (ऋत-सद्) सत्यमें रहनेवाला, (व्योम-सद्) आकाशमें रहनेवाला, (अप्-जा) कर्मके साथ होनेवाला, जीवनके साथ रहनेवाला, (गो-जा) इंद्रियोंके साथ रहनेवाला, (ऋत-जा) ऋतका प्रवर्तक, (अ-द्रि-जा) जडमें रहनेवाला, जो है, वही 'बृहत् ऋत' है। (२) ऋतका प्रथम प्रवर्तक प्रजापति है। (३) मैं (अहं) आत्मा ऋतका पहिला प्रवर्तक हूं। (४) ऋत और सत्य तपही हैं। (५) ऋत और सत्य परब्रह्म है।'

यह ऋत की महिमा है। ऋत स्वयं आत्माका रूपही है। पूर्व मंत्रमें प्राण और आत्माही ऋत है, ऐसा स्पष्ट कहा है, इस लिये आत्माके निज धर्म ही ऋत और सत्य नामसे प्रसिद्ध हैं। 'ऋत' नाम यज्ञकाभी है इसलिये (**ऋतस्य गोपा**) 'ऋतका रक्षक' का अर्थ 'यज्ञका **रक्षक**' भी है। इस विषयमें निम्न मंत्र देखिये—

यज्ञस्य देवः । (ऋ. १।१।१)
ऋतस्य गोपा । (ऋ.१।१।८; ३।१०।२)
अध्वराणां राजन् । (ऋ. १।१।८)
अध्वराणां नेता । (ऋ. १०।४६।४)
यज्ञस्य नेता । (ऋ. २।५।२)
यज्ञस्य प्राविता । (ऋ. ३।२१।३)
यज्ञस्य साधनः । (ऋ. ३।२७।८)

अग्निदेवता का यह वर्णन एकही भावका द्योतक होना स्वाभाविक है। यज्ञका स्वरूप पहले निश्चित किया ही है। पुरुषका जीवन यज्ञ ही है। इस जीवनरूप यज्ञका नेता, चालक, रक्षक यही आत्माग्नि है, इसमें कोई शंका नहीं है। यही बात पूर्वोक्त उपनिषद्वचनोंसे सिद्ध हो रही है। वहां भी ऋतका स्वरूप 'आत्मा' ही बताया है। इस प्रकार अनेक रीतिसे विचार करनेपर तात्पर्य एकही सिद्ध होता है, यही सत्य अर्थका लक्षण है।

'**दीदिवि**' शब्द इसके पश्चात् आता है। इसका अर्थ 'प्रकाशमान' है। इसके समान जो अन्यत्र मंत्रभाग है, उसमें 'दीदिहि' पाठ है, देखिये—

मधुच्छंदा वैश्वामित्रः । अग्निः ।
गोपामृतस्य दीदिविम् । (ऋ. १।१।८)
विश्वामित्रो गाथिनः । अग्निः ।
गोपा ऋतस्य दीदिहि । (ऋ. ३।१०।२)
उरुक्षय आमहीयवः । अग्नी रक्षोहा ।
गोपा ऋतस्य दीदिहि । (ऋ. १०।११८।७)

थोडासा पाठभेद होनेपर भी अर्थकी एकता ही है, '**दीदिवि**' शब्दका अर्थ 'प्रकाशमान' है और '**दीदिहि**' का अर्थ 'प्रकाशित हो,' ऐसा है, इसलिये अर्थकी दृष्टिसे कोई भेद नहीं है।

'**वर्धमानं स्वे दमे**' अपने दमनमें बढनेवाला, अपने घरमें वृद्धिको प्राप्त होनेवाला, यह इसका भाव है। 'दम' शब्दका अर्थ 'संयम, दमन, आत्मसंयम, मनोविकार और इंद्रिय वृत्तियोंका संयम मनकी स्थिरता; घर, परिवार' इतना है। संयमसे अपनी शक्ति बढती है। मनोनिग्रहसे आत्मशक्तिका विकास होता है। यही उन्नतिका नियम है।

(१) सत्कर्मोंका फैलाव करना, (२) सत्यनिष्ठा बढानी, (३) अज्ञानांधकार दूर करके ज्ञानका प्रकाश करना, और (४) संयमसे अपनी शक्तिका विकास करना चाहिये। इस मंत्रसे सब मनुष्योंके लिये यही उपदेश है और जो आत्मोन्नति चाहते हैं, उनके लिये ये बोध अमूल्य हैं। इनका पालन करनेसे मनुष्य अग्निके समान तेजस्वी हो सकता है।

इस तरह तुलनात्मक अध्ययन वेदके मंत्रोंका करना उचित है। इस तरहके अध्ययनसे ही वेद मंत्रोंका रहस्य ध्यानमें आ सकता है। इस दैवत-संहितासे इस तरहके अध्ययनकी अतीव सहायता होनेवाली है । आशा है, इस तरह का अध्ययन करके पाठक लाभ उठावेंगे ।

सूचियोंका उपयोग ।

अग्निदेवताकी '**पुनरुक्त-मन्त्र-सूची**' पृ० १८७से२१६ तक है। इस सूचीसे किस मन्त्रका कौनसा भाग कहां पुनरुक्त हुआ है, इसका पता लग सकता है। अग्निके विवरणमें तथा भूमिकामें जो पुनरुक्त मन्त्र दिये हैं और जो विवरण किया है, उससे इस सूची की सहायता वेद-मन्त्रोंका अर्थ करनेमें कितनी है, इसका पता लग सकता है। भूमिका पृ० ४८ से ६६ तक पाठक देख सकते हैं कि पुनरुक्त मन्त्रसूचीसे कैसा लाभ हो सकता है। यदि पाठक इस सूचीका उत्तम उपयोग कर सकेंगे, तो मन्त्रका अर्थ अन्तर्गत प्रमाणोंसे निश्चित होनेमें बडी सहायता हो सकती है।

दूसरी उपमा-सूची है। इससे पता लग सकता है कि अग्निको कितनी उपमाएं किस अर्थमें दी हैं।

तीसरी सूची मन्त्रोंकी अकारादि वर्णानुक्रम-सूची है। इससे कौनसा मन्त्र कहां है, इसका पता लग सकता है। अन्तिम सूची विशेषणोंकी है, इससे अग्निके गुण जाने जा सकते हैं। गुणोंका बोध होनेसे स्वरूप का निश्चय होता है। इस तरह ये सब सूचियां बडी उपयोगी हैं।

अन्तिम निवेदन ।

यहां अन्तिम निवेदन यह है कि यहां अग्निके विषयमें जो लिखा है, वही परिपूर्ण है, ऐसा नहीं समझना चाहिये। पाठक विचार करते रहेंगे, तो उनके सामने कई अन्य बातें स्वयं उपस्थित होंगीं और प्रकाशित होती रहेंगीं। इसलिये हरएक पाठक अपनी स्वतंत्र विचार-शक्तिसे इन मंत्रोंका विचार करें और जो विचार होगा, वह जनताके सामने रखते जांय। इसी तरह करनेसेही वेद-विद्याका प्रकाश होगा।

—संपादक

अग्निदेवता का परिचय।

भूमिका की विषय-सूची।

विषय	पृष्ठ
१ विषय प्रवेश।	६
२ भाषामें अग्नि शब्दका भाव।	,,
३ अग्निके पर्याय शब्द।	,,
४ पहला मानव " अग्नि "	,,
५ वृषभ और धेनु।	७
६ पहला अंगिरा ऋषि।	८
७ वैश्वानर अग्नि।	,,
८ ब्राह्मण और क्षत्रिय।	९
९ अग्निसंवर्धन।	१०
१० व्यक्तिभाव और संघभाव।	११
११ संघशक्ति का अद्भुत बल।	,,
१२ जनता का केंद्र।	१२
१३ समाज का अमरत्व।	,,
१४ सब धन संघका ही है।	१३
१५ संघ के विजयमें व्यक्ति का जय।	,,
१६ बुद्धि में पहिला अग्नि।	१४
१७ पहिला मननकर्ता अग्नि।	१५
१८ मनुष्यमें अग्नि।	,,
१९ मर्त्यों में अमृत अग्नि।	१६
२० जाठराग्नि।	,,
२१ वाणी के स्थानमें अग्नि।	१७
२२ दिव्य जन्मकर्ता अग्नि।	,,
२३ शक्ति प्रदाता अग्नि।	१८
२४ पुरोहित अग्नि। गणराज।	,,
२५ हस्तपादहीन गुह्य अग्नि।	१९
२६ वृद्ध नागरिक।	१९
२७ प्रजामें देवताका अनुभव।	२०
२८ न दबनेवाला।	,,
२९ मूकमें वाचाल।	२१
३० पुराना मित्र।	,,
३१ विनाशियोंमें अविनाशी।	२२
३२ अनेक देवोंका प्रेरक एक देव।	२३
३३ अनेक अग्नियोंके साथ एक अग्नि।	२५
३४ अग्नियोंमें अग्नि।	२६
३५ देवोंद्वारा प्रदीप्त अग्नि।	२७
३६ दूत अग्नि।	२८
३७ होता अग्नि।	२९
३८ अग्निरूप होना।	,,
३९ एक अग्नि से दूसरे अग्निका जलना।	,,
४० देवोंद्वारा स्थापित अग्नि।	३०
४१ मानवी प्रजा में अग्नि।	३१
४२ जीवन-रसरूप अग्नि।	३२
४३ देवोंका निवासक अग्नि।	,,
४४ दस बहिनें इसको प्रकट करती हैं।	३३
४५ प्रजाका रक्षक।	३४
४६ देवोंके साथ अग्निका बैठनेका स्थान।	३५
४७ यज्ञका झंडा।	३६

४८ देवोंमें यज्ञ।	३७	५८ सप्त धातु।	४५
४९ यही दूत है।	,,	६० सात घोडे।	,,
५० गुहा संचारी अग्नि।	३८	६१ सात बहिनें।	,,
५१ अग्निके साथी अनेक देव।	४०	६२ सात ऋत्विज्।	,,
५२ " सात " संख्या का महत्त्व।	४१	६३ पांच और दो दोहनकर्ता।	४६
५३ सात हाथ।	,,	६४ तनूनपात् अग्नि।	,,
५४ सात जिह्वाएं।	४२	६५ अन्य बातों का उपदेश।	४७
५५ सात नदियां।	४२	६६ परम आत्माग्नि।	४८
५६ सप्त ऋषि और सप्त नद।	४३	६७ सारांश।	,,
५७ सात किरण।	४४	६८ अग्नि देवताके विचार करनेकी दिशा।	,,
५८ सप्त रत्न।	,,	६९ हृदयमें यज्ञ	५१

अग्निदेवताकी सूचियाँ।

१ पुनरुक्त-मन्त्रसूची	पृ० १८७-२१६
प्रथम-मण्डल	१८७-१९४
द्वितीय "	१९४-१९५
तृतीय "	१९५-१९८
चतुर्थ "	१९८-२००
पञ्चम "	२००-२०४
षष्ठ "	२०४-२०६
सप्तम "	२०६-२०८
अष्टम "	२०८-२१०
दशम "	२१०-२१६
२ उपमासूची	२१७-२२४
३ मंत्राणां अकारानुक्रमसूची	२२५-२३८
४ (विशेषण)गुणबोधकपदसूची	२३८-२७४

अग्निमन्त्राणां ऋषिसूची ।

(१) अग्निः ।

ऋषिः	मंत्रसंख्या	पृष्ठं
मधुच्छन्दा वैश्वामित्रः	१-९	१
मेधातिथिः काण्वः	१०-२६	”
शुनः शेप आजीगर्तिः, स कृत्रिमो वैश्वामित्रो देवरातः	२७-४९	२
हिरण्यस्तूप आङ्गिरसः	५०-६७	३
कण्वो घौरः	६८-८५	५
प्रस्कण्वः काण्वः	८६-१०९	६
नोधा गौतमः	११०-१२३	८
पराशरः शाक्त्यः	१२४-२१४	९
गोतमो राहूगणः	२१५-२५५	१४
कुत्स आङ्गिरसः	२५६-२७१	१६
परुच्छेपो दैवोदासिः	२७२-२९१	१८
दीर्घतमा औचथ्यः	२९२-३६०	२०
अगस्त्यो मैत्रावरुणः	३६१-३६८	२६
गृत्समदः शौनकः	३६९-४१५	२७
सोमाहुतिर्भार्गवः	४१६-४४६	३०
विश्वामित्रो गाथिनः	४४७-५७३	३२
ऋषभो वैश्वामित्रः	५७४-५८७	४१
उत्कीलः कात्यः	५८८-५९९	४२
कतो वैश्वामित्रः	६००-६०९	४३
गाथी कौशिकः	६१०-६२६	४४
देवश्रवा देववातश्च भारतौ	६२७-६३०	४६
वामदेवो गौतमः	६३१-७५४	”
बुधगविष्ठिरावात्रेयौ	७५५-७६६	५५
कुमार आत्रेयः, वृशो वा जानः उभौ वा	७६७-७७८	५६
वसुश्रुत आत्रेयः	७७९-८१०	५७
इष आत्रेयः	८११-८२७	६०
गय आत्रेयः	८२८-८४१	६१
सुतंभर आत्रेयः	८४२-८६५	६३
धरुण आङ्गिरसः	८६६-८७०	६४
पूरुरात्रेयः	८७१-८८०	६५
द्वितो मृक्तवाहा आत्रेयः	८८१-८८५	”
वव्रिरात्रेयः	८८६-८९०	६६
प्रयस्वन्त आत्रेयाः	८९१-८९४	”
सस आत्रेयः	८९५-८९८	६७
विश्वसामा आत्रेयः	८९९-९०२	”
द्युम्नो विश्वचर्षणिरात्रेयः	९०३-९०६	”
बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबंधुश्च क्रमेण गौपायना लौपायना वा	९०७-९१०	”
वसूयव आत्रेयाः	९११-९२७	”
त्र्यरुणस्त्रैवृष्णः, त्रसदस्युः पौरुकुत्सः, अश्वमेधश्च भारताः राजानः (अत्रिर्भौम इति केचित्)	९२८-९३२	६९
विश्ववारात्रेयी	९३३-९३८	”
भरद्वाजो बार्हस्पत्यः	९३९-१०८९	७०
शंयुर्बार्हस्पत्यः (तृणपाणिः)	१०९०-१०९९	८०
वसिष्ठो मैत्रावरुणिः	११००-१२१३	८१
वत्सः काण्वः	१२१४-२३	८९
सोभरिः काण्वः	१२२४-६९	९०
विश्वमना वैयश्वः	१२७०-९९	९३
नाभाकः काण्वः	१३००-१३०९	९४
विरूप आङ्गिरसः	१३१०-१३८८	९५
भर्गः प्रागाथः	१३८९-१४०८	९८
सुदीति-पुरुमीळ्हावाङ्गिरसौ, तयोर्वान्यतरः	१४०९-१४२३	१००
हर्यतः प्रागाथः	१४२४-४१	१०१
गोपवन आत्रेयः	१४४२-५३	१०२
उशना काव्यः	१४५४-६२	”

प्रयोगो भार्गवः, पावकोऽग्नि-बार्हस्पत्यो वा गृहपति-यविष्ठौ सहसः पुत्रावान्यतरो वा	१४६३-८४	१०३
त्रित आप्त्यः	१४८५-१५३३	,,
त्रिशिरास्त्वाष्ट्रः	१५३४-३९	१०८
हविर्धान आङ्गिः	१५४०-५६	,,
दमनो यामायनः	१५५७-७०	११०
विमद ऐन्द्रः, प्राजापत्यो वा, वसुकृद्वा वासुक्रः	१५७१-८८	१११
वत्सप्रिर्भालन्दनः	१५८९-१६१०	११२
देवाः	१६११-२४	११४
सुमित्रो वाध्र्यश्वः	१६२५-३६	११५
सौचीकोऽग्निः, वैश्वानरो वा, (सप्तिर्वाजंभरो वा)	१६३७-५०	११६
अरुणो वैतहव्यः	१६५१-६५	११७
उपस्तुतो वार्ष्टिहव्यः	१६६६-७४	११८
चित्रमहा वासिष्ठः	१६७५-८२	११९
अग्निः	१६८३	१२०
पावकोऽग्निः	१६८४-८९	,,
शार्ङ्गाः (जरिता, द्रोणः, सारिसृक्वः, स्तम्बमित्रः)	१६९०-९७	१२१
मृळीको वासिष्ठः	१६९८-१७०२	,,
केतुराग्नेयः	१७०३-७	१२२
सूनुरार्भवः	१७०८-१०	,,
वत्स आग्नेयः	१७११-१५	,,
संवनन आङ्गिरसः	१७१६	,,

(२) वैश्वानरोऽग्निः ।

नोधा गौतमः	१७१७-२३	१२३
कुत्स आङ्गिरसः	१७२४-२६	,,
विश्वामित्रो गाथिनः	१७२७-५७	१२४
वामदेवो गौतमः	१७५८-७२	१२६
भरद्वाजो बार्हस्पत्यः	१७७३-९३	१२७
वसिष्ठो मैत्रावरुणिः	१७९४-१८१२	१२९

(३) रक्षोहाऽग्निः ।

वामदेवो गौतमः	१८१३-२७	१३१
पायुर्भारद्वाजः	१८२८-५२	१३२
उरुक्षय आमहीयवः	१८५३-६१	१३४

(४) जातवेदा अग्निः ।

कश्यपो मारीचः	१८६२	,,
श्येन आग्नेयः	१८६३-६५	१३५
भृगुः	१८६६	,,

(५) घर्मोऽग्निः ।

कुत्स आङ्गिरसः	१८६७	,,

(६) औषसोऽग्निः ।

कुत्स आङ्गिरसः	१८६८-७८	,,

(७) द्रविणोदा अग्निः ।

कुत्स आङ्गिरसः	१८७९-८६	१३६

(८) शुचिरग्निः ।

कुत्स आङ्गिरसः	१८८७-९४	१३७

(९) अग्निरापो गावश्च ।

वामदेवो गौतमः	१८९५-१९०५	१३८

(१०) आप्री सूक्तानि ।

मेधातिथिः काण्वः	१९०६-१७	१३९
दीर्घतमा औचथ्यः	१९१८-३०	,,
अगस्त्यो मैत्रावरुणः	१९३१-४१	१४०
गृत्समदः शौनकः	१९४२-५२	,,
विश्वामित्रो गाथिनः	१९५३-६३	१४१
वसुश्रुत आत्रेयः	१९६४-७३	१४२
वसिष्ठो मैत्रावरुणिः	१९७४-८०	१४३
असितः काश्यपो देवलो वा	१९८१-९१	१४४
सुमित्रो वाध्र्यश्वः	१९९२-२००२	,,
जमदग्निर्भार्गवः, रामो वा जामदग्न्यः	२००३-१३	१४५
विवस्वानृषिः	२०१४-७१	१४६
ब्रह्मा	२०७२-८३	१५२
विवस्वानृषिः	२०८४-२११८	१५३

विवस्वानृषिः	२१२९-४१	१५७
अथर्वा	२१४२-२२१६	१५९
भृगुः	२२१७-७४	१६५
भृग्वङ्गिराः	२२७५-७८	१६९
अङ्गिराः	२२७९-८३	१७०
चातनः	२२८४-२३१८	"
शौनकः	२३१९-२९	१७२
मृगारः	२३३०-३६	१७३
गार्ग्यः	२३३७-३८	१७४
पतिवेदनः	२३३९-४०	"
गृत्समदो मेधातिथिर्वा	२३४१	"
शुक्रः	२३४२	"
ब्रह्मा	२३४३-५४	"
वसिष्ठः	२३५५-६४	१७५
बादरायणिः	२३६५-७१	१७६
अङ्गिराः प्रचेताः	२३७२	१७७
मरीचिः काश्यपः	२३७३	"
जातवेदाः	२३७४	"
कौशिकः	२३७५-८९	"
कबन्धः	२३९०-९६	१७८

अग्निसहचारी देवगणः।

(१) वैश्वानरोऽग्निः सूर्यश्च।

मूर्धन्वाङ्गिरसो, वामदेव्यो वा	२३९७-२४१५	१७९

(२) रक्षोहाऽग्निः।

रक्षोहा ब्राह्मः	२४१६-२१	१८१

(३) अपां-न-पादग्निः।

गृत्समदः शौनकः	२४२२-३६	"

(४) अग्नीन्द्रादयः।

वसिष्ठो मैत्रावरुणिः	२४३७	१८२

(५) अग्निर्मरुतश्च।

मेधातिथिः काण्वः	२४३८-४६	१८३
सोभरिः काण्वः	२४४७	"

(६) अग्निमित्रवरुणादयः।

हिरण्यस्तूप आङ्गिरसः	२४४८	"

(७) अग्निर्वरुणश्च।

वामदेवो गौतमः	२४४९-५२	"

(८) अग्नाविष्णू।

मेधातिथिः	२४५३-५४	१८४

(९) अग्निसूर्यौ।

पृषध्रः काण्वः	२४५५	"

(१०) अग्निः सूर्यो वायुश्च।

दीर्घतमा औचथ्यः	२४५६	"

(११) अग्निसूर्यानिलाः।

इरिम्बिठिः काण्वः	२४५७	"

(१२) [केशिनः=] अग्निसूर्यवायवः।

वातरशना मुनयः= (१-७ क्रमेण जूतिः, वातजूतिः, विप्रजूतिः, वृषाणकः, करिक्रतः, एतशः, ऋष्यशृङ्गः)	२४५८-६४	१८५

(१३) अग्नीषोमौ।

गोतमो राहूगणः	२४६५-७६	"
ब्रह्मा	२४७७-७९	१८६
अथर्वा (यशस्कामः)	२४८०	"
शन्तातिः	२४८१	"
भार्गवः	२४८२-८३	"

ॐ

दैवत-संहिता

(ऋग्यजुःसामाथर्वणां संहितानां सर्वान् मंत्रान् दैवतानुसारेण संगृह्य निर्मिता)

१ अग्निदेवता ।

॥ १ ॥ (ऋग्वेदस्य मण्डलं १, सूक्तं १, मंत्राः १-९) [१ - ९] मधुच्छन्दा वैश्वामित्रः । गायत्री (८×३) ।

॥ॐ॥ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् १
अग्निः पूर्वेभिर्ऋषिभिर् ईड्यो नूतनैरुत । स देवाँ एह वक्षति २
अग्निना रयिमश्नवत् पोषमेव दिवेदिवे । यशसं वीरवत्तमम् ३
अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स इद् देवेषु गच्छति ४
अग्निर्होता कविक्रतुस् सत्यश्चित्रश्रवस्तमः । देवो देवेभिरा गमत् ५
यदङ्ग दाशुषे त्वम् अग्ने भद्रं करिष्यसि । तवेत् तत् सत्यमङ्गिरः ६
उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ७
राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानं स्वे दमे ८
स नः पितेव सूनवे ऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ९

॥ २ ॥ (ऋ० १ । १२ । १-१२) [१० - २६] मेधातिथिः काण्वः ।

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् १०
अग्निमग्निं हवीमभिस् सदा हवन्त विश्पतिम् । हव्यवाहं पुरुप्रियम् ११
अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे । असि होता न ईड्यः १२
ताँ उशतो वि बोधय यदग्ने यासि दूत्यम् । देवैरा सत्सि बर्हिषि १३

घृताहवन दीदिवः प्रति ष्म रिषतो दह । अग्ने त्वं रक्षस्विनः १४
अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड् जुह्वास्यः १५
कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे । देवममीवचातनम् १६
यस्त्वामग्ने हविष्पतिर् दूतं देव सपर्यति । तस्य स्म प्राविता भव १७
यो अग्निं देववीतये हविष्माँ आविवासति । तस्मै पावक मृळय १८
स नः पावक दीदिवो ऽग्ने देवाँ इहा वह । उप यज्ञं हविश्च नः १९
स नः स्तवान आ भर गायत्रेण नवीयसा । रयिं वीरवतीमिषम् २०
अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः । इमं स्तोमं जुषस्व नः २१

॥ ३ ॥ (ऋ० १ । १५ । ४, १२)

अग्ने देवाँ इहा वह सादया योनिषु त्रिषु । परि भूष पिब ऋतुना २२
गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि । देवान् देवयते यज २३

॥ ४ ॥ (ऋ० १ । २२ । ९-१०)

अग्ने पत्नीरिहा वह देवानामुशतीरुप । त्वष्टारं सोमपीतये २४
आ ग्ना अग्न इहावसे होत्रां यविष्ठ भारतीम् । वरूत्रीं धिषणां वह २५

॥ ५ ॥ (ऋ० १ । २३ । २४) अनुष्टुप् (८×४) ।

सं माग्ने वर्चसा सृज सं प्रजया समायुषा ।
विद्युर्मे अस्य देवा इन्द्रो विद्यात् सह ऋषिभिः २६

॥ ६ ॥ (ऋ० १ । २४ । २)

[२७-४९] शुनःशेप आजीगर्तिः स कृत्रिमो वैश्वामित्रो देवरातः । त्रिष्टुप् (११×४) ।

अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम ।
स नो मह्या अदितये पुनर्दात् पितरं च दृशेयं मातरं च २७

॥ ७ ॥ (ऋ० १ । २६ । १-१०) गायत्री (८×३) ।

वसिष्वा हि मियेध्य वस्त्राण्यूर्जां पते । सेमं नो अध्वरं यज २८
नि नो होता वरेण्यस् सदा यविष्ठ मन्मभिः । अग्ने दिवित्मता वचः २९
आ हि ष्मा सूनवे पिता ऽऽपिर्यजत्यापये । सखा सख्ये वरेण्यः ३०

आ नो बर्ही रिशादसो वरुणो मित्रो अर्यमा । सीदन्तु मनुषो यथा ३१
पूर्व्य होतरस्य नो मन्दस्व सख्यस्य च । इमा उ षु श्रुधी गिरः ३२
यच्चिद्धि शश्वता तना देवंदेवं यजामहे । त्वे इद्धूयते हविः ३३
प्रियो नो अस्तु विश्पतिर् होता मन्द्रो वरेण्यः । प्रियाः स्वग्नयो वयम् ३४
स्वग्नयो हि वार्यं देवासो दधिरे च नः । स्वग्नयो मनामहे ३५
अथा न उभयेषाम् अमृत मर्त्यानाम् । मिथः सन्तु प्रशस्तयः ३६
विश्वेभिरग्ने अग्निभिर् इमं यज्ञमिदं वचः । चनो धाः सहसो यहो ३७

॥ ८ ॥ (ऋ० १ । २७ । १-१२) ।

अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः । सम्राजन्तमध्वराणाम् ३८
स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः । मीढ्वाँ अस्माकं बभूयात् ३९
स नो दूराच्चासाच्च नि मर्त्यादघायोः । पाहि सदमिद् विश्वायुः ४०
इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसम् । अग्ने देवेषु प्र वोचः ४१
आ नो भज परमेष्वा वाजेषु मध्यमेषु । शिक्षा वस्वो अन्तमस्य ४२
विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ । सद्यो दाशुषे क्षरसि ४३
यमग्ने पृत्सु मर्त्यम् अवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः ४४
नकिरस्य सहन्त्य पर्येता कयस्य चित् । वाजो अस्ति श्रवाय्यः ४५
स वाजं विश्वचर्षणिर् अर्वद्भिरस्तु तरुता । विप्रेभिरस्तु सनिता ४६
जराबोध तद् विविड्ढि विशेविशे यज्ञियाय । स्तोमं रुद्राय दृशीकम् ४७
स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः । धिये वाजाय हिन्वतु ४८
स रेवाँ इव विश्पतिर् दैव्यः केतुः शृणोतु नः । उक्थैरग्निर्बृहद्भानुः ४९

॥ ९ ॥ (ऋ० १ । ३१ । १-१८) [५० – ६७] हिरण्यस्तूप आङ्गिरसः ।
जगती (१२×४); ५७, ६५, ६७ त्रिष्टुप् (११×४) ।

त्वमग्ने प्रथमो अङ्गिरा ऋषिर् देवो देवानामभवः शिवः सखा ।
तव व्रते कवयो विद्मनापसो ऽजायन्त मरुतो भ्राजदृष्टयः ५०

त्वमग्ने प्रथमो अङ्गिरस्तमः कविर्देवानां परि भूषसि व्रतम् ।
विभुर्विश्वस्मै भुवनाय मेधिरो द्विमाता शयुः कतिधा चिदायवे ५१

त्वम॑ग्ने प्रथ॒मो मा॑त॒रिश्व॑न आ॒विर्भ॑व सुक्रतू॒या वि॒वस्व॑ते ।
अरे॑जेतां॒ रोद॑सी होतृ॒वूर्ये ऽस॑घ्नोर्भा॒रमय॑जो म॒हो व॑सो ५२

त्वम॑ग्ने मन॑वे॒ द्याम॑वाशयः पु॒रूरव॑से सु॒कृते॑ सु॒कृत्त॑रः ।
श्वा॒त्रेण॒ यत् पि॒त्रोर्मुच्य॑से॒ पर्या ऽऽ त्वा॒ पूर्व॑मनय॒न्नाप॑रं॒ पुनः॑ ५३

त्वम॑ग्ने वृ॒ष॒भः पु॑ष्टि॒वर्ध॑न॒ उद्य॑तस्रुचे भवसि श्र॒वाय्यः॑ ।
य आहु॑तिं॒ परि॒ वेदा॒ वष॑ट्कृति॒म् एका॑युर॒ग्रे॒ विश॑ आ॒विवा॑ससि ५४

त्वम॑ग्ने वृ॒जि॒नव॑र्तनिं॒ नरं॒ सक्म॑न् पिपर्षि वि॒दथे॑ विचर्षणे ।
यः शूर॑साता॒ परि॑तक्म्ये॒ धने॑ द॒भ्रेभि॑श्चि॒त् समृ॑ता॒ हंसि॒ भूय॑सः ५५

त्वं तम॑ग्ने अमृत॒त्व उ॑त्त॒मे मर्तं॑ दधासि॒ श्रव॑से दि॒वेदि॑वे ।
यस्ता॑तृषा॒ण उ॒भया॑य॒ जन्म॑ने॒ मयः॑ कृ॒णोषि॒ प्रय॒ आ च॑ सू॒रये॑ ५६

त्वं नो॑ अग्ने स॒नये॒ धना॑नां य॒शसं॑ का॒रुं कृ॑णुहि॒ स्तवा॑नः ।
ऋ॒ध्याम॒ कर्मा॒पसा॒ नवे॑न दे॒वैर्द्या॑वापृथि॒वी प्राव॑तं नः ५७

त्वं नो॑ अग्ने पि॒त्रोरु॒पस्थ॒ आ दे॒वो दे॒वेष्व॑नवद्य॒ जागृ॑विः ।
त॒नू॒कृद् बो॑धि॒ प्रम॑तिश्च का॒रवे॒ त्वं क॑ल्याण॒ वसु॒ विश्व॒मोपि॑षे ५८

त्वम॑ग्ने प्रम॑ति॒स्त्वं पि॒तासि॑ न॒स् त्वं व॑य॒स्कृत् तव॑ जा॒मयो॑ व॒यम् ।
सं त्वा॒ रायः॑ श॒तिनः॒ सं स॑ह॒स्रिणः॑ सु॒वीरं॑ यन्ति व्रत॒पाम॑दाभ्य ५९

त्वाम॑ग्ने प्रथ॒मम॒ायुम॒ायवे॑ दे॒वा अ॑कृण्व॒न् नहु॑षस्य वि॒श्पति॑म् ।
इळा॑मकृण्व॒न् मनु॑षस्य॒ शास॑नीं पि॒तुर्यत् पु॒त्रो मम॑कस्य॒ जाय॑ते ६०

त्वं नो॑ अग्ने॒ तव॑ देव पा॒युभि॑र् म॒घोनो॑ रक्ष त॒न्व॑श्च वन्द्य ।
त्रा॒ता तो॒कस्य॒ तन॑ये॒ गवा॑म॒सि अनि॑मेषं॒ रक्ष॑माण॒स्तव॑ व्र॒ते ६१

त्वम॑ग्ने॒ यज्य॑वे पा॒युरन्त॑रो ऽनिषङ्गाय॑ चतुर॒क्ष इ॑ध्यसे ।
यो रा॒तह॑व्यो ऽवृ॒काय॒ धाय॑से की॒रेश्चि॒न् मन्त्रं॒ मन॑सा व॒नोषि॒ तम् ६२

त्वम॑ग्न उरु॒शंसा॑य वा॒घते॑ स्पा॒र्हं यद् रेक्णः॑ पर॒मं व॒नोषि॒ तत् ।
आ॒ध्रस्य॑ चि॒त् प्रम॑तिरुच्यसे पि॒ता प्र पाकं॒ शास्सि॒ प्र दिशो॑ वि॒दुष्ट॑रः ६३

त्वम॑ग्ने॒ प्रय॑तदक्षिणं॒ नरं॒ वर्मे॑व स्यू॒तं परि॑ पासि वि॒श्वतः॑ ।
स्वा॒दु॒क्ष॒द्मा यो व॑स॒तौ स्यो॑न॒कृज् जी॑वया॒जं यज॑ते॒ सोप॒मा दि॒वः ६४

इमाम॑ग्ने श॒रणिं॑ मीमृषो न इ॒मम॒ध्वानं॒ यमगा॑म दू॒रात् ।
आ॒पिः पि॒ता प्रम॑तिः सो॒म्यानां॒ भृमि॑रस्यृषि॒कृन् मर्त्या॑नाम् ६५

म॒नु॒ष्वद॑ग्ने अङ्गि॒रस्वद॑ङ्गिरो ययाति॒वत् सद॑ने पूर्व॒वच्छु॑चे ।
अच्छ॑ या॒ह्या व॑हा॒ दैव्यं॒ जन॒म् आ सा॑दय ब॒र्हिषि॑ यक्षि॑ च प्रि॒यम् ६६

ए॒तेना॑ग्ने॒ ब्रह्म॑णा वावृधस्व॒ शक्ती॑ वा॒ यत्ते॑ चकृ॒मा वि॒दा वा॑ ।
उ॒त प्र णे॑ष्य॒भि वस्यो॑ अ॒स्मान्त् सं नः॑ सृज सुम॒त्या वाज॑वत्या ६७

॥ १० ॥ (ऋ० १।३६।१-१२, ५-२०)

[६८-८५] कण्वो घौरः। प्रगाथः = बृहती (८।८।१२।८) + सतो बृहती (१२।८।१२।८)।

प्र वो॑ य॒ह्वं पु॑रू॒णां॑ वि॒शां॑ दे॑वय॒तीना॑म् ।
अ॒ग्निं सू॒क्तेभि॒र्वचो॑भिरीमहे॒ यं सी॒मिद॒न्य ईळ॑ते ६८

जना॑सो अ॒ग्निं द॑धिरे सहो॒वृधं॑ ह॒विष्म॑न्तो विधेम ते ।
स त्वं नो॑ अ॒द्य सु॒मना॑ इ॒हावि॒ता भवा॒ वाजे॑षु सन्त्य ६९

प्र त्वा॑ दू॒तं वृ॑णीमहे॒ होता॑रं वि॒श्ववे॑दसं ।
म॒हस्ते॑ स॒तो वि च॑रन्त्य॒र्चयो॑ दि॒वि स्पृ॑शन्ति भा॒नवः॑ ७०

दे॒वास॑स्त्वा॒ वरु॑णो मि॒त्रो अ॑र्य॒मा सं दू॒तं प्र॒त्नमि॑न्धते ।
विश्वं॒ सो अ॑ग्ने जयति॒ त्वया॒ धनं॒ यस्ते॑ द॒दाश॒ मर्त्यः॑ ७१

म॒न्द्रो होता॑ गृ॒हप॑तिर् अग्ने॑ दू॒तो वि॒शाम॑सि ।
त्वे विश्वा॒ संग॑तानि व्र॒ता ध्रु॒वा यानि॑ दे॒वा अकृ॑ण्वत ७२

त्वे इद॑ग्ने सु॒भगे॑ यविष्ठ्य॒ विश्व॒मा हू॑यते ह॒विः ।
स त्वं नो॑ अ॒द्य सु॒मना॑ उ॒ताऽप॒रं यक्षि॑ दे॒वान्त्सु॒वीर्या॑ ७३

तं घे॑मि॒त्था न॑म॒स्विन॒ उप॑ स्व॒राज॑मासते ।
होत्रा॑भिर॒ग्निं मनु॑षः॒ समि॑न्धते तिति॒र्वांसो॒ अति॒ स्रिधः॑ ७४

घ्नन्तो॑ वृ॒त्रम॑तर॒न् रोद॑सी अ॒प उ॒रु क्षया॑य चक्रिरे ।
भुव॑त् कण्वे॒ वृषा॑ द्यु॒म्न्याहु॑तः क्रन्द॒दश्वो॒ गवि॑ष्टिषु ७५

सं सी॑दस्व म॒हाँ अ॑सि॒ शोच॑स्व देव॒वीत॑मः ।
वि धू॒मम॑ग्ने अरु॒षं मि॑येध्य सृ॒ज प्र॑शस्त दर्श॒तम् ७६

यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन ।
यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ७७

यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि ।
तस्य प्रेषो दीदियुस्तमिमा ऋचस् तमग्निं वर्धयामसि ७८

रायस्पूर्धि स्वधावोऽस्ति हि ते ऽग्ने देवेष्वाप्यम् ।
त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ महाँ असि ७९

पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः ।
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य ८०

घनेव विष्वग् वि जह्यराव्णस् तपुर्जम्भ यो अस्मध्रुक् ।
यो मर्त्यः शिशीते अत्यक्तुभिर् मा नः स रिपुरीशत ८१

अग्निर्वव्ने सुवीर्यम् अग्निः कण्वाय सौभगम् ।
अग्निः प्रावन् मित्रोत मेध्यातिथिम् अग्निः साता उपस्तुतम् ८२

अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे ।
अग्निर्नयन् नववास्त्वं बृहद्रथं तुर्वीतिं दस्यवे सहः ८३

नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ८४

त्वेषासो अग्नेरमवन्तो अर्चयो भीमासो न प्रतीतये ।
रक्षस्विनः सदमिद्यातुमावतो विश्वं समत्रिणं दह ८५

॥ ११ ॥ (ऋ० १ । ४४ । १-१४)

[८६ - १०९] प्रस्कण्वः काण्वः । प्रगाथः = बृहती (८।८।१२।८) + सतो बृहती (१२।८।१२।८) ।

अग्ने विवस्वदुषसश् चित्रं राधो अमर्त्य ।
आ दाशुषे जातवेदो वहा त्वम् अद्या देवाँ उषर्बुधः ८६

जुष्टो हि दूतो असि हव्यवाहनो ऽग्ने रथीरध्वराणाम् ।
सजूरश्विभ्यामुषसा सुवीर्यम् अस्मे धेहि श्रवो बृहत् ८७

अद्या दूतं वृणीमहे वसुमग्निं पुरुप्रियम् ।
धूमकेतुं भाऋजीकं व्युष्टिषु यज्ञानामध्वरश्रियम् ८८

श्रेष्ठं यविष्ठमतिथिं स्वाहुतं जुष्टं जनाय दाशुषे ।
देवाँ अच्छा यातवे जातवेदसम् अग्निमीळे व्युष्टिषु ८९

स्तविष्यामि त्वामहं विश्वस्यामृत भोजन ।
अग्ने त्रातारममृतं मियेध्य यजिष्ठं हव्यवाहन ९०
सुशंसो बोधि गृणते यविष्ठ्य मधुजिह्वः स्वाहुतः ।
प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम् ९१

होतारं विश्ववेदसं सं हि त्वा विश इन्धते ।
स आ वह पुरुहूत प्रचेतसो ऽग्ने देवाँ इह द्रवत् ९२
सवितारमुषसमश्विना भगम् अग्निं व्युष्टिषु क्षपः ।
कण्वासस्त्वा सुतसोमास इन्धते हव्यवाहं स्वध्वर ९३

पतिर्ह्यध्वराणाम् अग्ने दूतो विशामसि ।
उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः ९४
अग्ने पूर्वा अनूषसो विभावसो दीदेथ विश्वदर्शतः ।
असि ग्रामेष्वविता पुरोहितो ऽसि यज्ञेषु मानुषः ९५

नि त्वा यज्ञस्य साधनम् अग्ने होतारमृत्विजम् ।
मनुष्वद् देव धीमहि प्रचेतसं जीरं दूतममर्त्यम् ९६
यद् देवानां मित्रमहः पुरोहितो ऽन्तरो यासि दूत्यम् ।
सिन्धोरिव प्रस्वनितास ऊर्मयो ऽग्नेर्भ्राजन्ते अर्चयः ९७

श्रुधि श्रुत्कर्ण वह्निभिर् देवैरग्ने सयावभिः ।
आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् ९८
शृण्वन्तु स्तोमं मरुतः सुदानवो ऽग्निजिह्वा ऋतावृधः ।
पिबन्तु सोमं वरुणो धृतव्रतो ऽश्विभ्यामुषसा सजूः ९९

॥ १२ ॥ (ऋ० १ । ४५ । १-१०) अनुष्टुप् (८×४) ।

त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत । यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् १००
श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः। तान् रोहिदश्व गिर्वणस् त्रयस्त्रिंशतमा वह १०१
प्रियमेधवदत्रिवज् जातवेदो विरूपवत् । अङ्गिरस्वन् महिव्रत प्रस्कण्वस्य श्रुधी हवम् १०२

महिकेरव ऊतये प्रियमेधा अहूषत । राजन्तमध्वराणाम् अग्निं शुक्रेण शोचिषा १०३
घृताहवन सन्त्य इमा उ षु श्रुधी गिरः । याभिः कण्वस्य सूनवो हवन्तेऽवसे त्वा १०४
त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः । शोचिष्केशं पुरुप्रिय अग्ने हव्याय वोळ्हवे १०५
नि त्वा होतारमृत्विजं दधिरे वसुवित्तमम् । श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु १०६
आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः। बृहद् भा बिभ्रतो हविर् अग्ने मर्ताय दाशुषे १०७
प्रातर्याव्णः सहस्कृत सोमपेयाय सन्त्य । इहाद्य दैव्यं जनं बर्हिरा सादया वसो १०८
अर्वाञ्चं दैव्यं जनम् अग्ने यक्ष्व सहूतिभिः । अयं सोमः सुदानवस् तं पात तिरोअह्न्यम् १०९

॥१३॥ (ऋ० १।५८।१-९) [११०-१२३] नोधा गौतमः। जगती, (१२×४) ११५-१२३ त्रिष्टुप् (११×४)।

नू चित् सहोजा अमृतो नि तुन्दते होता यद् दूतो अभवद् विवस्वतः ।
वि साधिष्ठेभिः पथिभी रजो मम आ देवताता हविषा विवासति ११०

आ स्वमद्म युवमानो अजरस् तृष्वविष्यन्नतसेषु तिष्ठति ।
अत्यो न पृष्ठं प्रुषितस्य रोचते दिवो न सानु स्तनयन्नचिक्रदत् १११

क्राणा रुद्रेभिर्वसुभिः पुरोहितो होता निषत्तो रयिषाळमर्त्यः ।
रथो न विक्ष्वृञ्जसान आयुषु व्यानुषग् वार्या देव ऋण्वति ११२

वि वातजूतो अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविष्वणिः ।
तृषु यदग्ने वनिनो वृषायसे कृष्णं त एम रुशदूर्मे अजर ११३

तपुर्जम्भो वन आ वातचोदितो यूथे न साह्वाँ अव वाति वंसगः ।
अभिव्रजन्नक्षितं पाजसा रजः स्थातुश्चरथं भयते पतत्रिणः ११४

दधुष्ट्वा भृगवो मानुषेष्वा रयिं न चारुं सुहवं जनेभ्यः ।
होतारमग्ने अतिथिं वरेण्यं मित्रं न शेवं दिव्याय जन्मने ११५

होतारं सप्त जुह्वो३ यजिष्ठं यं वाघतो वृणते अध्वरेषु ।
अग्निं विश्वेषामरतिं वसूनां सपर्यामि प्रयसा यामि रत्नम् ११६

अच्छिद्रा सूनो सहसो नो अद्य स्तोतृभ्यो मित्रमहः शर्म यच्छ ।
अग्ने गृणन्तमंहस उरुष्य ऊर्जो नपात् पूर्भिरायसीभिः ११७

भवा वरूथं गृणते विभावो भवा मघवन् मघवद्भ्यः शर्म ।
उरुष्याग्ने अंहसो गृणन्तं प्रातर्मक्षू धियावसुर्जगम्यात् ११८

॥ १४ ॥ (ऋ० १ । ६० । १-५)

[११९—१२३] नोधा गौतमः । त्रिष्टुप् ।

वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थम् ।
द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद् भृगवे मातरिश्वा ११९

अस्य शासुरुभयासः सचन्ते हविष्मन्त उशिजो ये च मर्ताः ।
दिवश्चित् पूर्वो न्यसादि होता ऽऽपृच्छ्यो विश्पतिर्विक्षु वेधाः १२०

तं नव्यसी हृद आ जायमानम् अस्मत् सुकीर्तिर्मधुजिह्वमश्याः ।
यमृत्विजो वृजने मानुषासः प्रयस्वन्त आयवो जीजनन्त १२१

उशिक् पावको वसुर्मानुषेषु वरेण्यो होताधायि विक्षु ।
दमूना गृहपतिर्दम आँ अग्निर्भुवद् रयिपती रयीणाम् १२२

तं त्वा वयं पतिमग्ने रयीणां प्र शंसामो मतिभिर्गोतमासः ।
आशुं न वाजंभरं मर्जयन्तः प्रातर्मक्षू धियावसुर्जगम्यात् १२३

॥ १५ ॥ (ऋ० १ । ६५ । १-१०)

[१२४-२१४] पराशरः शाक्त्यः । द्विपदा विराट् ।

पश्वा न तायुं, गुहा चतन्तं नमो युजानं, नमो वहन्तम् १२४
सजोषा धीराः, पदैरनु ग्मन्न् उप त्वा सीदन्, विश्वे यजत्राः १२५
ऋतस्य देवा, अनु व्रता गुर् भुवत् परिष्टिर्,द्यौर्न भूम १२६
वर्धन्तीमापः, पन्वा सुशिश्विम् ऋतस्य योना, गर्भे सुजातम् १२७
पुष्टिर्न रण्वा, क्षितिर्न पृथ्वी गिरिर्न भुज्म, क्षोदो न शंभु १२८
अत्यो नाज्मन्,त्सर्गप्रतक्तः सिन्धुर्न क्षोदः, क ईं वराते १२९
जामिः सिन्धूनां, भ्रातेव स्वस्राम् इभ्यान् न राजा, वनान्यत्ति १३०
यद्वातजूतो, वना व्यस्थाद् अग्निर्ह दाति, रोमा पृथिव्याः १३१
श्वसित्यप्सु, हंसो न सीदन् क्रत्वा चेतिष्ठो, विशामुषर्भुत् १३२
सोमो न वेधा, ऋतप्रजातः पशुर्न शिश्वा, विभुर्दूरेभाः १३३

॥ १६ ॥ (ऋ० १।६६।१-१०)

रयिर्न चित्रा, सूरो न संदृग् आयुर्न प्राणो, नित्यो न सूनुः १३४
तक्वा न भूर्णिर्,वना सिषक्ति पयो न धेनुः, शुचिर्विभावा १३५

दाधार क्षेमम्,ओको न रण्वो यवो न पक्वो, जेता जनानाम् १३६
ऋषिर्न स्तुभ्वा, विक्षु प्रशस्तो वाजी न प्रीतो, वयो दधाति १३७
दुरोकशोचिः, क्रतुर्न नित्यो जायेव योनाव्,अरं विश्वस्मै १३८
चित्रो यदभ्राट्,छ्वेतो न विक्षु रथो न रुक्मी, त्वेषः समत्सु १३९
सेनेव सृष्टा,ऽमं दधाति अस्तुर्न दिद्युत्, त्वेषप्रतीका १४०
यमो ह जातो, यमो जनित्वं जारः कनीनां, पतिर्जनीनाम् १४१
तं वश्चराथा, वयं वसत्यास् तं न गावो, नक्षन्त इद्धम् १४२
सिन्धुर्न क्षोदः, प्र नीचीरैनोन् नवन्त गावः, स्व१र्दृशीके १४३

॥ १७ ॥ (ऋ० १ । ६७ । १-१०)

वनेषु जायुर्,मर्तेषु मित्रो वृणीते श्रुष्टिं, राजेवाजुर्यम् १४४
क्षेमो न साधुः, क्रतुर्न भद्रो भुवत् स्वाधीर्,होता हव्यवाट् १४५
हस्ते दधानो, नृम्णा विश्वानि अमे देवान् धाद्, गुहा निषीदन् १४६
विदन्तीमत्र, नरो धियंधा हृदा यत् तष्टान्, मन्त्राँ अशंसन् १४७
अजो न क्षां, दाधार पृथिवीं तस्तम्भ द्यां, मन्त्रेभिः सत्यैः १४८
प्रिया पदानि, पश्वो नि पाहि विश्वायुरग्ने, गुहा गुहं गाः १४९
य ईं चिकेत, गुहा भवन्तम् आ यः ससाद, धारामृतस्य १५०
वि ये चृतन्ति,ऋता सपन्त आदिद् वसूनि, प्र ववाचास्मै १५१
वि यो वीरुत्सु, रोधन् महित्वा उत प्रजा, उत प्रसूष्वन्तः १५२
चित्तिरपां, दमे विश्वायुः सद्मेव धीराः, संमाय चक्रुः १५३

॥ १८ ॥ (ऋ० १ । ६८ । १—१०)

श्रीणन्नुप स्थाद्, दिवं भुरण्युः स्थातुश्चरथम्,अक्तून् व्यूर्णोत् १५४
परि यदेषाम्,एको विश्वेषां भुवद् देवो, देवानां महित्वा १५५
आदित् ते विश्वे, क्रतुं जुषन्त शुष्काद्यद् देव, जीवो जनिष्ठाः १५६
भजन्त विश्वे, देवत्वं नाम ऋतं सपन्तो, अमृतमेवैः १५७
ऋतस्य प्रेषा, ऋतस्य धीतिर् विश्वायुर्विश्वे, अपांसि चक्रुः १५८
यस्तुभ्यं दाशाद्, यो वा ते शिक्षात् तस्मै चिकित्वान्, रयिं दयस्व १५९
होता निषत्तो, मनोरपत्ये स चिन् न्वासां, पती रयीणाम् १६०

इच्छन्त रेतो, मिथस्तनूषु सं जानत स्वैर्, दक्षैरमूराः १६१
पितुर्न पुत्राः, क्रतुं जुषन्त श्रोषन् ये अस्य, शासं तुरासः १६२
वि राय और्णोद्, दुरः पुरुक्षुः पिपेश नाकं, स्तृभिर्दमूनाः १६३

॥ १९ ॥ (ऋ० १ । ६९ । १-१०)

शुक्रः शुशुक्वाँ, उषो न जारः पप्रा समीची, दिवो न ज्योतिः १६४
परि प्रजातः, क्रत्वा बभूथ भुवो देवानां, पिता पुत्रः सन् १६५
वेधा अदृप्तो, अग्निर्विजानन्न् ऊधर्न गोनां, स्वाद्मा पितूनाम् १६६
जने न शेव, आहूर्यः सन् मध्ये निषत्तो, रण्वो दुरोणे १६७
पुत्रो न जातो, रण्वो दुरोणे वाजी न प्रीतो, विशो वि तारीत् १६८
विशो यदह्वे, नृभिः सनीळा अग्निर्देवत्वा, विश्वान्यश्याः १६९
नकिष्ट एता, व्रता मिनन्ति नृभ्यो यदेभ्यः, श्रुष्टिं चकर्थ १७०
तत् तु ते दंसो, यदहन्त्समानैर् नृभिर्यद् युक्तो, विवे रपांसि १७१
उषो न जारो, विभावोस्रः संज्ञातरूपश्, चिकेतदस्मै १७२
त्मना वहन्तो, दुरो व्यृण्वन् नवन्त विश्वे, स्वर्दृशीके १७३

॥ २० ॥ (ऋ० १ । ७० । १-११)

वनेम पूर्वीर्, अर्यो मनीषा अग्निः सुशोको, विश्वान्यश्याः १७४
आ दैव्यानि, व्रता चिकित्वान् आ मानुषस्य, जनस्य जन्म १७५
गर्भो यो अपां, गर्भो वनानां गर्भश्च स्थातां, गर्भश्चरथाम् १७६
अद्रौ चिदस्मा, अन्तर्दुरोणे विशां न विश्वो, अमृतः स्वाधीः १७७
स हि क्षपावाँ, अग्नी रयीणां दाशद् यो अस्मा, अरं सूक्तैः १७८
एता चिकित्वो, भूमा नि पाहि देवानां जन्म, मर्तांश्च विद्वान् १७९
वर्धान्यं पूर्वीः, क्षपो विरूपाः स्थातुश्च रथम्, ऋतप्रवीतम् १८०
अराधि होता, स्वर्निषत्तः कृण्वन् विश्वानि, अपांसि सत्या १८१
गोषु प्रशस्तिं, वनेषु धिषे भरन्त विश्वे, बलिं स्वर्णः १८२
वि त्वा नरः, पुरुत्रा सपर्यन् पितुर्न जिव्रेर्, वि वेदो भरन्त १८३
साधुर्न गृध्नुर्, अस्तेव शूरो यातेव भीमस्, त्वेषः समत्सु १८४

॥ २१ (ऋ० १ । ७१ । १—१०) । त्रिष्टुप् ।

उप प्र जिन्वन्नुशतीरुशन्तं पतिं न नित्यं जनयः सनीळाः ।
स्वसारः श्यावीमरुषीमजुष्रन् चित्रमुच्छन्तीमुषसं न गावः १८५

वीळु चिद् दृळ्हा पितरो न उक्थैर् अद्रिं रुजन्नङ्गिरसो रवेण ।
चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः १८६

दधन्नृतं धनयन्नस्य धीतिम् आदिदर्यो दिधिष्वो३ विभृत्राः ।
अतृष्यन्तीरपसो यन्त्यच्छा देवाञ् जन्म प्रयसा वर्धयन्तीः १८७

मथीद् यदीं विभृतो मातरिश्वा गृहेगृहे श्येतो जेन्यो भूत् ।
आदीं राज्ञे न सहीयसे सचा सन्ना दूत्यं१ भृगवाणो विवाय १८८

महे यत् पित्र ईं रसं दिवे कर् अव त्सरत् पृशन्यश्चिकित्वान् ।
सृजदस्ता धृषता दिद्युमस्मै स्वायां देवो दुहितरि त्विषिं धात् १८९

स्व आ यस्तुभ्यं दम आ विभाति नमो वा दाशादुशतो अनु द्यून् ।
वर्धो अग्ने वयो अस्य द्विबर्हा यासद् राया सरथं यं जुनासि १९०

अग्निं विश्वा अभि पृक्षः सचन्ते समुद्रं न स्रवतः सप्त यह्वीः ।
न जामिभिर्वि चिकिते वयो नो विदा देवेषु प्रमतिं चिकित्वान् १९१

आ यदिषे नृपतिं तेज आनट् शुचि रेतो निषिक्तं द्यौरभीके ।
अग्निः शर्धमनवद्यं युवानं स्वाध्यं जनयत् सूदयच्च १९२

मनो न योऽध्वनः सद्य एति एकः सत्रा सूरो वस्व ईशे ।
राजाना मित्रावरुणा सुपाणी गोषु प्रियममृतं रक्षमाणा १९३

मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा अभि विदुष्कविः सन् ।
नभो न रूपं जरिमा मिनाति पुरा तस्या अभिशस्तेरधीहि १९४

॥ २२ ॥ (ऋ० १ । ७२ । १-१०)

नि काव्या वेधसः शश्वतस्कर् हस्ते दधानो नर्या पुरूणि ।
अग्निर्भुवद् रयिपती रयीणां सत्रा चक्राणो अमृतानि विश्वा १९५

अस्मे वत्सं परि षन्तं न विन्दन् इच्छन्तो विश्वे अमृता अमूराः ।
श्रमयुवः पदव्यो धियंधास् तस्थुः पदे परमे चार्वग्नेः १९६

तिस्रो यदग्ने शरदस्त्वामिच् छुचिं घृतेन शुचयः सपर्यान्।
नामानि चिद् दधिरे यज्ञियानि असूदयन्त तन्वः सुजाताः १९७

आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः।
विदन् मर्तो नेमधिता चिकित्वान् अग्निं पदे परमे तस्थिवांसम् १९८

संजानाना उप सीदन्नभिज्ञु पत्नीवन्तो नमस्यं नमस्यन्।
रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि रक्षमाणाः १९९

त्रिः सप्त यद् गुह्यानि त्वे इत् पदाविदन् निहिता यज्ञियासः।
तेभी रक्षन्ते अमृतं सजोषाः पशूञ्च स्थातॄञ्चरथं च पाहि २००

विद्वाँ अग्ने वयुनानि क्षितीनां व्यानुषक्छुरुधो जीवसे धाः।
अन्तर्विद्वाँ अध्वनो देवयानान् अतन्द्रो दूतो अभवो हविर्वाट् २०१

स्वाध्यो दिव आ सप्त यह्वी रायो दुरो व्यृतज्ञा अजानन्।
विदद् गव्यं सरमा दृळ्हमूर्वं येना नु कं मानुषी भोजते विट् २०२

आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृतत्वाय गातुम्।
मह्ना महद्भिः पृथिवी वि तस्थे माता पुत्रैरदितिर्धायसे वेः २०३

अधि श्रियं नि दधुश्चारुमस्मिन् दिवो यदक्षी अमृता अकृण्वन्।
अध क्षरन्ति सिन्धवो न सृष्टाः प्र नीचीरग्ने अरुषीरजानन् २०४

॥२३॥ (ऋ० १।७३।१-१०)

रयिर्न यः पितृवित्तो वयोधाः सुप्रणीतिश्चिकितुषो न शासुः।
स्योनशीरतिथिर्न प्रीणानो होतेव सद्म विधतो वि तारीत् २०५

देवो न यः सविता सत्यमन्मा क्रत्वा निपाति वृजनानि विश्वा।
पुरुप्रशस्तो अमतिर्न सत्य आत्मेव शेवो दिधिषाय्यो भूत् २०६

देवो न यः पृथिवीं विश्वधाया उपक्षेति हितमित्रो न राजा।
पुरःसदः शर्मसदो न वीरा अनवद्या पतिजुष्टेव नारी २०७

तं त्वा नरो दम आ नित्यमिद्धम् अग्ने सचन्त क्षितिषु ध्रुवासु।
अधि द्युम्नं नि दधुर्भूर्यस्मिन् भवा विश्वायुर्धरुणो रयीणाम् २०८

वि पृक्षो अग्ने मघवानो अश्युर् वि सूरयो ददतो विश्वमायुः ।
सनेम वाजं समिथेष्वर्यो भागं देवेषु श्रवसे दधानाः । २०९
ऋतस्य हि धेनवो वावशानाः स्मदूध्नीः पीपयन्त द्युभक्ताः ।
परावतः सुमतिं भिक्षमाणा वि सिन्धवः समया सस्रुरद्रिम् २१०
त्वे अग्ने सुमतिं भिक्षमाणा दिवि श्रवो दधिरे यज्ञियासः ।
नक्ता च चक्रुरुषसा विरूपे कृष्णं च वर्णमरुणं च सं धुः २११
यान् राये मर्तान्त्सुषूदो अग्ने ते स्याम मघवानो वयं च ।
छायेव विश्वं भुवनं सिसक्षि आपप्रिवान् रोदसी अन्तरिक्षम् २१२
अर्वद्भिरग्ने अर्वतो नृभिर्नॄन् वीरैर्वीरान् वनुयामा त्वोताः ।
ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः २१३
एता ते अग्न उचथानि वेधो जुष्टानि सन्तु मनसे हृदे च ।
शकेम रायः सुधुरो यमं ते ऽधि श्रवो देवभक्तं दधानाः २१४

॥ २४ ॥ (ऋ० १ । ७४ । १-९) [२१५-२५५] गोतमो राहूगणः । गायत्री ।

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये । आरे अस्मे च शृण्वते २१५
यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु । अरक्षद् दाशुषे गयम् २१६
उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि । धनंजयो रणेरणे २१७
यस्य दूतो असि क्षये वेषि हव्यानि वीतये । दस्मत् कृणोष्यध्वरम् २१८
तमित् सुहव्यमङ्गिरः सुदेवं सहसो यहो । जना आहुः सुबर्हिषम् २१९
आ च वहासि ताँ इह देवाँ उप प्रशस्तये । हव्या सुश्चन्द्र वीतये २२०
न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन । यदग्ने यासि दूत्यम् २२१
त्वोतो वाज्यह्रयो ऽभि पूर्वस्मादपरः । प्र दाश्वाँ अग्ने अस्थात् २२२
उत द्युमत् सुवीर्यं बृहदग्ने विवाससि । देवेभ्यो देव दाशुषे २२३

॥ २५ ॥ (ऋ० १ । ७५ । १-५)

जुषस्व सप्रथस्तमं वचो देवप्सरस्तमम् । हव्या जुह्वान आसनि २२४
अथा ते अङ्गिरस्तम अग्ने वेधस्तम प्रियम् । वोचेम ब्रह्म सानसि २२५
कस्ते जामिर्जनानाम् अग्ने को दाश्वध्वरः । को ह कस्मिन्नसि श्रितः २२६

त्वं जामिर्जनानाम् अग्ने मित्रो असि प्रियः । सखा सखिभ्य ईड्यः २२७
यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत् । अग्ने यक्षि स्वं दमम् २२८

॥ २६ ॥ (ऋ० १ । ७६ । १-५) त्रिष्टुप् ।

का त उपेतिर्मनसो वराय भुवदग्ने शंतमा का मनीषा ।
को वा यज्ञैः परि दक्षं त आप केन वा ते मनसा दाशेम २२९

एह्यग्न इह होता नि षीद अदब्धः सु पुरएता भवा नः ।
अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान् २३०

प्र सु विश्वान् रक्षसो धक्ष्यग्ने भवा यज्ञानामभिशस्तिपावा ।
अथा वह सोमपतिं हरिभ्याम् आतिथ्यमस्मै चकृमा सुदाव्ने २३१

प्रजावता वचसा वह्निरासा च हुवे नि च सत्सीह देवैः ।
वेषि होत्रमुत पोत्रं यजत्र बोधि प्रयन्तर्जनितर्वसूनाम् २३२

यथा विप्रस्य मनुषो हविर्भिर् देवाँ अयजः कविभिः कविः सन् ।
एवा होतः सत्यतर त्वमद्य अग्ने मन्द्रया जुह्वा यजस्व २३३

॥ २७ ॥ (ऋ० १ । ७७ । १-५)

कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ।
यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत् कृणोति देवान् २३४

यो अध्वरेषु शंतम ऋतावा होता तमू नमोभिरा कृणुध्वम् ।
अग्निर्यद् वेर्मर्ताय देवान् त्स चा बोधाति मनसा यजाति २३५

स हि क्रतुः स मर्यः स साधुर् मित्रो न भूदद्भुतस्य रथीः ।
तं मेधेषु प्रथमं देवयन्तीर् विश उप ब्रुवते दस्ममारीः २३६

स नो नृणां नृतमो रिशादा अग्निर्गिरोऽवसा वेतु धीतिम् ।
तना च ये मघवानः शविष्ठा वाजप्रसूता इषयन्त मन्म २३७

एवाग्निर्गोतमेभिर्ऋतावा विप्रेभिरस्तोष्ट जातवेदाः ।
स एषु द्युम्नं पीपयत् स वाजं स पुष्टिं याति जोषमा चिकित्वान् २३८

॥ २८ ॥ (ऋ०१ । ७८ । १-५) गायत्री

अभि त्वा गोतमा गिरा जातवेदो विचर्षणे । द्युम्नैरभि प्र णोनुमः २३९

तमु त्वा गोतमो गिरा रायस्कामो दुवस्यति । द्युम्नैरभि प्र णोनुमः २४०
तमु त्वा वाजसातमम् अङ्गिरस्वद् हवामहे । द्युम्नैरभि प्र णोनुमः २४१
तमु त्वा वृत्रहन्तमं यो दस्यूँरवधूनुषे । द्युम्नैरभि प्र णोनुमः २४२
अवोचाम रहूगणा अग्नये मधुमद् वचः । द्युम्नैरभि प्र णोनुमः २४३

॥ २९ ॥ (ऋ० १ । ७९ । १-१२)

२४४-४६ त्रिष्टुप्; २४७-४९ उष्णिक्; २५०-२५५ गायत्री ।

हिरण्यकेशो रजसो विसारे ऽहिर्धुनिर्वात इव ध्रजीमान् ।
शुचिभ्राजा उषसो नवेदा यशस्वतीरपस्युवो न सत्याः २४४

आ ते सुपर्णा अमिनन्तँ एवैः कृष्णो नोनाव वृषभो यदीदम् ।
शिवाभिर्न स्मयमानाभिरागात् पतन्ति मिहः स्तनयन्त्यभ्रा २४५

यदीमृतस्य पयसा पियानो नयन्नृतस्य पथिभी रजिष्ठैः ।
अर्यमा मित्रो वरुणः परिज्मा त्वचं पृञ्चन्त्युपरस्य योनौ २४६

अग्ने वाजस्य गोमत ईशानः सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः २४७
स इधानो वसुष्कवि अग्निरीळेन्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि २४८
क्षपो राजन्नुत त्मना ऽग्ने वस्तोरुतोषसः । स तिग्मजम्भ रक्षसो दह प्रति २४९
अवा नो अग्न ऊतिभिर् गायत्रस्य प्रभर्मणि । विश्वासु धीषु वन्द्य २५०
आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम् । विश्वासु पृत्सु दुष्टरम् २५१
आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम् । मार्डीकं धेहि जीवसे २५२
प्र पूतास्तिग्मशोचिषे वाचो गोतमाग्नये । भरस्व सुम्नयुर्गिरः २५३
यो नो अग्नेऽभिदासति अन्ति दूरे पदीष्ट सः । अस्माकमिद् वृधे भव २५४
सहस्राक्षो विचर्षणिर् अग्नी रक्षांसि सेधति । होता गृणीत उक्थ्यः २५५

॥ ३० ॥ (ऋ० १ । ९४ । १-१६)

[२५६-२७१] कुत्स आङ्गिरसः । जगती; २७०-७१ त्रिष्टुप् ।

इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसदि अग्ने सख्ये मा रिषामा वयं तव २५६

यस्मै त्वमायजसे स साधति अनर्वा क्षेति दधते सुवीर्यम् ।
स तूताव नैनमश्नोत्यंहतिर् अग्ने सख्ये मा रिषामा वयं तव २५७

शकेम त्वा समिधं साधया धियस् त्वे देवा हविरदन्त्याहुतम् ।
त्वमादित्याँ आ वह तान् ह्यु१श्मसि अग्ने सख्ये मा रिषामा वयं तव २५८

भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।
जीवातवे प्रतरं साधया धियो ऽग्ने सख्ये मा रिषामा वयं तव २५९

विशां गोपा अस्य चरन्ति जन्तवो द्विपच्च यदुत चतुष्पदक्तुभिः ।
चित्रः प्रकेत उषसो महाँ असि अग्ने सख्ये मा रिषामा वयं तव २६०

त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः ।
विश्वा विद्वाँ आर्त्विज्या धीर पुष्यसि अग्ने सख्ये मा रिषामा वयं तव २६१

यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित् सन्तळिदिवाति रोचसे ।
रात्र्याश् चिदन्धो अति देव पश्यसि अग्ने सख्ये मा रिषामा वयं तव २६२

पूर्वो देवा भवतु सुन्वतो रथो ऽस्माकं शंसो अभ्यस्तु दूढ्यः ।
तदा जानीतोत पुष्यता वचो ऽग्ने सख्ये मा रिषामा वयं तव २६३

वधैर्दुःशंसाँ अप दूढ्यो जहि दूरे वा ये अन्ति वा के चिदत्रिणः ।
अथा यज्ञाय गृणते सुगं कृधि अग्ने सख्ये मा रिषामा वयं तव २६४

यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः ।
आदिन्वसि वनिनो धूमकेतुना ऽग्ने सख्ये मा रिषामा वयं तव २६५

अध स्वनादुत बिभ्युः पतत्रिणो द्रप्सा यत् ते यवसादो व्यस्थिरन् ।
सुगं तत् ते तावकेभ्यो रथेभ्यो ऽग्ने सख्ये मा रिषामा वयं तव २६६

अयं मित्रस्य वरुणस्य धायसे ऽवयातां मरुतां हेळो अद्भुतः ।
मृळा सु नो भूत्वेषां मनः पुनर् अग्ने सख्ये मा रिषामा वयं तव २६७

देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे ।
शर्मन् त्स्याम तव सप्रथस्तमे ऽग्ने सख्ये मा रिषामा वयं तव २६८

तत् ते भद्रं यत् समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः ।
दधासि रत्नं द्रविणं च दाशुषे ऽग्ने सख्ये मा रिषामा वयं तव २६९

यस्मै त्वं सुद्रविणो ददाशो ऽनागास् त्वमदिते सर्वताता ।
यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम २७०

स त्वमग्ने सौभगत्वस्य विद्वान् अस्माकमायुः प्र तिरेह देव ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ २७१

॥ ३१ ॥ (ऋ० १ । १२७ । १—११)

[२७२—२९१] परुच्छेपो दैवोदासिः । अत्यष्टिः, २७७ अतिधृतिः ।

अग्निं होतारं मन्ये दास्वन्तं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु वष्टि शोचिषा ऽऽजुह्वानस्य सर्पिषः २७२

यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभिर् विप्रेभिः शुक्र मन्मभिः ।
परिज्मानमिव द्यां होतारं चर्षणीनाम् ।
शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः २७३

स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहंतरः परशुर्न द्रुहंतरः ।
वीळु चिद् यस्य समृतौ श्रुवद् वनेव यत् स्थिरम् ।
निष्षहमाणो यमते नायते धन्वासहा नायते २७४

दृळ्हा चिदस्मा अनु दुर्यथा विदे तेजिष्ठाभिररणिभिर्दाष्ट्यवसे ऽग्नये दाष्ट्यवसे ।
प्र यः पुरूणि गाहते तक्षद् वनेव शोचिषा ।
स्थिरा चिदन्ना नि रिणात्योजसा नि स्थिराणि चिदोजसा २७५

तमस्य पृक्षमुपरासु धीमहि नक्तं यः सुदर्शतरो दिवातराद् अप्रायुषे दिवातरात् ।
आदस्यायुर्ग्रभणवद् वीळु शर्म न सूनवे ।
भक्तमभक्तमवो व्यन्तो अजरा अग्नयो व्यन्तो अजराः २७६

स हि शर्धो न मारुतं तुविष्वणिर् अप्नस्वतीषूर्वरास्विष्टनिर् आर्तनास्विष्टनिः ।
आदद्धव्यान्याददिर् यज्ञस्य केतुरर्हणा ।
अध स्मास्य हर्षतो हृषीवतो विश्वे जुषन्त पन्थां नरः शुभे न पन्थाम् २७७

द्विता यदीं कीस्तासो अभिद्यवो नमस्यन्त उपवोचन्त भृगवो मथ्नन्तो दाशा भृगवः ।
अग्निरीशे वसूनां शुचिर्यो धर्णिरेषाम् ।
प्रियाँ अपिधीँर्वनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः २७८

विश्वासां त्वा विशां पतिं हवामहे　सर्वासां समानं दंपतिं भुजे　सत्यगिर्वाहसं भुजे।
अतिथिं मानुषाणां　पितुर्न यस्यासया।
अमी च विश्वे अमृतास आ वयो　हव्या देवेष्वा वयः　२७९
त्वमग्ने सहसा सहन्तमः　शुष्मिन्तमो जायसे देवतातये　रयिर्न देवतातये।
शुष्मिन्तमो हि ते मदो　द्युम्निन्तम उत क्रतुः।
अध स्मा ते परि चरन्त्यजर　श्रुष्टीवानो नाजर　२८०
प्र वो महे सहसा सहस्वत　उषर्बुधे पशुषे नाग्नये　स्तोमो बभूत्वग्नये।
प्रति यदीं हविष्मान्　विश्वासु क्षासु जोगुवे।
अग्रे रेभो न जरत ऋषूणां　जूर्णिर्होत ऋषूणाम्　२८१
स नो नेदिष्ठं ददृशान आ भर　अग्ने देवेभिः सचनाः सुचेतुना　महो रायः सुचेतुना।
महि शविष्ठ नस्कृधि　संचक्षे भुजे अस्यै।
महि स्तोतृभ्यो मघवन् त्सुवीर्यं　मथीरुग्रो न शवसा　२८२

॥ ३२ ॥ (ऋ० १ । १२८ । १-८)

अयं जायत मनुषो धरीमणि　होता यजिष्ठ उशिजामनु व्रतम्　अग्निः स्वमनु व्रतम्।
विश्वश्रुष्टिः सखीयते　रयिरिव श्रवस्यते।
अदब्धो होता नि षददिळस्पदे　परिवीत इळस्पदे　२८३
तं यज्ञसाधमपि वातयामसि　ऋतस्य पथा नमसा हविष्मता　देवताता हविष्मता।
स न ऊर्जामुपाभृति　अया कृपा न जूर्यति।
यं मातरिश्वा मनवे परावतो　देवं भाः परावतः　२८४
एवेन सद्यः पर्येति पार्थिवं　मुहुर्गी रेतो वृषभः कनिक्रदद्　दधद् रेतः कनिक्रदत्।
शतं चक्षाणो अक्षभिर्　देवो वनेषु तुर्वणिः।
सदो दधान उपरेषु सानुषु　अग्निः परेषु सानुषु　२८५
स सुक्रतुः पुरोहितो दमेदमे　ऽग्निर्यज्ञस्याध्वरस्य चेतति　क्रत्वा यज्ञस्य चेतति।
क्रत्वा वेधा इषूयते　विश्वा जातानि पस्पशे।
यतो घृतश्रीरतिथिरजायत　वह्निर्वेधा अजायत　२८६

ऋत्वा यदस्य तविषीषु पृञ्चते ऽग्नेरवेण मरुतां न भोज्या इषिराय न भोज्या।
स हि ष्मा दानमिन्वति वसूनां च मज्मना।
स नस् त्रासते दुरितादभिह्रुतः शंसादघादभिह्रुतः २८७

विश्वो विहाया अरतिर्वसुर्दधे हस्ते दक्षिणे तरणिर्न शिश्रथच् छ्रवस्यया न शिश्रथत्।
विश्वस्मा इदिषुध्यते देवत्रा हव्यमोहिषे।
विश्वस्मा इत् सुकृते वारमृण्वति अग्निर्द्वारा व्यृण्वति २८८

स मानुषे वृजने शंतमो हितो३ ऽग्निर्यज्ञेषु जेन्यो न विश्पतिः प्रियो यज्ञेषु विश्पतिः।
स हव्या मानुषाणाम् इळा कृतानि पत्यते।
स नस् त्रासते वरुणस्य धूर्तेर् महो देवस्य धूर्तेः २८९

अग्निं होतारमीळते वसुधितिं प्रियं चेतिष्ठमरतिं न्येरिरे हव्यवाहं न्येरिरे।
विश्वायुं विश्ववेदसं होतारं यजतं कविम्।
देवासो रण्वमवसे वसूयवो गीर्भी रण्वं वसूयवः २९०

॥ ३३ ॥ (ऋ० १।१३९।७)

ओ षू णो अग्ने शृणुहि त्वमीळितो देवेभ्यो ब्रवसि यज्ञियेभ्यो राजभ्यो यज्ञियेभ्यः।
यद्ध त्यामङ्गिरोभ्यो धेनुं देवा अदत्तन।
वि तां दुह्रे अर्यमा कर्तरी सचाँ एष तां वेद मे सचा २९१

॥ ३४ ॥ (ऋ० १।१४०।१-१३)

[२९२-३६०] दीर्घतमा औचथ्यः। जगती, ३०१ त्रिष्टुब्वा, ३०३-४ त्रिष्टुप्।

वेदिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये।
वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनम् २९२

अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमी पुनः।
अन्यस्यासा जिह्वया जेन्यो वृषा न्य१न्येन वनिनो मृष्ट वारणः २९३

कृष्णप्रुतौ वेविजे अस्य सक्षिता उभा तरेते अभि मातरा शिशुम्।
प्राचाजिह्वं ध्वसयन्तं तृषुच्युतम् आ साच्यं कुपयं वर्धनं पितुः २९४

मुमुक्ष्वो३ मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ जुवः।
असमना अजिरासो रघुष्यदो वातजूता उप युज्यन्त आशवः २९५

आदस्य ते ध्वसयन्तो वृथेरते कृष्णमभ्वं महि वर्पः करिक्रतः ।
यत् सीं महीमवनिं प्राभि मर्मृशद् अभिश्वसन् त्स्तनयन्नेति नानदत् २९६

भूषन् न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत् ।
ओजायमानस् तन्वश्च शुम्भते भीमो न शृङ्गा दविधाव दुर्गृभिः २९७

स संस्तिरो विष्टिरः सं गृभायति जानन्नेव जानतीर्नित्य आ शये ।
पुनर्वर्धन्ते अपि यन्ति देव्यम् अन्यद् वर्पः पित्रोः कृण्वते सचा २९८

तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास् तस्थुर्मम्रुषीः प्रायवे पुनः ।
तासां जरां प्रमुञ्चन्नेति नानदद् असुं परं जनयञ्जीवमस्तृतम् २९९

अधीवासं परि मातू रिहन्नह तुविग्रेभिः सत्वभिर्याति वि ज्रयः ।
वयो दधत् पद्वते रेरिहत् सदा अनु श्येनी सचते वर्तनीरह ३००

अस्माकमग्ने मघवत्सु दीदिहि अध श्वसीवान् वृषभो दमूनाः ।
अवास्या शिशुमतीरदीदेर् वर्मेव युत्सु परिजर्भुराणः ३०१

इदमग्ने सुधितं दुर्धितादधि प्रियादु चिन् मन्मनः प्रेयो अस्तु ते ।
यत् ते शुक्रं तन्वो३ रोचते शुचि तेनास्मभ्यं वनसे रत्नमा त्वम् ३०२

रथाय नावमुत नो गृहाय नित्यारित्रां पद्वतीं रास्यग्ने ।
अस्माकं वीराँ उत नो मघोनो जनाँश्च या पारयाच्छर्म या च ३०३

अभी नो अग्न उक्थमिज् जुगुर्या द्यावाक्षामा सिन्धवश्च स्वगूर्ताः ।
गव्यं यव्यं यन्तो दीर्घाहा इषं वरमरुण्यो वरन्त ३०४

॥ ३५ ॥ (ऋ० १ । १४१ । १-१३) जगती, ३१६-१७ त्रिष्टुप् ।

बळित्था तद् वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ।
यदीमुप ह्वरते साधते मतिर् ऋतस्य धेना अनयन्त सस्रुतः ३०५

पृक्षो वपुः पितुमान् नित्य आ शये द्वितीयमा सप्तशिवासु मातृषु ।
तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः ३०६

निर्यदीं बुध्नान् महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः ।
यदीमनु प्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति ३०७

प्र यत् पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति ।
उभा यदस्य जनुषं यदिन्वत आदिद् यविष्ठो अभवद् घृणा शुचिः ३०८

आदिन्मातॄराविशद् यास्वा शुचिर् अहिंस्यमान उर्विया वि वावृधे ।
अनु यत् पूर्वा अरुहत् सनाजुवो नि नव्यसीष्ववरासु धावते ३०९

आदिद्धोतारं वृणते दिविष्टिषु भगमिव पपृचानास ऋञ्जते ।
देवान् यत् क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं विश्वधा वेति धायसे ३१०

वि यदस्थाद् यजतो वातचोदितो ह्वारो न वक्वा जरणा अनाकृतः ।
तस्य पत्मन् दक्षुषः कृष्णजंहसः शुचिजन्मनो रज आ व्यध्वनः ३११

रथो न यातः शिक्वभिः कृतो द्याम् अङ्गेभिररुषेभिरीयते ।
आदस्य ते कृष्णासो दक्षि सूरयः शूरस्येव त्वेषथादीषते वयः ३१२

त्वया ह्यग्ने वरुणो धृतव्रतो मित्रः शाशद्रे अर्यमा सुदानवः ।
यत् सीमनु क्रतुना विश्वथा विभुर् अरान् न नेमिः परिभूरजायथाः ३१३

त्वमग्ने शशमानाय सुन्वते रत्नं यविष्ठ देवतातिमिन्वसि ।
तं त्वा नु नव्यं सहसो युवन् वयं भगं न कारे महिरत्न धीमहि ३१४

अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिम् ।
रश्मीँरिव यो यमति जन्मनी उभे देवानां शंसमृत आ च सुक्रतुः ३१५

उत नः सुद्योत्मा जीराश्वो होता मन्द्रः शृणवच् चन्द्ररथः ।
स नो नेषन्नेषतमैरमूरो ऽग्निर्वामं सुवितं वस्यो अच्छ ३१६

अस्ताव्यग्निः शिमीवद्भिरर्कैः साम्राज्याय प्रतरं दधानः ।
अमी च ये मघवानो वयं च मिहं न सूरो अति निष्टतन्युः ३१७

॥ ३६ ॥ (ऋ० १ । १४३ । १-८) जगती, ३२५ त्रिष्टुप् ।

प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः सूनवे भरे ।
अपां नपाद् यो वसुभिः सह प्रियो होता पृथिव्यां न्यसीददृत्वियः ३१८

स जायमानः परमे व्योमनि आविरग्निरभवन् मातरिश्वने ।
अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत् ३१९

अस्य त्वेषा अजरा अस्य भानवः सुसंदृशः सुप्रतीकस्य सुद्युतः ।
भात्वक्षसो अत्यक्तुर्न सिन्धवो ऽग्ने रेजन्ते असंसन्तो अजराः ३२०

यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना ।
अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति ३२१

न यो वराय मरुतामिव स्वनः सेनेव सृष्टा दिव्या यथाशनिः ।
अग्निर्जम्भैस् तिगितैरत्ति भर्वति योधो न शत्रून् त्स वना न्यृञ्जते ३२२

कुविन्नो अग्निरुचथस्य वीरसद् वसुष्कुविद् वसुभिः काममावरत् ।
चोदः कुवित् तुतुज्यात् सातये धियः शुचिप्रतीकं तमया धिया गृणे ३२३

घृतप्रतीकं व ऋतस्य धूर्षदम् अग्निं मित्रं न समिधान ऋञ्जते ।
इन्धानो अक्रो विदथेषु दीद्यच् छुक्रवर्णामुदु नो यंसते धियम् ३२४

अप्रयुच्छन्नप्रयुच्छद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः ।
अदब्धेभिरदृपितेभिरिष्टे ऽनिमिषद्भिः परि पाहि नो जाः ३२५

॥ ३७ ॥ (ऋ० १ । १४४ । १-७) जगती ।

एति प्र होता व्रतमस्य मायया ऊर्ध्वां दधानः शुचिपेशसं धियम् ।
अभि स्रुचः क्रमते दक्षिणावृतो या अस्य धाम प्रथमं ह निंसते ३२६

अभीमृतस्य दोहना अनूषत योनौ देवस्य सदने परीवृताः ।
अपामुपस्थे विभृतो यदावसद् अध स्वधा अधयद् याभिरीयते ३२७

युयूषतः सवयसा तदिद् वपुः समानमर्थं वितरित्रता मिथः
आदीं भगो न हव्यः समस्मदा वोह्लुर्न रश्मीन् त्समयंस्त सारथिः ३२८

यमीं द्वा सवयसा सपर्यतः समाने योना मिथुना समोकसा ।
दिवा न नक्तं पलितो युवाजनि पुरू चरन्नजरो मानुषा युगा ३२९

तमीं हिन्वन्ति धीतयो दश व्रिशो देवं मर्तास ऊतये हवामहे ।
धनोरधि प्रवत आ स ऋण्वति अभिव्रजद्भिर्वयुना नवाधित ३३०

त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्य पशुपा इव त्मना ।
एनी त एते बृहती अभिश्रिया हिरण्ययी वक्वरी बर्हिराशाते ३३१

अग्ने जुषस्व प्रति हर्य तद् वचो मन्द्र स्वधाव ऋतजात सुक्रतो ।
यो विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः संदृष्टौ पितुमाँ इव क्षयः ३३२

॥ ३८ ॥ (ऋ० १ । १४५ । १-५) जगती, ३३७ त्रिष्टुप् ।

तं पृच्छता स जगामा स वेद स चिकित्वाँ ईयते सा न्वीयते ।
तस्मिन्त्सन्ति प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शुष्मिणस्पतिः ३३३

तमित् पृच्छन्ति न सिमो वि पृच्छति स्वेनेव धीरो मनसा यदग्रभीत् ।
न मृष्यते प्रथमं नापरं वचो ऽस्य क्रत्वा सचते अप्रदृपितः ३३४

तमिद् गच्छन्ति जुह्वस्तमर्वतीर् विश्वान्येकः शृणवद् वचांसि मे ।
पुरुप्रैषस् ततुरिर्यज्ञसाधनो ऽच्छिद्रोतिः शिशुरादत्त सं रभः ३३५

उपस्थायं चरति यत् समारत सद्यो जातस् तत्सार युज्येभिः ।
अभि श्वान्तं मृशते नान्द्ये मुदे यदीं गच्छन्त्युशतीरपिष्ठितम् ३३६

स ईं मृगो अप्यो वनर्गुर् उप त्वच्युपमस्यां नि धायि ।
व्यब्रवीद् वयुना मर्त्येभ्यो ऽग्निर्विद्वाँ ऋतचिद्धि सत्यः ३३७

॥ ३९ ॥ (ऋ० १ । १४६ । १-५) त्रिष्टुप् ।

त्रिमूर्धानं सप्तरश्मिं गृणीषे ऽनूनमग्निं पित्रोरुपस्थे ।
निषत्तमस्य चरतो ध्रुवस्य विश्वा दिवो रोचनापप्रिवांसम् ३३८

उक्षा महाँ अभि ववक्ष एने अजरस् तस्थावितऊतिर्ऋष्वः ।
उर्व्याः पदो नि दधाति सानौ रिहन्त्यूधो अरुषासो अस्य ३३९

समानं वत्समभि संचरन्ती विष्वग् धेनू वि चरतः सुमेके ।
अनपवृज्याँ अध्वनो मिमाने विश्वान् केताँ अधि महो दधाने ३४०

धीरासः पदं कवयो नयन्ति नाना हृदा रक्षमाणा अजुर्यम् ।
सिषासन्तः पर्यपश्यन्त सिन्धुम् आविरेभ्यो अभवत् सूर्यो नॄन् ३४१

दिदृक्षेण्यः परि काष्ठासु जेन्य ईळेन्यो महो अर्भाय जीवसे ।
पुरुत्रा यदभवत् सूरहैभ्यो गर्भेभ्यो मघवा विश्वदर्शतः ३४२

॥ ४० ॥ (ऋ० १ । १४७ । १-५)

कथा ते अग्ने शुचयन्त आयोर् ददाशुर्वाजेभिराशुषाणाः ।
उभे यत् तोके तनये दधाना ऋतस्य सामन् रणयन्त देवाः ३४३

बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु त्वो गृणाति वन्दारुस् ते तन्वं वन्दे अग्ने ३४४
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान् सुकृतो विश्ववेदा दिप्सन्त इद् रिपवो नाह देभुः ३४५
यो नो अग्ने अररिवाँ अघायुर् अरातीवा मर्चयति द्वयेन ।
मन्त्रो गुरुः पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः ३४६
उत वा यः सहस्य प्रविद्वान् मर्तो मर्तं मर्चयति द्वयेन ।
अतः पाहि स्तवमान स्तुवन्तम् अग्ने माकिर्नो दुरिताय धायीः ३४७

॥ ४१ ॥ (ऋ० १ । १४८ । १-५)

मथीद् यदीं विष्टो मातरिश्वा होतारं विश्वाप्सुं विश्वदेव्यम् ।
नि यं दधुर्मनुष्यासु विक्षु स्वर्ण चित्रं वपुषे विभावम् ३४८
ददानमिन्न ददभन्त मन्म अग्निर्वरूथं मम तस्य चाकन् ।
जुषन्त विश्वान्यस्य कर्म उपस्तुतिं भरमाणस्य कारोः ३४९
नित्ये चिन्नु यं सदने जगृभ्रे प्रशस्तिभिर्दधिरे यज्ञियासः
प्र सू नयन्त गृभयन्त इष्टौ अश्वासो न रथ्यो रारहाणाः ३५०
पुरूणि दस्मो नि रिणाति जम्भैर् आद् रोचते वन आ विभावा ।
आदस्य वातो अनु वाति शोचिर् अस्तुर्न शर्यामसनामनु द्यून् ३५१
न यं रिपवो न रिषण्यवो गर्भे सन्तं रेषणा रेषयन्ति ।
अन्धा अपश्या न दभन्नभिख्या नित्यास ईं प्रेतारो अरक्षन् ३५२

॥ ४२ ॥ (ऋ० १ । १४९ । १-५) विराट्

महः स राय एषते पतिर्दन्न् इन इनस्य वसुनः पद आ ।
उप ध्रजन्तमद्रयो विधन्नित् ३५३
स यो वृषा नरां न रोदस्योः श्रवोभिरस्ति जीवपीतसर्गः ।
प्र यः सस्राणः शिश्रीत योनौ ३५४
आ यः पुरं नार्मिणीमदीदेद् अत्यः कविर्नभन्यो३ नार्वा ।
सूरो न रुरुक्वाञ्छतात्मा ३५५

अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात् ।
होता यजिष्ठो अपां सधस्थे ३५६

अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या ।
मर्तो यो अस्मै सुतुको ददाश ३५७

॥ ४३ ॥ (ऋ० १ । १५० । १-३) उष्णिक् ।

पुरु त्वा दाश्वान् वोचे अरिरग्ने तव स्विदा । तोदस्येव शरण आ महस्य ३५८
व्यनिनस्य धनिनः प्रहोषे चिदररुषः । कदा चन प्रजिगतो अदेवयोः ३५९
स चन्द्रो विप्र मर्त्यो महो व्राधन्तमो दिवि । प्रप्रेत् ते अग्ने वनुषः स्याम ३६०

॥ ४४ ॥ (ऋ० १ । १८९ । १-८)

(३६१-३६८) अगस्त्यो मैत्रावरुणः । त्रिष्टुप् ।

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्य१स्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ३६१

अग्ने त्वं पारया नव्यो अस्मान् स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ३६२

अग्ने त्वमस्मद् युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः ।
पुनरस्मभ्यं सुविताय देव क्षां विश्वेभिरमृतेभिर्यजत्र ३६३

पाहि नो अग्ने पायुभिरजस्रैर् उत प्रिये सदन आ शुशुक्वान् ।
मा ते भयं जरितारं यविष्ठ नूनं विदन् मापरं सहस्वः ३६४

मा नो अग्नेऽव सृजो अघाय अविष्यवे रिपवे दुच्छुनायै ।
मा दत्वते दशते मादते नो मा रीषते सहसावन् परा दाः ३६५

वि घ त्वावाँ ऋतजात यंसद् गृणानो अग्ने तन्वे३ वरूथम् ।
विश्वाद् रिरिक्षोरुत वा निनित्सोर् अभिह्रुतामसि हि देव विष्पद् ३६६

त्वं ताँ अग्न उभयान् वि विद्वान् वेषि प्रपित्वे मनुषो यजत्र ।
अभिपित्वे मनवे शास्यो भूर् मर्मृजेन्य उशिग्भिर्नाक्रः ३६७

अवोचाम निवचनान्यस्मिन् मानस्य सूनुः सहसाने अग्नौ ।
वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदानुम् ३६८

॥ ४५ ॥ (ऋग्वेदस्य द्वितीयं मण्डलं २, सूक्तं १, मन्त्राः १-१६)

जगती । (३६९—४१५) गृत्समदः शौनकः (आङ्गिरसः शौनहोत्रो भार्गवः) ।

त्वमग्ने द्युभिस् त्वमाशुशुक्षणिस् त्वमद्भ्यस् त्वमश्मनस् परि ।
त्वं वनेभ्यस् त्वमोषधीभ्यस् त्वं नृणां नृपते जायसे शुचिः ३६९

तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः ।
तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश् च नो दमे ३७०

त्वमग्न इन्द्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः ।
त्वं ब्रह्मा रयिविद् ब्रह्मणस्पते त्वं विधर्तः सचसे पुरंध्या । ३७१

त्वमग्ने राजा वरुणो धृतव्रतस् त्वं मित्रो भवसि दस्म ईड्यः ।
त्वमर्यमा सत्पतिर्यस्य संभुजं त्वमंशो विदथे देव भाजयुः ३७२

त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्नावो मित्रमहः सजात्यम् ।
त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो असि पुरूवसुः ३७३

त्वमग्ने रुद्रो असुरो महो दिवस् त्वं शर्धो मारुतं पृक्ष ईशिषे ।
त्वं वातैररुणैर्यासि शंगयस् त्वं पूषा विधतः पासि नु त्मना ३७४

त्वमग्ने द्रविणोदा अरंकृते त्वं देवः सविता रत्नधा असि ।
त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस् तेऽविधत् ३७५

त्वामग्ने दम आ विश्पतिं विशस् त्वां राजानं सुविदत्रमृञ्जते ।
त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति ३७६

त्वामग्ने पितरमिष्टिभिर्नरस् त्वां भ्रात्राय शम्या तनूरुचम् ।
त्वं पुत्रो भवसि यस् तेऽविधत् त्वं सखा सुशेवः पास्याधृषः ३७७

त्वमग्न ऋभुराके नमस्य१स् त्वं वाजस्य क्षुमतो राय ईशिषे ।
त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः ३७८

त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा ।
त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती ३७९

त्वमग्ने सुभृत उत्तमं वयस् तव स्पार्हे वर्ण आ संदृशि श्रियः ।
त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ३८०

त्वामग्न आदित्यास आस्यं१ त्वां जिह्वां शुचयश् चक्रिरे कवे ।
त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदन्त्याहुतम् । ३८१

त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदन्त्याहुतम्
त्वया मर्तासः स्वदन्त आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः ३८२

त्वं तान् त्सं च प्रति चासि मज्मना अग्ने सुजात प्र च देव रिच्यसे ।
पृक्षो यदत्र महिना वि ते भुवद् अनु द्यावापृथिवी रोदसी उभे ३८३

ये स्तोतृभ्यो गोअग्रामश्वपेशसम् अग्ने रातिमुपसृजन्ति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद् वदेम विदथे सुवीराः ३८४

॥ ४६ ॥ (ऋ० २ । २ । १-१३)

यज्ञेन वर्धत जातवेदसम् अग्निं यजध्वं हविषा तना गिरा ।
समिधानं सुप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदम् ३८५

अभि त्वा नक्तीरुषसो ववाशिरे अग्ने वत्सं न स्वसरेषु धेनवः ।
दिव इवेदरतिर्मानुषा युगा आक्षपो भासि पुरुवार संयतः ३८६

तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं न्येरिरे ।
रथमिव वेद्यं शुक्रशोचिषम् अग्निं मित्रं न क्षितिषु प्रशंस्यम् ३८७

तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः ।
पृश्न्याः पतरं चितयन्तमक्षभिः पाथो न पायुं जनसी उभे अनु ३८८

स होता विश्वं परि भूत्वध्वरं तमु हव्यैर्मनुष ऋञ्जते गिरा ।
हिरिशिप्रो वृधसानासु जर्भुरद् द्यौर्न स्तृभिश् चितयद् रोदसी अनु ३८९

स नो रेवत् समिधानः स्वस्तये संददस्वान् रयिमस्मासु दीदिहि ।
आ नः कृणुष्व सुविताय रोदसी अग्ने हव्या मनुषो देव वीतये ३९०

दा नो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि ।
प्राची द्यावापृथिवी ब्रह्मणा कृधि स्व१र्ण शुक्रमुषसो वि दिद्युतः ३९१

स इधान उषसो राम्या अनु स्व१र्ण दीदेदरुषेण भानुना ।
होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशामतिथिश् चारुरायवे ३९२

एवा नो अग्ने अमृतेषु पूर्व्य धीष् पीपाय बृहद्दिवेषु मानुषा ।
दुहाना धेनुर्वृजनेषु कारवे त्मना शतिनं पुरुरूपमिषणि ३९३

वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति ।
अस्माकं द्युम्नमधि पञ्च कृष्टिषु उच्चा स्व१र्ण शुशुचीत दुष्टरम् ३९४

स नो बोधि सहस्य प्रशंस्यो यस्मिन् त्सुजाता इषयन्त सूरयः ।
यमग्ने यज्ञमुपयन्ति वाजिनो नित्ये तोके दीदिवांसं स्वे दमे ३९५

उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश् च शर्मणि ।
वस्वो रायः पुरुश्चन्द्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः ३९६
ये स्तोतृभ्यो० (३८४)

॥ ४७ ॥ (ऋ० २ । ८ । १-६) गायत्री, ४०२ अनुष्टुप् ।

वाजयन्निव नू रथान् योगाँ अग्नेरुप स्तुहि । यशस्तमस्य मीळ्हुषः ३९७
यः सुनीथो ददाशुषे अजुर्यो जरयन्नरिं । चारुप्रतीक आहुतः ३९८
य उ श्रिया दमेष्वा दोषोषसि प्रशस्यते । यस्य व्रतं न मीयते ३९९
आ यः स्व१र्ण भानुना चित्रो विभात्यर्चिषा । अञ्जानो अजरैरभि ४००
अत्रिमनु स्वराज्यम् अग्निमुक्थानि वावृधुः । विश्वा अधि श्रियो दधे ४०१
अग्नेरिन्द्रस्य सोमस्य देवानामूतिभिर्वयम् । अरिष्यन्तः सचेमहि अभि ष्याम पृतन्यतः ४०२

॥ ४८ ॥ (ऋ० २ । ९ । १-६) । त्रिष्टुप् ।

नि होता होतृषदने विदानस् त्वेषो दीदिवाँ असदत् सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः ४०३

त्वं दूतस् त्वमु नः परस्पास् त्वं वस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस् तने तनूनाम् अप्रयुच्छन् दीद्यद् बोधि गोपाः ४०४

विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
यस्माद् योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे ४०५

अग्ने यजस्व हविषा यजीयाञ् छ्रुष्टी देष्णमभि गृणीहि राधः ।
त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता ४०६

उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म ।
कृधि क्षुमन्तं जरितारमग्ने कृधि पतिं स्वपत्यस्य रायः ४०७
सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद् दिदीहि ४०८

॥ ४९ ॥ (ऋ० २ । १० । १-६)

जोहूत्रो अग्निः प्रथमः पितेव इळस्पदे मनुषा यत् समिद्धः ।
श्रियं वसानो अमृतो विचेता मर्मृजेन्यः श्रवस्यः स वाजी ४०९
श्रूया अग्निश् चित्रभानुर्हवं मे विश्वाभिर्गीर्भिरमृतो विचेताः ।
श्यावा रथं वहतो रोहिता वा उतारुषाह चक्रे विभृत्रः ४१०
उत्तानायामजनयन् त्सुषूतं भुवदग्निः पुरुपेशासु गर्भः ।
शिरिणायां चिदक्तुना महोभिर् अपरीवृतो वसति प्रचेताः ४११
जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानं ४१२
आ विश्वतः प्रत्यञ्चं जिघर्मि अरक्षसा मनसा तज्जुषेत ।
मर्यश्रीः स्पृहयद् वर्णो अग्निर् नाभिमृशे तन्वा३ जर्भुराणः ४१३
ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद् वदेम ।
अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि ४१४

॥ ५० ॥ (ऋ० २ । ४१ । १९ तृतीयः पादः) गायत्री ।

अग्निं च हव्यवाहनम् ४१५

॥ ५१ ॥ (ऋ० २ । ४ । १-२) (४१६-४४६) सोमाहुतिर्भार्गवः । त्रिष्टुप् ।

हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसम् ।
मित्र इव यो दिधिषाय्यो भूद् देव आदेवे जने जातवेदाः ४१६
इमं विधन्तो अपां सधस्थे द्वितादधुर्भृगवो विक्ष्वा३योः ।
एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्वः ४१७
अग्निं देवासो मानुषीषु विक्षु प्रियं धुः क्षेष्यन्तो न मित्रम् ।
स दीदयदुशतीरूर्म्या आ दक्षाय्यो यो दास्वते दम आ ४१८

अस्य रण्वा स्वस्येव पुष्टिः संदृष्टिरस्य हियानस्य दक्षोः ।
वि यो भरिभ्रदोषधीषु जिह्वाम् अत्यो न रथ्यो दोधवीति वारान् ४१९
आ यन्मे अभ्वं वनदः पनन्त उशिग्भ्यो नामिमीत वर्णम् ।
स चित्रेण चिकिते रंसु भासा जुजुर्वाँ यो मुहुरा युवा भूत् ४२०
आ यो वना तातृषाणो न भाति वार्ण पथा रथ्येव स्वानीत् ।
कृष्णाध्वा तपू रण्वश् चिकेत द्यौरिव स्मयमानो नभोभिः ४२१
स यो व्यस्थादभि दक्षदुर्वी पशुर्नैति स्वयुरगोपाः ।
अग्निः शोचिष्माँ अतसान्युष्णन् कृष्णव्यथिरस्वदयन्न भूम ४२२
नू ते पूर्वस्यावसो अधीतौ तृतीये विदथे मन्म शंसि ।
अस्मे अग्ने संयद्वीरं बृहन्तं क्षुमन्तं वाजं स्वपत्यं रयिं दाः ४२३
त्वया यथा गृत्समदासो अग्ने गुहा वन्वन्त उपराँ अभि ष्युः ।
सुवीरासो अभिमातिषाहः स्मत् सूरिभ्यो गृणते तद् वयो धाः ४२४

॥ ५२ ॥ (ऋ० २ । ५ । १-८) । अनुष्टुप् ।

होताजनिष्ट चेतनः पिता पितृभ्य ऊतये ।
प्रयक्षञ्जेन्यं वसु शकेम वाजिनो यमम् ४२५
आ यस्मिन् त्सप्त रश्मयस् तता यज्ञस्य नेतरि ।
मनुष्वद् दैव्यमष्टमं पोता विश्वं तदिन्वति ४२६
दधन्वे वा यदीमनु वोचद् ब्रह्माणि वेरु तत् ।
परि विश्वानि काव्या नेमिश् चक्रमिवाभवत् ४२७
साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि ।
विद्वाँ अस्य व्रता ध्रुवा वया इवानु रोहते ४२८
ता अस्य वर्णमायुवो नेष्टुः सचन्त धेनवः ।
कुवित् तिसृभ्य आ वरं स्वसारो या इदं ययुः ४२९
यदी मातुरुप स्वसा घृतं भरन्त्यस्थित ।
तासामध्वर्युरागतौ यवो वृष्टीव मोदते ४३०
स्वः स्वाय धायसे कृणुतामृत्विगृत्विजम् ।
स्तोमं यज्ञं चादरं वनेमा ररिमा वयम् ४३१

यथा विद्वाँ अरं करद् विश्वेभ्यो यजतेभ्यः ।
अयमग्ने त्वे अपि यं यज्ञं चकृमा वयम् ४३२

॥ ५३ ॥ (ऋ० २ । ६ । १-८) गायत्री ।

इमां मे अग्ने समिधम् इमामुपसदं वनेः । इमा उ षु श्रुधी गिरः ४३३
अया ते अग्ने विधेम ऊर्जो नपादश्वमिष्टे । एना सूक्तेन सुजात ४३४
तं त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः । सपर्येम सपर्यवः ४३५
स बोधि सूरिर्मघवा वसुपते वसुदावन् । युयोध्यस्मद् द्वेषांसि ४३६
स नो वृष्टिं दिवस्परि स नो वाजमनर्वाणम् । स नः सहस्रिणीरिषः ४३७
ईळानायावस्यवे यविष्ठ दूत नो गिरा । यजिष्ठ होतरा गहि ४३८
अन्तर्ह्यग्न ईयसे विद्वान् जन्मोभया कवे । दूतो जन्येव मित्र्यः ४३९
स विद्वाँ आ च पिप्रयो यक्षि चिकित्व आनुषक् । आ चास्मिन् त्सत्सि बर्हिषि ४४०

॥ ५४ ॥ (ऋ० २ । ७ । १-६)

श्रेष्ठं यविष्ठ भारत अग्ने द्युमन्तमा भर । वसो पुरुस्पृहं रयिम् ४४१
मा नो अरातिरीशत देवस्य मर्त्यस्य च । पर्षि तस्या उत द्विषः ४४२
विश्वा उत त्वया वयं धारा उदन्या इव । अति गाहेमहि द्विषः ४४३
शुचिः पावक वन्द्यो अग्ने बृहद् वि रोचसे । त्वं घृतेभिराहुतः ४४४
त्वं नो असि भारत अग्ने वशाभिरुक्षभिः । अष्टापदीभिराहुतः ४४५
द्र्वन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो अद्भुतः ४४६

॥ ५५ ॥ (ऋग्वेदस्य तृतीयं मण्डलं ३, सूक्तं १, मन्त्राः १ – २३)
(४४७—५७३) विश्वामित्रो गाथिनः । त्रिष्टुप् ।

सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै ।
देवाँ अच्छा दीद्यद् युञ्जे अद्रिं शमाये अग्ने तन्वं जुषस्व ४४७
प्राञ्चं यज्ञं चकृम वर्धतां गीः समिद्भिरग्निं नमसा दुवस्यन् ।
दिवः शशासुर्विदथा कवीनां गृत्साय चित् तवसे गातुमीषुः ४४८
मयो दधे मेधिरः पूतदक्षो दिवः सुबन्धुर्जनुषा पृथिव्याः ।
अविन्दन्नु दर्शतमप्स्वन्तर् देवासो अग्निमपसि स्वसॄणाम् ४४९

अवर्धयन् त्सुभगं सप्त यह्वीः श्वेतं जज्ञानमरुषं महित्वा ।
शिशुं न जातमभ्यारुरश्वा देवासो अग्निं जनिमन् वपुष्यन् ४५०
शुक्रेभिरङ्गै रज आततन्वान् क्रतुं पुनानः कविभिः पवित्रैः ।
शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः ४५१
वव्राजा सीमनदतीरदब्धा दिवो यह्वीरवसाना अनग्नाः ।
सना अत्र युवतयः सयोनीर् एकं गर्भं दधिरे सप्त वाणीः ४५२
स्तीर्णा अस्य संहतो विश्वरूपा घृतस्य योनौ स्रवथे मधूनाम् ।
अस्थुरत्र धेनवः पिन्वमाना मही दस्मस्य मातरा समीची ४५३
बभ्राणः सूनो सहसो व्यद्यौद् दधानः शुक्रा रभसा वपूंषि ।
श्चोतन्ति धारा मधुनो घृतस्य वृषा यत्र वावृधे काव्येन ४५४
पितुश् चिदूधर्जनुषा विवेद व्यस्य धारा असृजद् वि धेनाः ।
गुहा चरन्तं सखिभिः शिवेभिर् दिवो यह्वीभिर्न गुहा बभूव ४५५
पितुश् च गर्भं जनितुश् च बभ्रे पूर्वीरेको अधयत् पीप्यानाः ।
वृष्णे सपत्नी शुचये सबन्धू उभे अस्मै मनुष्ये नि पाहि ४५६
उरौ महाँ अनिबाधे ववर्ध आपो अग्निं यशसः सं हि पूर्वीः ।
ऋतस्य योनावशयद् दमूना जामीनामग्निरपसि स्वसॄणाम् ४५७
अक्रो न बभ्रिः समिथे महीनां दिदृक्षेयः सूनवे भाऋजीकः ।
उदुस्रिया जनिता यो जजान अपां गर्भो नृतमो यह्वो अग्निः ४५८
अपां गर्भं दर्शतमोषधीनां वना जजान सुभगा विरूपम् ।
देवासश् चिन्मनसा सं हि जग्मुः पनिष्ठं जातं तवसं दुवस्यन् ४५९
बृहन्त इद् भानवो भाऋजीकम् अग्निं सचन्त विद्युतो न शुक्राः ।
गुहेव वृद्धं सदसि स्वे अन्तर् अपार ऊर्वे अमृतं दुहानाः ४६०
ईळे च त्वा यजमानो हविर्भिर् ईळे सखित्वं सुमतिं निकामः ।
देवैरवो मिमीहि सं जरित्रे रक्षा च नो दम्येभिरनीकैः ४६१
उपक्षेतारस् तव सुप्रणीते अग्ने विश्वानि धन्या दधानाः ।
सुरेतसा श्रवसा तुञ्जमाना अभि ष्याम पृतनायूँरदेवान् ४६२

आ देवानामभवः केतुरग्ने मन्द्रो विश्वानि काव्यानि विद्वान् ।
प्रति मर्ताँ अवासयो दमूना अनु देवान् रथिरो यासि साधन् ४६३

नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन् ।
घृतप्रतीक उर्विया व्यद्यौद् अग्निर्विश्वानि काव्यानि विद्वान् ४६४

आ नो गहि सख्येभिः शिवेभिर् महान् महीभिरूतिभिः सरण्यन् ।
अस्मे रयिं बहुलं संतरुत्रं सुवाचं भागं यशसं कृधी नः ४६५

एता ते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचम् ।
महान्ति वृष्णे सवना कृतेमा जन्मञ्जन्मन् निहितो जातवेदाः ४६६

जन्मञ्जन्मन् निहितो जातवेदा विश्वामित्रेभिरिध्यते अजस्रः ।
तस्य वयं सुमतौ यज्ञियस्य अपि भद्रे सौमनसे स्याम ४६७

इमं यज्ञं सहसावन् त्वं नो देवत्रा धेहि सुक्रतो रराणः ।
प्र यंसि होतर्बृहतीरिषो नो अग्ने महि द्रविणमा यजस्व ४६८

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस् तनयो विजावा अग्ने सा ते सुमतिर्भूत्वस्मे ४६९

॥ ५६ ॥ (ऋ० ३ । ५ । १-११)

प्रत्यग्निरुषसश् चेकितानो ऽबोधि विप्रः पदवीः कवीनाम् ।
पृथुपाजा देवयद्भिः समिद्धो ऽप द्वारा तमसो वह्निरावः ४७०

प्रेद्वग्निर्वावृधे स्तोमेभिर् गीर्भिः स्तोतॄणां नमस्य उक्थैः ।
पूर्वीर्ऋतस्य संदृशश् चकानः सं दूतो अद्यौदुषसो विरोके ४७१

अधाय्यग्निर्मानुषीषु विक्षु अपां गर्भो मित्र ऋतेन साधन् ।
आ हर्यतो यजतः सान्वस्थाद् अभूदु विप्रो हव्यो मतीनाम् ४७२

मित्रो अग्निर्भवति यत् समिद्धो मित्रो होता वरुणो जातवेदाः ।
मित्रो अध्वर्युरिषिरो दमूना मित्रः सिन्धूनामुत पर्वतानाम् ४७३

पाति प्रियं रिपो अग्रं पदं वेः पाति यह्वश् चरणं सूर्यस्य ।
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ४७४

ऋभुश् चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान् ।
ससस्य चर्म घृतवत् पदं वेस् तदिदग्नी रक्षत्यप्रयुच्छन् ४७५

आ योनिमग्निर्घृतवन्तमस्थात् पृथुप्रगाणमुशन्तमुशानः ।
दीद्यानः शुचिर्ऋष्वः पावकः पुनःपुनर्मातरा नव्यसी कः ४७६

सद्यो जात ओषधीभिर्ववक्षे यदी वर्धन्ति प्रस्वो घृतेन ।
आप इव प्रवता शुम्भमाना उरुष्यदग्निः पित्रोरुपस्थे ४७७

उदु ष्टुतः समिधा यह्वो अद्यौद् वर्ष्मन् दिवो अधि नाभा पृथिव्याः ।
मित्रो अग्निरीड्यो मातरिश्वा दूतो वक्षद् यजथाय देवान् ४७८

उदस्तम्भीत् समिधा नाकमृष्वो३ अग्निर्भवन्नुत्तमो रोचनानाम् ।
यदी भृगुभ्यः परि मातरिश्वा गुहा सन्तं हव्यवाहं समीधे ४७९
इळामग्ने० (४६९)

॥ ५७ ॥ (ऋ० ३ । ६ । १-११)

प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयन्तः ।
दक्षिणावाड् वाजिनी प्राच्येति हविर्भरन्त्यग्नये घृताची ४८०

आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु प्रयज्यो ।
दिवश् चिदग्ने महिना पृथिव्या वच्यन्तां ते वह्नयः सप्तजिह्वाः ४८१

द्यौश् च त्वा पृथिवी यज्ञियासो नि होतारं सादयन्ते दमाय ।
यदी विशो मानुषीर्देवयन्तीः प्रयस्वतीरीळते शुक्रमर्चिः ४८२

महान् त्सधस्थे ध्रुव आ निषत्तो अन्तर्द्यावा माहिने हर्यमाणः ।
आस्क्रे सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू ४८३

व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ ।
त्वं दूतो अभवो जायमानस् त्वं नेता वृषभ चर्षणीनाम् ४८४

ऋतस्य वा केशिना योग्याभिर् घृतस्नुवा रोहिता धुरि धिष्व ।
अथा वह देवान् देव विश्वान् त्स्वध्वरा कृणुहि जातवेदः ४८५

दिवश् चिदा ते रुचयन्त रोका उषो विभातीरनु भासि पूर्वीः ।
अपो यदग्न उशधग् वनेषु होतुर्मन्द्रस्य पनयन्त देवाः ४८६

उरौ वा ये अन्तरिक्षे मदन्ति दिवो वा ये रोचने सन्ति देवाः ।
ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः ४८७

ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः ।
पत्नीवतस् त्रिंशतं त्रींश् च देवान् अनुष्वधमा वह मादयस्व ४८८*

स होता यस्य रोदसी चिदुर्वी यज्ञंयज्ञमभि वृधे गृणीतः ।
प्राची अध्वरेव तस्थतुः सुमेके ऋतावरी ऋतजातस्य सत्ये ४८९
इळामग्ने० (४६९)

॥ ५८ ॥ (ऋ० ३ । ७ । १-११)

प्र य आरुः शितिपृष्ठस्य धासेर् आ मातरा विविशुः सप्त वाणीः ।
परिक्षिता पितरा सं चरेते प्र सर्स्राते दीर्घमायुः प्रयक्षे ४९०

दिवक्षसो धेनवो वृष्णो अश्वा देवीरा तस्थौ मधुमद् वहन्तीः ।
ऋतस्य त्वा सदसि क्षेमयन्तं पर्येका चरति वर्तनिं गौः ४९१

आ सीमरोहत् सुयमा भवन्तीः पतिश् चिकित्वान् रयिविद् रयीणाम् ।
प्र नीलपृष्ठो अतसस्य धासेस् ता अवासयत् पुरुधप्रतीकः ४९२

महि त्वाष्ट्रमूर्जयन्तीरजुर्यं स्तभूयमानं वहतो वहन्ति ।
व्यङ्गेभिर्दिद्युतानः सधस्थ एकामिव रोदसी आ विवेश ४९३

जानन्ति वृष्णो अरुषस्य शेवम् उत ब्रध्नस्य शासने रणन्ति ।
दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः ४९४

उतो पितृभ्यां प्रविदानु घोषं महो महद्भ्यामनयन्त शूषम् ।
उक्षा ह यत्र परि धानमक्तोर् अनु स्वं धाम जरितुर्ववक्ष ४९५

अध्वर्युभिः पञ्चभिः सप्त विप्राः प्रियं रक्षन्ते निहितं पदं वेः ।
प्राञ्चो मदन्त्युक्षणो अजुर्या देवा देवानामनु हि व्रता गुः ४९६

दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित् त आहुर् अनु व्रतं व्रतपा दीध्यानाः ४९७

वृषायन्ते महे अत्याय पूर्वीर् वृष्णे चित्राय रश्मयः सुयामाः ।
देव होतर्मन्द्रतरश् चिकित्वान् महो देवान् रोदसी एह वक्षि ४९८

---

* ४८८ अथर्व० २० । १३ । ४

पृक्षप्रयजो द्रविणः सुवाचः सुकेतव उषसो रेवदूषुः । ४९९
उतो चिदग्ने महिना पृथिव्याः कृतं चिदेनः सं महे दशस्य

इळामग्ने० (४९९)

॥ ५९ ॥ (ऋ० ३।९।१—९) बृहती, ५०८ त्रिष्टुप्।

सखायस् त्वा ववृमहे देवं मर्तास ऊतये । ५००
अपां नपातं सुभगं सुदीदितिं सुप्रतूर्तिमनेहसम्

कायमानो वना त्वं यन्मातॄरजगन्नपः । ५०१
न तत् ते अग्ने प्रमृषे निवर्तनं यद् दूरे सन्निहाभवः

अतिं तृष्टं ववक्षिथ अथैव सुमना असि । ५०२
प्रप्रान्ये यन्ति पर्यन्य आसते येषां सख्ये असि श्रितः

ईयिवांसमति स्रिधः शश्वतीरति सश्चतः । ५०३
अन्वीमविन्दन् निचिरासो अद्रुहो अप्सु सिंहमिव श्रितम्

ससृवांसमिव त्मना अग्निमित्था तिरोहितम् । ५०४
ऐनं नयन् मातरिश्वा परावतो देवेभ्यो मथितं परि

तं त्वा मर्ता अगृभ्णत देवेभ्यो हव्यवाहन । ५०५
विश्वान् यद् यज्ञाँ अभिपासि मानुष तव क्रत्वा यविष्ठ्य

तद् भद्रं तव दंसना पाकाय चिच्छदयति । ५०६
त्वां यदग्ने पशवः समासते समिद्धमपिशर्वरे

आ जुहोता स्वध्वरं शीरं पावकशोचिषम् । ५०७
आशुं दूतमजिरं प्रत्नमीड्यं श्रुष्टी देवं सपर्यत

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् । ५०८
औक्षन् घृतैरस्तृणन् बर्हिरस्मा आदिद्धोतारं न्यसादयन्त

॥ ६० ॥ (ऋ० ३।१०।१-९)। उष्णिक्।

त्वामग्ने मनीषिणः सम्राजं चर्षणीनाम् । देवं मर्तास इन्धते समध्वरे ५०९
त्वां यज्ञेष्वृत्विजम् अग्ने होतारमीळते । गोपा ऋतस्य दीदिहि स्वे दमे ५१०
स घा यस् ते ददाशति समिधा जातवेदसे । सो अग्ने धत्ते सुवीर्यं स पुष्यति ५११

स केतुरध्वराणाम् अग्निर्देवेभिरा गमत् । अञ्जानः सप्त होतृभिर्हविष्मते ५१२
प्र होत्रे पूर्व्यं वचो अग्नये भरता बृहत् । विपां ज्योतींषि बिभ्रते न वेधसे ५१३
अग्निं वर्धन्तु नो गिरो यतो जायत उक्थ्यः । महे वाजाय द्रविणाय दर्शतः ५१४
अग्ने यजिष्ठो अध्वरे देवान् देवयते यज । होता मन्द्रो वि राजस्यति स्रिधः ५१५
स नः पावक दीदिहि द्युमदस्मे सुवीर्यम् । भवा स्तोतृभ्यो अन्तमः स्वस्तये ५१६
तं त्वा विप्रा विपन्यवो जागृवांसः समिन्धते । हव्यवाहममर्त्यं सहोवृधम् ५१७

॥ ६१ ॥ (ऋ० ३ । ११ । १—९) गायत्री ।

अग्निर्होता पुरोहितो अध्वरस्य विचर्षणिः । स वेद यज्ञमानुषक् ५१८
स हव्यवाळमर्त्य उशिग् दूतश् चनोहितः । अग्निर्धिया समृण्वति ५१९
अग्निर्धिया स चेतति केतुर्यज्ञस्य पूर्व्यः । अर्थं ह्यस्य तरणि ५२०
अग्निं सूनुं सनश्रुतं सहसो जातवेदसम् । वह्निं देवा अकृण्वत ५२१
अदाभ्यः पुरएता विशामग्निर्मानुषीणाम् । तूर्णी रथः सदा नवः ५२२
साह्वान् विश्वा अभियुजः क्रतुर्देवानाममृक्तः । अग्निस् तुविश्रवस्तमः ५२३
अभि प्रयांसि वाहसा दाश्वाँ अश्नोति मर्त्यः । क्षयं पावकशोचिषः ५२४
परि विश्वानि सुधिता अग्नेरश्याम मन्मभिः । विप्रासो जातवेदसः ५२५
अग्ने विश्वानि वार्या वाजेषु सनिषामहे । त्वे देवास एरिरे ५२६

॥ ६२ ॥ (ऋ० ३ । २४ । १-५) ५२७ अनुष्टुप्; ५२८-५३१ गायत्री ।

अग्ने सहस्व पृतना अभिमातीरपास्य । दुष्टरस् तरन्नरातीर् वर्चो धा यज्ञवाहसे ५२७
अग्न इळा समिध्यसे वीतिहोत्रो अमर्त्यः । जुषस्व सू नो अध्वरम् ५२८
अग्ने द्युम्नेन जागृवे सहसः सूनवाहुत । एदं बर्हिः सदो मम ५२९
अग्ने विश्वेभिरग्निभिर् देवेभिर्महया गिरः । यज्ञेषु य उ चायवः ५३०
अग्ने दा दाशुषे रयिं वीरवन्तं परीणसम् । शिशीहि नः सूनुमतः ५३१

॥ ६३ ॥ (ऋ० ३ । २५ । १-५) विराट् ।

अग्ने दिवः सूनुरसि प्रचेतास् तना पृथिव्या उत विश्ववेदाः ।
ऋधग् देवाँ इह यजा चिकित्वः ५३२
अग्निः सनोति वीर्याणि विद्वान् त्सनोति वाजममृताय भूषन् ।
स नो देवाँ एह वहा पुरुक्षो ५३३

अग्निर्द्यावापृथिवी विश्वजन्ये आ भाति देवी अमृते अमूरः ।
क्षयन् वाजैः पुरुश्चन्द्रो नमोभिः ५३४

अग्न इन्द्रश् च दाशुषो दुरोणे सुतावतो यज्ञमिहोप यातम् ।
अमर्धन्ता सोमपेयाय देवा ५३५

अग्ने अपां समिध्यसे दुरोणे नित्यः सूनो सहसो जातवेदः ।
सधस्थानि महयमान ऊती ५३६

॥ ६४ ॥ (ऋ० ३ । २७ । १-१५) गायत्री ।

प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या । देवाञ्जिगाति सुम्नयुः ५३७
ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनम् । श्रुष्टीवानं धितावानम् ५३८
अग्ने शकेम ते वयं यमं देवस्य वाजिनः । अति द्वेषांसि तरेम ५३९
समिध्यमानो अध्वरे३ अग्निः पावक ईड्यः । शोचिष्केशस् तमीमहे ५४०
पृथुपाजा अमर्त्यो घृतनिर्णिक् स्वाहुतः । अग्निर्यज्ञस्य हव्यवाट् ५४१
तं सबाधो यतस्रुच इत्था धिया यज्ञवन्तः । आ चक्रुरग्निमूतये ५४२
होता देवो अमर्त्यः पुरस्तादेति मायया । विदथानि प्रचोदयन् ५४३
वाजी वाजेषु धीयते अध्वरेषु प्र णीयते । विप्रो यज्ञस्य साधनः ५४४
धिया चक्रे वरेण्यो भूतानां गर्भमा दधे । दक्षस्य पितरं तना ५४५
नि त्वा दधे वरेण्यं दक्षस्येळा सहस्कृत । अग्ने सुदीतिमुशिजम् ५४६
अग्निं यन्तुरमप्तुरम् ऋतस्य योगे वनुषः । विप्रा वाजैः समिन्धते ५४७
ऊर्जो नपातमध्वरे दीदिवांसमुप द्यवि । अग्निमीळे कविक्रतुम् ५४८
ईळेन्यो नमस्यस् तिरस् तमांसि दर्शतः । समग्निरिध्यते वृषा ५४९ *
वृषो अग्निः समिध्यते अश्वो न देववाहनः । तं हविष्मन्त ईळते ५५० *
वृषणं त्वा वयं वृषन् वृषणः समिधीमहि । अग्ने दीद्यतं बृहत् ५५१ *

॥ ६५ ॥ (ऋ० ३ । २८ । १-६)

५५२-५५३, ५५७ गायत्री, ५५४ उष्णिक्, ५५५ त्रिष्टुप्, ५५६ जगती ।

अग्ने जुषस्व नो हविः पुरोळाशं जातवेदः । प्रातःसावे धियावसो ५५२
पुरोळा अग्ने पचतस् तुभ्यं वा घा परिष्कृतः । तं जुषस्व यविष्ठ्य ५५३
अग्ने वीहि पुरोळाशम् आहुतं तिरोअह्न्यम् । सहसः सूनुरस्यध्वरे हितः ५५४

---

* ५४९-५५१ अथर्व. २० । १०२ । १-३

माध्यंदिने सवने जातवेदः पुरोळाशमिह कवे जुषस्व ।
अग्ने यह्वस्य तव भागधेयं न प्र मिनन्ति विदथेषु धीराः ५५५

अग्ने तृतीये सवने हि कानिषः पुरोळाशं सहसः सूनवाहुतम् ।
अथा देवेष्वध्वरं विपन्यया धा रत्नवन्तममृतेषु जागृविम् ५५६

अग्ने वृधान आहुतिं पुरोळाशं जातवेदः । जुषस्व तिरोअह्न्यम् ५५७

॥ ६६ ॥ (ऋ० ३ । २९ । १-१६) त्रिष्टुप्;
५५८, ५६१, ५६७, ५६९ अनुष्टुप्; ५६३, ५६८, ५७१, ५७२ जगती ।

अस्तीदमधिमन्थनम् अस्ति प्रजननं कृतम् ।
एतां विश्पत्नीमा भर अग्निं मन्थाम पूर्वथा ५५८

अरण्योर्निहितो जातवेदा गर्भ इव सुधितो गर्भिणीषु ।
दिवेदिव ईड्यो जागृवद्भिर् हविष्मद्भिर्मनुष्येभिरग्निः ५५९

उत्तानायामव भरा चिकित्वान् त्सद्यः प्रवीता वृषणं जजान ।
अरुषस्तूपो रुशदस्य पाज इळायास् पुत्रो वयुनेऽजनिष्ट ५६०

इळायास् त्वा पदे वयं नाभा पृथिव्या अधि ।
जातवेदो नि धीमहि अग्ने हव्याय वोळ्हवे ५६१

मन्थता नरः कविमद्वयन्तं प्रचेतसममृतं सुप्रतीकम् ।
यज्ञस्य केतुं प्रथमं पुरस्ताद् अग्निं नरो जनयता सुशेवम् ५६२

यदी मन्थन्ति बाहुभिर्वि रोचते अश्वो न वाज्यरुषो वनेष्वा ।
चित्रो न यामन्नश्विनोरनिवृतः परि वृणक्त्यश्मनस् तृणा दहन् ५६३

जातो अग्नी रोचते चेकितानो वाजी विप्रः कविशस्तः सुदानुः ।
यं देवास ईड्यं विश्वविदं हव्यवाहमदधुरध्वरेषु ५६४

सीद होतः स्व उ लोके चिकित्वान् त्सादया यज्ञं सुकृतस्य योनौ ।
देवावीर्देवान् हविषा यजास्यग्ने बृहद् यजमाने वयो धाः ५६५

कृणोत धूमं वृषणं सखायो अस्रेधन्त इतन वाजमच्छ ।
अयमग्निः पृतनाषाट् सुवीरो येन देवासो असहन्त दस्यून् ५६६

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आ सीद अथा नो वर्धया गिरः ५६७

तनूनपादुच्यते गर्भ आसुरो नराशंसो भवति यद् विजायते ।
मातरिश्वा यदमिमीत मातरि वातस्य सर्गो अभवत् सरीमणि ५६८

सुनिर्मथा निर्मथितः सुनिधा निहितः कविः ।
अग्ने स्वध्वरा कृणु देवान् देवयते यज ५६९

अजीजनन्नमृतं मर्त्यासो अस्रेमाणं तरणिं वीळुजम्भम् ।
दश स्वसारो अग्रुवः समीचीः पुमांसं जातमभि सं रभन्ते ५७०

प्र सप्तहोता सनकादरोचत मातुरुपस्थे यदशोचदूधनि ।
न नि मिषति सुरणो दिवेदिवे यदसुरस्य जठरादजायत ५७१

अमित्रायुधो मरुतामिव प्रयाः प्रथमजा ब्रह्मणो विश्वमिद् विदुः ।
द्युम्नवद् ब्रह्म कुशिकास एरिर एकएको दमे अग्निं समीधिरे ५७२

यदद्य त्वा प्रयति यज्ञे अस्मिन् होतश् चिकित्वोऽवृणीमहीह ।
ध्रुवमया ध्रुवमुताशमिष्ठाः प्रजानन् विद्वाँ उप याहि सोमम् ५७३

॥ ६७ ॥ (ऋ० ३ । १३ । १-७) [५७४-५८०] ऋषभो वैश्वामित्रः । अनुष्टुप् ।

प्र वो देवायाग्नये बर्हिष्ठमर्चास्मै ।
गमद् देवेभिरा स नो यजिष्ठो बर्हिरा सदत् ५७४

ऋतावा यस्य रोदसी दक्षं सचन्त ऊतयः ।
हविष्मन्तस् तमीळते तं सनिष्यन्तोऽवसे ५७५

स यन्ता विप्र एषां स यज्ञानामथा हि षः ।
अग्निं तं वो दुवस्यत दाता यो वनिता मघम् ५७६

स नः शर्माणि वीतये अग्निर्यच्छतु शंतमा ।
यतो नः प्रुष्णवद् वसु दिवि क्षितिभ्यो अप्स्वा ५७७

दीदिवांसमपूर्व्यं वस्वीभिरस्य धीतिभिः ।
ऋक्वाणो अग्निमिन्धते होतारं विश्पतिं विशाम् ५७८

उत नो ब्रह्मन्नविष उक्[illegible]तमः ।
शं नः शोचा मरुद्वृधो अग्ने सहस्रसातमः ५७९

नू नो रास्व सहस्रवत् तोकवत् पुष्टिमद् वसु ।
द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम् ५८०

॥ ६८ ॥ (ऋ० ३ । १४ । १-७) त्रिष्टुप् ।

आ होता मन्द्रो विदथान्यस्थात् सत्यो यज्वा कवितमः स वेधाः ।
विद्युद्रथः सहसस्पुत्रो अग्निः शोचिष्केशः पृथिव्यां पाजो अश्रेत् ५८१

अयामि ते नमउक्तिं जुषस्व ऋतावस्तुभ्यं चेतते सहस्वः ।
विद्वाँ आ वक्षि विदुषो नि षत्सि मध्य आ बर्हिरूतये यजत्र ५८२

द्रवतां त उषसा वाजयन्ती अग्ने वातस्य पथ्याभिरच्छ ।
यत् सीमञ्जन्ति पूर्व्यं हविर्भिर् आ वन्धुरेव तस्थतुर्दुरोणे ५८३

मित्रश् च तुभ्यं वरुणः सहस्वो अग्ने विश्वे मरुतः सुम्नमर्चन् ।
यच्छोचिषा सहसस्पुत्र तिष्ठा अभि क्षितीः प्रथयन् त्सूर्यो नॄन् ५८४

वयं ते अद्य ररिमा हि कामम् उत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवान् अस्रेधता मन्मना विप्रो अग्ने ५८५

त्वद्धि पुत्र सहसो वि पूर्वीर् देवस्य यन्त्यूतयो वि वाजाः ।
त्वं देहि सहस्रिणं रयिं नो अद्रोघेण वचसा सत्यमग्ने ५८६

तुभ्यं दक्ष कविक्रतो यानीमा देव मर्तासो अध्वरे अकर्म ।
त्वं विश्वस्य सुरथस्य बोधि सर्वं तदग्ने अमृत स्वदेह ५८७

॥ ६९ ॥ (ऋ० ३ । १५ । १-७) (५८८-५९९) उत्कीलः कात्यः । त्रिष्टुप् ।

वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्याम् अग्नेरहं सुहवस्य प्रणीतौ ५८८

त्वं नो अस्या उषसो व्युष्टौ त्वं सूर उदिते बोधि गोपाः ।
जन्मेव नित्यं तनयं जुषस्व स्तोमं मे अग्ने तन्वा सुजात ५८९

त्वं नृचक्षा वृषभानु पूर्वीः कृष्णास्वग्ने अरुषो वि भाहि ।
वसो नेषि च पर्षि चात्यंहः कृधी नो राय उशिजो यविष्ठ ५९०

अषाह्लो अग्ने वृषभो दिदीहि पुरो विश्वाः सौभगा संजिगीवान् ।
यज्ञस्य नेता प्रथमस्य पायोर् जातवेदो बृहतः सुप्रणीते ५९१

अच्छिद्रा शर्म जरितः पुरूणि देवाँ अच्छा दीद्यानः सुमेधाः ।
रथो न सस्निरभि वक्षि वाजम् अग्ने त्वं रोदसी नः सुमेके ५९२

प्र पीपय वृषभ जिन्व वाजान् अग्ने त्वं रोदसी नः सुदोघे ।
देवेभिर्देव सुरुचा रुचानो मा नो मर्तस्य दुर्मतिः परि ष्ठात् ५९३
इळामग्ने० (४६९)

॥ ७० ॥ (ऋ० ३ । १६ । १-६) प्रगाथः (= बृहती + सतोबृहती ।)

अयमग्निः सुवीर्यस्य ईशे महः सौभगस्य ।
राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ५९४

इमं नरो मरुतः सश्चता वृधं यस्मिन् रायः शेवृधासः ।
अभि ये सन्ति पृतनासु दूढ्यो विश्वाहा शत्रुमादभुः ५९५

स त्वं नो रायः शिशीहि मीढ्वो अग्ने सुवीर्यस्य ।
तुविद्युम्न वर्षिष्ठस्य प्रजावतो अनमीवस्य शुष्मिणः ५९६

चक्रिर्यो विश्वा भुवनाभि सासहिश् चक्रिर्देवेष्वा दुवः ।
आ देवेषु यतत आ सुवीर्य आ शंस उत नृणाम् ५९७

मा नो अग्नेऽमतये मावीरतायै रीरधः ।
मागोतायै सहसस्पुत्र मा निदे अप द्वेषांस्या कृधि ५९८

शग्धि वाजस्य सुभग प्रजावतो अग्ने बृहतो अध्वरे ।
सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता ५९९

॥ ७१ ॥ (ऋ० ३ । १७ । १-५) ६००—६०४ कतो वैश्वामित्रः । त्रिष्टुप् ।

समिध्यमानः प्रथमानु धर्मा समक्तुभिरज्यते विश्ववारः ।
शोचिष्केशो घृतनिर्णिक् पावकः सुयज्ञो अग्निर्यजथाय देवान् ६००

यथायजो होत्रमग्ने पृथिव्या यथा दिवो जातवेदश् चिकित्वान् ।
एवानेन हविषा यक्षि देवान् मनुष्वद् यज्ञं प्र तिरेममद्य ६०१

त्रीण्यायूंषि तव जातवेदस् तिस्र आजानीरुषसस् ते अग्ने ।
ताभिर्देवानामवो यक्षि विद्वान् अथा भव यजमानाय शं योः ६०२

अग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस् त्वेड्यं जातवेदः ।
त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिम् ६०३

यस् त्वद्धोता पूर्वो अग्ने यजीयान् द्विता च सत्ता स्वधया च शंभुः ।
तस्यानु धर्म प्र यजा चिकित्वो अथा नो धा अध्वरं देववीतौ ६०४

॥ ७२ ॥ (ऋ० ३ । १८ । १-५)

भवा नो अग्ने सुमना उपेतौ सखेव सख्ये पितरेव साधुः ।
पुरुद्रुहो हि क्षितयो जनानां प्रति प्रतीचीर्दहतादरातीः ६०५

तपो ष्वग्ने अन्तराँ अमित्रान् तपा शंसमररुषः परस्य ।
तपो वसो चिकितानो अचित्तान् वि ते तिष्ठन्तामजरा अयासः ६०६

इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय ।
यावदीशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम् ६०७

उच्छोचिषा सहसस्पुत्र स्तुतो बृहद् वयः शशमानेषु धेहि ।
रेवदग्ने विश्वामित्रेषु शं योर् मर्मृज्मा ते तन्वं भूरि कृत्वः ६०८

कृधि रत्नं सुसनितर्धनानां स घेदग्ने भवसि यत् समिद्धः ।
स्तोतुर्दुरोणे सुभगस्य रेवत् सृप्रा करस्ना दधिषे वपूंषि ६०९

॥ ७३ ॥ (ऋ० ३ । १९ । १-५) [६१०—६२६] गाथी कौशिकः ।

अग्निं होतारं प्र वृणे मियेधे गृत्सं कविं विश्वविदममूरम् ।
स नो यक्षद् देवताता यजीयान् राये वाजाय वनते मघानि ६१०

प्र ते अग्ने हविष्मतीमियर्मि अच्छा सुद्युम्नां रातिनीं घृताचीम् ।
प्रदक्षिणिद् देवतातिमुराणः सं रातिभिर्वसुभिर्यज्ञमश्रेत् ६११

स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः ।
अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश् च वस्वः ६१२

भूरीणि हि त्वे दधिरे अनीका अग्ने देवस्य यज्यवो जनासः ।
स आ वह देवतातिं यविष्ठ शर्धो यदद्य दिव्यं यजासि ६१३

यत् त्वा होतारमनजन् मियेधे निषादयन्तो यजथाय देवाः ।
स त्वं नो अग्नेऽवितेह बोधि अधि श्रवांसि धेहि नस् तनूषु ६१४

॥ ७४ ॥ (ऋ० ३ । २० । २—४)

अग्ने त्री ते वाजिना त्री षधस्था तिस्रस् ते जिह्वा ऋतजात पूर्वीः ।
तिस्र उ ते तन्वो देववातास् ताभिर्नः पाहि गिरो अप्रयुच्छन् ६१५
अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य नाम ।
याश् च माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबन्धो ६१६
अग्निर्नेता भग इव क्षितीनां दैवीनां देव ऋतुपा ऋतावा ।
स वृत्रहा सनयो विश्ववेदाः पर्षद् विश्वाति दुरिता गृणन्तम् ६१७

॥ ७५ ॥ (ऋ० ३ । २१ । १-५)

६१८, ६२१ त्रिष्टुप्, ६१९-२० अनुष्टुप्, ६२२ विराड्रूपा सतोबृहती ।

इमं नो यज्ञममृतेषु धेहि इमा हव्या जातवेदो जुषस्व ।
स्तोकानामग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य ६१८
घृतवन्तः पावक ते स्तोकाः श्चोतन्ति मेदसः ।
स्वधर्मन् देववीतये श्रेष्ठं नो धेहि वार्यम् ६१९
तुभ्यं स्तोका घृतश्चुतो अग्ने विप्राय सन्त्य ।
ऋषिः श्रेष्ठः समिध्यसे यज्ञस्य प्राविता भव ६२०
तुभ्यं श्चोतन्त्यध्रिगो शचीवः स्तोकासो अग्ने मेदसो घृतस्य ।
कविशस्तो बृहता भानुनागा हव्या जुषस्व मेधिर ६२१
ओजिष्ठं ते मध्यतो मेद उद्भृतं प्र ते वयं ददामहे ।
श्चोतन्ति ते वसो स्तोका अधि त्वचि प्रति तान् देवशो विहि ६२२

॥ ७६ ॥ (ऋ० ३ । २२ । १-५) ६२६ पुरीष्याग्नयः । त्रिष्टुप्, ६२६ अनुष्टुप् ।

अयं सो अग्निर्यस्मिन् त्सोमम् इन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रिणं वाजमत्यं न सप्तिं ससवान् त्सन् त्स्तूयसे जातवेदः ६२३
अग्ने यत् ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ६२४

अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचिषे धिष्ण्या ये ।
या रोचने परस्तात् सूर्यस्य याश् चावस्तादुपतिष्ठन्त आपः ६२५
पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः ।
जुषन्तां यज्ञमद्रुहो अनमीवा इषो महीः ६२६
इळामग्ने० (४६९)

॥ ७७ ॥ (ऋ० ३ । २३ । १-५)

६२७-६३० देवश्रवा देववातश्च भारतौ । त्रिष्टुप्, ६२९ सतोबृहती ।

निर्मथितः सुधित आ सधस्थे युवा कविरध्वरस्य प्रणेता ।
जूर्यत्स्वग्निरजरो वनेष्वत्रा दधे अमृतं जातवेदाः ६२७
अमन्थिष्टां भारता रेवदग्निं देवश्रवा देववातः सुदक्षम् ।
अग्ने वि पश्य बृहताभि रायेषां नो नेता भवतादनु द्यून् ६२८
दश क्षिपः पूर्व्यं सीमजीजनन् त्सुजातं मातृषु प्रियम् ।
अग्निं स्तुहि दैववातं देवश्रवो यो जनानामसद् वशी ६२९
नि त्वा दधे वर आ पृथिव्या इळायास्पदे सुदिनत्वे अह्नाम् ।
दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि ६३०
इळामग्ने० (४६९)

॥ ७८ ॥ (ऋग्वेदस्य चतुर्थं मण्डलं , सूक्तं १, मंत्राः १, ६-२०)
[६३१—७५५] वामदेवो गौतमः । त्रिष्टुप्, ६३१ अष्टिः ।

त्वां ह्यग्ने सदमित् समन्यवो देवासो देवमरतिं न्येरिर इति क्रत्वा न्येरिरे ।
अमर्त्यं यजत मर्त्येष्वा देवमादेवं जनत प्रचेतसं विश्वमादेवं जनत प्रचेतसम् ६३१
अस्य श्रेष्ठा सुभगस्य संदृग् देवस्य चित्रतमा मर्त्येषु ।
शुचि घृतं न तप्तमघ्न्यायाः स्पार्हा देवस्य मंहनेव धेनोः ६३२
त्रिरस्य ता परमा सन्ति सत्या स्पार्हा देवस्य जनिमान्यग्नेः ।
अनन्ते अन्तः परिवीत आगाच्छुचिः शुक्रो अर्यो रोरुचानः ६३३
स दूतो विश्वेदभि वष्टि सद्मा होता हिरण्यरथो रंसुजिह्वः ।
रोहिदश्वो वपुष्यो विभावा सदा रण्वः पितुमतीव संसत् ६३४

स चेतयन् मनुषो यज्ञबन्धुः प्र तं मह्या रशनया नयन्ति।
स क्षेत्यस्य दुर्यासु साधन् देवो मर्तस्य सधनित्वमाप ६३५
स तू नो अग्निर्नयतु प्रजानन् अच्छा रत्नं देवभक्तं यदस्य।
धिया यद् विश्वे अमृता अकृण्वन् द्यौष्पिता जनिता सत्यमुक्षन् ६३६
स जायत प्रथमः पस्त्यासु महो बुध्ने रजसो अस्य योनौ।
अपादशीर्षा गुहमानो अन्ता आयोयुवानो वृषभस्य नीळे ६३७
प्र शर्ध आर्त प्रथमं विपन्याँ ऋतस्य योना वृषभस्य नीळे।
स्पार्हो युवा वपुष्यो विभावा सप्त प्रियासोऽजनयन्त वृष्णे ६३८
अस्माकमत्र पितरो मनुष्या अभि प्र सेदुर्ऋतमाशुषाणाः।
अश्मव्रजाः सुदुघा वव्रे अन्तर् उदुस्रा आजन्नुषसो हुवानाः ६३९
ते मर्मृजत ददृवांसो अद्रिं तदेषामन्ये अभितो वि वोचन्।
पश्वयन्त्रासो अभि कारमर्चन् विदन्त ज्योतिश् चकृपन्त धीभिः ६४०
ते गव्यता मनसा दृध्रमुब्धं गा येमानं परि षन्तमद्रिम्।
दृळ्हं नरो वचसा दैव्येन व्रजं गोमन्तमुशिजो वि वव्रुः ६४१
ते मन्वत प्रथमं नाम धेनोस् त्रिः सप्त मातुः परमाणि विन्दन्।
तज्जानतीरभ्यनूषत व्रा आविर्भुवदरुणीर्यशसा गोः ६४२
नेशत् तमो दुधितं रोचत द्यौर् उद् देव्या उषसो भानुरर्त।
आ सूर्यो बृहतस् तिष्ठदज्राँ ऋजु मर्तेषु वृजिना च पश्यन् ६४३
आदित् पश्चा बुबुधाना व्यख्यन् आदिद् रत्नं धारयन्त द्युभक्तम्।
विश्वे विश्वासु दुर्यासु देवा मित्र धिये वरुण सत्यमस्तु ६४४
अच्छा वोचेय शुशुचानमग्निं होतारं विश्वभरसं यजिष्ठम्।
शुच्यूधो अतृणन्न गवाम् अन्धो न पूतं परिषिक्तमंशोः ६४५
विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम्।
अग्निर्देवानामव आवृणानः सुमृळीको भवतु जातवेदाः ६४६

॥ ७९ ॥ (ऋ० ४।२।१-२०) त्रिष्टुप्।

यो मर्त्येष्वमृत ऋतावा देवो देवेष्वरतिर्निधायि।
होता यजिष्ठो मह्ना शुचध्यै हव्यैरग्निर्मनुष ईरयध्यै ६४७

इह त्वं सूनो सहसो नो अद्य जातो जाताँ उभयाँ अन्तरग्ने ।
दूत ईयसे युयुजान ऋष्व ऋजुमुष्कान् वृषणः शुक्रांश्च ६४८
अत्या वृधस्नू रोहिता घृतस्नू ऋतस्य मन्ये मनसा जविष्ठा ।
अन्तरीयसे अरुषा युजानो युष्मांश्च देवान् विश आ च मर्तान् ६४९
अर्यमणं वरुणं मित्रमेषाम् इन्द्राविष्णू मरुतो अश्विनोत ।
स्वश्वो अग्ने सुरथः सुराधा एदु वह सुहविषे जनाय ६५०
गोमाँ अग्नेऽविमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।
इळावाँ एषो असुर प्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान् ६५१
यस् त इध्मं जभरत् सिष्विदानो मूर्धानं वा ततपते त्वाया ।
भुवस् तस्य स्वतवाँः पायुरग्ने विश्वस्मात् सीमघायत उरुष्य ६५२
यस् ते भरादन्नियते चिदन्नं निशिषन् मन्द्रमतिथिमुदीरत् ।
आ देवयुरिनधते दुरोणे तस्मिन् रयिर्ध्रुवो अस्तु दास्वान् ६५३
यस् त्वा दोषा य उषसि प्रशंसात् प्रियं वा त्वा कृणवते हविष्मान् ।
अश्वो न स्वे दम आ हेम्यावान् तमंहसः पीपरो दाश्वांसम् ६५४
यस् तुभ्यमग्ने अमृताय दाशद् दुवस् त्वे कृणवते यतस्रुक् ।
न स राया शशमानो वि योषत् नैनमंहः परि वरदघायोः ६५५
यस्य त्वमग्ने अध्वरं जुजोषो देवो मर्तस्य सुधितं रराणः ।
प्रीतेदसद्धोत्रा सा यविष्ठ असाम यस्य विधतो वृधासः ६५६
चित्तिमचित्तिं चिनवद् वि विद्वान् पृष्ठेव वीता वृजिना च मर्तान्
राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्य ६५७
कविं शशासुः कवयोऽदब्धा निधारयन्तो दुर्यास्वायोः ।
अतस् त्वं दृश्याँ अग्न एतान् पड्भिः पश्येरद्भुताँ अर्य एवैः ६५८
त्वमग्ने वाघते सुप्रणीतिः सुतसोमाय विधते यविष्ठ ।
रत्नं भर शशमानाय घृष्वे पृथु श्चन्द्रमवसे चर्षणिप्राः ६५९
अधा ह यद् वयमग्ने त्वाया पड्भिर्हस्तेभिश् चकृमा तनूभिः ।
रथं न क्रन्तो अपसा भुरिजोर् ऋतं येमुः सुध्य आशुषाणाः ६६०

* पृथु चन्द्रम् अवसे (पदानि)

अधा मातुरुपसः सप्त विप्रा जायेमहि प्रथमा वेधसो नॄन्।
दिवस्पुत्रा अङ्गिरसो भवेम अद्रिं रुजेम धनिनं शुचन्तः ६६१

अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः।
शुचीदयन् दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ६६२

सुकर्माणः सुरुचो देवयन्तो अयो न देवा जनिमा धमन्तः।
शुचन्तो अग्निं ववृधन्त इन्द्रम् ऊर्वं गव्यं परिषदन्तो अग्मन् ६६३

आ यूथेव क्षुमति पश्वो अख्यद् देवानां यज् जनिमान्त्युग्र।
मर्तानां चिदुर्वशीरकृप्रन् वृधे चिदर्य उपरस्यायोः ६६४

अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः।
अनूनमग्निं पुरुधा सुश्चन्द्रं देवस्य मर्मृजतश् चारु चक्षुः ६६५

एता ते अग्न उचथानि वेधो अवोचाम कवये ता जुषस्व।
उच्छोचस्व कृणुहि वस्यसो नो महो रायः पुरुवार प्र यन्धि ६६६

॥ ८० ॥ (ऋ० ४ । ३ । २-१६)

अयं योनिश् चकृमा यं वयं ते जायेव पत्य उशती सुवासाः।
अर्वाचीनः परिवीतो नि षीद इमा उ ते स्वपाक प्रतीचीः ६६७

आशृण्वते अदृपिताय मन्म नृचक्षसे सुमृळीकाय वेधः।
देवाय शस्तिममृताय शंस ग्रावेव सोता मधुषुद् यमीळे ६६८

त्वं चिन्नः शम्या अग्ने अस्या ऋतस्य बोध्यृतचित् स्वाधीः।
कदा त उक्था सधमाद्यानि कदा भवन्ति सख्या गृहे ते ६६९

कथा ह तद् वरुणाय त्वमग्ने कथा दिवे गर्हसे कन्न आगः।
कथा मित्राय मीळ्हुषे पृथिव्यै ब्रवः कदर्यम्णे कद् भगाय ६७०

कद्धिष्ण्यासु वृधसानो अग्ने कद् वाताय प्रतवसे शुभंये।
परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने ६७१

कथा महे पुष्टिंभराय पूष्णे कद् रुद्राय सुमखाय हविर्दे।
कद् विष्णव उरुगायाय रेतो ब्रवः कदग्ने शरवे बृहत्यै ६७२

कथा शर्धाय मरुतामृताय कथा सूरे बृहते पृच्छ्यमानः ।
प्रति ब्रवोऽदितये तुराय साधा दिवो जातवेदश् चिकित्वान् ६७३

ऋतेन ऋतं नियतमीळ आ गोर् आमा सचा मधुमत् पक्वमग्ने ।
कृष्णा सती रुशता धासिनैषा जामर्येण पयसा पीपाय ६७४

ऋतेन हि ष्मा वृषभश् चिदक्तः पुमाँ अग्निः पयसा पृष्ठ्येन ।
अस्पन्दमानो अचरद् वयोधा वृषा शुक्रं दुदुहे पृश्निरूधः ६७५

ऋतेनाद्रिं व्यसन् भिदन्तः समङ्गिरसो नवन्त गोभिः ।
शुनं नरः परि षदन्नुषासम् आविः स्वरभवज् जाते अग्नौ ६७६

ऋतेन देवीरमृता अमृक्ता अर्णोभिरापो मधुमद्भिरग्ने ।
वाजी न सर्गेषु प्रस्तुभानः प्र सदमित् स्रवितवे दधन्युः ६७७

मा कस्य यक्षं सदमिद्धुरो गा मा वेशस्य प्रमिनतो मापेः ।
मा भ्रातुरग्ने अनृजोर्ऋणं वेर् मा सख्युर्दक्षं रिपोर्भुजेम ६७८

रक्षा णो अग्ने तव रक्षणेभी रारक्षाणः सुमख प्रीणानः ।
प्रति ष्फुर वि रुज वीड्वंहो जहि रक्षो महि चिद् वावृधानम् ६७९

एभिर्भव सुमना अग्ने अर्कैर् इमान् त्स्पृश मन्मभिः शूर वाजान् ।
उत ब्रह्माण्यङ्गिरो जुषस्व सं ते शस्तिर्देववाता जरेत ६८०

एता विश्वा विदुषे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि ।
निवचना कवये काव्यानि अशंसिषं मतिभिर्विप्र उक्थैः ६८१

॥ ८१ ॥ (ऋ० ४ । ६ । १-११)

ऊर्ध्व ऊ षु णो अध्वरस्य होतर् अग्ने तिष्ठ देवताता यजीयान् ।
त्वं हि विश्वमभ्यसि मन्म प्र वेधसश् चित् तिरसि मनीषाम् ६८२

अमूरो होता न्यसादि विक्षु अग्निर्मन्द्रो विदथेषु प्रचेताः ।
ऊर्ध्वं भानुं सवितेवाश्रेन् मेतेव धूमं स्तभायदुप द्याम् ६८३

यता सुजूर्णी रातिनी घृताची प्रदक्षिणिद् देवतातिमुराणः ।
उदु स्वरुर्नवजा नाक्रः पश्वो अनक्ति सुधितः सुमेकः ६८४

स्तीर्णे बर्हिषि समिधाने अग्ना ऊर्ध्वो अध्वर्युर्जुजुषाणो अस्थात् ।
पर्यग्निः पशुपा न होता त्रिविष्ट्येति प्रदिव उराणः ६८५

परि त्मना मितद्रुरेति होता अग्निर्मन्द्रो मधुवचा ऋतावा ।
द्रवन्त्यस्य वाजिनो न शोका भयन्ते विश्वा भुवना यदभ्राट् ६८६

भद्रा ते अग्ने स्वनीक संदृग् घोरस्य सतो विषुणस्य चारुः ।
न यत् ते शोचिस् तमसा वरन्त न ध्वस्मानस् तन्वी३ रेप आ धुः ६८७

न यस्य सातुर्जनितोरवारि न मातरापितरा नू चिदिष्टौ ।
अधा मित्रो न सुधितः पावको अग्निर्दीदाय मानुषीषु विक्षु ६८८

द्विर्यं पञ्च जीजनन् त्संवसानाः स्वसारो अग्निं मानुषीषु विक्षु ।
उषर्बुधमथर्यो३ न दन्तं शुक्रं स्वासं परशुं न तिग्मम् ६८९

तव त्ये अग्ने हरितो घृतस्ना रोहितास ऋज्वञ्चः स्वञ्चः ।
अरुषासो वृषण ऋजुमुष्का आ देवतातिमह्वन्त दस्माः ६९०

ये ह त्ये ते सहमाना अयासस् त्वेषासो अग्ने अर्चयश् चरन्ति ।
श्येनासो न दुवसनासो अर्थं तुविष्वणसो मारुतं न शर्धः ६९१

अकारि ब्रह्म समिधान तुभ्यं शंसात्युक्थं यजते व्यू धाः ।
होतारमग्निं मनुषो नि षेदुर् नमस्यन्त उशिजः शंसमायोः । ६९२

॥ ८२ ॥ (ऋ० ४ । ७ । १-११) त्रिष्टुप्, ६९३ जगती, ६९४-९८ अनुष्टुप् ।

अयमिह प्रथमो धायि धातृभिर् होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर् वनेषु चित्रं विभ्वं विशेविशे ६९३

अग्ने कदा त आनुषग् भुवद् देवस्य चेतनम् ।
अधा हि त्वा जगृभ्रिरे मर्तासो विक्ष्वीड्यम् ६९४

ऋतावानं विचेतसं पश्यन्तो द्यामिव स्तृभिः ।
विश्वेषामध्वराणां हस्कर्तारं दमेदमे ६९५

आशुं दूतं विवस्वतो विश्वा यश् चर्षणीरभि ।
आ जभ्रुः केतुमायवो भृगवाणं विशेविशे ६९६

तमग्निं होतारमानुषक् चिकित्वांसं नि षेदिरे ।
रण्वं पावकशोचिषं यजिष्ठं सप्त धामभिः ६९७

तं शश्वतीषु मातृषु वन आ वीतमश्रितम् ।
चित्रं सन्तं गुहा हितं सुवेदं कूचिदर्थिनम् ६९८

ससस्य यद् वियुता सस्मिन्नूधन्न् ऋतस्य धामन् रणयन्त देवाः ।
महाँ अग्निर्नमसा रातहव्यो वेरध्वराय सदमिदृतावा ६९९

वेरध्वरस्य दूत्यानि विद्वान् उभे अन्ता रोदसी संचिकित्वान् ।
दूत ईयसे प्रदिव उराणो विदुष्टरो दिव आरोधनानि ७००

कृष्णं त एम रुशतः पुरो भाश् चरिष्ण्वर्चिर्वपुषामिदेकम् ।
यदप्रवीता दधते ह गर्भं सद्यश् चिज् जातो भवसीदु दूतः ७०१

सद्यो जातस्य ददृशानमोजो यदस्य वातो अनुवाति शोचिः ।
वृणक्ति तिग्मामतसेषु जिह्वां स्थिरा चिदन्ना दयते वि जम्भैः ७०२

तृषु यदन्ना तृषुणा ववक्ष तृषुं दूतं कृणुते यह्वो अग्निः ।
वातस्य मेळिं सचते निजूर्वन् आशुं न वाजयते हिन्वे अर्वा ७०३

॥ ८३ ॥ (ऋ० ४ । ८ । १-८) गायत्री ।

दूतं वो विश्ववेदसं हव्यवाहममर्त्यम् । यजिष्ठमृञ्जसे गिरा ७०४
स हि वेदा वसुधितिं महाँ आरोधनं दिवः । स देवाँ एह वक्षति ७०५
स वेद देव आनमं देवाँ ऋतायते दमे । दाति प्रियाणि चिद् वसु ७०६
स होता सेदु दूत्यं चिकित्वाँ अन्तरीयते । विद्वाँ आरोधनं दिवः ७०७
ते स्याम ये अग्नये ददाशुर्हव्यदातिभिः । य ईं पुष्यन्त इन्धते ७०८
ते राया ते सुवीर्यैः ससवांसो वि शृण्विरे । ये अग्ना दधिरे दुवः ७०९
अस्मे रायो दिवेदिवे सं चरन्तु पुरुस्पृहः । अस्मे वाजास ईरताम् ७१०
स विप्रश् चर्षणीनां शवसा मानुषाणाम् । अति क्षिप्रेव विध्यति ७११

॥ ८४ ॥ (ऋ० ४ । ९ । १-८)

अग्ने मृळ महाँ असि य ईमा देवयुं जनम् । इयेथ बर्हिरासदम् ७१२
स मानुषीषु दूळभो विक्षु प्रावीरमर्त्यः । दूतो विश्वेषां भुवत् ७१३

स सद्म परि णीयते होता मन्द्रो दिविष्टिषु । उत पोता नि षीदति ७१४
उत ग्ना अग्निरध्वर उतो गृहपतिर्दमे । उत ब्रह्मा नि षीदति ७१५
वेषि ह्यध्वरीयताम् उपवक्ता जनानाम् । हव्या च मानुषाणाम् ७१६
वेषीद् वस्य दूत्यं१ यस्य जुजोषो अध्वरम् । हव्यं मर्तस्य वोळ्हवे ७१७
अस्माकं जोष्यध्वरम् अस्माकं यज्ञमङ्गिरः । अस्माकं शृणुधी हवम् ७१८
परि ते दूळभो रथो अस्माँ अश्नोतु विश्वतः । येन रक्षसि दाशुषः ७१९

॥ ८५ ॥ (ऋ० ४ । १० । १-८)

पदपंक्तिः, (७२३, ७२५, ७२६ उष्णिग्वा,) ७२४ महापदपंक्तिः, ७२७ उष्णिक् ।

अग्ने तमद्य अश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम् । ऋध्यामा त ओहैः ७२०
अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथीर्ऋतस्य बृहतो बभूथ ७२१
एभिर्नो अर्कैर् भवा नो अर्वाङ् स्वर्ण ज्योतिः । अग्ने विश्वेभिः सुमना अनीकैः ७२२
आभिष्टे अद्य गीर्भिर्गृणन्तो अग्ने दाशेम । प्र ते दिवो न स्तनयन्ति शुष्माः ७२३
तव स्वादिष्ठ अग्ने संदृष्टिर् इदा चिदह्न इदा चिदक्तोः । श्रिये रुक्मो न रोचत उपाके ७२४
घृतं न पूतं तनूररेपाः शुचि हिरण्यम् । तत् ते रुक्मो न रोचत स्वधावः ७२५
कृतं चिद्धि ष्मा सनेमि, द्वेषो अग्न इनोषि मर्तात् । इत्था यजमानादृतावः ७२६
शिवा नः सख्या सन्तु, भ्रात्रा अग्ने देवेषु युष्मे । सा नो नाभिः सदने सस्मिन्नूधन् ७२७

॥ ८६ ॥ (ऋ० ४ । ११ । १-६) त्रिष्टुप् ।

भद्रं ते अग्ने सहसिन्ननीकम् उपाक आ रोचते सूर्यस्य ।
रुशद् दृशे ददृशे नक्तया चिद् अरूक्षितं दृश आ रूपे अन्नम् ७२८

वि षाह्यग्ने गृणते मनीषां खं वेपसा तुविजात स्तवानः ।
विश्वेभिर्यद् वावनः शुक्र देवैस् तन्नो रास्व सुमहो भूरि मन्म ७२९

त्वदग्ने काव्या त्वन्मनीषास् त्वदुक्था जायन्ते राध्यानि ।
त्वदेति द्रविणं वीरपेशा इत्थाधिये दाशुषे मर्त्याय ७३०

त्वद् वाजी वाजंभरो विहाया अभिष्टिकृज् जायते सत्यशुष्मः ।
त्वद् रयिर्देवजूतो मयोभुस् त्वदाशुर्जूजुवाँ अग्ने अर्वा ७३१

त्वामग्ने प्रथमं देवयन्तो देवं मर्ता अमृत मन्द्रजिह्वम् ।
द्वेषोयुतमा विवासन्ति धीभिर् दमूनसं गृहपतिममूरम् ७३२

आरे अस्मदमतिमारे अंह आरे विश्वां दुर्मतिं यन्निपासि ।
दोषा शिवः सहसः सूनो अग्ने यं देव आ चित् सचसे स्वस्ति ७३३

॥ ८७ ॥ (ऋ० ४ । १२ । १-६)

यस् त्वामग्न इनधते यतस्रुक् त्रिस् ते अन्नं कृणवत् सस्मिन्नहन् ।
स सु द्युम्नैरभ्यस्तु प्रसक्षत् तव क्रत्वा जातवेदश् चिकित्वान् ७३४
इध्मं यस् ते जभरच्छश्रमाणो महो अग्ने अनीकमा सपर्यन् ।
स इधानः प्रति दोषामुषासं पुष्यन् रयिं सचते घ्नन्नमित्रान् ७३५
अग्निरीशे बृहतः क्षत्रियस्य अग्निर्वाजस्य परमस्य रायः ।
दधाति रत्नं विधते यविष्ठो व्यानुषङ् मर्त्याय स्वधावान् ७३६
यच्चिद्धि ते पुरुषत्रा यविष्ठ अचित्तिभिश् चकृमा कच्चिदागः ।
कृधी ष्व१स्माँ अदितेरनागान् व्येनांसि शिश्रथो विष्वगग्ने ७३७
महश् चिदग्न एनसो अभीके ऊर्वाद् देवानामुत मर्त्यानाम् ।
मा ते सखायः सदमिद् रिषाम यच्छा तोकाय तनयाय शं योः ७३८
यथा ह त्यद् वसवो गौर्यं चित् पदि षिताममुञ्चता यजत्राः ।
एवो ष्व१स्मन्मुञ्चता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ७३९

॥ ८८ ॥ (ऋ० ४ । १३ । १-५)

प्रत्यग्निरुषसामग्रमख्यद् विभातीनां सुमना रत्नधेयम् ।
यातमश्विना सुकृतो दुरोणम् उत् सूर्यो ज्योतिषा देव एति ७४०
ऊर्ध्वं भानुं सविता देवो अश्रेद् द्रप्सं दविध्वद् गविषो न सत्वा ।
अनु व्रतं वरुणो यन्ति मित्रो यत् सूर्यं दिव्यारोहयन्ति ७४१
यं सीमकृण्वन् तमसे विपृचे ध्रुवक्षेमा अनवस्यन्तो अर्थम् ।
तं सूर्यं हरितः सप्त यह्वीः स्पशं विश्वस्य जगतो वहन्ति ७४२
वहिष्ठेभिर्विहरन् यासि तन्तुम् अवव्ययन्नसितं देव वस्म ।
दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस् तमो अप्स्व१न्तः ७४३
अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न ।
कया याति स्वधया को ददर्श दिवः स्कम्भः समृतः पाति नाकम् ७४४

॥ ८९ ॥ (ऋ० ४ । १४ । १—५)

प्रत्यग्निरुषसो जातवेदा अख्यद् देवो रोचमाना महोभिः ।
आ नासत्योरुगाया रथेन इमं यज्ञमुप नो यातमच्छ ७४५
ऊर्ध्वं केतुं सविता देवो अश्रेज् ज्योतिर्विश्वस्मै भुवनाय कृण्वन् ।
आप्रा द्यावापृथिवी अन्तरिक्षं वि सूर्यो रश्मिभिश् चेकितानः ७४६
आवहन्त्यरुणीर्ज्योतिषागान् मही चित्रा रश्मिभिश् चेकिताना ।
प्रबोधयन्ती सुविताय देवी उषा ईयते सुयुजा रथेन ७४७
आ वां वहिष्ठा इह ते वहन्तु रथा अश्वास उषसो व्युष्टौ ।
इमे हि वां मधुपेयाय सोमा अस्मिन् यज्ञे वृषणा मादयेथाम् ७४८
अनायतो० (७४४)

॥ ९० ॥ (ऋ० ४ । १५ । १-६) गायत्री ।

अग्निर्होता नो अध्वरे वाजी सन् परि णीयते । देवो देवेषु यज्ञियः ७४९
परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिव । आ देवेषु प्रयो दधत् ७५०
परि वाजपतिः कविर् अग्निर्हव्यान्यक्रमीत् । दधद् रत्नानि दाशुषे ७५१
अयं यः सृञ्जये पुरो दैववाते समिध्यते । द्युमाँ अमित्रदम्भनः ७५२
अस्य घा वीर ईवतो अग्नेरीशीत मर्त्यः । तिग्मजम्भस्य मीळ्हुषः ७५३
तमर्वन्तं न सानसिम् अरुषं न दिवः शिशुम् । मर्मृज्यन्ते दिवेदिवे ७५४

॥ ९१ ॥ (ऋग्वेदस्य पञ्चमं मण्डलं, सूक्तं १, मन्त्राः १-१२)
(७५५-७६६) बुधगविष्ठिरावात्रेयौ । त्रिष्टुप् ।

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ७५५
अबोधि होता यजथाय देवान् ऊर्ध्वो अग्निः सुमनाः प्रातरस्थात् ।
समिद्धस्य रुशदर्शि पाजो महान् देवस् तमसो निरमोचि ७५६
यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः ।
आद् दक्षिणा युज्यते वाजयन्ती उत्तानामूर्ध्वो अधयज् जुहूभिः ७५७

अग्निमच्छा देवयतां मनांसि चक्षूंषीव सूर्ये सं चरन्ति ।
यदीं सुवाते उषसा विरूपे श्वेतो वाजी जायते अग्रे अह्नाम् ७५८

जनिष्ट हि जेन्यो अग्रे अह्नां हितो हितेष्वरुषो वनेषु ।
दमेदमे सप्त रत्ना दधानो अग्निर्होता नि षसादा यजीयान् ७५९

अग्निर्होता न्यसीदद् यजीयान् उपस्थे मातुः सुरभा उ लोके ।
युवा कविः पुरुनिःष्ठ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः ७६०

प्र णु त्यं विप्रमध्वरेषु साधुम् अग्निं होतारमीळते नमोभिः ।
आ यस् ततान रोदसी ऋतेन नित्यं मृजन्ति वाजिनं घृतेन ७६१

मार्जाल्यो मृज्यते स्वे दमूनाः कविप्रशस्तो अतिथिः शिवो नः ।
सहस्रशृङ्गो वृषभस् तदोजा विश्वाँ अग्ने सहसा प्रास्यन्यान् ७६२

प्र सद्यो अग्ने अत्येष्यन्यान् आविर्यस्मै चारुतमो बभूथ ।
ईळेन्यो वपुष्यो विभावा प्रियो विशामतिथिर्मानुषीणाम् ७६३

तुभ्यं भरन्ति क्षितयो यविष्ठ बलिमग्ने अन्तित ओत दूरात् ।
आ भन्दिष्ठस्य सुमतिं चिकिद्धि बृहत् ते अग्ने महि शर्म भद्रम् ७६४

आद्य रथं भानुमो भानुमन्तम् अग्ने तिष्ठ यजतेभिः समन्तम् ।
विद्वान् पथीनामुर्व१न्तरिक्षम् एह देवान् हविरद्याय वक्षि ७६५

अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत् ७६६

॥ ९२ ॥ (ऋ० ५ । २ । १-१२)

(७६७-७७८) कुमार आत्रेयः, वृशो वा जानः, उभौ वा; २, ९ वृशो जानः । त्रिष्टुप् , १२ शक्वरी ।

कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे ।
अनीकमस्य न मिनज्जनासः पुरः पश्यन्ति निहितमरतौ ७६७

कमेतं त्वं युवते कुमारं पेषी बिभर्षि महिषी जजान ।
पूर्वीर्हि गर्भः शरदो ववर्ध अपश्यं जातं यदसूत माता ७६८

हिरण्यदन्तं शुचिवर्णमारात् क्षेत्रादपश्यमायुधा मिमानम् ।
ददानो अस्मा अमृतं विपृक्वत् किं मामनिन्द्राः कृणवन्ननुक्थाः ७६९

क्षेत्रादपश्यं सनुतश्चरन्तं सुमद्यूथं न पुरु शोभमानम् ।
न ता अगृभ्रन्नजनिष्ट हि षः पलिक्नीरिद्युवतयो भवन्ति ७७०

के मे मर्यकं वि यवन्त गोभिर् न येषां गोपा अरणश्चिदास ।
य ईं जगृभुरव ते सृजन्त्व् आजाति पश्व उप नश्चिकित्वान् ७७१

वसां राजानं वसतिं जनानाम् अरातयो नि दधुर्मर्त्येषु ।
ब्रह्माण्यत्रेरव तं सृजन्तु निन्दितारो निन्द्यासो भवन्तु ७७२

शुनश्चिच्छेपं निदितं सहस्राद् यूपादमुञ्चो अशमिष्ट हि षः ।
एवास्मदग्ने वि मुमुग्धि पाशान् होतश्चिकित्व इह तू निषद्य ७७३

हृणीयमानो अप हि मदैयेः प्र मे देवानां व्रतपा उवाच ।
इन्द्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगाम् ७७४

वि ज्योतिषा बृहता भात्यग्निर् आविर्विश्वानि कृणुते महित्वा ।
प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ७७५

उत स्वानासो दिवि षन्त्वग्नेस् तिग्मायुधा रक्षसे हन्तवा उ ।
मदे चिदस्य प्र रुजन्ति भामा न वरन्ते परिबाधो अदेवीः ७७६

एतं ते स्तोमं तुविजात विप्रो रथं न धीरः स्वपा अतक्षम् ।
यदीदग्ने प्रति त्वं देव हर्याः स्वर्वतीरप एना जयेम ७७७

तुविग्रीवो वृषभो वावृधानो अशत्र्व१र्यः समजाति वेदः ।
इतीममग्निममृता अवोचन् बर्हिष्मते मनवे शर्म यंसद्धविष्मते मनवे शर्म यंसत् ७७८

॥ ९३ ॥ (ऋ० ५ । ३ । १-२, ४-१२)

(७७९-८१०) वसुश्रुत आत्रेयः । ७७९ विराट्, ७८०-७८९ त्रिष्टुप् ।

त्वमग्ने वरुणो जायसे यत् त्वं मित्रो भवसि यत्समिद्धः ।
त्वे विश्वे सहसस्पुत्र देवास् त्वमिन्द्रो दाशुषे मर्त्याय ७७९

त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन्गुह्यं बिभर्षि ।
अञ्जन्ति मित्रं सुधितं न गोभिर् यद्दंपती समनसा कृणोषि ७८०

तव श्रिया सुदृशो देव देवाः पुरू दधाना अमृतं सपन्त ।
होतारमग्निं मनुषो नि षेदुर् दशस्यन्त उशिजः शंसमायोः ७८१

न त्वद्धोता पूर्वो अग्ने यजीयान् न काव्यैः परो अस्ति स्वधावः ।
विशश् च यस्या अतिथिर्भवासि स यज्ञेन वनवद् देव मर्तान् ७८२

वयमग्ने वनुयाम त्वोता वसूयवो हविषा बुध्यमानाः ।
वयं समर्ये विदथेष्वह्नां वयं राया सहसस्पुत्र मर्तान् ७८३

यो न आगो अभ्येनो भराति अधीदघमघशंसे दधात ।
जही चिकित्वो अभिशस्तिमेताम् अग्ने यो नो मर्चयति द्वयेन ७८४

त्वामस्या व्युषि देव पूर्वे दूतं कृण्वाना अयजन्त हव्यैः ।
संस्थे यदग्न ईयसे रयीणां देवो मर्तैर्वसुभिरिध्यमानः ७८५

अव स्पृधि पितरं योधि विद्वान् पुत्रो यस् ते सहसः सून ऊहे ।
कदा चिकित्वो अभि चक्षसे नो अग्ने कदाँ ऋतचिद् यातयासे ७८६

भूरि नाम वन्दमानो दधाति पिता वसो यदि तज् जोषयासे ।
कुविद् देवस्य सहसा चकानः सुम्नमग्निर्वनते वावृधानः ७८७

त्वमङ्ग जरितारं यविष्ठ विश्वान्यग्ने दुरिताति पर्षि ।
स्तेना अदृश्रन् रिपवो जनासो अज्ञातकेता वृजिना अभूवन् ७८८

इमे यामासस् त्वद्रिगभूवन् वसवे वा तदिदागो अवाचि ।
नाहायमग्निरभिशस्तये नो न रीषते वावृधानः परा दात् ७८९

॥ ९४ ॥ (ऋ० ५ । ४ । १-११) त्रिष्टुप् ।

त्वामग्ने वसुपतिं वसूनाम् अभि प्र मन्दे अध्वरेषु राजन् ।
त्वया वाजं वाजयन्तो जयेम अभि ष्याम पृत्सुतीर्मर्त्यानाम् ७९०

हव्यवाळग्निरजरः पिता नो विभुर्विभावा सुदृशीको अस्मे ।
सुगार्हपत्याः समिषो दिदीहि अस्मध्र्यक् सं मिमीहि श्रवांसि ७९१

विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निम् ।
नि होतारं विश्वविदं दधिध्वे स देवेषु वनते वार्याणि ७९२

जुषस्वाग्न इळया सजोषा यतमानो रश्मिभिः सूर्यस्य ।
जुषस्व नः समिधं जातवेद आ च देवान् हविरद्याय वक्षि ७९३

जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि ७९४

वधेन दस्युं प्र हि चातयस्व वयः कृण्वानस् तन्वेऽ स्वायै ।
पिपर्षि यत् सहसस्पुत्र देवान् त्सो अग्ने पाहि नृतम वाजे अस्मान् ७९५

वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे ।
अस्मे रयिं विश्ववारं समिन्व अस्मे विश्वानि द्रविणानि धेहि ७९६

अस्माकमग्ने अध्वरं जुषस्व सहसः सूनो त्रिषधस्थ हव्यम् ।
वयं देवेषु सुकृतः स्याम शर्मणा नस् त्रिवरूथेन पाहि ७९७

विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरितातिं पर्षि ।
अग्ने अत्रिवन्नमसा गृणानोऽ अस्माकं बोध्यविता तनूनाम् ७९८

यस् त्वा हृदा कीरिणा मन्यमानो अमर्त्यं मर्त्यो जोहवीमि ।
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् ७९९

यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम् ।
अश्विनं स पुत्रिणं वीरवन्तं गोमन्तं रयिं नशते स्वस्ति ८००

॥ ९५ ॥ (ऋ० ५ । ६ । १-१०) पङ्क्तिः ।

अग्निं तं मन्ये यो वसुर् अस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवो अस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ८०१

सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।
समर्वन्तो रघुद्रुवः सं सुजातासः सूरय इषं स्तोतृभ्य आ भर ८०२

अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः ।
अग्नी राये स्वाभुवं स प्रीतो याति वार्यम् इषं स्तोतृभ्य आ भर ८०३

आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
यद्ध स्या ते पनीयसी समिद् दीदयति द्यवि इषं स्तोतृभ्य आ भर ८०४

आ ते अग्न ऋचा हविः शुक्रस्य शोचिषस्पते ।
सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ८०५

प्रो त्ये अग्नयोऽग्निषु विश्वं पुष्यन्ति वार्यम् ।
ते हिन्विरे त इन्विरे त इषण्यन्त्यानुषग् इषं स्तोतृभ्य आ भर ८०६

तव त्ये अग्ने अर्चयो महि व्राधन्त वाजिनः ।
ये पत्वभिः शफानां व्रजा भुरन्त गोनाम् इषं स्तोतृभ्य आ भर ८०७

नवा नो अग्न आ भर स्तोतृभ्यः सुक्षितीरिषः ।
ते स्याम य आनृचुस् त्वादूतासो दमेदम इषं स्तोतृभ्य आ भर ८०८

उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि ।
उतो न उत् पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर ८०९

एवाँ अग्निमजुर्यमुर् गीर्भिर्यज्ञेभिरानुषक् ।
दधदस्मे सुवीर्यम् उत त्यदाश्वश्व्यम् इषं स्तोतृभ्य आ भर ८१०

॥ ९६ ॥ (ऋ० ५ । ७ । १-१०) (८११-८२७) इष आत्रेयः । अनुष्टुप्, ८२० पङ्क्तिः ।

सखायः सं वः सम्यञ्चम् इषं स्तोमं चाग्नये ।
वर्षिष्ठाय क्षितीनाम् ऊर्जो नप्त्रे सहस्वते ८११

कुत्रा चिद् यस्य समृतौ रण्वा नरो नृषदने ।
अर्हन्तश् चिद् यमिन्धते संजनयन्ति जन्तवः ८१२

सं यदिषो वनामहे सं हव्या मानुषाणाम् ।
उत द्युम्नस्य शवस ऋतस्य रश्मिमा ददे ८१३

सः स्मा कृणोति केतुमा नक्तं चिद् दूर आ सते ।
पावको यद् वनस्पतीन् प्र स्मा मिनात्यजरः ८१४

अव स्म यस्य वेषणे स्वेदं पथिषु जुह्वति ।
अभीमह स्वजेन्यं भूमा पृष्ठेव रुरुहुः ८१५

यं मर्त्यः पुरुस्पृहं विदद् विश्वस्य धायसे ।
प्र स्वादनं पितूनाम् अस्ततातिं चिदायवे ८१६

स हि ष्मा धन्वाक्षितं दाता न दात्या पशुः ।
हिरिश्मश्रुः शुचिदन् ऋभुरनिभृष्टतविषिः ८१७

शुचिः ष्म यस्मा अत्रिवत् प्र स्वधितीव रीयते ।
सुषूरसूत माता क्राणा यदानशे भगम् ८१८
आ यस्ते सर्पिरासुते अग्ने शमस्ति धायसे ।
ऐषु द्युम्नमुत श्रव आ चित्तं मर्त्येषु धाः ८१९
इति चिन् मन्युमध्रिजस् त्वादातमा पशुं ददे ।
आदग्ने अपृणतो अत्रिः सासह्याद् दस्यून् इषः सासह्यान् नॄन् ८२०

॥ ९७ ॥ (ऋ० ५ । ८ । १-७) जगती ।

त्वामग्न ऋतायवः समीधिरे प्रत्नं प्रत्नास ऊतये सहस्कृत ।
पुरुश्चन्द्रं यजतं विश्वधायसं दमूनसं गृहपतिं वरेण्यम् ८२१
त्वामग्ने अतिथिं पूर्व्यं विशः शोचिष्केशं गृहपतिं नि षेदिरे ।
बृहत्केतुं पुरुरूपं धनस्पृतं सुशर्माणं स्ववसं जरद्विषम् ८२२
त्वामग्ने मानुषीरीळते विशो होत्राविदं विविचिं रत्नधातमम् ।
गुहा सन्तं सुभग विश्वदर्शतं तुविष्वणसं सुयजं घृतश्रियम् ८२३
त्वामग्ने धर्णसिं विश्वधा वयं गीर्भिर्गृणन्तो नमसोप सेदिम ।
स नो जुषस्व समिधानो अङ्गिरो देवो मर्तस्य यशसा सुदीतिभिः ८२४
त्वमग्ने पुरुरूपो विशेविशे वयो दधासि प्रत्नथा पुरुष्टुत ।
पुरूण्यन्ना सहसा वि राजसि त्विषिः सा ते तित्विषाणस्य नाधृषे ८२५
त्वामग्ने समिधानं यविष्ठ्य देवा दूतं चक्रिरे हव्यवाहनम् ।
उरुज्रयसं घृतयोनिमाहुतं त्वेषं चक्षुर्दधिरे चोदयन्मति ८२६
त्वामग्ने प्रदिव आहुतं घृतैः सुम्नायवः सुषमिधा समीधिरे ।
स वावृधान ओषधीभिरुक्षितो३ अभि ज्रयांसि पार्थिवा वि तिष्ठसे ८२७

॥ ९८ ॥ (ऋ० ५ । ९ । १-७)
(८२८-८४१) गय आत्रेयः । अनुष्टुप् । ८३२; ८३४ पङ्क्तिः ।

त्वामग्ने हविष्मन्तो देवं मर्तास ईळते ।
मन्ये त्वा जातवेदसं स हव्या वक्ष्यानुषक् ८२८
अग्निर्होता दास्वतः क्षयस्य वृक्तबर्हिषः ।
सं यज्ञासश् चरन्ति यं सं वाजासः श्रवस्यवः ८२९

उत स्म यं शिशुं यथा नवं जनिष्टारणी ।
धर्तारं मानुषीणां विशामग्निं स्वध्वरम् ८३०

उत स्म दुर्गृभीयसे पुत्रो न ह्वार्याणाम् ।
पुरू यो दग्धासि वना अग्ने पशुर्न यवसे ८३१

अध स्म यस्यार्चयः सम्यक् संयन्ति धूमिनः ।
यदीमह त्रितो दिवि उप ध्मातेव धमति शिशीते ध्मातरी यथा ८३२

तवाहमग्न ऊतिभिर् मित्रस्य च प्रशस्तिभिः ।
द्वेषोयुतो न दुरिता तुर्याम मर्त्यानाम् ८३३

तं नो अग्ने अभी नरो रयिं सहस्व आ भर ।
स क्षेपयत् स पोषयद् भुवद् वाजस्य सातय उतैधि पृत्सु नो वृधे ८३४

॥ ९९ ॥ (ऋ० ५ । १० । १-७) अनुष्टुप्; ८३८; ८४१ पङ्क्तिः ।

अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो ।
प्र नो राया परीणसा रत्सि वाजाय पन्थाम् ८३५

त्वं नो अग्ने अद्भुत क्रत्वा दक्षस्य मंहना ।
त्वे असुर्यमारुहत् क्राणा मित्रो न यज्ञियः ८३६

त्वं नो अग्न एषां गयं पुष्टिं च वर्धय ।
ये स्तोमेभिः प्र सूरयो नरो मघान्यानशुः ८३७

ये अग्ने चन्द्र ते गिरः शुम्भन्त्यश्वराधसः ।
शुष्मेभिः शुष्मिणो नरो दिवश् चिद् येषां बृहत् सुकीर्तिर्बोधति त्मना ८३८

तव त्ये अग्ने अर्चयो भ्राजन्तो यन्ति धृष्णुया ।
परिज्मानो न विद्युतः स्वानो रथो न वाजयुः ८३९

नू नो अग्न ऊतये सबाधसश् च रातये ।
अस्माकासश् च सूरयो विश्वा आशास् तरीषणि ८४०

त्वं नो अग्ने अङ्गिरः स्तुतः स्तवान आ भर ।
होतर्विभ्वासहं रयिं स्तोतृभ्यः स्तवसे च न उतैधि पृत्सु नो वृधे ८४१

॥ १०० ॥ (ऋ० ५ । ११ । १-६) (८४२-८६५) सुतंभर आत्रेयः । जगती ।

जनस्य गोपा अजनिष्ट जागृविर् अग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद् वि भाति भरतेभ्यः शुचिः ८४२

यज्ञस्य केतुं प्रथमं पुरोहितम् अग्निं नरस् त्रिषधस्थे समीधिरे ।
इन्द्रेण देवैः सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ८४३

असंमृष्टो जायसे मात्रोः शुचिर् मन्द्रः कविरुदतिष्ठो विवस्वतः ।
घृतेन त्वावर्धयन्नग्न आहुत धूमस् ते केतुरभवद् दिवि श्रितः ८४४

अग्निर्नो यज्ञमुप वेतु साधुया अग्निं नरो वि भरन्ते गृहेगृहे ।
अग्निर्दूतो अभवद्धव्यवाहनो अग्निं वृणाना वृणते कविक्रतुम् ८४५

तुभ्येदमग्ने मधुमत्तमं वचस् तुभ्यं मनीषा इयमस्तु शं हृदे ।
त्वां गिरः सिन्धुमिवावनीर्महीर् आ पृणन्ति शवसा वर्धयन्ति च ८४६

त्वामग्ने अङ्गिरसो गुहा हितम् अन्वविन्दञ्छिश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत् त्वामाहुः सहसस्पुत्रमङ्गिरः ८४७

॥ १०१ ॥ (ऋ० ५ । १२ । १-६) त्रिष्टुप् ।

प्राग्नये बृहते यज्ञियाय ऋतस्य वृष्णे असुराय मन्म ।
घृतं न यज्ञ आस्येऽ सुपूतं गिरं भरे वृषभाय प्रतीचीम् ८४८

ऋतं चिकित्व ऋतमिच् चिकिद्धि ऋतस्य धारा अनु तृन्धि पूर्वीः ।
नाहं यातुं सहसा न द्वयेन ऋतं सपाम्यरुषस्य वृष्णः ८४९

कया नो अग्न ऋतयन्नृतेन भुवो नवेदा उचथस्य नव्यः ।
वेदा मे देव ऋतुपा ऋतूनां नाहं पतिं सनितुरस्य रायः ८५०

के ते अग्ने रिपवे बन्धनासः के पायवः सनिषन्त द्युमन्तः ।
के धासिमग्ने अनृतस्य पान्ति क आसतो वचसः सन्ति गोपाः ८५१

सखायस् ते विषुणा अग्न एते शिवासः सन्तो अशिवा अभूवन् ।
अधूर्षत स्वयमेते वचोभिर् ऋजूयते वृजिनानि ब्रुवन्तः ८५२

यस् ते अग्ने नमसा यज्ञमीट्ट ऋतं स पात्यरुषस्य वृष्णः ।
तस्य क्षयः पृथुरा साधुरेतु प्रसर्स्राणस्य नहुषस्य शेषः ८५३

॥ १०२ ॥ (ऋ० ५ । १३ । १-६) गायत्री ।

अर्चन्तस् त्वा हवामहे अर्चन्तः समिधीमहि । अग्ने अर्चन्त ऊतये ८५४
अग्नेः स्तोमं मनामहे सिध्रमद्य दिविस्पृशः । देवस्य द्रविणस्यवः ८५५
अग्निर्जुषत नो गिरो होता यो मानुषेष्वा । स यक्षद् दैव्यं जनम् ८५६
त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः । त्वया यज्ञं वि तन्वते ८५७
त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम् । स नो रास्व सुवीर्यम् ८५८
अग्ने नेमिरराँ इव देवाँस् त्वं परिभूरसि । आ राधश् चित्रमृञ्जसे ८५९

॥ १०३ ॥ (ऋ० ५ । १४ । १-६)

अग्निं स्तोमेन बोधय समिधानो अमर्त्यम् । हव्या देवेषु नो दधत् ८६०
तमध्वरेष्वीळते देवं मर्ता अमर्त्यम् । यजिष्ठं मानुषे जने ८६१
तं हि शश्वन्त ईळते स्रुचा देवं घृतश्चुता । अग्निं हव्याय वोळ्हवे ८६२
अग्निर्जातो अरोचत घ्नन् दस्यून् ज्योतिषा तमः । अविन्दद् गा अपः स्वः ८६३
अग्निमीळेन्यं कविं घृतपृष्ठं सपर्यत । वेतु मे शृणवद्धवम् ८६४
अग्निं घृतेन वावृधुः स्तोमेभिर्विश्वचर्षणिम् । स्वाधीभिर्वचस्युभिः ८६५

॥ १०४ ॥ (ऋ० ५ । १५ । १-५) (८६६-८७०) धरुण आङ्गिरसः । त्रिष्टुप् ।

प्र वेधसे कवये वेद्याय गिरं भरे यशसे पूर्व्याय ।
घृतप्रसत्तो असुरः सुशेवो रायो धर्ता धरुणो वस्वो अग्निः ८६६
ऋतेन ऋतं धरुणं धारयन्त यज्ञस्य शाके परमे व्योमन् ।
दिवो धर्मन् धरुणे सेदुषो नॄन् जातैरजाताँ अभि ये ननक्षुः ८६७
अंहोयुवस् तन्वस् तन्वते वि वयो महद् दुष्टरं पूर्व्याय ।
स संवतो नवजातस् तुतुर्यात् सिंहं न क्रुद्धमभितः परि ष्ठुः ८६८
मातेव यद् भरसे पप्रथानो जनंजनं धायसे चक्षसे च ।
वयोवयो जरसे यद् दधानः परि त्मना विषुरूपो जिगासि ८६९
वाजो नु ते शवसस्पात्वन्तम् उरुं दोघं धरुणं देव रायः ।
पदं न तायुर्गुहा दधानो महो राये चितयन्नत्रिमस्पः ८७०

॥ १०५ ॥ (ऋ० ५ । १६ । १-५) [८७१-८८०] पूरुरात्रेयः । अनुष्टुप्, ८७५ पङ्क्तिः ।

बृहद् वयो हि भानवे ऽर्चा देवायाग्नये ।
यं मित्रं न प्रशस्तिभिर् मर्तासो दधिरे पुरः ८७१

स हि द्युभिर्जनानां होता दक्षस्य बाह्वोः ।
वि हव्यमग्निरानुषग् भगो न वारमृण्वति ८७२

अस्य स्तोमे मघोनः सख्ये वृद्धशोचिषः ।
विश्वा यस्मिन् तुविष्वणि समर्ये शुष्ममादधुः ८७३

अधा ह्यग्न एषां सुवीर्यस्य मंहना ।
तमिद् यह्वं न रोदसी परि श्रवो बभूवतुः ८७४

नू न एहि वार्यम् अग्ने गृणान आ भर ।
ये वयं ये च सूरयः स्वस्ति धामहे सचा उतैधि पृत्सु नो वृधे ८७५

॥ १०६ ॥ (ऋ० ५ । १७ । १-५) अनुष्टुप्, ८८० पङ्क्तिः ।

आ यज्ञैर्देव मर्त्य इत्था तव्यांसमूतये ।
अग्निं कृते स्वध्वरे पूरुरीळीतावसे ८७६

अस्य हि स्वयशस्तर आसा विधर्मन् मन्यसे ।
तं नाकं चित्रशोचिषं मन्द्रं परो मनीषया ८७७

अस्य वासा उ अर्चिषा य आयुक्त तुजा गिरा ।
दिवो न यस्य रेतसा बृहच्छोचन्त्यर्चयः ८७८

अस्य क्रत्वा विचेतसो दस्मस्य वसु रथ आ ।
अधा विश्वासु हव्यो ऽग्निर्विक्षु प्र शस्यते ८७९

नू न इद्धि वार्यम् आसा सचन्त सूरयः ।
ऊर्जो नपादभिष्टये पाहि शग्धि स्वस्तय उतैधि पृत्सु नो वृधे ८८०

॥ १०७ ॥ (ऋ० ५ । १८ । १-५)
[८८१-८८५] द्वितो मृक्तवाहा आत्रेयः । अनुष्टुप्, ८८५ पङ्क्तिः ।

प्रातरग्निः पुरुप्रियो विशः स्तवेतातिथिः ।
विश्वानि यो अमर्त्यो हव्या मर्तेषु रण्यति ८८१

द्विताय मृक्तवाहसे   स्वस्य दक्षस्य मंहना ।
इन्दुं स धत्त आनुषक्   स्तोता चित् ते अमर्त्य   ८८२

तं वो दीर्घायुशोचिषं   गिरा हुवे मघोनाम् ।
अरिष्टो येषां रथो   व्यश्वदावन् नीयते   ८८३

चित्रा वा येषु दीधितिर्   आसन्नुक्था पान्ति ये ।
स्तीर्णं बर्हिः स्वर्णरे   श्रवांसि दधिरे परि   ८८४

ये मे पञ्चाशतं ददुर्   अश्वानां सधस्तुति ।
द्युमदग्ने महि श्रवो   बृहत् कृधि मघोनां   नृवदमृत नृणाम्   ८८५

॥ १०८ ॥ (ऋ० ५ । १९ । १-५)

[८८६—८९०] वव्रिरात्रेयः । ८८६-८८७ गायत्री, ८८८-८८९ अनुष्टुप्, ८९० विराड्रूपा ।

अभ्यवस्थाः प्र जायन्ते   प्र वव्रेर्वव्रिश् चिकेत । उपस्थे मातुर्वि चष्टे   ८८६
जुहुरे वि चितयन्तो   ऽनिमिषं नृम्णं पान्ति । आ दृळ्हां पुरं विविशुः   ८८७

आ श्वैत्रेयस्य जन्तवो   द्युमद् वर्धन्त कृष्टयः ।
निष्कग्रीवो बृहदुक्थ   एना मध्वा न वाजयुः   ८८८

प्रियं दुग्धं न काम्यम्   अजामि जाम्योः सचा ।
घर्मो न वाजजठरो   ऽदब्धः शश्वतो दभः   ८८९

क्रीळन् नो रश्म आ भुवः   सं भस्मना वायुना वेविदानः ।
ता अस्य सन् धृषजो न तिग्माः   सुसंशिता वक्ष्यो वक्षणेस्थाः   ८९०

॥ १०९ ॥ (ऋ० ५ । २० । १-४) [८९१-८९४] प्रयस्वन्त आत्रेयाः । अनुष्टुप्, ८९४ पङ्क्तिः ।

यमग्ने वाजसातम   त्वं चिन् मन्यसे रयिम् ।
तं नो गीर्भिः श्रवाय्यं   देवत्रा पनया युजम्   ८९१

ये अग्ने नेरयन्ति ते   वृद्धा उग्रस्य शवसः ।
अप द्वेषो अप ह्वरो   ऽन्यव्रतस्य सश्चिरे   ८९२

होतारं त्वा वृणीमहे   ऽग्ने दक्षस्य साधनम् ।
यज्ञेषु पूर्व्यं गिरा   प्रयस्वन्तो हवामहे   ८९३

इत्था यथा त ऊतये   सहसावन् दिवेदिवे ।
राय ऋताय सुक्रतो   गोभिः ष्याम सधमादो   वीरैः स्याम सधमादः   ८९४

॥ ११० ॥ (ऋ० ५ । २१ । १-४) [८९५-८९८] सस आत्रेयः । अनुष्टुप्, ८९८ पङ्क्तिः ।

मनुष्वत् त्वा नि धीमहि मनुष्वत् समिधीमहि । अग्ने मनुष्वदङ्गिरो देवान् देवयते यज ८९५
त्वं हि मानुषे जने ऽग्ने सुप्रीत इध्यसे । स्रुचस् त्वा यन्त्यानुषक् सुजात सर्पिरासुते ८९६
त्वां विश्वे सजोषसो देवासो दूतमक्रत । सपर्यन्तस् त्वा कवे यज्ञेषु देवमीळते ८९७
देवं वो देवयज्यया अग्निमीळीत मर्त्यः ।
समिद्धः शुक्र दीदिहि ऋतस्य योनिमासदः ससस्य योनिमासदः ८९८

॥ १११ ॥ (ऋ० ५ । २२ । १-४) [८९९-९०२] विश्वसामा आत्रेयः । अनुष्टुप्, ९०२ पङ्क्तिः ।

प्र विश्वसामन्नत्रिवद् अर्चा पावकशोचिषे । यो अध्वरेष्वीड्यो होता मन्द्रतमो विशि ८९९
न्य१ग्निं जातवेदसं दधाता देवमृत्विजम् । प्र यज्ञ एत्वानुषग् अद्या देवव्यचस्तमः ९००
चिकित्विन् मनसं त्वा देवं मर्तास ऊतये । वरेण्यस्य तेऽवस इयानासो अमन्महि ९०१
अग्ने चिकिद्ध्य१स्य न इदं वचः सहस्य ।
तं त्वा सुशिप्र दंपते स्तोमैर्वर्धन्त्यत्रयो गीर्भिः शुम्भन्त्यत्रयः ९०२

॥ ११२ ॥ (ऋ० ५ । २३ । १-४) [९०३-९०६] द्युम्नो विश्वचर्षणिरात्रेयः । अनुष्टुप्, ९०६ पङ्क्तिः ।

अग्ने सहन्तमा भर द्युम्नस्य प्रासहा रयिम् । विश्वा यश् चर्षणीरभि आ३सा वाजेषु सासहत् ९०३
तमग्ने पृतनाषहं रयिं सहस्व आ भर । त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमतः ९०४
विश्वे हि त्वा सजोषसो जनासो वृक्तबर्हिषः । होतारं सद्मसु प्रियं व्यन्ति वार्या पुरु ९०५
स हि ष्मा विश्वचर्षणिर् अभिमाति सहो दधे ।
अग्न एषु क्षयेष्वा रेवन् नः शुक्र दीदिहि द्युमत् पावक दीदिहि ९०६

॥ ११३ ॥ (ऋ० ५ । २४ । १-४)
[९०७-९१०] बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्च क्रमेण गोपायना लौपायना वा । द्विपदा विराट् ।

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ९०७
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ९०८
स नो बोधि श्रुधी हवम् उरुष्या णो अघायतः समस्मात् ९०९
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ९१०

॥ ११४ ॥ (ऋ० ५ । २५ । १-९) [९११-९२७] वसूयव आत्रेयाः । अनुष्टुप् ।

अच्छा वो अग्निमवसे देवं गासि स नो वसुः ।
रासत् पुत्र ऋषूणाम् ऋतावा पर्षति द्विषः ९११

स हि सत्यो यं पूर्वे चिद् देवासश् चिद् यमीधिरे ।
होतारं मन्द्रजिह्वमित् सुदीतिभिर्विभावसुम् ९१२

स नो धीती वरिष्ठया श्रेष्ठया च सुमत्या ।
अग्ने रायो दिदीहि नः सुवृक्तिभिर्वरेण्य ९१३

अग्निर्देवेषु राजति अग्निर्मर्तेष्वाविशन् ।
अग्निर्नो हव्यवाहनो ऽग्निं धीभिः सपर्यत ९१४

अग्निस् तुविश्रवस्तमं तुविब्रह्माणमुत्तमम् ।
अतूर्तं श्रावयत् पतिं पुत्रं ददाति दाशुषे ९१५

अग्निर्ददाति सत्पतिं सासाह यो युधा नृभिः ।
अग्निरत्यं रघुष्यदं जेतारमपराजितम् ९१६

यद् वाहिष्ठं तदग्नये बृहदर्च विभावसो ।
महिषीव त्वद् रयिस् त्वद् वाजा उदीरते ९१७

तव द्युमन्तो अर्चयो ग्रावेवोच्यते बृहत् ।
उतो ते तन्यतुर्यथा स्वानो अर्त त्मना दिवः ९१८

एवाँ अग्निं वसूयवः सहसानं ववन्दिम ।
स नो विश्वा अति द्विषः पर्षन्नावेव सुक्रतुः ९१९

॥ ११५ ॥ (ऋ० ५ । २६ । १-८) गायत्री ।

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् वक्षि यक्षि च ९२०

तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम् । देवाँ आ वीतये वह ९२१

वीतिहोत्रं त्वा कवे द्युमन्तं समिधीमहि । अग्ने बृहन्तमध्वरे ९२२

अग्ने विश्वेभिरा गहि देवेभिर्हव्यदातये । होतारं त्वा वृणीमहे ९२३

यजमानाय सुन्वत आग्ने सुवीर्यं वह । देवैरा सत्सि बर्हिषि ९२४

समिधानः सहस्रजिद् अग्ने धर्माणि पुष्यसि । देवानां दूत उक्थ्यः ९२५

न्यग्निं जातवेदसं होत्रवाहं यविष्ठ्यम् । दधाता देवमृत्विजम् ९२६

प्र यज्ञ एत्वानुषग् अद्या देवव्यचस्तमः । स्तृणीत बर्हिरासदे ९२७

॥ ११६ ॥ (ऋ० ५ । २७ । १-५)

[९२८-९३२] त्र्यरुणस्त्रैवृष्णः, त्रसदस्युः पौरुकुत्सः, अश्वमेधश्च भारताः राजानः (अत्रिर्भौम इति केचित्) । त्रिष्टुप्, ९३१-९३२ अनुष्टुप् ।

अनस्वन्ता सत्पतिर्मामहे मे　गावा चेतिष्ठो असुरो मघोनः ।
त्रैवृष्णो अग्ने दशभिः सहस्रैर्　वैश्वानर त्र्यरुणश् चिकेत　९२८
यो मे शता च विंशतिं च गोनां　हरी च युक्ता सुधुरा ददाति ।
वैश्वानर सुष्टुतो वावृधानो　ऽग्ने यच्छ त्र्यरुणाय शर्म　९२९
एवा ते अग्ने सुमतिं चकानो　नविष्ठाय नवमं त्रसदस्युः ।
यो मे गिरस् तुविजातस्य पूर्वीर्　युक्तेनाभि त्र्यरुणो गृणाति　९३०
यो म इति प्रवोचति　अश्वमेधाय सूरये ।
दददृचा सनिं यते　ददन्मेधामृतायते　९३१
यस्य मा परुषाः शतम्　उद्धर्षयन्त्युक्षणः ।
अश्वमेधस्य दानाः　सोमा इव त्र्याशिरः　९३२

॥ ११७ ॥ (ऋ० ५ । २८ । १—६)

[९३३-९३८] विश्ववारात्रेयी । ९३३, ९३५ त्रिष्टुप्, ९३४ जगती, ९३६ अनुष्टुप्, ९३७-९३८ गायत्री ।

समिद्धो अग्निर्दिवि शोचिरश्रेत्　प्रत्यङ्ङुषसमुर्विया वि भाति ।
एति प्राची विश्ववारा नमोभिर्　देवाँ ईळाना हविषा घृताची　९३३
समिध्यमानो अमृतस्य राजसि　हविष् कृण्वन्तं सचसे स्वस्तये ।
विश्वं स धत्ते द्रविणं यमिन्वसि　आतिथ्यमग्ने नि च धत्त इत् पुरः　९३४
अग्ने शर्ध महते सौभगाय　तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यं सुयममा कृणुष्व　शत्रूयतामभि तिष्ठा महांसि　९३५
समिद्धस्य प्रमहसो　ऽग्ने वन्दे तव श्रियम् ।
वृषभो द्युम्नवाँ असि　समध्वरेष्विध्यसे　९३६
समिद्धो अग्न आहुत　देवान् यक्षि स्वध्वर । त्वं हि हव्यवाळसि　९३७
आ जुहोता दुवस्यत　अग्निं प्रयत्यध्वरे । वृणीध्वं हव्यवाहनम्　९३८

॥ ११८ ॥ (ऋग्वेदस्य षष्ठं मण्डलं, सूक्तं १, मन्त्राः १-१३)

[९३९-१०९०] भरद्वाजो बार्हस्पत्यः । त्रिष्टुप् ।

त्वं ह्यग्ने प्रथमो मनोता अस्या धियो अभवो दस्म होता ।
त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै ९३९

अधा होता न्यसीदो यजीयान् इळस्पद इषयन्नीड्यः सन् ।
तं त्वा नरः प्रथमं देवयन्तो महो राये चितयन्तो अनु ग्मन् ९४०

वृतेव यन्तं बहुभिर्वसव्यैस् त्वे रयिं जागृवांसो अनु ग्मन् ।
रुशन्तमग्निं दर्शतं बृहन्तं वपावन्तं विश्वहा दीदिवांसम् ९४१

पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रव आपन्नमृक्तम् ।
नामानि चिद् दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ ९४२

त्वां वर्धन्ति क्षितयः पृथिव्यां त्वां राय उभयासो जनानाम् ।
त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणाम् ९४३

सपर्येण्यः स प्रियो विक्ष्वग्निर् होता मन्द्रो नि षसादा यजीयान् ।
तं त्वा वयं दम आ दीदिवांसम् उप ज्ञुबाधो नमसा सदेम ९४४

तं त्वा वयं सुध्यो नव्यमग्ने सुम्नायव ईमहे देवयन्तः ।
त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन ९४५

विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनाम् ।
प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं यजतं रयीणाम् ९४६

सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिम् ।
य आहुतिं परि वेदा नमोभिर् विश्वेत् स वामा दधते त्वोतः ९४७

अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः ।
वेदी सूनो सहसो गीर्भिरुक्थैर् आ ते भद्रायां सुमतौ यतेम ९४८

आ यस् ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्यस् तरुत्रः ।
बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि ९४९

नृवद् वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः ।
पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि सन्तु ९५०

पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन् वसुता ते अश्याम् ।
पुरूणि हि त्वे पुरुवार सन्ति अग्ने वसु विधते राजनि त्वे ९५१

॥ ११९ ॥ (ऋ० ६ । २ । १-११) अनुष्टुप्, ९६२ शक्करी ।

त्वं हि क्षैतवद् यशोऽग्ने मित्रो न पत्यसे । त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ९५२
त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते । त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः ९५३
सजोषस्त्वा दिवो नरो यज्ञस्य केतुमिन्धते । यद्ध स्य मानुषो जनः सुम्नायुर्जुह्वे अध्वरे ९५४
ऋधद् यस्ते सुदानवे धिया मर्तः शशमते । ऊती ष बृहतो दिवो द्विषो अंहो न तरति ९५५
समिधा यस्त आहुतिं निशितिं मर्त्यो नशत् । वयावन्तं स पुष्यति क्षयमग्ने शतायुषम् ९५६
त्वेषस्ते धूम ऋण्वति दिवि षञ्छुक्र आततः । सूरो न हि द्युता त्वं कृपा पावक रोचसे ९५७
अधा हि विक्ष्वीड्योऽसि प्रियो नो अतिथिः । रण्वः पुरीव जूर्यः सूनुर्न त्रययाय्यः ९५८
क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः । परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुः ९५९
त्वं त्या चिदच्युताग्ने पशुर्न यवसे । धामा ह यत् ते अजर वना वृश्चन्ति शिक्वसः ९६०
वेषि ह्यध्वरीयतामग्ने होता दमे विशाम् । समृधो विश्पते कृणु जुषस्व हव्यमङ्गिरः ९६१
अच्छा नो मित्रमहो देव देवान् अग्ने वोचः सुमतिं रोदस्योः ।
वीहि स्वस्तिं सुक्षितिं दिवो नॄन् द्विषो अंहांसि दुरिता तरेम, ता तरेम, तवावसा तरेम ९६२

॥ १२० ॥ (ऋ० ६ । ३ । १—८) त्रिष्टुप् ।

अग्ने स क्षेषदृतपा ऋतेजा उरु ज्योतिर्नशते देवयुष्टे ।
यं त्वं मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तमंहः ९६३

ईजे यज्ञेभिः शशमे शमीभिर् ऋधद्वारायाग्नये ददाश ।
एवा चन तं यशसामजुष्टिर् नांहो मर्तं नशते न प्रदृप्तिः ९६४

सूरो न यस्य दृशतिररेपा भीमा यदेति शुचतस्त आ धीः ।
हेषस्वतः शुरुधो नायमक्तोः कुत्रा चिद् रण्वो वसतिर्वनेजाः ९६५

तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यमसान आसा ।
विजेहमानः परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत् ९६६

स इदस्तेव प्रति धादसिष्यञ् छिशीत तेजोऽयसो न धाराम् ।
चित्रध्रजतिररतिर्यो अक्तोर् वेर्न द्रुषद्वा रघुपत्मजंहाः ९६७

स ईं रेभो न प्रति वस्त उस्राः शा।प.. पीति मित्रमहाः ।
नक्तं य ईमरुषो यो दिवा नॄन् अमर्त्यो अरुषो यो दिवा नॄन् ९६८
दिवो न यस्य विधतो नवीनोद् वृषा रुक्ष ओषधीषु नूनोत् ।
घृणा न यो ध्रजसा पत्मना यन् ना रोदसी वसुना दं सुपत्नी ९६९
धायोभिर्वा यो युज्येभिरर्कैर् विद्युन्न दविद्योत् स्वेभिः शुष्मैः ।
शर्धो वा यो मरुतां ततक्ष ऋभुर्न त्वेषो रभसानो अद्यौत् ९७०

॥ १२१ ॥ (ऋ० ६ । ४ । १-८)

यथा होतर्मनुषो देवताता यज्ञेभिः सूनो सहसो यजासि ।
एवा नो अद्य समना समानान् उशन्नग्न उशतो यक्षि देवान् ९७१
स नो विभावा चक्षणिर्न वस्तोर् अग्निर्वन्दारु वेद्यश् चनो धात् ।
विश्वायुर्यो अमृतो मर्त्येषु उषर्भुद्भूदतिथिर्जातवेदाः ९७२
द्यावो न यस्य पनयन्त्यभ्वं भासांसि वस्ते सूर्यो न शुक्रः ।
वि य इनोत्यजरः पावको ऽश्नस्य चिच्छिश्नथत् पूर्व्याणि ९७३
वद्मा हि सूनो अस्यद्मसद्वा चक्रे अग्निर्जनुषाज्मान्नम् ।
स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यन्तः ९७४
नितिक्ति यो वारणमन्नमत्ति वायुर्न राष्ट्र्यत्येत्यक्तून् ।
तुर्याम यस् त आदिशामरातीर् अत्यो न ह्रुतः पततः परिह्रुत् ९७५
आ सूर्यो न भानुमद्भिरर्कैर् अग्ने ततन्थ रोदसी वि भासा ।
चित्रो नयत् परि तमांस्यक्तः शोचिषा पत्मन्नौशिजो न दीयन् ९७६
त्वां हि मन्द्रतममर्कशोकैर् ववृमहे महि नः श्रोष्यग्ने ।
इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ९७७
नू नो अग्नेऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्यंहः ।
ता सूरिभ्यो गृणते रासि सुम्नं मदेम शतहिमाः सुवीराः ९७८

॥ १२२ ॥ (ऋ० ६ । ५ । १-७)

हुवे वः सूनुं सहसो युवानम् अद्रोघवाचं मतिभिर्यविष्ठम् ।
य इन्वति द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक् ९७९

त्वे वसू॑नि पुर्वणीक होतर् दोषा वस्तो॒रेरि॑रे य॒ज्ञिया॑सः ।
क्षामे॑व॒ विश्वा॒ भुव॑नानि॒ यस्मि॑न् त्सं सौभ॑गानि द॒धिरे पा॑व॒के	९८०

त्वं वि॒क्षु प्र॒दिवः॑ सीद आ॒सु क्रत्वा॑ र॒थीर॑भवो॒ वार्या॑णाम् ।
अत॑ इनोषि विध॒ते चि॑कित्वो॒ व्या॑नु॒षग् जा॑तवेदो॒ वसू॑नि	९८१

यो नः॒ सनु॑त्यो अ॒भिदास॑दग्ने॒ यो अन्त॑रो मित्रमहो व॒नुष्या॑त् ।
तम॒जरे॑भि॒र्वृष॑भि॒स् तव॒ स्वैस् तपा॑ तपिष्ठ॒ तप॑सा॒ तप॑स्वान्	९८२

यस् ते॑ य॒ज्ञेन॑ स॒मिधा॒ य उ॒क्थैर् अ॒र्केभिः॑ सूनो सहसो॒ ददा॑शत् ।
स मर्त्ये॑ष्वमृत॒ प्रचे॑ता रा॒या द्यु॒म्नेन॒ श्रव॑सा॒ वि भा॑ति	९८३

स तत् कृ॑धीषि॒तस् तूय॑मग्ने॒ स्पृधो॑ बाधस्व॒ सह॑सा॒ सह॑स्वान् ।
यच्छ॒स्यसे॒ द्युभि॑र॒क्तो वचो॑भि॒स् तज् जु॑षस्व जरि॒तुर्घोषि॒ मन्म॑	९८४

अ॒श्याम॒ तं काम॑मग्ने॒ तवो॒ती अ॒श्याम॑ र॒यिं र॑यिवः सु॒वीर॑म् ।
अ॒श्याम॒ वाज॑म॒भि वा॒जय॑न्तो॒ ऽश्याम॑ द्यु॒म्नम॑जरा॒जरं॑ ते	९८५

॥ १२३ ॥ (ऋ० ६ । ६ । १-७)

प्र नव्य॑सा॒ सह॑सः सू॒नुमच्छा॑ य॒ज्ञेन॑ गा॒तुमव॑ इ॒च्छमा॑नः ।
वृ॒श्चद्व॑नं कृ॒ष्णया॑मं॒ रुश॑न्तं वी॒ती होता॑रं दि॒व्यं जि॑गाति	९८६

स श्वि॒ता॒नस् त॑न्य॒तू रो॑चन॒स्था अ॒जरे॑भि॒र्नान॑दद्भि॒र्यवि॑ष्ठः ।
यः पा॑व॒कः पु॑रु॒तमः॑ पु॒रूणि॑ पृ॒थून्य॒ग्निर॑नु॒याति॒ भर्व॑न्	९८७

वि ते॒ विष्व॒ग् वात॑जूतासो अग्ने॒ भामा॑सः शुचे॒ शुच॑यश् चरन्ति ।
तु॒वि॒म्र॒क्षासो॑ दि॒व्या नव॑ग्वा॒ वना॑ वनन्ति धृष॒ता रु॒जन्तः॑	९८८

ये ते॑ शु॒क्रासः॒ शुच॑यः शुचिष्मः॒ क्षां वप॑न्ति॒ विषि॑तासो॒ अश्वाः॑ ।
अध॑ भ्र॒मस् त॑ उर्वि॒या वि भा॑ति या॒तय॑मानो॒ अधि॒ सानु॒ पृश्नेः॑	९८९

अध॑ जि॒ह्वा पा॑पतीति॒ प्र वृष्णो॑ गोषु॒युधो॒ नाशनिः॑ सृजा॒ना ।
शूर॑स्येव॒ प्रसि॑तिः क्षा॒तिर॒ग्नेर् दु॒र्वर्तु॑र्भी॒मो द॑यते॒ वना॑नि	९९०

आ भा॒नुना॒ पार्थि॑वानि॒ ज्रयां॑सि म॒हस् तो॒दस्य॑ धृष॒ता त॑तन्थ ।
स बा॑ध॒स्वाप॑ भ॒या सहो॑भि॒ः स्पृधो॑ वनु॒ष्यन् व॒नुषो॒ नि जू॑र्व	९९१

स चित्र चित्रं चितयन्तमस्मे　चित्रक्षत्र चित्रतमं वयोधाम् ।
चन्द्रं रयिं पुरुवीरं बृहन्तं　चन्द्र चन्द्राभिर्गृणते युवस्व　९९२

॥ १२४ ॥ (ऋ० ६ । १० । १-७) त्रिष्टुप्; ९९९ द्विपदा विराट् ।

पुरो वो मन्द्रं दिव्यं सुवृक्तिं　प्रयति यज्ञे अग्निमध्वरे दधिध्वम् ।
पुर उक्थेभिः स हि नो विभावा　स्वध्वरा करति जातवेदाः　९९३

तमु द्युमः पुर्वणीक होतर्　अग्ने अग्निभिर्मनुष इधानः ।
स्तोमं यमस्मै ममतेव शूषं　घृतं न शुचि मतयः पवन्ते　९९४

पीपाय स श्रवसा मर्त्येषु　यो अग्नये ददाश विप्र उक्थैः ।
चित्राभिस् तमूतिभिश् चित्रशोचिर्　व्रजस्य साता गोमतो दधाति　९९५

आ यः पप्रौ जायमान उर्वी　दूरेदृशा भासा कृष्णाध्वा ।
अध बहु चित् तम ऊर्म्यायास्　तिरः शोचिषा ददृशे पावकः　९९६

नू नश् चित्रं पुरुवाजाभिरूती　अग्ने रयिं मघवद्भ्यश् च धेहि ।
ये राधसा श्रवसा चात्यन्यान्　त्सुवीर्येभिश् चाभि सन्ति जनान्　९९७

इमं यज्ञं चनो धा अग्न उशन्　यं त आसानो जुहुते हविष्मान् ।
भरद्वाजेषु दधिषे सुवृक्तिम्　अवीर्वाजस्य गध्यस्य सातौ　९९८

वि द्वेषांसीनुहि वर्धयेळां　मदेम शतहिमाः सुवीराः　९९९

॥ १२५ ॥ (ऋ० ६ । ११ । १-६) त्रिष्टुप् ।

यजस्व होतरिषितो यजीयान्　अग्ने बाधो मरुतां न प्रयुक्ति ।
आ नो मित्रावरुणा नासत्या　द्यावा होत्राय पृथिवी ववृत्याः　१०००

त्वं होता मन्द्रतमो नो अध्रुग्　अन्तर्देवो विदथा मर्त्येषु ।
पावकया जुह्वा३ वह्निरासा　ऽग्ने यजस्व तन्वं१ तव स्वाम्　१००१

धन्या चिद्धि त्वे धिषणा वष्टि　प्र देवाञ् जन्म गृणते यजध्यै ।
वेपिष्ठो अङ्गिरसां यद्ध विप्रो　मधु च्छन्दो भनति रेभ इष्टौ　१००२

अदिद्युतत् स्वपाको विभावा　ऽग्ने यजस्व रोदसी उरूची ।
आयुं न यं नमसा रातहव्या　अञ्जन्ति सुप्रयसं पञ्च जनाः　१००३

वृञ्जे ह यन्नमसा बर्हिरग्नौ अयामि स्रुग् घृतवती सुवृक्तिः ।
अम्यक्षि सद्म सदने पृथिव्या अश्रायि यज्ञः सूर्ये न चक्षुः १००४

दशस्या नः पुर्वणीक होतर् देवेभिरग्ने अग्निभिरिधानः ।
रायः सूनो सहसो वावसाना अति स्रसेम वृजनं नांहः १००५

॥ १२६ ॥ (ऋ० ६ । १२ । १-६)

मध्ये होता दुरोणे बर्हिषो राळ् अग्निस् तोदस्य रोदसी यजध्यै ।
अयं स सूनुः सहस ऋतावा दूरात् सूर्यो न शोचिषा ततान १००६

आ यस्मिन् त्वे स्वपाके यजत्र यक्षद् राजन्त्सर्वतातेव नु द्यौः ।
त्रिषधस्थस् ततरुषो न जंहो हव्या मघानि मानुषा यजध्यै १००७

तेजिष्ठा यस्यारतिर्वनेराट् तोदो अध्वन्न वृधसानो अद्यौत् ।
अद्रोघो न द्रविता चेतति त्मन्न् अमर्त्योऽवर्त्र ओषधीषु १००८

सास्माकेभिरेतरी न शूषैर् अग्निः ष्टवे दम आ जातवेदाः ।
द्र्वन्नो वन्वन् क्रत्वा नार्वा उस्रः पितेव जारयायि यज्ञैः १००९

अध स्मास्य पनयन्ति भासो वृथा यत् तक्षदनुयाति पृथ्वीम् ।
सद्यो यः स्पन्द्रो विषितो धवीयान् ऋणो न तायुरति धन्वा राट् १०१०

स त्वं नो अर्वन्निदाया विश्वेभिरग्ने अग्निभिरिधानः ।
वेषि रायो वि यासि दुच्छुना मदेम शतहिमाः सुवीराः १०११

॥ १२७ ॥ (ऋ० ६ । १३ । १-६)

त्वद् विश्वा सुभग सौभगानि अग्ने वि यन्ति वनिनो न वयाः ।
श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपाम् १०१२

त्वं भगो न आ हि रत्नमिषे परिज्मेव क्षयसि दस्मवर्चाः ।
अग्ने मित्रो न बृहत ऋतस्य असि क्षत्ता वामस्य देव भूरेः १०१३

स सत्पतिः शवसा हन्ति वृत्रम् अग्ने विप्रो वि पणेर्भर्ति वाजम् ।
यं त्वं प्रचेत ऋतजात राया सजोषा नप्त्रापां हिनोषि १०१४

यस् ते सूनो सहसो गीर्भिरुक्थैर् यज्ञैर्मर्तो निशितिं वेद्यानट् ।
विश्वं स देव प्रति वारमग्ने धत्ते धान्यं१ पत्यते वसव्यैः १०१५

ता नृभ्य आ सौश्रवसा सुवीरा अग्ने सूनो सहसः पुष्यसे धाः ।
कृणोषि यच्छवसा भूरि पश्वो वयो वृकायारये जसुरये १०१६
वद्मा सूनो सहसो नो विहाया अग्ने तोकं तनयं वाजि नो दाः ।
विश्वाभिर्गीर्भिरभि पूर्तिमश्यां मदेम शतहिमाः सुवीराः १०१७

॥ १२८ ॥ (ऋ० ६ । १४ । १-६) अनुष्टुप्, ९६२ शक्वरी ।

अग्ना यो मर्त्यो दुवो धियं जुजोष धीतिभिः । भसन्नु ष प्र पूर्व्य इषं वुरीतावसे १०१८
अग्निरिद्धि प्रचेता अग्निर्वेधस्तम ऋषिः । अग्निं होतारमीळते यज्ञेषु मनुषो विशः १०१९
नाना ह्यग्नेऽवसे स्पर्धन्ते रायो अर्यः । तूर्वन्तो दस्युमायवो व्रतैः सीक्षन्तो अव्रतम् १०२०
अग्निरप्सामृतीषहं वीरं ददाति सत्पतिम् । यस्य त्रसन्ति शवसः संचक्षि शत्रवो भिया १०२१
अग्निर्हि विद्मना निदो देवो मर्तमुरुष्यति । सहावा यस्यावृतो रयिर्वाजेष्ववृतः १०२२
अच्छा नो मित्रमहो० (९६२)

॥ १२९ ॥ (ऋ० ६ । १५ । १-१९)

जगती; १०२५, १०३७ शक्वरी; १०२८ अतिशक्वरी; १०३९ अनुष्टुप्; १०४० बृहती;
१०३२-३६, १०३८, १०४१ त्रिष्टुप् ।

इमम् षु वो अतिथिमुषर्बुधं विश्वासां विशां पतिमृञ्जसे गिरा ।
वेतीद् दिवो जनुषा कच्चिदा शुचिर् ज्योक् चिदत्ति गर्भो यदच्युतम् १०२३
मित्रं न यं सुधितं भृगवो दधुर् वनस्पतावीड्यमूर्ध्वशोचिषम् ।
स त्वं सुप्रीतो वीतहव्ये अद्भुत प्रशस्तिभिर्महयसे दिवेदिवे १०२४
स त्वं दक्षस्यावृको वृधो भूरर्यः परस्य अन्तरस्य तरुषः ।
रायः सूनो सहसो मर्त्येष्वा छर्दिर्यच्छ वीतहव्याय सप्रथो भरद्वाजाय सप्रथः १०२५
द्युतानं वो अतिथिं स्वर्णरम् अग्निं होतारं मनुषः स्वध्वरम् ।
विप्रं न द्युक्षवचसं सुवृक्तिभिर् हव्यवाहमरतिं देवमृञ्जसे १०२६
पावकया यश् चितयन्त्या कृपा क्षामन् रुरुच उषसो न भानुना ।
तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः १०२७
अग्निमग्निं वः समिधा दुवस्यत प्रियंप्रियं वो अतिथिं गृणीषणि ।
उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं देवो देवेषु वनते हि नो दुवः १०२८

समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम्।
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम् १०२९

त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम्।
देवासश् च मर्तासश् च जागृविं विभुं विश्पतिं नमसा नि षेदिरे १०३०

विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे।
यत् ते धीतिं सुमतिमावृणीमहे ऽध स्मा नस् त्रिवरूथः शिवो भव १०३१

तं सुप्रतीकं सुदृशं स्वञ्चम् अविद्वांसो विदुष्टरं सपेम।
स यक्षद् विश्वा वयुनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत् १०३२

तमग्ने पास्युत तं पिपर्षि यस् त आनट् कवये शूर धीतिम्।
यज्ञस्य वा निशितिं वोदितिं वा तमित् पृणक्षि शवसोत राया १०३३

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री १०३४

अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः।
देवानामुत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा १०३५

अग्ने यदद्य विशो अध्वरस्य होतः पावकशोचे वेष्ट्वं हि यज्वा।
ऋता यजासि महिना वि यद् भूर् हव्या वह यविष्ठ या ते अद्य १०३६

अभि प्रयांसि सुधितानि हि ख्यो, नि त्वा दधीत रोदसी यजध्यै।
अवा नो मघवन् वाजसातौ, अग्ने विश्वानि दुरिता तरेम, ता तरेम तवावसा तरेम १०३७

अग्ने विश्वेभिः स्वनीक देवैर् ऊर्णावन्तं प्रथमः सीद योनिम्।
कुलायिनं घृतवन्तं सवित्रे यज्ञं नय यजमानाय साधु १०३८

इममु त्यमथर्ववद् अग्निं मन्थन्ति वेधसः।
यमङ्कूयन्तमानयन् अमूरं श्याव्याभ्यः १०३९

जनिष्वा देववीतये सर्वताता स्वस्तये।
आ देवान् वक्ष्यमृतां ऋतावृधो यज्ञं देवेषु पिस्पृशः १०४०

वयमु त्वा गृहपते जनानाम् अग्ने अकर्म समिधा बृहन्तम्।
अस्थूरि नो गार्हपत्यानि सन्तु तिग्मेन नस् तेजसा सं शिशाधि १०४१

॥ १३० ॥ (ऋ० ६ । १६ । १—१८)

गायत्री; १०४२,१०४७ वर्धमाना; १०६८।१०८८-१०८९ अनुष्टुप्; १०८७ त्रिष्टुप् ।

त्वमग्ने यज्ञानां होता विश्वेषां हितः । देवेभिर्मानुषे जने १०४२
स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः । आ देवान् वक्षि यक्षि च १०४३
वेत्था हि वेधो अध्वनः पथश् च देवाञ्जसा । अग्ने यज्ञेषु सुक्रतो १०४४
त्वामीळे अध द्विता भरतो वाजिभिः शुनम् । ईजे यज्ञेषु यज्ञियम् १०४५
त्वमिमा वार्या पुरु दिवोदासाय सुन्वते । भरद्वाजाय दाशुषे १०४६
त्वं दूतो अमर्त्य आ वहा दैव्यं जनम् । शृण्वन् विप्रस्य सुष्टुतिम् १०४७
त्वामग्ने स्वाध्यो३ मर्तासो देववीतये । यज्ञेषु देवमीळते १०४८
तव प्र यक्षि संदृशम् उत क्रतुं सुदानवः । विश्वे जुषन्त कामिनः १०४९
त्वं होता मनुर्हितो वह्निरासा विदुष्टरः । अग्ने यक्षि दिवो विशः १०५०
अग्न आ याहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि १०५१
तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्य १०५२
स नः पृथु श्रवाय्यम् अच्छा देव विवाससि । बृहदग्ने सुवीर्यम् १०५३
त्वामग्ने पुष्करादधि अथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः १०५४
तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरंदरम् १०५५
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनंजयं रणेरणे १०५६
एह्यू षु ब्रवाणि ते ऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः १०५७
यत्र क्व च ते मनो दक्षं दधस उत्तरम् । तत्रा सदः कृणवसे १०५८
नहि ते पूर्तमक्षिपद् भुवन्नेमानां वसो । अथा दुवो वनवसे १०५९
आग्निरगामि भारतो वृत्रहा पुरुचेतनः । दिवोदासस्य सत्पतिः १०६०
स हि विश्वाति पार्थिवा रयिं दाशन् महित्वना । वन्वन्नवातो अस्तृतः १०६१
स प्रत्नवन्नवीयसा अग्ने द्युम्नेन संयता । बृहत् ततन्थ भानुना १०६२
प्र वः सखायो अग्नये स्तोमं यज्ञं च धृष्णुया । अर्च गाय च वेधसे १०६३
स हि यो मानुषा युगा सीदद्धोता कविक्रतुः । दूतश् च हव्यवाहनः १०६४
ता राजाना शुचिव्रता आदित्यान् मारुतं गणम् । वसो यक्षीह रोदसी १०६५
वस्वी ते अग्ने संदृष्टिर् इषयते मर्त्याय । ऊर्जो नपादमृतस्य १०६६
क्रत्वा दा अस्तु श्रेष्ठो ऽद्य त्वा वन्वन्त्सुरेक्णाः । मर्त आनाश सुवृक्तिम् १०६७

ते ते अग्ने त्वोता इषयन्तो विश्वमायुः ।
तरन्तो अर्यो अरातीर् वन्वन्तो अर्यो अरातीः १०६८

अग्निस् तिग्मेन शोचिषा यासद् विश्वं न्य१त्रिणम् । अग्निर्नो वनते रयिम् १०६९

सुवीरं रयिमा भर जातवेदो विचर्षणे । जहि रक्षांसि सुक्रतो १०७०

त्वं नः पाह्यंहसो जातवेदो अघायतः । रक्षा णो ब्रह्मणस् कवे १०७१

यो नो अग्ने दुरेव आ मर्तो वधाय दाशति । तस्मान्नः पाह्यंहसः १०७२

त्वं तं देव जिह्वया परि बाधस्व दुष्कृतम् । मर्तो यो नो जिघांसति १०७३

भरद्वाजाय सप्रथः शर्म यच्छ सहन्त्य । अग्ने वरेण्यं वसु १०७४

अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः १०७५

गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे । सीदन्नृतस्य योनिमा १०७६

ब्रह्म प्रजावदा भर जातवेदो विचर्षणे । अग्ने यद् दीदयद् दिवि १०७७

उप त्वा रण्वसंदृशं प्रयस्वन्तः सहस्कृत । अग्ने ससृज्महे गिरः १०७८

उप च्छायामिव घृणेर् अगन्म शर्म ते वयम् । अग्ने हिरण्यऽसंदृशः १०७९

य उग्र इव शर्यहा तिग्मशृङ्गो न वंसगः । अग्ने पुरो रुरोजिथ १०८०

आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति । विशामग्निं स्वध्वरं १०८१

प्र देवं देववीतये भरता वसुवित्तमम् । आ स्वे योनौ नि षीदतु १०८२

आ जातं जातवेदसि प्रियं शिशीतातिथिम् । स्योन आ गृहपतिम् १०८३

अग्ने युक्ष्वा हि ये तव अश्वासो देव साधवः । अरं वहन्ति मन्यवे १०८४

अच्छा नो याह्या वह अभि प्रयांसि वीतये । आ देवान् त्सोमपीतये १०८५

उदग्ने भारत द्युमद् अजस्रेण दविद्युतत् । शोचा वि भाह्यजर १०८६

वीती यो देवं मर्तो दुवस्येद् अग्निमीळीताध्वरे हविष्मान् ।
होतारं सत्ययजं रोदस्योर् उत्तानहस्तो नमसा विवासेत् १०८७

आ ते अग्न ऋचा हविर् हृदा तष्टं भरामसि । ते ते भवन्तूक्षण ऋषभासो वशा उत १०८८

अग्निं देवासो अग्रियम् इन्धते वृत्रहन्तमम् । येना वसून्याभृता तृह्ला रक्षांसि वाजिना १०८९

॥ १३१ ॥ (ऋ० ६ । ४८ । १-१०)

(१०९०-१०९९) शंयुर्बार्हस्पत्यः (तृणपाणिः) । प्रगाथः ऋ, १०९०, १०९२ बृहती; १०९१, १०९३ सतोबृहती, १०९४ बृहती, १०९५ महा सतोबृहती, १०९६ महा बृहती, १०९७ महा सतोबृहती, १०९८ बृहती, १०९९ सतोबृहती ।

यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् १०९०

ऊर्जो नपातं स हिनायमस्मयुर् दाशेम हव्यदातये ।
भुवद् वाजेष्ववि॒ता भुवद् वृध उत त्राता तनूनाम् १०९१

वृषा ह्यग्ने अजरो महान् विभास्यर्चिषा ।
अजस्रेण शोचिषा शोशुचच् छुचे सुदीतिभिः सु दीदिहि १०९२

महो देवान् यजसि यक्ष्यानुषक् तव क्रत्वोत दंसना ।
अर्वाचः सीं कृणुह्यग्नेऽवसे रास्व वाजोत वंस्व १०९३

यमापो अद्रयो वना गर्भमृतस्य पिप्रति ।
सहसा यो मथितो जायते नृभिः पृथिव्या अधि सानवि १०९४

आ यः पप्रौ भानुना रोदसी उभे धूमेन धावते दिवि ।
तिरस् तमो ददृश ऊर्म्यास्वा श्यावास्वरुषो वृषा श्यावा अरुषो वृषा १०९५

बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा ।
भरद्वाजे समिधानो यविष्ठ्य रेवन्नः शुक्र दीदिहि द्युमत् पावक दीदिहि १०९६

विश्वासां गृहपतिर्विशामसि त्वमग्ने मानुषीणाम् ।
शतं पूर्भिर्यविष्ठ पाह्यंहसः समेद्धारं शतं हिमाः स्तोतृभ्यो ये च ददति १०९७

त्वं नश् चित्र ऊत्या वसो राधांसि चोदय ।
अस्य रायस् त्वमग्ने रथीरसि विदा गाधं तुचे तु नः १०९८

पर्षि तोकं तनयं पर्तृभिष्ट्वम् अदब्धैरप्रयुत्वभिः ।
अग्ने हेळांसि दैव्या युयोधि नोऽदेवानि ह्वरांसि च १०९९

॥ १३२ ॥ (ऋग्वेदस्य सप्तमं मण्डलं, सूक्तं १, मन्त्राः १-२५)
[११००-१२१३] वसिष्ठो मैत्रावरुणिः । विराट्, १११८-२४ त्रिष्टुप् ।

अग्निं नरो दीधितिभिररण्योर् हस्तच्युती जनयन्त प्रशस्तम् ।
दूरेदृशं गृहपतिमथर्युम् ११००
तमग्निमस्ते वसवो न्यृण्वन् त्सुप्रतिचक्षमवसे कुतश्चित् ।
दक्षाय्यो यो दम आस नित्यः ११०१
प्रेद्धो अग्ने दीदिहि पुरो नो ऽजस्रया सूर्म्या यविष्ठ ।
त्वां शश्वन्त उप यन्ति वाजाः ११०२
प्र ते अग्नयोऽग्निभ्यो वरं निः सुवीरासः शोशुचन्त द्युमन्तः ।
यत्रा नरः समासते सुजाताः ११०३
दा नो अग्ने धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तम् ।
न यं यावा तरति यातुमावान् ११०४
उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृताची ।
उप स्वैनमरमतिर्वसूयुः ११०५
विश्वा अग्नेऽप दहारातीर् येभिस्तपोभिरदहो जरूथम् ।
प्र निस्वरं चातयस्वामीवाम् ११०६
आ यस्ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पावक ।
उतो न एभिः स्तवथैरिह स्याः ११०७
वि ये ते अग्ने भेजिरे अनीकं मर्ता नरः पित्र्यासः पुरुत्रा ।
उतो न एभिः सुमना इह स्याः ११०८
इमे नरो वृत्रहत्येषु शूरा विश्वा अदेवीरभि सन्तु मायाः ।
ये मे धियं पनयन्त प्रशस्ताम् ११०९
मा शूने अग्ने नि षदाम नृणां माशेषसोऽवीरता परि त्वा ।
प्रजावतीषु दुर्यासु दुर्य १११०
यमश्वी नित्यमुपयाति यज्ञं प्रजावन्तं स्वपत्यं क्षयं नः ।
स्वजन्मना शेषसा वावृधानम् ११११

पाहि नो अग्ने रक्षसो अजुष्टात् पाहि धूर्तेररुषो अघायोः ।
त्वा युजा पृतनायूँरभि ष्याम् १११२

सेदग्निरग्नीँरत्यस्त्वन्यान् यत्र वाजी तनयो वीळुपाणिः ।
सहस्रपाथा अक्षरा समेति १११३

सेदग्निर्यो वनुष्यतो निपाति समेद्धारमंहस उरुष्यात् ।
सुजातासः परि चरन्ति वीराः १११४

अयं सो अग्निराहुतः पुरुत्रा यमीशानः समिदिन्धे हविष्मान् ।
परि यमेत्यध्वरेषु होता १११५

त्वे अग्न आहवनानि भूरि ईशानास आ जुहुयाम नित्या ।
उभा कृण्वन्तो वहतू मियेधे १११६

इमो अग्ने वीततमानि हव्या ऽजस्रो वक्षि देवतातिमच्छ ।
प्रति न ईं सुरभीणि व्यन्तु १११७

मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतये मा नो अस्यै ।
मा नः क्षुधे मा रक्षस ऋतावो मा नो दमे मा वन आ जुहूर्थाः १११८

नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।
रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः १११९

त्वमग्ने सुहवो रण्वसंदृक् सुदीती सूनो सहसो दिदीहि ।
मा त्वे सचा तनये नित्य आ धङ् मा वीरो अस्मन्नर्यो वि दासीत् ११२०

मा नो अग्ने दुर्भृतये सचैषु देवेद्धेष्वग्निषु प्र वोचः ।
मा ते अस्मान् दुर्मतयो भृमाच्चिद् देवस्य सूनो सहसो नशन्त ११२१

स मर्तो अग्ने स्वनीक रेवान् अमर्त्ये य आजुहोति हव्यम् ।
स देवता वसुवनिं दधाति यं सूरिरर्थी पृच्छमान एति ११२२

महो नो अग्ने सुवितस्य विद्वान् रयिं सूरिभ्य आ वहा बृहन्तम् ।
येन वयं सहसावन् मदेमाविक्षितास आयुषा सुवीराः ११२३

नू मे ब्रह्माण्यग्न० (१११९)

॥ १३३ ॥ (ऋ० ७ । ३ । १-१०) त्रिष्टुप् ।

अग्निं वो देवमग्निभिः सजोषा　यजिष्ठं दूतमध्वरे कृणुध्वम् ।
यो मर्त्येषु निध्रुविर्ऋतावा　तपुर्मूर्धा घृतान्नः पावकः　११२४

प्रोथदश्वो न यवसेऽविष्यन्　यदा महः संवरणाद् व्यस्थात् ।
आदस्य वातो अनु वाति शोचिर्　अध स्म ते व्रजनं कृष्णमस्ति　११२५

उद्यस्य ते नवजातस्य वृष्णो　ऽग्ने चरन्त्यजरा इधानाः ।
अच्छा द्यामरुषो धूम एति　सं दूतो अग्न ईयसे हि देवान्　११२६

वि यस्य ते पृथिव्यां पाजो अश्रेत्　तृषु यदन्ना समवृक्त जम्भैः ।
सेनेव सृष्टा प्रसितिष्ट एति　यवं न दस्म जुह्वा विवेक्षि　११२७

तमिद् दोषा तमुषसि यविष्ठम्　अग्निमत्यं न मर्जयन्त नरः ।
निशिशाना अतिथिमस्य योनौ　दीदाय शोचिराहुतस्य वृष्णः　११२८

सुसंदृक् ते स्वनीक प्रतीकं　वि यद् रुक्मो न रोचस उपाके ।
दिवो न ते तन्यतुरेति शुष्मश्　चित्रो न सूरः प्रति चक्षि भानुम्　११२९

यथा वः स्वाहाग्नये दाशेम　परीळाभिर्घृतवद्भिश् च हव्यैः ।
तेभिर्नो अग्ने अमितैर्महोभिः　शतं पूर्भिरायसीभिर्नि पाहि　११३०

या वा ते सन्ति दाशुषे अधृष्टा　गिरो वा याभिर्नृवतीरुरुष्याः ।
ताभिर्नः सूनो सहसो नि पाहि　स्मत् सूरीञ् जरितॄञ् जातवेदः　११३१

निर्यत् पूतेव स्वधितिः शुचिर्गात्　स्वया कृपा तन्वा३ रोचमानः ।
आ यो मात्रोरुशेन्यो जनिष्ट　देवयज्याय सुक्रतुः पावकः　११३२

एता नो अग्ने सौभगा दिदीहि　अपि क्रतुं सुचेतसं वतेम ।
विश्वा स्तोतृभ्यो गृणते च सन्तु　यूयं पात स्वस्तिभिः सदा नः　११३३

॥ १३४ ॥ (ऋ० ७ । ४ । १-१०)

प्र वः शुक्राय भानवे भरध्वं　हव्यं मतिं चाग्नये सुपूतम् ।
यो दैव्यानि मानुषा जनूंषि　अन्तर्विश्वानि विद्मना जिगाति　११३४

स गृत्सो अग्निस् तरुणश् चिदस्तु　यतो यविष्ठो अजनिष्ट मातुः ।
सं यो वना युवते शुचिदन्　भूरि चिदन्ना समिदत्ति सद्यः　११३५

अस्य देवस्य संसद्यनीके यं मर्तासः श्येतं जगृभ्रे ।
नि यो गृभं पौरुषेयीमुवोच दुरोकमग्निरायवे शुशोच ११३६

अयं कविरकविषु प्रचेता मर्तेष्वग्निरमृतो नि धायि ।
स मा नो अत्र जुहुरः सहस्वः सदा त्वे सुमनसः स्याम ११३७

आ यो योनिं देवकृतं ससाद क्रत्वा ह्य१ग्निरमृताँ अतारीत् ।
तमोषधीश् च वनिनश् च गर्भं भूमिश् च विश्वधायसं बिभर्ति ११३८

ईशे ह्य१ग्निरमृतस्य भूरेर् ईशे रायः सुवीर्यस्य दातोः ।
मा त्वा वयं सहसावन्नवीरा माप्सवः परि षदाम मादुवः ११३९

परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम ।
न शेषो अग्ने अन्यजातमस्ति अचेतानस्य मा पथो वि दुक्षः ११४०

नहि ग्रभायारणः सुशेवो ऽन्योदर्यो मनसा मन्तवा उ ।
अधा चिदोकः पुनरित् स एति आ नो वाज्यभीषाळेतु नव्यः ११४१

त्वमग्ने वनुष्यतो० (१०३४)

एता नो अग्ने० (११३४)

॥ १३५ ॥ (ऋ० ७ । ७ । १-७)

प्र वो देवं चित् सहसानमग्निम् अश्वं न वाजिनं हिषे नमोभिः ।
भवा नो दूतो अध्वरस्य विद्वान् त्मना देवेषु विविदे मितद्रुः ११४२

आ याह्यग्ने पथ्या३ अनु स्वा मन्द्रो देवानां सख्यं जुषाणः ।
आ सानु शुष्मैर्नदयन् पृथिव्या जम्भेभिर्विश्वमुशधग् वनानि ११४३

प्राचीनो यज्ञः सुधितं हि बर्हिः प्रीणीते अग्निरीळितो न होता ।
आ मातरा विश्ववारे हुवानो यतो यविष्ठ जज्ञिषे सुशेवः ११४४

सद्यो अध्वरे रथिरं जनन्त मानुषासो विचेतसो य एषाम् ।
विशामधायि विश्पतिर्दुरोणे३ ऽग्निर्मन्द्रो मधुवचा ऋतावा ११४५

असादि वृतो वह्निराजगन्वान् अग्निर्ब्रह्मा नृषदने विधर्ता ।
द्यौश् च यं पृथिवी वावृधाते आ यं होता यजति विश्ववारम् ११४६

एते द्युम्नेभिर्विश्वमातिरन्त मन्त्रं ये वारं नर्या अतक्षन् ।
प्र ये विशस् तिरन्त श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्य ११४७
नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम् ।
इषं स्तोतृभ्यो मघवद्भ्य आनड् यूयं पात स्वस्तिभिः सदा नः ११४८

॥ १३६ ॥ (ऋ० ७।८।१-७)

इन्धे राजा समर्यो नमोभिर् यस्य प्रतीकमाहुतं घृतेन ।
नरो हव्येभिरीळते सबाध आग्निरग्र उषसामशोचि ११४९
अयमु ष्य सुमहाँ अवेदि होता मन्द्रो मनुषो यह्वो अग्निः ।
वि भा अकः ससृजानः पृथिव्यां कृष्णपविरोषधीभिर्ववक्षे ११५०
कया नो अग्ने वि वसः सुवृक्तिं कामु स्वधामृणवः शस्यमानः ।
कदा भवेम पतयः सुदत्र रायो वन्तारो दुष्टरस्य साधोः ११५१
प्रप्रायमग्निर्भरतस्य शृण्वे वि यत् सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ द्युतानो दैव्यो अतिथिः शुशोच ११५२
असन्नित् त्वे आहवनानि भूरि भुवो विश्वेभिः सुमना अनीकैः ।
स्तुतश् चिदग्ने शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात ११५३
इदं वचः शतसाः संसहस्रम् उदग्नये जनिषीष्ट द्विबर्हाः ।
शं यत् स्तोतृभ्य आपये भवाति द्युमदमीवचातनं रक्षोहा ११५४
नू त्वामग्न ईमहे वसिष्ठा० (११५०)

॥ १३७ ॥ (ऋ० ७।९।१-६)

अबोधि जार उषसामुपस्थाद् होता मन्द्रः कवितमः पावकः ।
दधाति केतुमुभयस्य जन्तोर् हव्या देवेषु द्रविणं सुकृत्सु ११५५
स सुक्रतुर्यो वि दुरः पणीनां पुनानो अर्कं पुरुभोजसं नः ।
होता मन्द्रो विशां दमूनास् तिरस् तमो ददृशे राम्याणाम् ११५६
अमूरः कविरदितिर्विवस्वान् त्सुसंसन्मित्रो अतिथिः शिवो नः ।
चित्रभानुरुषसां भात्यग्रे ऽपां गर्भः प्रस्वऽ आ विवेश ११५७

ईळेन्यो वो मनुषो युगेषु समन॥ .. तवेदाः ।
सुसंदृशा भानुना यो विभाति प्रति गावः समिधानं बुधन्त ११५८

अग्ने याहि दूत्यं१ मा रिषण्यो देवाँ अच्छा ब्रह्मकृता गणेन ।
सरस्वतीं मरुतो अश्विनापो यक्षि देवान् रत्नधेयाय विश्वान् ११५९

त्वामग्ने समिधानो वसिष्ठो जरूथं हन् यक्षि राये पुरंधिम् ।
पुरुणीथा जातवेदो जरस्व यूयं पात स्वस्तिभिः सदा नः ११६०

॥ १३८ ॥ (ऋ० ७ । १० । १-५) ।

उषो न जारः पृथु पाजो अश्रेद् दविद्युतत् दीद्यच्छोशुचानः ।
वृषा हरिः शुचिरा भाति भासा धियो हिन्वान उशतीरजीगः ११६१

स्व१र्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म ।
अग्निर्जन्मानि देव आ वि विद्वान् द्रवद् दूतो देवयावा वनिष्ठः ११६२

अच्छा गिरो मतयो देवयन्तीर् अग्निं यन्ति द्रविणं भिक्षमाणाः ।
सुसंदृशं सुप्रतीकं स्वञ्चं हव्यवाहमरतिं मानुषाणाम् ११६३

इन्द्रं नो अग्ने वसुभिः सजोषा रुद्रं रुद्रेभिरा वहा बृहन्तम् ।
आदित्येभिरदितिं विश्वजन्यां बृहस्पतिमृक्वभिर्विश्ववारम् ११६४

मन्द्रं होतारमुशिजो यविष्ठम् अग्निं विश ईळते अध्वरेषु ।
स हि क्षपावाँ अभवद् रयीणाम् अतन्द्रो दूतो यजथाय देवान् ११६५

॥ १३९ ॥ (ऋ० ७ । ११ । १-५)

महाँ अस्यध्वरस्य प्रकेतो न ऋते त्वदमृता मादयन्ते ।
आ विश्वेभिः सरथं याहि देवैर् न्यग्ने होता प्रथमः सदेह ११६६

त्वामीळते अजिरं दूत्याय हविष्मन्तः सदमिन् मानुषासः ।
यस्य देवैरासदो बर्हिरग्ने ऽहान्यस्मै सुदिना भवन्ति ११६७

त्रिश् चिदक्तोः प्र चिकितुर्वसूनि त्वे अन्तर्दाशुषे मर्त्याय ।
मनुष्वदग्न इह यक्षि देवान् भवा नो दूतो अभिशस्तिपावा ११६८

अग्निरीशे बृहतो अध्वरस्य अग्निर्विश्वस्य हविषः कृतस्य
क्रतुं ह्यस्य वसवो जुषन्त अथा देवा दधिरे हव्यवाहम् ११६९

आग्ने वह हविरद्याय देवान् इन्द्रज्येष्ठास इह मादयन्ताम् ।
इमं यज्ञं दिवि देवेषु धेहि यूयं पात स्वस्तिभिः सदा नः ११७०

॥ १४० ॥ (ऋ० ७ । १२ । १-३)

अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे ।
चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ११७१

स मह्ना विश्वा दुरितानि साह्वान् अग्निः ष्टवे दम आ जातवेदाः ।
स नो रक्षिषद् दुरितादवद्याद् अस्मान् गृणत उत नो मघोनः ११७२

त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः ।
त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ११७३

॥ १४१ ॥ (ऋ० ७ । १४ । १-३) त्रिष्टुप्, ११७४ बृहती ।

समिधा जातवेदसे देवाय देवहूतिभिः ।
हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये ११७४

वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र ।
वयं घृतेनाध्वरस्य होतर् वयं देव हविषा भद्रशोचे ११७५

आ नो देवेभिरुप देवहूतिम् अग्ने याहि वषट्कृतिं जुषाणः ।
तुभ्यं देवाय दाशतः स्याम यूयं पात स्वस्तिभिः सदा नः ११७६

॥ १४२ ॥ (ऋ० ७ । १५ । १-१५) गायत्री ।

उपसद्याय मीळ्हुष आस्ये जुहुता हविः । यो नो नेदिष्ठमाप्यम् ११७७
यः पञ्च चर्षणीरभि निषसाद दमेदमे । कविर्गृहपतिर्युवा ११७८
स नो वेदो अमात्यम् अग्नी रक्षतु विश्वतः । उतास्मान् पात्वंहसः ११७९
नवं नु स्तोममग्नये दिवः श्येनाय जीजनम् । वस्वः कुविद् वनाति नः ११८०
स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा । अग्रे यज्ञस्य शोचतः ११८१
सेमां वेतु वषट्कृतिम् अग्निर्जुषत नो गिरः । यजिष्ठो हव्यवाहनः ११८२
नि त्वा नक्ष्य विश्पते द्युमन्तं देव धीमहि । सुवीरमग्न आहुत ११८३
क्षप उस्रश्च दीदिहि स्वग्नयस् त्वया वयम् । सुवीरस् त्वमस्मयुः ११८४
उप त्वा सातये नरो विप्रासो यन्ति धीतिभिः । उपाक्षरा सहस्रिणी ११८५

अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः । शुचिः पावक ईड्यः ११८६
स नो राधांस्या भर ईशानः सहसो यहो । भगश् च दातु वार्यम् ११८७
त्वमग्ने वीरवद् यशो देवश् च सविता भगः । दितिश् च दाति वार्यम् ११८८
अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः । तपिष्ठैरजरो दह ११८९
अधा मही न आयस्यनाधृष्टो नृपीतये । पूर्भवा शतभुजिः ११९०
त्वं नः पाह्यंहसो दोषावस्तरघायतः । दिवा नक्तमदाभ्य ११९१

॥ १४२ ॥ (ऋ० ७ । १६ । १-१२) प्रगाथः- (बृहती, सतोबृहती ।)

एना वो अग्निं नमसा ऊर्जो नपातमा हुवे ।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ११९२
स योजते अरुषा विश्वभोजसा स दुद्रवत् स्वाहुतः ।
सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम् ११९३

उदस्य शोचिरस्थाद् आजुह्वानस्य मीळ्हुषः ।
उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः ११९४
तं त्वा दूतं कृण्महे यशस्तमं देवाँ आ वीतये वह ।
विश्वा सूनो सहसो मर्तभोजना रास्व तद् यत् त्वेमहे ११९५

त्वमग्ने गृहपतिस् त्वं होता नो अध्वरे ।
त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यम् ११९६
कृधि रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि ।
आ न ऋते शिशीहि विश्वमृत्विजं सुशंसो यश् च दक्षते ११९७

त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानाम् ऊर्वान् दयन्त गोनाम् ११९८
येषामिळा घृतहस्ता दुरोण आँ अपि प्राता निषीदति ।
ताँस् त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घश्रुत् ११९९

स मन्द्रया च जिह्वया वह्निरासा विदुष्टरः ।
अग्ने रयिं मघवद्भ्यो न आ वह हव्यदातिं च सूदय १२००

ये राधांसि ददत्यश्व्या मघा कामेन श्रवसो महः ।
ताँ अंहसः पिपृहि पर्तृभिष्ट्वं शतं पूर्भिर्यविष्ठ्य १२०१

देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम् ।
उद् वा सिञ्चध्वमुप वा पृणध्वम् आदिद् वो देव ओहते १२०२

तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
दधाति रत्नं विधते सुवीर्यम् अग्निर्जनाय दाशुषे १२०३

॥ १४४ ॥ (ऋ० ७ । १७ । १-७) द्विपदा त्रिष्टुप् ।

अग्ने भव सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीताम् १२०४
उत द्वार उशतीर्वि श्रयन्ताम् उत देवाँ उशत आ वहेह १२०५
अग्ने वीहि हविषा यक्षि देवान् त्स्वध्वरा कृणुहि जातवेदः १२०६
स्वध्वरा करति जातवेदा यक्षद् देवाँ अमृतान् पिप्रयच्च १२०७
वंस्व विश्वा वार्याणि प्रचेतः सत्या भवन्त्वाशिषो नो अद्य १२०८
त्वामु ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज आ नपातम् १२०९
ते ते देवाय दाशतः स्याम महो नो रत्ना वि दध इयानः १२१०

॥ १४५ ॥ (ऋ० ७ । ५० । २) जगती ।

यद् विजामन् परुषि वन्दनं भुवद् अष्ठीवन्तौ परि कुल्फौ च देहत् ।
अग्निष्टच्छोचन्नप बाधतामितो मा मां पद्येन रपसा विदत् त्सरुः १२११

॥ १४६ ॥ (ऋ० ७ । १०४ । १०, १४) त्रिष्टुप् ।

यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस् तनूनाम् ।
रिपुः स्तेनः स्तेयकृद् दभ्रमेतु नि ष हीयतां तन्वा३ तना च १२१२

यदि वाहमनृतदेव आस मोघं वा देवाँ अप्यूहे अग्ने ।
किमस्मभ्यं जातवेदो हृणीषे द्रोघवाचस् ते निर्ऋथं सचन्ताम् १२१३

॥ १४७ ॥ (ऋग्वेदस्य अष्टमं मण्डलम् । सूक्तं ११, मन्त्राः १-१०)

(१२१४—१२२३) वत्सः काण्वः । गायत्री, १२१४ प्रतिष्ठा, १२१५ वर्धमाना, १२२३ त्रिष्टुप् ।

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः १२१४

त्वमसि प्रशस्यो विदथेषु सहन्त्य । अग्ने रथीरध्वराणाम् १२१५
स त्वमस्मदप द्विषो युयोधि जातवेदः । अदेवीरग्ने अरातीः १२१६
अन्ति चित् सन्तमह यज्ञं मर्तस्य रिपोः । नोप वेषि जातवेदः १२१७
मर्ता अमर्त्यस्य ते भूरि नाम मनामहे । विप्रासो जातवेदसः १२१८
विप्रं विप्रासोऽवसे देवं मर्तास ऊतये । अग्निं गीर्भिर्हवामहे १२१९
आ ते वत्सो मनो यमत् परमाच्चित् सधस्थात् । अग्ने त्वां-कामया गिरा १२२०
पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः । समत्सु त्वा हवामहे १२२१
समत्स्वग्निमवसे वाजयन्तो हवामहे । वाजेषु चित्रराधसम् १२२२

प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश् च सत्सि ।
स्वां चाग्ने तन्वं पिप्रयस्व अस्मभ्यं च सौभगमा यजस्व १२२३

॥ १४८ ॥ (ऋ० ८ । १९ । १—३३)

(१२२४—१२६९) सोभरिः काण्वः । प्रगाथः= (ककुप्+ सतोबृहती), १२५० द्विपदा विराट् ।

तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे । देवत्रा हव्यमोहिरे १२२४
त्रिभूतराति विप्र चित्रशोचिषम् अग्निमीळिष्व यन्तुरम् ।
अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम् १२२५

देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु २१०९

एता उ वः सुभगा विश्वरूपा वि पक्षोभिः श्रयमाणा उदातैः ।
ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु २११०

अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने ।
उषासा वाꣳ सुहिरण्ये सुशिल्पे ऋतस्य योनाविह सादयामि २१११

मैत्रा० पाठ०:— २१०७ (१ तनूनपात्सं; २ स्वधां देवैर्); २१०८ (१ मेध्यश्चासि); २१०९ (१ देवेभिरक्तम०)
२११० (१ विश्ववारा); २१११ (४ योना इह)

काठ० पाठ०— २१०९ (१ देवेभिरक्तम०); २११० (१ विश्ववारा; २ कवषः; ३ सुप्रयाणा) २१११ (१ योना इह)

प्रथमा वांᳬ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता २११२

आदित्यैर्नो भारती वष्टु यज्ञᳬ सरस्वती सह रुद्रैर्न आवीत् ।
इडोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त २११३

त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः ।
त्वष्टेदं विश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः २११४

अश्वो घृतेन त्मन्या समक्त उप देवाँ २ ऋतुशः पाथ एतु ।
वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् २११५

प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः २११६

॥ २३४ ॥ (वा० यजुर्वेद २९।२५-३६; काठकसं० १६।२०, मैत्रा० सं० ४।१३।३; तैत्ति० ब्रा० ३।६।३)

समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान् त्वं दूतः कविरसि प्रचेताः २११७

तनूनपात् पथ ऋतस्य यानान् मध्वा समञ्जन् त्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ञमृन्धन् देवत्रा च कृणुह्यध्वरं नः २११८

नराशᳬसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या २११९

आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता स एनान् यक्षीषितो यजीयान् २१२०

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम् ।
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् २१२१

व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः २१२२

मैत्रा० पाठ०-- २११३ (१ स्योनं कृण्वाना सुविते दधातु) २११४ (१ त्वष्टेमा विश्वा भुवना) २११५ (१ समक्ता; २ देवं); २११९ (१ स्वदन्तु); २१२० (१ आजुह्वाना)

काठ० पाठ०-- २११६ (१ समिधे; २ कृण्वया); २११९ अयं मन्त्रो नास्ति ।

आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने २१२३

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता २१२४

आ नो यज्ञं भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु २१२५

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद् भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान् २१२६

उपावसृज त्मन्या समञ्जन् देवानां पाथ ऋतुथा हवींषि ।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन २१२७

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत् पुरोगाः ।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः २१२८

॥ २३'१ ॥ (ऋग्वेदीय-परिशिष्ट-प्रैषाध्याये १-१३ । मैत्रा० सं० ४ । १३ । २; २०० । १; काठक सं० १५ । १३; तै० ब्रा० ३ । ६ । २ । १)

होता यक्षदग्निं समिधा सुषमिधा समिद्धं नाभा पृथिव्याः संगथे वामस्य ।
वर्ष्मन् दिव इळस्पदे वेत्वाज्यस्य होतर्यज २१२९

होता यक्षत् तनूनपातमदितेर्गर्भं भुवनस्य गोपाम् ।
मध्वाद्य देवो देवेभ्यो देवयानान् पथो अनक्तु वेत्वाज्यस्य होतर्यज २१३०

होता यक्षन्नराशंसं नृशंसं नॄः प्रणेत्रं ।
गोभिर्वपावान् त्स्याद् वीरैः शक्तीवान् रथैः प्रथमयावा हिरण्यैश्चन्द्री वेत्वाज्यस्य होतर्यज २१३१

होता यक्षदग्निमीळ ईळितो देवो देवाँ आवक्षद्दूतो हव्यवाळमूरः ।
उपेमं यज्ञमुपेमो देवो देवहूतिमवतु वेत्वाज्यस्य होतर्यज २१३२

मैत्रा० पाठ०- २१२८ मंत्रः नोपलभ्यते; २१३१; (१ नृशस्तं; नूऽस्प्रणेत्रं); २१३२ (१ ह्रमिमिड; २ देवं आ च वक्षद्, ३ ०मूरा),

काठ० पाठ०- २१२९ (१ समिधं); २१३१ अयं मन्त्रः नोपलभ्यते, २१३२ (४ देवहूतिं वेत्वा०);

होता यक्षद् बर्हिः सुष्टरीमोर्णम्रदा अस्मिन् यज्ञे वि च प्र च प्रथतां स्वासस्थं देवेभ्यः ॥
एमेनदद्य वसवो रुद्रा आदित्याः सदन्तु प्रियमिंद्रस्यास्तु वेत्वाज्यस्य होतर्यज २१३३

होता यक्षद् दुर ऋष्वाः कवष्यो कोषधावनीरुद्राताभिर्जिहतां विपक्षोभिः श्रयतां ।
सुप्रायणा अस्मिन् यज्ञे विश्रयन्तामृतावृधो व्यन्त्वाज्यस्य होतर्यज २१३४

होता यक्षदुषासानक्ता बृहती सुपेशसा नॄँःपतिभ्यो योनिं कृण्वाने ।
संस्मयमाने इन्द्रेण देवैरेदं बर्हिः सीदतां वीतामाज्यस्य होतर्यज २१३५

होता यक्षद् दैव्या होतारा मन्द्रा पोतारा कवी प्रचेतसा ।
स्विष्टमद्यान्यः करदिषा स्वभिगूर्तमन्य ऊर्जा सतवसेमं यज्ञं दिवि
देवेषु धत्तां वीतामाज्यस्य होतर्यज २१३६

होता यक्षत् तिस्रो देवीरपसामपस्तमा अच्छिद्रमद्येदमपस्तन्वतां ।
देवेभ्यो देवीर्देवमपो व्यन्त्वाज्यस्य होतर्यज २१३७

होता यक्षत् त्वष्टारमचिष्टमपाकं रेतोधां विश्रवसं यशोधां ।
पुरुरूपमकामकर्शनं सुपोषः पोषैः स्यात् सुवीरो वीरैर्वेत्वाज्यस्य होतर्यज २१३८

होता यक्षद् वनस्पतिमुपावस्रक्षद्धियो जोष्टारं शशमं नरः ।
स्वदान् स्वधितिर्ऋतुथाद्य देवो देवेभ्यो हव्यैवाड् वेत्वाज्यस्य होतर्यज २१३९

अजैदग्निरसनद्वाजं नि देवो देवेभ्यो हव्यवाट् प्रांजोभिर्हिन्वानो धेनाभिः ।
कल्पमानो यज्ञस्यायुः प्रतिरन्नुपप्रेष्य होतर्हव्या देवेभ्यः २१४०

होता यक्षदग्निं स्वाहाज्यस्य स्वाहा मेदसः स्वाहा स्तोकानां स्वाहा
स्वाहाकृतीनां स्वाहा हव्यसूक्तीनाम् ॥
स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य व्यन्तु होतर्यज २१४१

मैत्रा० पाठ०- २१३३ (१ देवेभ्या; स्वदन्तु); २१३४ (१ श्रयंतां); २१३५ (नॄःष्पतिभ्यो);
२१३९ (१ स्वदात्, २ हव्यावाड्); २१४०–२१४२ मन्त्राः नोपलभ्यन्ते ।

काठ० पाठ०- २१३४(१ श्रयंतां); २१३६ (१ करत्स्वभि०, २ ०मन्यस्स्वतसेमं); २१३८ (१ ०मचिष्टुमपाकं)
२१३९ (१ स्वदान्), २१४० अयं मंत्रो नोपलभ्यते ।

अथर्ववेदेऽग्निमन्त्राः ।

(अथर्ववेदे कां०१, सू० ९, मं० ३-४ अथर्वा । त्रिष्टुप् ।)

येनेन्द्राय समभरः पयांस्युत्तमेन ब्रह्मणा जातवेदः ।
तेन त्वमग्न इह वर्धयेमं सजातानां श्रैष्ठ्य आ धेह्येनम् २१४२

ऐषां यज्ञमुत वर्चो ददेऽहं रायस्पोषमुत चित्तान्यग्ने ।
सपत्ना अस्मदधरे भवन्तूत्तमं नाकमधि रोहयेमम् २१४३

(अथर्व० २ । १९ । १-४ । विषमत्रिष्टुभा गायत्री, २१४८ भुरिग्विषमा ।)

अग्ने यत् ते तपस्तेन तं प्रति तप योऽस्मान् द्वेष्टि यं वयं द्विष्मः २१४४
अग्ने यत् ते हरस्तेन तं प्रति हर योऽस्मान् द्वेष्टि यं वयं द्विष्मः २१४५
अग्ने यत् तेऽर्चिस्तेन तं प्रत्यर्च योऽस्मान् द्वेष्टि यं वयं द्विष्मः । २१४६
अग्ने यत् ते शोचिस्तेन तं प्रति शोच योऽस्मान् द्वेष्टि यं वयं द्विष्मः २१४७
अग्ने यत् ते तेजस्तेन तमतेजसं कृणु योऽस्मान् द्वेष्टि यं वयं द्विष्मः २१४८

(अथर्व० २।२९।१—२। २१४९ अनुष्टुप्, २१५० त्रिष्टुप्।)

पार्थिवस्य रस देवा भगस्य तन्वो३ बले ।
आयुष्यमस्मा अग्निः सूर्यो वर्च आ धाद् बृहस्पतिः २१४९

आयुरस्मै धेहि जातवेदः प्रजां त्वष्टरधिनिधेह्यस्मै ।
रायस्पोषं सवितरा सुवास्मै शतं जीवाति शरदस्तवायम् २१५०

(अथर्व० २ । ३४ । ३ । त्रिष्टुप्)

ये बध्यमानमनु दीध्याना अन्वैक्षन्त मनसा चक्षुषा च ।
अग्निष्टानग्रे प्र मुमोक्तु देवो विश्वकर्मा प्रजया संरराणः २१५१

(अथर्व० कां० ३ । १ । १-३, ५-६। २१५२ त्रिष्टुप्, २१५३ विराड्गर्भा भुरिक्, २१५४ अनुष्टुप्, २१५६ विराट्पुर उष्णिक् ।)

अग्निर्नः शत्रून् प्रत्येतु विद्वान् प्रतिदहन्नभिशस्तिमरातिम् ।
स सेनां मोहयतु परेषां निर्हस्तांश्च कृणवज्जातवेदाः २१५२

यूयमुग्रा मरुत ईदृशे स्था-ऽभि प्रेत मृणत सहध्वम् ।
अमीमृणन् वसवो नाथिता इमे अग्निर्ह्येषां दूतः प्रत्येतु विद्वान् २१५३

अमित्रसेनां मघवन्न् अस्मान् छत्रूयतीमभि ।
युवं तानिन्द्र वृत्रहन्न् अग्निश्च दहतं प्रति २१५४

इन्द्रः सेनां मोहयतु मरुतो घ्नन्त्वोजसा ।
चक्षूंष्यग्निरा दत्तां पुनरेतु पराजिता २१५५

(अथर्व० ३ । २ । १—३ । २१५६ त्रिष्टुप् ; २१५७-५८ अनुष्टुप् ।)

अग्निर्नो दूतः प्रत्येतु विद्वान् प्रतिदहन्नभिशस्तिमरातिम् ।
स चित्तानि मोहयतु परेषां निर्हस्तांश्च कृणवज्जातवेदाः २१५६

अयमग्निरमूमुहद् यानि चित्तानि वो हृदि ।
वि वो धमत्वोकसः प्र वो धमतु सर्वतः २१५७

इन्द्र चित्तानि मोहय-न्नर्वाङाकूत्या चर ।
अग्नेर्वातस्य ध्राज्या तान् विषूचो वि नाशय २१५८

(अथर्व० ३ । ३ । १ । त्रिष्टुप्)

अचिक्रदत् स्वपा इह भुवदग्ने व्यचस्व रोदसी उरूची ।
युञ्जन्तु त्वा मरुतो विश्ववेदस आमुं नय नमसा रातहव्यम् २१५९

(अथर्व० ३।४।३)

अच्छ त्वा यन्तु हविनः सजाता अग्निर्दूतो अजिरः सं चरातै ।
जायाः पुत्राः सुमनसो भवन्तु बहुं बलिं प्रति पश्यासा उग्रः २१६०

(अथर्व० ३ । २७ । १ । पञ्चपदा ककुम्मतीगर्भाऽष्टिः ।)

प्राची दिगग्निरधिपतिरसितो रक्षितादित्या इषवः ।
तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योऽस्मान् द्वेष्टि यं वयं द्विष्मस् तं वो जम्भे दध्मः २१६१

(अथर्व० ४ । ४ । ६ । भुरिक् ।)

अद्याग्ने अद्य सवित-रद्य देवि सरस्वति ।
अद्यास्य ब्रह्मणस्पते धनुरिवा तानया पसः २१६२

(अथर्व० ५।८।१-३। अनुष्टुप्, २१६४ त्र्यवसाना षट्पदा जगती।)

वैकङ्कतेनेध्मेन देवेभ्य आज्यं वह।
अग्ने ताँ इह मादय सर्व आ यन्तु मे हवम् २१६३

इन्द्रा याहि मे हवम् इदं करिष्यामि तच्छृणु।
इम ऐन्द्रा अतिसरा आकूतिं सं नमन्तु मे।
तेभिः शकेम वीर्यं जातवेदस्तनूवशिन् २१६४

यदुमावमुतो देवा अदेवः संश्चिकीर्षति।
मा तस्याग्निर्हव्यं वाक्षीद्धवं देवा अस्य मोप गुर्ममैव हवमेतन २१६५

(अथर्व ५।२४।२। चतुष्पदातिशक्वरी।)

अग्निर्वनस्पतीनाम् अधिपतिः स मावतु।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा २१६६

(अथर्व० ५।२८।१-१४। त्रिष्टुप्, २१७२ पञ्चपदातिशक्वरी २१७३, ७५, ७६, ७८
ककुम्मत्यनुष्टुप्, २१७९ पुरउष्णिक्।)

नव प्राणान् नवभिः सं मिमीते दीर्घायुत्वाय शतशारदाय।
हरिते त्रीणि रजते त्रीणि अयसि त्रीणि तपसाविष्ठितानि २१६७

अग्निः सूर्यश्चन्द्रमा भूमिरापो द्यौरन्तरिक्षं प्रदिशो दिशश्च।
आर्तवा ऋतुभिः संविदाना अनेन मा त्रिवृता पारयन्तु २१६८

त्रयः पोषास्त्रिवृति श्रयन्ताम् अनक्तु पूषा पयसा घृतेन।
अन्नस्य भूमा पुरुषस्य भूमा भूमा पशूनां त इह श्रयन्ताम् २१६९

इममादित्या वसुना समुक्षते-ममग्ने वर्धय वावृधानः।
इममिन्द्र सं सृज वीर्येणा-स्मिन् त्रिवृच्छ्रयतां पोषयिष्णु २१७०

भूमिष्ट्वा पातु हरितेन विश्वभृ-दग्निः पिपर्त्वयसा सजोषाः।
वीरुद्भिष्टे अर्जुनं संविदानं दक्षं दधातु सुमनस्यमानम् २१७१

त्रेधा जातं जन्मनेदं हिरण्य-मग्नेरेकं प्रियतमं बभूव सोमस्यैकं हिंसितस्य परापतत्।
अपामेकं वेधसां रेत आहुस् तत् ते हिरण्यं त्रिवृदस्त्वायुषे २१७२

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ।
त्रेधामृतस्य चक्षणं त्रीण्यायूंषि तेऽकरम् २१७३

त्रयः सुपर्णास्त्रिवृता यदायन्न् एकाक्षरमभिसंभूय शक्राः ।
प्रत्यौहन् मृत्युममृतेन साकम् अन्तर्दधाना दुरितानि विश्वा २१७४

दिवस्त्वा पातु हरितं मध्यात् त्वा पात्वर्जुनम् ।
भूम्या अयस्मयं पातु प्रागाद् देवपुरा अयम् २१७५

इमास्तिस्रो देवपुरा—स्तास्त्वा रक्षन्तु सर्वतः ।
तास्त्वं बिभ्रद्वर्च—स्व्युत्तरो द्विषतां भव २१७६

पुरं देवानाममृतं हिरण्यं य आबेधे प्रथमो देवो अग्रे ।
तस्मै नमो दश प्राचीः कृणो—म्यनु मन्यतां त्रिवृदाबधे मे २१७७

आ त्वा चृतत्वर्यमा पूषा बृहस्पतिः ।
अहर्जातस्य यन्नाम तेन त्वाति चृतामसि २१७८

ऋतुभिष्ट्वार्तवै—रायुषे वर्चसे त्वा ।
संवत्सरस्य तेजसा तेन संहनु कृण्मसि २१७९

घृतादुल्लुप्तं मधुना समक्तं भूमिदृंहमच्युतं पारयिष्णु ।
भिन्दत् सपत्नानधरांश्च कृण्वदा मा रोह महते सौभगाय २१८०

(अथर्व० ६ । ३६ । १-३ । गायत्री ।)

ऋतावानं वैश्वानरम् ऋतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे २१८१
स विश्वा प्रति चाक्लृप ऋतूंरुत्सृजते वशी । यज्ञस्य वय उत्तिरन् २१८२
अग्निः परेषु धामसु कामो भूतस्य भव्यस्य । सम्राडेको वि राजति २१८३

(अथर्व०६ । ११० । २-३ । त्रिष्टुप् ।)

ज्येष्ठघ्न्यां जातो विचृतोर्यमस्य मूलबर्हणात् परि पाह्येनम् ।
अत्येनं नेषद् दुरितानि विश्वा दीर्घायुत्वाय शतशारदाय २१८४

व्याघ्रेऽह्न्यजनिष्ट वीरो नक्षत्रजा जायमानः सुवीरः ।
स मा वधीत् पितरं वर्धमानो मा मातरं प्र मिनीज्जनित्रीम् २१८५

(अथर्व० ६ । १११ । १-४ । अनुष्टुप्, २१८६ परानुष्टुप् त्रिष्टुप् ।)

इमं मे अग्ने पुरुषं मुमुग्ध्ययं यो बद्धः सुयतो लालपीति ।
अतोऽधि ते कृणवद् भागधेयं यदानुन्मदितोऽसति २१८६
अग्निष्टे नि शमयतु यदि ते मन उद्युतम् । कृणोमि विद्वान् भेषजं यथानुन्मदितोऽससि २१८७
देवैनसादुन्मदितम् उन्मत्तं रक्षसस्परि । कृणोमि विद्वान् भेषजं यदानुन्मदितोऽसति २१८८
पुनस्त्वा दुरप्सरसः पुनरिन्द्रः पुनर्भगः । पुनस्त्वा दुर्विश्वे देवा यथानुन्मदितोऽससि २१८९

(अथर्व० ६ । ११२ । १-३ । त्रिष्टुप् ।)

मा ज्येष्ठं वधीदयमग्न एषां मूलबर्हणात् परि पाह्येनम् ।
स ग्राह्याः पाशान् वि चृत प्रजानन् तुभ्यं देवा अनु जानन्तु विश्वे २१९०
उन्मुञ्च पाशांस्त्वमग्न एषां त्रयस्त्रिभिरुत्सिता येभिरासन् ।
स ग्राह्याः पाशान् वि चृत प्रजानन् पितापुत्रौ मातरं मुञ्च सर्वान् २१९१
येभिः पाशैः परिवित्तो विबद्धो ऽङ्गेअङ्ग आर्पित उत्सितश्च ।
वि ते मुच्यन्तां विमुचो हि सन्ति भ्रूणघ्नि पूषन् दुरितानि मृक्ष्व २१९२

(अथर्व० ७ । ३४ (३५) । १ ॥ जगती ।)

अग्ने जातान् प्र णुदा मे सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व ।
अधस्पदं कृणुष्व ये पृतन्यवो ऽनागसस्ते वयमदितये स्याम २१९३

(अथर्व० ७ । ३५ [३६] १-३ ॥ त्रिष्टुप्, २१९४ अनुष्टुप् ।)

प्रान्यान् त्सपत्नान् त्सहसा सहस्व प्रत्यजातान् जातवेदो नुदस्व ।
इदं राष्ट्रं पिपृहि सौभगाय विश्व एनमनु मदन्तु देवाः २१९४
इमा यास्ते शतं हिराः सहस्रं धमनीरुत ।
तासां ते सर्वासामहमश्मना बिलमप्यधाम् २१९५
परं योनेरवरं ते कृणोमि मा त्वा प्रजाभि भून्मोत सूनुः ।
अस्वं१ त्वाप्रजसं कृणोम्यश्मानं ते अपिधानं कृणोमि २१९६

(अथर्व० ७ । ७४ [७८] । ४ ॥ अनुष्टुप् ।)

व्रतेन त्वं व्रतपते समक्तो विश्वाहा सुमना दीदिहीह ।
तं त्वा वयं जातवेदः समिद्धं प्रजावन्त उप सदेम सर्वे २१९७

(अथर्व० ७ । ७८ (८३) १-२॥ २१९८ परोष्णिक्. २१९९ त्रिष्टुप् ।)

वि ते मुञ्चामि रशनां वि योक्त्रं वि नियोजनम् । इहैव त्वमजस्र एध्यग्ने २१९८
अस्मै क्षत्राणि धारयन्तमग्ने युनज्मि त्वा ब्रह्मणा दैव्येन ।
दीदिह्यस्मभ्यं द्रविणेह भद्रं प्रेमं वोचो हविर्दां देवतासु २१९९

(अथर्व० ७ । १०६ [१११] । १ । बृहतीगर्भा त्रिष्टुप् ।)

यदस्मृति चकृम किं चिदग्न उपारिम चरणे जातवेदः ।
ततः पाहि त्वं नः प्रचेतः शुभे सखिभ्यो अमृतत्वमस्तु नः २२००

(अथर्व० ७ । ११५ [१२०] १-४ ॥ अनुष्टुप्, २२०२-३ त्रिष्टुप् ।)

प्र पतेतः पापि लक्ष्मि नश्येतः प्रामुतः पत । अयस्मयेनाङ्केन द्विषते त्वा सजामसि २२०१
या मा लक्ष्मीः पतयालूरजुष्टाभिचस्कन्द वन्दनेव वृक्षम् ।
अन्यत्रास्मत् सवितस्तामितो धा हिरण्यहस्तो वसु नो रराणः २२०२
एकशतं लक्ष्म्योऽ मर्त्यस्य साकं तन्वा जनुषोऽधि जाताः ।
तासां पापिष्ठा निरितः प्र हिण्मः शिवा अस्मभ्यं जातवेदो नि यच्छ २२०३
एता एना व्याकरं खिले गा विष्ठिता इव ।
रमन्तां पुण्या लक्ष्मीर्याः पापीस्ता अनीनशम् २२०४

(अथर्व० १९ । ३ । १-४ ॥ त्रिष्टुप्, २२०६ भुरिक् ।)

दिवस्पृथिव्याः पर्यन्तरिक्षाद् वनस्पतिभ्यो अध्योषधीभ्यः ।
यत्रयत्र विभृतो जातवेदास्तत स्तुतो जुषमाणो न एहि २२०५
यस्ते अप्सु महिमा यो वनेषु य ओषधीषु पशुष्वप्स्वन्तः ।
अग्ने सर्वास्तन्वः सं रभस्व ताभिर्न एहि द्रविणोदा अजस्रः २२०६
यस्ते देवेषु महिमा स्वर्गो या ते तनूः पितृष्वाविवेश ।
पुष्टिर्या ते मनुष्येषु पप्रथेऽग्ने तया रयिमस्मासु धेहि २२०७
श्रुत्कर्णाय कवये वेद्याय वचोभिर्वाकैरुप यामि रातिम् ।
यतो भयमभयं तन्नो अस्त्वव देवानां यज हेडो अग्ने २२०८

अथर्व० १९ । ४ । १-४ ॥ त्रिष्टुप्, २२०९ पञ्चपदा विराडतिजगती, २२१० जगती ।

यामाहुतिं प्रथमामथर्वा या जाता या हव्यमकृणोज्जातवेदाः ।
तां त एतां प्रथमो जोहवीमि ताभिष्टुप्तो वहतु हव्यमग्निरग्नये स्वाहा २२०९

आकूतिं देवीं सुभगां पुरो दधे चित्तस्य माता सुहवा नो अस्तु ।
यामाशामेमि केवली सा मे अस्तु विदेयमेनां मनसि प्रविष्टाम् २२१०

आकूत्या नो बृहस्पत आकूत्या न उपा गहि ।
अथो भगस्य नो धेहि अथो नः सुहवो भव २२११

बृहस्पतिर्म आकूतिमाङ्गिरसः प्रति जानातु वाचमेताम् ।
यस्य देवा देवताः संबभूवुः स सुप्रणीताः कामो अन्वेत्वस्मान् २२१२

(अथर्व० १९ । ३७ । १-४॥ २२१३ त्रिष्टुप्; २२१४ आस्तारपंक्तिः; २२१५ त्रिपदा महाबृहती; २२१६ पुरोष्णिक् ।)

इदं वर्चो अग्निना दत्तमागन् भर्गो यशः सह ओजो वयो बलम् ।
त्रयस्त्रिंशद् यानि च वीर्याणि तान्यग्निः प्र ददातु मे २२१३

वर्च आ धेहि मे तन्वां३ सह ओजो वयो बलम् ।
इन्द्रियाय त्वा कर्मणे वीर्याय प्रति गृह्णामि शतशारदाय २२१४

ऊर्जे त्वा बलाय त्वौजसे सहसे त्वा ।
अभिभूयाय त्वा राष्ट्रभृत्याय पर्यूहामि शतशारदाय २२१५

ऋतुभ्यष्ट्वार्तवेभ्यो माद्भ्यः संवत्सरेभ्यः ।
धात्रे विधात्रे समृधे भूतस्य पतये यजे २२१६

(अथर्व० ४ । १४ । १-९ । भृगुः । त्रिष्टुप्; २२१८, २२२० अनुष्टुप्; २२१९ प्रस्तारपङ्क्तिः; २२२३, २२२५ जगती; २२२४ पञ्चपदातिशाक्वरी ।)

अजो ह्य१ग्नेरजनिष्ट शोकात् सो अपश्यज्जनितारमग्रे ।
तेन देवा देवतामग्र आयन् तेन रोहान् रुरुहुर्मेध्यासः २२१७

क्रमध्वमग्निना नाकमुख्यान् हस्तेषु बिभ्रतः ।
दिवस्पृष्ठं स्व१र्गत्वा मिश्रा देवेभिराध्वम् २२१८

पृष्ठात् पृथिव्या अहमन्तरिक्षमारुहमन्तरिक्षाद् दिवमारुहम् ।
दिवो नाकस्य पृष्ठात् स्व१र्ज्योतिरगामहम् २२१९

स्व१र्यन्तो नापेक्षन्त आ द्यां रोहन्ति रोदसी ।
यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे २२२०

अग्ने प्रेहि प्रथमो देवतानां चक्षुर्देवानामुत मानुषाणाम् ।
इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति २२२१

अजमनज्मि पयसा घृतेन दिव्यं सुपर्णं पयसं बृहन्तम् ।
तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम् २२२२

पञ्चौदनं पञ्चभिरङ्गुलिभि-र्दर्व्योद्धर पञ्चधैतमोदनम् ।
प्राच्यां दिशि शिरो अजस्य धेहि दक्षिणायां दिशि दक्षिणं धेहि पार्श्वम् २२२३

प्रतीच्यां दिशि भसदमस्य धेहि उत्तरस्यां दिश्युत्तरं धेहि पार्श्वम् ।
ऊर्ध्वायां दिश्य१जस्यानूकं धेहि दिशि ध्रुवायां धेहि पाजस्यं१ अन्तरिक्षे मध्यतो मध्यमस्य २२२४

शृतमजं शृतया प्रोर्णुहि त्वचा सर्वैरङ्गैः संभृतं विश्वरूपम् ।
स उत्तिष्ठेतो अभि नाकमुत्तमं पद्भिश्चतुर्भिः प्रति तिष्ठ दिक्षु २२२५

(अथर्व० ७ । ८४ । १ । जगती ।)

अनाधृष्यो जातवेदा अमर्त्यो विराडग्ने क्षत्रभृद् दीदिहीह ।
विश्वा अमीवाः प्रमुञ्चन् मानुषीभिः शिवाभिरद्य परि पाहि नो गयम् २२२६

(अथर्व० ७ । १०८ [११३] । १-२ ॥ २२२७ बृहतीगर्भा त्रिष्टुप्; २२२८ त्रिष्टुप् ।)

यो नस्तायद् दिप्सति यो न आविः स्वो विद्वानरणो वा नो अग्ने ।
प्रतीच्येत्वरणी दत्वती तान् मैषामग्ने वास्तु भून्मो अपत्यम् २२२७

यो नः सुप्ताञ्जाग्रतो वाभिदासात् तिष्ठतो वा चरतो जातवेदः ।
वैश्वानरेण सयुजा सजोषास् तान् प्रतीचो निर्दह जातवेदः २२२८

(अथर्व० कां १२ । २ । १-१३; ३३-५५ ॥ त्रिष्टुप्; २२३०, २२३३, २२३८-४५, २२४७-४९, २२५१-५४, २२५६, २२६४, २२६७ अनुष्टुप् (२२४२ ककुम्मती पराबृहती, २२४४ निचृत्, २२५३ पुरस्तात्ककुम्मती); २२३१ आस्तारपङ्क्तिः; २२३४ भुरिगार्षी पङ्क्तिः २२५८ जगती; २२६१-६२ भुरिग्; २२३५ अनुष्टुब्गर्भा विपरीतपादलक्ष्मा पङ्क्तिः; २२५० पुरस्ताद्बृहती; २२५५ त्रिप० एकाव० भुरिगार्ची गायत्री; २२५७ एकाव० द्विप० आर्ची बृहती; २२५९ एका० द्विप० साम्नी त्रिष्टुप्; २२६० पञ्चपदा बार्हतवैराजगर्भा जगती; २२६३ उपरिष्टाद्विराड् बृहती; २२६५ पुरस्ताद्विराड् बृहती; २२६८ बृहतीगर्भा ।)

नडमा रोह न ते अत्र लोक इदं सीसं भागधेयं त एहि ।
यो गोषु यक्ष्मः पुरुषेषु यक्ष्म-स्तेन त्वं साकमधराङ् परेहि २२२९

अघशंसदुःशंसाभ्यां करेणानुकरेण च । यक्ष्मं च सर्वं तेनेतो मृत्युं च निरजामसि २२३०

निरितो मृत्युं निर्ऋतिं निररातिमजामसि ।
यो नो द्वेष्टि तमद्ध्यग्ने अक्रव्याद्यमु द्विष्मस्तमु ते प्र सुवामसि २२३१
यद्यग्निः क्रव्याद्यदि वा व्याघ्र इमं गोष्ठं प्रविवेशान्योकाः ।
तं माषाज्यं कृत्वा प्र हिणोमि दूरं स गच्छत्वप्सुषदोऽप्यग्नीन् २२३२
यत्त्वा क्रुद्धाः प्रचक्रुर्मन्युना पुरुषे मृते । सुकल्पमग्ने तत् त्वया पुनस्त्वोद्दीपयामसि २२३३
पुनस्त्वादित्या रुद्रा वसवः पुनर्ब्रह्मा वसुनीतिरग्ने ।
पुनस्त्वा ब्रह्मणस्पतिराधाद् दीर्घायुत्वाय शतशारदाय २२३४
यो अग्निः क्रव्यात् प्रविवेश० (ऋ० १० । १६ । १०) (१५६६)
क्रव्यादमग्निं प्र हिणोमि दूरं० (१० । १६ । ९) (१५६६)
क्रव्यादमग्निमिषितो हरामि जनान् दृंहन्तं वज्रेण मृत्युम् ।
नि तं शास्मि गार्हपत्येन विद्वान् पितॄणां लोकेऽपि भागो अस्तु २२३५
क्रव्यादमग्निं शशमानमुक्थ्यं प्र हिणोमि पथिभिः पितृयाणैः ।
मा देवयानैः पुनरा गा अत्रैवैधि पितृषु जागृहि त्वम् २२३६
समिन्धते संकसुकं स्वस्तये शुद्धा भवन्तः शुचयः पावकाः ।
जहाति रिप्रमत्येन एति समिद्धो अग्निः सुपुना पुनाति २२३७
देवो अग्निः संकसुको दिवस्पृष्ठान्यारुहत् ।
मुच्यमानो निरेणसो ऽमोगस्माँ अशस्त्याः २२३८
अस्मिन् वयं संकसुके अग्नौ रिप्राणि मृज्महे ।
अभूम यज्ञियाः शुद्धाः प्र ण आयूंषि तारिषत् २२३९
संकसुको विकसुको निर्ऋथो यश्च निस्वरः । ते ते यक्ष्मं सवेदसो दूराद् दूरमनीनशन् २२४०
यो नो अश्वेषु वीरेषु यो नो गोष्वजाविषु । क्रव्यादं निर्णुदामसि यो अग्निर्जनयोपनः २२४१
अन्येभ्यस्त्वा पुरुषेभ्यो गोभ्यो अश्वेभ्यस्त्वा ।
निः क्रव्यादं नुदामसि यो अग्निर्जीवितयोपनः २२४२
यस्मिन् देवा अमृजत यस्मिन् मनुष्या उत । तस्मिन् घृतस्तावो मृष्ट्वा त्वमग्ने दिवं रुह २२४३
समिद्धो अग्न आहुत स नो माभ्यपक्रमीः । अत्रैव दीदिहि द्यवि ज्योक् च सूर्यं दृशे २२४४
सीसे मृड्ढ्वं नडे मृड्ढ्वम् अग्नौ संकसुके च यत् । अथो अव्यां रामायां शीर्षक्तिमुपबर्हणे २२४५

यो नो अग्निः पितरो हृत्स्व१न्तरविवेशामृतो मर्त्येषु ।
मय्यहं तं परि गृह्णामि देवं मा सो अस्मान् द्विक्षत मा वयं तम् २२४६
अपावृत्य गार्हपत्यात् क्रव्यादा प्रेत दक्षिणा । प्रियं पितृभ्य आत्मने ब्रह्मभ्यः कृणुता प्रियम् २२४७
द्विभागधनमादाय प्र क्षिणात्यवर्त्या । अग्निः पुत्रस्य ज्येष्ठस्य यः क्रव्यादनिराहितः २२४८
यत् कृषते यद् वनुते यच्च वस्नेन विन्दते । सर्वं मर्त्यस्य तन्नास्ति क्रव्याच्चेदनिराहितः २२४९
अयज्ञियो हतवर्चा भवति नैनेन हविरत्तवे । छिनत्ति कृष्या गोर्धनाद् यं क्रव्यादनुवर्तते २२५०
मुहुर्गृध्यैः प्र वदत्यार्तिं मर्त्यो नीत्य । क्रव्याद्यानग्निरन्तिकादनुविद्वान्वितावति २२५१
ग्राह्या गृहाः सं सृज्यन्ते स्त्रिया यन्म्रियते पतिः ।
ब्रह्मैव विद्वानेष्यो३ यः क्रव्यादं निरादधत् २२५२
यद् रिप्रं शमलं चकृम यच्च दुष्कृतम् । आपो मा तस्माच्छुम्भन्त्वग्नेः संकसुकाच्च यत् २२५३
ता अधरादुदीचीराववृत्रन् प्रजानतीः पथिभिर्देवयानैः ।
पर्वतस्य वृषभस्याधि पृष्ठे नवाश्चरन्ति सरितः पुराणीः २२५४
अग्ने अक्रव्यान्निः क्रव्यादं नुदा देवयजनं वह २२५५
इमं क्रव्यादा विवेशायं क्रव्यादमन्वगात् । व्याघ्रौ कृत्वा नानानं तं हरामि शिवापरम् २२५६
अन्तर्धिर्देवानां परिधिर्मनुष्याणाम् अग्निर्गार्हपत्य उभयानन्तरा श्रितः २२५७
जीवानामायुः प्र तिर त्वमग्ने पितृणां लोकमपि गच्छन्तु ये मृताः ।
सुगार्हपत्यो वितपन्नरातिम् उषामुषां श्रेयसीं धेह्यस्मै २२५८
सर्वानग्ने सहमानः सपत्नानैषामूर्जं रयिमस्मासु धेहि २२५९
इममिन्द्रं वह्निं पप्रिमन्वारभध्वं स वो निर्वक्षद् दुरितादवद्यात् ।
तेनाप हत शरुमापतन्तं तेन रुद्रस्य परि पातास्ताम् २२६०
अनड्वाहं प्लवमन्वारभध्वं स वो निर्वक्षद् दुरितादवद्यात् ।
आ रोहत सवितुर्नावमेतां षड्भिरुर्वीभिरमतिं तरेम २२६१
अहोरात्रे अन्वेषि बिभ्रत् क्षेम्यस्तिष्ठन् प्रतरणः सुवीरः ।
अनातुरान् त्सुमनसस्तल्प बिभ्रज् ज्योगेव नः पुरुषगन्धिरेधि २२६२
ते देवेभ्य आ वृश्चन्ते पापं जीवन्ति सर्वदा । क्रव्याद्यानग्निरन्तिकादश्व इवानुवपते नडम् २२६३
येऽश्रद्धा धनकाम्यात् क्रव्यादा समासते । ते वा अन्येषां कुम्भीं पर्यादधति सर्वदा २२६४

प्रेवं पिपतिषति मनसा मुहुरा वर्तते पुनः । क्रव्याद्यानग्निरन्तिका–दनुविद्वान्वितावति २२६५

अविः कृष्णा भागधेयं पशूनां सीसं क्रव्यादपि चन्द्रं त आहुः ।
माषाः पिष्टा भागधेयं ते हव्य–मरण्यान्या गह्वरं सचस्व २२६६

इषीकां जरतीमिष्ट्वा तिल्पिञ्जं दण्डनं नडम् ।
तमिन्द्र इध्मं कृत्वा यमस्याग्निं निरादधौ २२६७

प्रत्यञ्चमर्कं प्रत्यर्पयित्वा प्रविद्वान् पन्थां वि ह्याविवेश ।
परामीषामसून्दिदेश दीर्घेणायुषा समिमान् त्सृजामि २२६८

(अथर्व० १९ । ५५ । १-६ ॥ त्रिष्टुप्; २२७० आस्तारपंक्तिः;२२७३ त्र्यवसाना पंचपदा पुरस्ताज्ज्योतिष्मती।)

रात्रिंरात्रिमप्रयातं भरन्तो ऽश्वायेव तिष्ठते घासमस्मै ।
रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम २२६९

या ते वसोर्वात इषुः सा त एषा तया नो मृड ।
रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषाम २२७०

सायंसायं गृहपतिर्नो अग्निः प्रातः प्रातः सौमनसस्य दाता ।
वसोर्वसोर्वसुदान एधि वयं त्वेन्धानास्तन्वं पुषेम २२७१

प्रातःप्रातर्गृहपतिर्नो अग्निः सायंसायं सौमनसस्य दाता ।
वसोर्वसोर्वसुदान एधी–न्धानास्त्वा शतंहिमा ऋधेम २२७२

अपश्चा दग्धान्नस्य भूयासम् । अन्नादायान्नपतये रुद्राय नमो अग्नये ।
सभ्यः सभां मे पाहि ये च सभ्याः सभासदः २२७३

त्वामिन्द्रा पुरुहूत विश्वमायुर्व्यश्नवत् ।
अहरहर्बलिमित् ते हरन्तो ऽश्वायेव तिष्ठते घासमग्ने २२७४

(अथर्व० कां०१, सू० २५, मं० १-४ । भृग्वङ्गिराः । २२७५ त्रिष्टुप् २२७६-७७ विराङ्गर्भा, २२७८ पुरोऽनुष्टुप् ।)

यदग्निरापो अदहत् प्रविश्य यत्राकृण्वन् धर्मधृतो नमांसि ।
तत्र त आहुः परमं जनित्रं स नः संविद्वान् परि वृङ्ग्धि तक्मन् २२७५

यद्यर्चिर्यदि वासि शोचिः शकल्येषि यदि वा ते जनित्रम् ।
ह्रूडुर्नामासि हरितस्य देव स नः संविद्वान् परि वृङ्ग्धि तक्मन् २२७६

यदि शोको यदि वाभिशोको यदि वा राज्ञो वरुणस्यासि पुत्रः ।
हूडुर्नामासि हरितस्य देव स नः संविद्वान् परि वृङ्ग्धि तक्मन् २२७७

नमः शीताय तक्मने नमो रूराय शोचिषे कृणोमि ।
यो अन्येद्युरुभयद्युरभ्येति तृतीयकाय नमो अस्तु तक्मने २२७८

(अथर्व० २ । ३५ । १ ॥ अङ्गिराः । त्रिष्टुप् ।)

ये भक्षयन्तो न वसून्यानृधु र्यानग्नयो अन्वतप्यन्त धिष्ण्याः ।
या तेषामवया दुरिष्टिः स्विष्टिं नस्तां कृणवद् विश्वकर्मा २२७९

(अथर्व० ४ । ३९ । १, २, ९, १० ॥ अङ्गिराः । २२८० त्रिपदा महाबृहती, २२८१ संस्तारपङ्क्तिः; । २२८२-८३ त्रिष्टुप् ।)

पृथिव्यामग्नये समनमन्त्स आर्ध्नोत् ।
यथा पृथिव्यामग्नये समनम न्नेवा मह्यं संनमः सं नमन्तु २२८०

पृथिवी धेनुस्तस्या अग्निर्वत्सः । सा मेऽग्निना वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा २२८१

अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपा उ ।
नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुया कर्म भागम् २२८२

हृदा पूतं मनसा जातवेदो विश्वानि देव वयुनानि विद्वान् ।
सप्तास्यानि तव जातवेद स्तेभ्यो जुहोमि स जुषस्व हव्यम् २२८३

(अथर्व० १ । ७ । १-७ ॥ चातनः । अनुष्टुप्, २२८८ त्रिष्टुप् ।)

स्तुवानमग्न आ वह यातुधानं किमीदिनम् । त्वं हि देव वन्दितो हन्ता दस्योर्बभूविथ २२८४
आज्यस्य परमेष्ठिन् जातवेदस्तनूवशिन् । अग्ने तौलस्य प्राशान यातुधानान् वि लापय २२८५
वि लपन्तु यातुधाना अत्त्रिणो ये किमीदिनः । अथेदमग्ने नो हवि रिन्द्रश्च प्रति हर्यतम् २२८६
अग्निः पूर्व आ रभतां प्रेन्द्रो नुदतु बाहुमान् । ब्रवीतु सर्वो यातुमान् अयमस्मीत्येत्य २२८७

पश्याम ते वीर्यं जातवेदः प्र णो ब्रूहि यातुधानान्नृचक्षः ।
त्वया सर्वे परितप्ताः पुरस्तात् त आ यन्तु प्रब्रुवाणा उपेदम् २२८८

आ रभस्व जातवेदो ऽस्माकार्थाय जज्ञिषे । दूतो नो अग्ने भूत्वा यातुधानान् वि लापय २२८९
त्वमग्ने यातुधानान् उपबद्धाँ इहा वह । अथैषामिन्द्रो वज्रेण अपि शीर्षाणि वृश्चतु २२९०

(अथर्व० १ । ८ । ३-४ ॥ २२९१ अनुष्टुप्, २२९२ बार्हतगर्भा त्रिष्टुप् ।

यातुधानस्य सोमप जहि प्रजां नयस्व च । नि स्तुवानस्य पातय परमक्ष्युतावरम् २२९१
यत्रैषामग्ने जनिमानि वेत्थ गुहा सतामत्रिणां जातवेदः ।
तांस्त्वं ब्रह्मणा वावृधानो जह्येषां शततर्हमग्ने २२९२

(अथर्व० १ । २८ । १-२ । अनुष्टुप् ।)

उप प्रागाद् देवो अग्नी रक्षोहामीवचातनः । दहन्नप द्वयाविनो यातुधानान् किमीदिनः २२९३
प्रति दह यातुधानान् प्रति देव किमीदिनः । प्रतीचीः कृष्णवर्तने सं दह यातुधान्यः २२९४

(अथर्व० ४ । ३६ । १-१० ॥ अनुष्टुप्, २३०२ भुरिक् ।)

तान् त्सत्यौजाः प्र दह—त्वग्निर्वैश्वानरो वृषा । यो नो दुरस्याद्दिप्सा—च्चाथो यो नो अरातियात् २२९५
यो नो दिप्सददिप्सतो दिप्सतो यश्च दिप्सति । वैश्वानरस्य दंष्ट्रयो—रग्नेरपि दधामि तम् २२९६
य आगरे मृगयन्ते प्रतिक्रोशेऽमावास्ये । क्रव्यादो अन्यान् दिप्सतः सर्वांस्तान् त्सहसा सहे २२९७
सहे पिशाचान् त्सह—सैषां द्रविणं ददे । सर्वान् दुरस्यतो हन्मि सं म आकूतिर्ऋध्यताम् २२९८
ये देवास्तेन हासन्ते सूर्येण मिमते जवम् । नदीषु पर्वतेषु ये सं तैः पशुभिर्विदे २२९९
तपनो अस्मि पिशाचानां व्याघ्रो गोमतामिव ।
श्वानः सिंहमिव दृष्ट्वा ते न विन्दन्ते न्यञ्चनम् २३००
न पिशाचैः सं शक्नोमि न स्तेनैर्न वनर्गुभिः । पिशाचास्तस्मान्नश्यन्ति यमहं ग्राममाविशे २३०१
यं ग्राममाविशत इदमुग्रं सहो मम । पिशाचास्तस्मान्नश्यन्ति न पापमुप जानते २३०२
ये मा क्रोधयन्ति लपिता हस्तिनं मशका इव । तानहं मन्ये दुर्हितान् जने अल्पशयूनिव २३०३
अभि तं निर्ऋतिर्धत्ताम् अश्वमिवाश्वाभिधान्या । मल्वो यो मह्यं क्रुध्यति स उ पाशान्न मुच्यते २३०४

(अथर्व० ५ । २९ । १-१५ । त्रिष्टुप्; २३०७ त्रिपदा विराण्नाम गायत्री; २३०९ पुरोऽतिजगती विराड्जगती
२३१५-१८ अनुष्टुप् (२३१५ भुरिक्; २३१७ चतुष्पदा पराबृहती ककुम्मती ।)

पुरस्ताद् युक्तो वह जातवेदो ऽग्ने विद्धि क्रियमाणं यथेदम् ।
त्वं भिषग् भेषजस्यासि कर्ता त्वया गामश्वं पुरुषं सनेम २३०५
तथा तदग्ने कृणु जातवेदो विश्वेभिर्देवैः सह संविदानः ।
यो नो दिदेव यतमो जघास यथा सो अस्य परिधिष्पताति २३०६
यथा सो अस्य परिधिष्पताति तथा तदग्ने कृणु जातवेदः ।
विश्वेभिर्देवैः सह संविदानः २३०७

❀

अक्ष्यौ३ नि विध्य हृदयं नि विध्य जिह्वां नि तृन्द्धि प्र दतो मृणीहि ।
पिशाचो अस्य यतमो जघास अग्ने यविष्ठ प्रति तं शृणीहि २३०८

यदस्य हृतं विहृतं यत् पराभृतम् आत्मनो जग्धं यतमत् पिशाचैः ।
तदग्ने विद्वान् पुनरा भर त्वं शरीरे मांसमसुमेरयामः २३०९

आमे सुपक्वे शबले विपक्वे यो मा पिशाचो अशने ददम्भ ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु २३१०

क्षीरे मा मन्थे यतमो ददम्भा–कृष्टपच्ये अशने धान्ये३ यः ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु २३११

अपां मा पाने यतमो ददम्भ क्रव्याद् यातूनां शयने शयानम् ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु २३१२

दिवा मा नक्तं यतमो ददम्भ क्रव्याद् यातूनां शयने शयानम् ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु २३१३

क्रव्यादमग्ने रुधिरं पिशाचं मनोहनं जहि जातवेदः ।
तमिन्द्रो वाजी वज्रेण हन्तु छिनत्तु सोमः शिरो अस्य धृष्णुः २३१४

सनादग्ने मृणसि यातुधानान्० (ऋ० १० । ८७ । १९) (१८४६)

समाहर जातवेदो यद्धृतं यत् पराभृतम् । गात्राण्यस्य वर्धन्ताम् अंशुरिवा प्यायतामयम् २३१५
सोमस्येव जातवेदो अंशुरा प्यायतामयम् । अग्ने विरप्शिनं मेध्यम् अयक्ष्मं कृणु जीवतु २३१६
एतास्ते अग्ने समिधः पिशाचजम्भनीः । तास्त्वं जुषस्व प्रति चैना गृहाण जातवेदः २३१७
तार्ष्टाघीरग्ने समिधः प्रति गृह्णाह्यर्चिषा । जहातु क्रव्याद् रूपं यो अस्य मांसं जिहीर्षति २३१८

(अथर्व० १ । ६ । १-५ ॥ शौनकः । त्रिष्टुप् २३२२ चतुष्पदार्षी पङ्क्तिः, २३२३ विराट् प्रस्तारपङ्क्तिः ।)

समास्त्वाग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या ।
सं दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशश्चतस्रः २३१९

सं चेध्यस्वाग्ने प्र च वर्धयेमम् उच्च तिष्ठ महते सौभगाय ।
मा ते रिषन्नुपसत्तारो अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये २३२०

त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणे भवा नः ।
सपत्नहाग्ने अभिमातिजिद् भव स्वे गये जागृह्यप्रयुच्छन् २३२१

क्षत्रेणाग्ने स्वेन सं रभस्व मित्रेणाग्ने मित्रधा यतस्व।
सजातानां मध्यमेष्ठा राज्ञाम् अग्ने विहव्यो दीदिहीह २३२२

अति निहो अति स्रिधो ऽत्यचित्तीरति द्विषः।
विश्वा ह्यग्ने दुरिता तर त्वमथास्मभ्यं सहवीरं रयिं दाः २३२३

(अथर्व० ६ । १०८ । ४ । अनुष्टुप् ।)

यामृषयो भूतकृतो मेधां मेधाविनो विदुः। तया मामद्य मेधया ऽग्ने मेधाविनं कृणु २३२४

(अथर्व० ७ । ८२ (८७) । १-६ ॥ त्रिष्टुप्, २३२५ ककुम्मती बृहती, २३२६ जगती ।)

मय्यग्रे अग्निं गृह्णामि सह क्षत्रेण वर्चसा बलेन।
मयि प्रजां मय्यायुर्दधामि स्वाहा मय्यग्निम् २३२५

इहैवाग्ने अधि धारया रयिं मा त्वा नि क्रन् पूर्वचित्ता निकारिणः।
क्षत्रेणाग्ने सुयममस्तु तुभ्यम् उपसत्ता वर्धतां ते अनिष्टृतः २३२६

अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः।
अनु सूर्य उषसो अनु रश्मीन् अनु द्यावापृथिवी आ विवेश २३२७

प्रत्यग्निरुषसामग्रमख्यत् प्रत्यहानि प्रथमो जातवेदाः।
प्रति सूर्यस्य पुरुधा च रश्मीन् प्रति द्यावापृथिवी आ ततान २३२८

घृतं ते अग्ने दिव्ये सधस्थे घृतेन त्वां मनुरद्या समिन्धे।
घृतं ते देवीर्नप्त्य१ आ वहन्तु घृतं तुभ्यं दुह्रतां गावो अग्ने २३२९

(अथर्व० ४ । २३ । १-७ । मृगारः । त्रिष्टुप्, २३३१ पुरस्ताज्ज्योतिष्मती, २३३३ अनुष्टुप्,
२३३५ प्रस्तारपङ्क्तिः ।)

अग्नेर्मन्वे प्रथमस्य प्रचेतसः पाञ्चजन्यस्य बहुधा यमिन्धते।
विशोविशः प्रविशिवांसमीमहे स नो मुञ्चत्वंहसः २३३०

यथा हव्यं वहसि जातवेदो यथा यज्ञं कल्पयसि प्रजानन्।
एवा देवेभ्यः सुमतिं न आ वह स नो मुञ्चत्वंहसः २३३१

यामन् यामन्नुपयुक्तं वहिष्ठं कर्मन् कर्मन्नाभगम्।
अग्निमीडे रक्षोहणं यज्ञवृधं घृताहुतं स नो मुञ्चत्वंहसः २३३२

सुजातं जातवेदसम् अग्निं वैश्वानरं विभुम्।
हव्यवाहं हवामहे स नो मुञ्चत्वंहसः २३३३

येन॒ ऋष॑यो ब॒लमद्यो॑तयन् यु॒जा येनासु॑राणा॒मयु॑वन्त मा॒याः ।
येना॒ग्निना॑ प॒णीनिन्द्रो॑ जि॒गाय॒ स नो॑ मुञ्च॒त्वंह॑सः २३३४

येन॑ दे॒वा अ॒मृत॑म॒न्वविन्द॒न् येनौष॑धी॒र्मधु॑मती॒रकृ॑ण्वन् ।
येन॑ दे॒वाः स्व१॒राभ॑र॒न् त्स नो॑ मुञ्च॒त्वंह॑सः २३३५

यस्ये॒दं प्र॒दिशि॒ यद् वि॒रोच॑ते॒ यज्जा॒तं ज॑नित॒व्यं१॒ च॒ केव॑लम् ।
स्तौम्य॒ग्निं ना॑थि॒तो जो॑हवीमि॒ स नो॑ मुञ्च॒त्वंह॑सः २३३६

(अथर्व० ६ । ४९ १-२ ॥ गार्ग्यः । २३३७ अनुष्टुप्, २३३८ जगती ।)

न॒हि ते॑ अग्ने त॒न्व१॒: क्रू॒रमा॒नंश॒ मर्त्यः॑ ।
क॒पिर्ब॑भस्ति॒ तेज॑नं॒ स्वं ज॒रायु॒ गौरि॑व २३३७

मे॒ष इ॑व॒ वै सं च॒ वि चो॒र्व१॒च्यसे॒ यदु॑त्तर॒द्रावुप॑रश्च॒ खाद॑तः ।
शी॒र्ष्णा शिरोऽप्स॒साप्सो॑ अ॒र्दय॑न्न॒ँ अं॒शून् ब॑भस्ति॒ हरि॑तेभि॒रा॒सभि॑ः २३३८

(अथर्व० २ । ३६ । १, ३ । पतिवेदनः । २३३९ त्रिष्टुप्, २३४० भुरिक् ।)

आ नो॑ अग्ने सुम॒तिं स॑म्भ॒लो ग॑मे॒—दि॒मां कु॑मा॒रीं स॒ह नो॒ भगे॑न ।
जु॒ष्टा व॒रेषु॒ सम॑नेषु व॒ल्गु॒—रो॒षं पत्या॒ सौभ॑गमस्त्व॒स्यै २३३९

इ॒यम॑ग्ने॒ नारी॒ पतिं॑ वि॒देष्ट॒ सोमो॒ हि राजा॑ सु॒भगां॑ कृ॒णोति॑ ।
सु॒वा॑ना पु॒त्रान् महि॑षी भवाति॒ ग॒त्वा पतिं॑ सु॒भगा॒ वि रा॑जतु २३४०

(अथर्व० २० । २ । २। गृत्समदो मेधातिथिर्वा । विराड् गायत्री ।)

अ॒ग्निराग्नी॑ध्रात् सु॒ष्टुभ॑ः स्व॒र्का॑दृ॒तुना॒ सोमं॑ पिबतु २३४१

(अथर्व० ४ । ४० । १ । शुक्रः । त्रिष्टुप् ।)

ये पु॒रस्ता॒ज्जुह्व॑ति जातवेदः प्राच्या॑ दि॒शो॒३॒भि॒दास॑न्त्य॒स्मान् ।
अ॒ग्निमृ॒त्वा ते परा॑ञ्चो व्यथन्तां प्र॒त्यगे॑नान् प्रति॒सरे॑ण हन्मि २३४२

(अथर्व० ३ । ३१ । १, ६ । ब्रह्मा । अनुष्टुप् ।)

वि दे॒वा ज॒रसा॑वृत॒न् वि त्वम॑ग्ने॒ अरा॑त्या । व्य१॒हं सर्वे॑ण पा॒प्मना॒ वि यक्ष्मे॑ण॒ समायु॑षा २३४३

अ॒ग्निः प्रा॒णान् त्सं द॑धाति च॒न्द्रः प्रा॒णेन॒ संहि॑तः ।
व्य१॒हं सर्वे॑ण पा॒प्मना॒ वि यक्ष्मे॑ण॒ समायु॑षा २३४४

(अथर्व० ५ । २६ । १ । द्विपदार्षी उष्णिक् ।)

यजूंषि यज्ञे समिधः स्वाहा ऽग्निः प्रविद्वानिह वो युनक्तु २३४५

(अथर्व० ६ । ७१ । १-३ । जगती, २३४८ त्रिष्टुप् ।

यदन्नमद्मि बहुधा विरूपं हिरण्यमश्वमुत गामजामविम् ।
यदेव किं च प्रतिजग्रहाहम् अग्निष्टद्धोता सुहुतं कृणोतु २३४६

यन्मा हुतमहुतमाजगाम दत्तं पितृभिरनुमतं मनुष्यैः ।
यस्मान्मे मन उदिव रारजीत्य ग्निष्टद्धोता सुहुतं कृणोतु २३४७

यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत संगृणामि ।
वैश्वानरस्य महतो महिम्ना शिवं मह्यं मधुमदस्त्वन्नम् २३४८

(अथर्व० १९ । ६५ । १ । जगती ।)

हरिः सुपर्णो दिवमारुहोऽर्चिषा ये त्वा दिप्सन्ति दिवमुत्पतन्तम् ।
अव तां जहि हरसा जातवेदो ऽबिभ्यदुग्रोऽर्चिषा दिवमा रोह सूर्य २३४९

(अथर्व० १९ । ६६ । १ । अति जगती ।)

अयोजाला असुरा मायिनो ऽयस्मयैः पाशैरङ्किनो ये चरन्ति ।
तांस्ते रन्धयामि हरसा जातवेदः सहस्रऋष्टिः सपत्नान् प्रमृणन् पाहि वज्रः २३५०

(अथर्व० १९ । ६४ । १-४ ॥ अनुष्टुप् ।)

अग्ने समिधमाहार्षं बृहते जातवेदसे । स मे श्रद्धां च मेधां च जातवेदाः प्र यच्छतु २३५१
इध्मेन त्वा जातवेदः समिधा वर्धयामसि । तथा त्वमस्मान् वर्धय प्रजया च धनेन च २३५२
यदग्ने यानि कानि चि दा ते दारूणि दध्मसि । सर्वं तदस्तु मे शिवं तज्जुषस्व यविष्ठ्य २३५३
एतास्ते अग्ने समिध स्त्वमिद्धः समिद्भव । आयुरस्मासु धेह्य मृतत्वमाचार्याय २३५४

(अथर्व० ३ । २१ । १—१० । वसिष्ठः । त्रिष्टुप्, २३५५ पुरोनुष्टुप्; २३५६-५७, २३६२ भुरिक्; २३५९ जगती; २३६० उपरिष्टाद्विराड्बृहती; २३६१ विराड्गर्भा, २३६३ निचृदनुष्टुप्; २३६४ अनुष्टुप् ।)

ये अग्नयो अप्स्वन्तर्ये वृत्रे ये पुरुषे ये अश्मसु ।
य आविवेशोषधीर्यो वनस्पतीं स्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् २३५५

यः सोमे अन्तर्यो गोष्वन्तर्य आविष्टो वयःसु यो मृगेषु ।
य आविवेश द्विपदो यश्चतुष्पद स्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् २३५६

य इन्द्रेण सरथं याति देवो वैश्वानर उत विश्वदा॰ ।
यं जोहवीमि पृतनासु सासहिं तेभ्यो अग्निभ्यो हुतमस्त्वेतत् २३५७

यो देवो विश्वाद्यमु काममाहुर्यं दातारं प्रतिगृह्णन्तमाहुः ।
यो धीरः शक्रः परिभूरदाभ्यस् तेभ्यो अग्निभ्यो हुतमस्त्वेतत् २३५८

यं त्वा होतारं मनसाभि संविदुस् त्रयोदश भौवनाः पञ्च मानवाः ।
वर्चोधसे यशसे सूनृतावते तेभ्यो अग्निभ्यो हुतमस्त्वेतत् २३५९

उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे ।
वैश्वानरज्येष्ठेभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् २३६०

दिवं पृथिवीमन्वन्तरिक्षं ये विद्युतमनुसंचरन्ति ।
ये दिक्ष्व१न्तर्ये वाते अन्तस् तेभ्यो अग्निभ्यो हुतमस्त्वेतत् २३६१

हिरण्यपाणिं सवितारमिन्द्रं बृहस्पतिं वरुणं मित्रमग्निम् ।
विश्वान् देवानङ्गिरसो हवामह इमं क्रव्यादं शमयन्त्वग्निम् २३६२

शान्तो अग्निः क्रव्याच् छान्तः पुरुषरेषणः ।
अथो यो विश्वदाव्य१स् तं क्रव्यादमशीशमम् २३६३

ये पर्वताः सोमपृष्ठा आप उत्तानशीवरीः ।
वातः पर्जन्य आदग्निस् ते क्रव्यादमशीशमन् २३६४

(अथर्व० ७ । १०९ (११४) । १-७ । बादरायणिः । अनुष्टुप् २३६५ विराड् पुरस्ताद्बृहती, २३६६-६७, २३६९-७० त्रिष्टुप्)

इदमुग्राय बभ्रवे नमो यो अक्षेषु तनूवशी ।
घृतेन कलिं शिक्षामि स नो मृडातीदृशे २३६५

घृतमप्सराभ्यो वह त्वमग्ने पांसूनक्षेभ्यः सिकता अपश्च ।
यथाभागं हव्यदातिं जुषाणा मदन्ति देवा उभयानि हव्या २३६६

अप्सरसः सधमादं मदन्ति हविर्धानमन्तरा सूर्यं च ।
ता मे हस्तौ सं सृजन्तु घृतेन सपत्नं मे कितवं रन्धयन्तु २३६७

आदिनवं प्रतिदीव्ने घृतेनास्माँ अभि क्षर ।
वृक्षमिवाशन्या जहि यो अस्मान् प्रतिदीव्यति २३६८

यो नो द्युवे धनमिदं चकार यो अक्षाणां ग्लहनं शेषणं च ।
स नो देवो हविरिदं जुषाणो गन्धर्वेभिः सधमादं मदेम २३६९
संवसव इति वो नामधेयम् उग्रंपश्या राष्ट्रभृतो ह्यक्षाः ।
तेभ्यो व इन्दवो हविषा विधेम वयं स्याम पतयो रयीणाम् २३७०
देवान् यन्नाथितो हुवे ब्रह्मचर्यं यदूषिम । अक्षान् यद् बभ्रूनालभे ते नो मृडन्त्वीदृशे २३७१

(अथर्व० ६ । ४७ । १ । अङ्गिराः प्रचेताः । त्रिष्टुप् ।)

अग्निः प्रातःसवने पात्वस्मान् वैश्वानरो विश्वकृद् विश्वशंभूः ।
स नः पावको द्रविणे दधातु आयुष्मन्तः सहभक्षाः स्याम २३७२

(अथर्व० ७ । ६२ (६४) । १ । मरीचिः काश्यपः । जगती ।)

अयमग्निः सत्पतिर्वृद्धवृष्णो रथीव पत्तीनजयत् पुरोहितः ।
नाभा पृथिव्यां निहितो दविद्युतद् अधस्पदं कृणुतां ये पृतन्यवः २३७३

(अथर्व० ७ । ६३ (६५) । १ । जातवेदाः । जगती ।)

पृतनाजितं सहमानमग्निमुक्थैर् हवामहे परमात् सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद् देवोऽति दुरितान्यग्निः । २३७४

(अथर्व० ६ । ३५ । १-३ । कौशिकः । गायत्री ।)

वैश्वानरो न ऊतय आ प्र यातु परावतः । अग्निर्नः सुष्टुतीरुप २३७५
वैश्वानरो न आगमद् इमं यज्ञं सजूरुप । अग्निरुक्थेष्वंहसु २३७६
वैश्वानरोऽङ्गिरसां स्तोममुक्थं च चाक्लृपत् । ऐषु द्युम्नं स्वर्यमत् २३७७

(अथर्व० ६ । ११७ । १-३ । त्रिष्टुप् ।)

अपमित्यमप्रतीत्तं यदस्मि यमस्य येन बलिना चरामि ।
इदं तदग्ने अनृणो भवामि त्वं पाशान् विचृतं वेत्थ सर्वान् २३७८
इहैव सन्तः प्रति दद्म एनज् जीवा जीवेभ्यो नि हराम एनत् ।
अपमित्य धान्यं१ यज्जघसाहम् इदं तदग्ने अनृणो भवामि २३७९
अनृणा अस्मिन्ननृणाः परस्मिन् तृतीये लोके अनृणाः स्याम ।
ये देवयानाः पितृयाणाश्च लोकाः सर्वान् पथो अनृणा आ क्षियेम २३८०

(अथर्व० ६ । ११८ । १-३ । त्रिष्टुप्)

यद्धस्ताभ्यां चकृम किल्बिषाण्यक्षाणां गत्नुमुपलिप्समानाः ।
उग्रंपश्ये उग्रजितौ तदद्याप्सरसावनु दत्तामृणं नः २३८१
उग्रंपश्ये राष्ट्रभृत् किल्बिषाणि यदक्षवृत्तमनु दत्तं न एतत् ।
ऋणान्नो नर्णमेत्सेमानो यमस्य लोके अधिरज्जुरायत् । २३८२
यस्मा ऋणं यस्य जायामुपैमि यं याचमानो अभ्यैमि देवाः ।
ते वाचं वादिषुर्मोत्तरां मद्देवपत्नी अप्सरसावधीतम् २३८३

(अथर्व० ६ । ११९ । १-३ । त्रिष्टुप् ।)

यददीव्यन्नृणमहं कृणोमि अदास्यन्नग्न उत संगृणामि ।
वैश्वानरो नो अधिपा वसिष्ठ उदिन्नयाति सुकृतस्य लोकम् २३८४
वैश्वानराय प्रति वेदयामि यद्यृणं संगरो देवतासु ।
स एतान् पाशान् विचृतं वेद सर्वान् अथ पक्वेन सह सं भवेम २३८५
वैश्वानरः पविता मा पुनातु यत् संगरमभिधावाम्याशाम् ।
अनाजानन् मनसा याचमानो यत् तत्रैनो अप तत् सुवामि २३८६

(अथर्व० ६ । १२१ । १, २, ४ । २३८७, २३३८, त्रिष्टुप्, २३८९, २३९० अनुष्टुप् ।)

विषाणा पाशान् वि ष्याध्यस्मद् य उत्तमा अधमा वारुणा ये ।
दुष्वप्न्यं दुरितं नि ष्वास्मद् अथ गच्छेम सुकृतस्य लोकम् २३८७
यद् दारुणि बध्यसे यच्च रज्ज्वां यद् भूम्यां बध्यसे यच्च वाचा ।
अयं तस्माद् गार्हपत्यो नो अग्निर् उदिन्नयाति सुकृतस्य लोकम् २३८८
वि जिहीष्व लोकं कृणु बन्धान्मुञ्चासि बद्धकम् ।
योन्या इव प्रच्युतो गर्भः पथः सर्वाँ अनु क्षिय २३८९

(अथर्व० ६ । ७६ । १-४ कबन्धः । अनुष्टुप्, २३९२ ककुम्मती ।)

य एनं परिषीदन्ति समादधति चक्षसे । संप्रेद्धो अग्निर्जिह्वाभिर् उदेतु हृदयादधि २३९०
अग्नेः सांतपनस्याहं आयुषे पदमा रभे । अद्धातिर्यस्य पश्यति धूममुद्यन्तमास्यतः २३९१
यो अस्य समिधं वेद क्षत्रियेण समाहिताम् । नाभिह्वारे पदं नि दधाति स मृत्यवे २३९२

नैनं घ्नन्ति पर्यायिणो न सन्नाँ अव गच्छति । अग्नेर्यः क्षत्रियो विद्वान् नाम गृह्णात्यायुषे २३९३

(अथर्व० ६ । ७७ । १-३ । अनुष्टुप् ।)

अस्थाद् द्यौरस्थात् पृथिवि अस्थाद् विश्वमिदं जगत् ।
आस्थाने पर्वता अस्थु स्थाम्न्यश्वाँ अतिष्ठिपम् २३९४

य उदानट् परायणं य उदानण्न्यायनम् । आवर्तनं निवर्तनं यो गोपा अपि तं हुवे २३९५

जातवेदो नि वर्तय शतं ते सन्त्वावृतः । सहस्रं त उपावृतस् ताभिर्नः पुनरा कृधि २३९६

अग्निसहचारी देवगणः

१२ वैश्वानरोऽग्निः सूर्यश्च ।

(ऋ० १० । ८८ । १-१९) मूर्धन्वानाङ्गिरसो, वामदेव्यो वा । सौर्य-
वैश्वानरोऽग्निः । त्रिष्टुप् ।)

हविष्पान्तमजरं स्वर्विदि दिविस्पृश्याहुतं जुष्टमग्नौ ।
तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथन्त २३९७

गीर्णं भुवनं तमसापगूळ्हम् आविः स्वरभवज्जाते अग्नौ ।
तस्य देवाः पृथिवी द्यौरुतापो ऽरणयन्नोषधीः सख्ये अस्य २३९८

देवेभिर्न्विषितो यज्ञियेभिर् अग्निं स्तोषाण्यजरं बृहन्तम् ।
यो भानुना पृथिवीं द्यामुतेमाम् आततान रोदसी अन्तरिक्षम् २३९९

यो होतासीत् प्रथमो देवजुष्टो यं समाञ्जन्नाज्येना वृणानाः ।
स पतत्रीत्वरं स्था जगद् यत् श्वात्रमग्निरकृणोज्जातवेदाः २४००

यज्जातवेदो भुवनस्य मूर्धन् अतिष्ठो अग्ने सह रोचनेन ।
तं त्वाहेम मतिभिर्गीर्भिरुक्थैः स यज्ञियो अभवो रोदसिप्राः २४०१

मूर्धा भुवो भवति नक्तमग्निस् ततः सूर्यो जायते प्रातरुद्यन् ।
मायामू तु यज्ञियानामेताम् अपो यत् तूर्णिश्चरति प्रजानन् २४०२

दृशेन्यो यो महिना समिद्धो ऽरोचत दिवियोनिर्विभावा ।
तस्मिन्नग्नौ सूक्तवाकेन देवा हविर्विश्व आजुहवुस्तनूपाः २४०३

सूक्तवाकं प्रथममादिदग्निम् आदिद्धविरजनयन्त देवाः ।
स एषां यज्ञो अभवत् तनूपास् तं द्यौर्वेद तं पृथिवी तमापः २४०४

यं देवासोऽजनयन्ताग्निं यस्मिन्नाजुहवुर्भुवनानि विश्वा ।
सो अर्चिषा पृथिवीं द्यामुतेमाम् ऋजूयमानो अतपन्महित्वा २४०५

स्तोमेन हि दिवि देवासो अग्निम् अजीजनञ्छक्तिभी रोदसिप्राम् ।
तमू अकृण्वन् त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः २४०६

यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयम् ।
यदा चरिष्णू मिथुनावभूताम् आदित् प्रापश्यन् भुवनानि विश्वा २४०७

विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन् ।
आ यस्ततानोषसो विभातीर् अपो ऊर्णोति तमो अर्चिषा यन् २४०८

वैश्वानरं कवयो यज्ञियासो ऽग्निं देवा अजनयन्नजुर्यम् ।
नक्षत्रं प्रत्नममिनच्चरिष्णु यक्षस्याध्यक्षं तविषं बृहन्तम् २४०९

वैश्वानरं विश्वहा दीदिवांसं मन्त्रैरग्निं कविमच्छा वदामः ।
यो महिम्ना परिबभूवोर्वी उतावस्तादुत देवः परस्तात् २४१०

द्वे स्रुती अशृणवं पितॄणाम् अहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरं च २४११

द्वे समीची बिभृतश्चरन्तं शीर्षतो जातं मनसा विमृष्टम् ।
स प्रत्यङ् विश्वा भुवनानि तस्थौ अप्रयुच्छन् तरणिर्भ्राजमानः २४१२

यत्रा वदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद ।
आ शेकुरित् सधमादं सखायो नक्षन्त यज्ञं क इदं वि वोचत् २४१३

कत्यग्नयः कति सूर्यासः कत्युषासः कत्यु स्विदापः ।
नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने कम् २४१४

यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो३ वसते मातरिश्वः ।
तावद् दधात्युप यज्ञमायन् ब्राह्मणो होतुरवरो निषीदन् २४१५

१३ रक्षोहाऽग्निः।

(ऋ० १० । १६२ । १-६ । रक्षोहा= (गर्भस्य दोषनिवारकः) (अत्रानुसंधेया मन्त्राः १८१३-१८६१) रक्षोहा ब्राह्मः । अनुष्टुप् ।)

ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः ।
अमीवा यस्ते गर्भं दुर्णामा योनिमाशये २४१६

यस्ते गर्भममीवा दुर्णामा योनिमाशये ।
अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् २४१७

यस्ते हन्ति पतयन्तं निषत्स्नुं यः सरीसृपम् ।
जातं यस्ते जिघांसति तमितो नाशयामसि २४१८

यस्त ऊरू विहरति अन्तरा दंपती शये ।
योनिं यो अन्तरारेळ्हि तमितो नाशयामसि २४१९

यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते ।
प्रजां यस्ते जिघांसति तमितो नाशयामसि २४२०

यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते ।
प्रजां यस्ते जिघांसति तमितो नाशयामसि २४२१

१४ अपां-न-पादग्निः।

(ऋ० २ । ३५ । १-१५ । गृत्समदः शौनकः । त्रिष्टुप् ।)

उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे ।
अपां नपादाशुहेमा कुवित् स सुपेशसस्करति जोषिषद्धि २४२२

इमं स्वस्मै हृद आ सुतष्टं मन्त्रं वोचेम कुविदस्य वेदत् ।
अपां नपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना जजान २४२३

समन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति ।
तमू शुचिं शुचयो दीदिवांसम् अपां नपातं परि तस्थुरापः २४२४

तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः ।
स शुक्रेभिः शिक्वभी रेवदस्मे दीदायानिध्मो घृतनिर्णिगप्सु २४२५

अस्मै तिस्रो अव्यथ्याय नारीर् देवाय देवीर्दिधिषन्त्यन्नम् ।
कृता इवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनाम् २४२६

अश्वस्यात्र जनिमास्य च स्वर् द्रुहो रिषः संपृचः पाहि सूरीन् ।
आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन्नानृतानि २४२७

स्व आ दमे सुदुघा यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति ।
सो अपां नपादूर्जयन्नप्स्वन्तर् वसुदेयाय विधते वि भाति २४२८

यो अप्स्वा शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति ।
वया इदन्या भुवनान्यस्य प्र जायन्ते वीरुधश्च प्रजाभिः २४२९

अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः ।
तस्य ज्येष्ठं महिमानं वहन्तीर् हिरण्यवर्णाः परि यन्ति यह्वीः २४३०

हिरण्यरूपः स हिरण्यसंदृग् अपां नपात्सेदु हिरण्यवर्णः ।
हिरण्ययात् परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै २४३१

तदस्यानीकमुत चारु नाम अपीच्यं वर्धते नप्तुरपाम् ।
यमिन्धते युवतयः समित्था हिरण्यवर्णं घृतमन्नमस्य २४३२

अस्मै बहूनामवमाय सख्ये यज्ञैर्विधेम नमसा हविर्भिः ।
सं सानु मार्ज्मि दिधिषामि बिल्मैर् दधाम्यन्नैः परि वन्द ऋग्भिः २४३३

स ईं वृषाजनयत् तासु गर्भं स ईं शिशुर्धयति तं रिहन्ति ।
सो अपां नपादनभिम्लातवर्णो ऽन्यस्येवेह तन्वा विवेष २४३४

अस्मिन् पदे परमे तस्थिवांसम् अध्वस्मभिर्विश्वहा दीदिवांसम् ।
आपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परि दीयन्ति यह्वीः २४३५

अयांसमग्ने सुक्षितिं जनाय अयांसमु मघवद्भ्यः सुवृक्तिम् ।
विश्वं तद् भद्रं यदवन्ति देवा बृहद् वदेम विदथे सुवीराः २४३६

१५ अग्नीन्द्रादयः ।

(ऋ० ७।४१।१। वसिष्ठो मैत्रावरुणिः। अग्नीन्द्रमित्रावरुणाश्विभगपूषब्रह्मणस्पतिसोमरुद्राः। जगती।)

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम २४३७

१६ अग्निर्मरुतश्च ।

(ऋ० १ । १९ । १-९ । मेधातिथिः काण्वः । गायत्री ।)

प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे । मरुद्भिरग्न आ गहि २४३८
नहि देवो न मर्त्यो महस्तव क्रतुं परः । मरुद्भिरग्न आ गहि २४३९
ये महो रजसो विदुर् विश्वे देवासो अद्रुहः । मरुद्भिरग्न आ गहि २४४०
ये उग्रा अर्कमानृचुर् अनाधृष्टास ओजसा । मरुद्भिरग्न आ गहि २४४१
ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः । मरुद्भिरग्न आ गहि २४४२
ये नाकस्याधि रोचने दिवि देवास आसते । मरुद्भिरग्न आ गहि २४४३
य ईङ्खयन्ति पर्वतान् तिरः समुद्रमर्णवम् । मरुद्भिरग्न आ गहि २४४४
आ ये तन्वन्ति रश्मिभिस् तिरः समुद्रमोजसा । मरुद्भिरग्न आ गहि २४४५
अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु । मरुद्भिरग्न आ गहि २४४६

(ऋ० ८ । १०३ । १४ । सोभरिः काण्वः । अनुष्टुप् ।)

आग्ने याहि मरुत्सखा रुद्रेभिः सोमपीतये ।
सोभर्या उप सुष्टुतिं मादयस्व स्वर्णरे २४४७

१७ अग्निमित्रावरुणादयः ।

(ऋ० १ । ३५ । १ । हिरण्यस्तूप आङ्गिरसः । अग्निर्मित्रावरुणौ रात्रिः सविता च । जगती ।)

ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे ।
ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये २४४८

१८ अग्निर्वरुणश्च ।

(ऋ० ४ । १ । २-५ । वामदेवो गोतमः । त्रिष्टुप्, २४४९ अति जगती, २४५० धृतिः ।)

स भ्रातरं वरुणमग्न आ ववृत्स्व देवाँ अच्छा सुमती यज्ञवनसं ज्येष्ठं यज्ञवनसम् ।
ऋतावानमादित्यं चर्षणीधृतं राजानं चर्षणीधृतम् २४४९
सखे सखायमभ्या ववृत्स्वाशुं न चक्रं रथ्येव रंह्यास्मभ्यं दस्म रंह्या ।
अग्ने मृळीकं वरुणे सचा विदो मरुत्सु विश्वभानुषु ।
तोकाय तुजे शुशुचान शं कृध्यस्मभ्यं दस्म शं कृधि २४५०

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेळोऽव
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत् २४५१
स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुणं रराणो वीहि मृळीकं सुहवो न एधि २४५२

१९ अग्नाविष्णू ।

(अथर्व कां० ७ । २९ (३०) । १-२ । मेधातिथिः । त्रिष्टुप् ।)

अग्नाविष्णू महि तद्वां महित्वं पाथो घृतस्य गुह्यस्य नाम ।
दमेदमे सप्त रत्ना दधानौ प्रति वां जिह्वा घृतमा चरण्यात् २४५३
अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणौ ।
दमेदमे सुष्टुत्या वावृधानौ प्रति वां जिह्वा घृतमुच्चरण्यात् २४५४

२० अग्निसूर्यौ ।

(ऋ० ८ । ५६ । (८) ५ । वालखिल्यसूक्तम् । पृषध्रः काण्वः । पंक्तिः ।)

अचेत्यग्निश्चिकितुर् हव्यवाट् स सुमद्रथः ।
अग्निः शुक्रेण शोचिषा बृहत्सूरो अरोचत दिवि सूर्यो अरोचत २४५५

२१ (केशिनः)-अग्निः सूर्यो वायुश्च ।

(ऋ० १ । १६४ । ४४ दीर्घतमा औचथ्यः । त्रिष्टुप् ।)

त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम् ।
विश्वमेको अभि चष्टे शचीभिर् ध्राजिरेकस्य ददृशे न रूपम् २४५६

२२ अग्निसूर्यानिलाः ।

(ऋ० ८ । १८ । ९ इरिम्बिठिः काण्वः । उष्णिक् ।)

शमग्निरग्निभिः करच् छं नस्तपतु सूर्यः । शं वातो वातु अरपा अप स्रिधः २४५७

अग्निसूर्यवायवः ।

(ऋ० १० । १३६ । १-७ ॥ २४५८ जूतिः, २४५९ वातजूतिः, २४६० विप्रजूतिः, २४६१ वृषाणकः, २४६२ करिक्रतः २४६ एतशः, २४६४ ऋष्यशृङ्गः (एते वातरशना मुनयः) । (केशिनः=) आग्नि-सूर्य-वायवः । नुष्टुप्)

केश्यग्निं केशी विषं केशी बिभर्ति रोदसी ।
केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते २४५८

मुनयो वातरशनाः पिशङ्गा वसते मला ।
वातस्यानु ध्राजिं यन्ति यद् देवासो अविक्षत २४५९

उन्मदिता मौनेयेन वाताँ आ तस्थिमा वयम् ।
शरीरेदस्माकं यूयं मर्तासो अभि पश्यथ २४६०

अन्तरिक्षेण पतति विश्वा रूपावचाकशत् ।
मुनिर्देवस्यदेवस्य सौकृत्याय सखा हितः २४६१

वातस्याश्वो वायोः सखा अथो देवेषितो मुनिः ।
उभौ समुद्रावा क्षेति यश्च पूर्व उतापरः २४६२

अप्सरसां गन्धर्वाणां मृगाणां चरणे चरन् ।
केशी केतस्य विद्वान् त्सखा स्वादुर्मदिन्तमः २४६३

वायुरस्मा उपामन्थत् पिनष्टि स्मा कुनन्नमा ।
केशी विषस्य पात्रेण यद् रुद्रेणापिबत् सह २४६४

अग्नीषोमौ ।

(ऋ० १ । ९३ । १-१२ । गोतमो राहूगणः । २४६५-२४६७ अनुष्टुप्; २४६८-२४७१, २४७६ त्रिष्टुप्; २४७२ जगती त्रिष्टुब्वा; २४७३-२४७५ गायत्री ।

अग्नीषोमाविमं सु मे शृणुतं वृषणा हवम् । प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः २४६५
अग्नीषोमा यो अद्य वाम् इदं वचः सपर्यति । तस्मै धत्तं सुवीर्यं गवां पोषं स्वश्व्यम् २४६६
अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिम् । स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत् २४६७

अग्नीषोमा चेति तद् वीर्यं वां यदमुष्णीतमवसं पणिं गाः ।
अवातिरतं बृसयस्य शेषो ऽविन्दतं ज्योतिरेकं बहुभ्यः २४६८

युवमेतानि दिवि रोचनानि अग्निश्च सोम सक्रतू अधत्तम् ।
युवं सिन्धूंरभिशस्तेरवद्यात् अग्नीषोमावमुञ्चतं गृभीतान् २४६९
आन्यं दिवो मातरिश्वा जभार अमथ्नादन्यं परि श्येनो अद्रेः ।
अग्नीषोमा ब्रह्मणा वावृधाना उरुं यज्ञाय चक्रथुरु लोकम् २४७०
अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणा जुषेथाम् ।
सुशर्माणा स्ववसा हि भूतम् अथा धत्तं यजमानाय शं योः २४७१
यो अग्नीषोमा हविषा सपर्याद् देवद्रीचा मनसा यो घृतेन ।
तस्य व्रतं रक्षतं पातमंहसो विशे जनाय महि शर्म यच्छतम् २४७२
अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्रा बभूवथुः २४७३
अग्नीषोमावनेन वां यो वां घृतेन दाशति । तस्मै दीदयतं बृहत् २४७४
अग्नीषोमाविमानि नो युवं हव्या जुजोषतम् । आ यातमुप नः सचा २४७५
अग्नीषोमा पिपृतमर्वतो न आ प्यायन्तामुस्रिया हव्यसूदः ।
अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमन्तम् २४७६

(अथर्व० ६ । ५४ । १-३ । ब्रह्मा । अनुष्टुप् ।)

इदं तद् युज उत्तरम् इन्द्रं शुम्भाम्यष्टये । अस्य क्षत्रं श्रियं महीं वृष्टिरिव वर्धया तृणम् २४७७
अस्मै क्षत्रमग्नीषोमौ अस्मै धारयतं रयिम् । इमं राष्ट्रस्याभीवर्गे कृणुतं युज उत्तरम् २४७८
सबन्धुश्चासबन्धुश्च यो अस्माँ अभिदासति । सर्वं तं रन्धयासि मे यजमानाय सुन्वते २४७९

(अथर्व० ६ । ५८ । ३ । अथर्वा (यशस्कामः) । अग्निः, इन्द्रः, सोमः । अनुष्टुप् ।)

यशा इन्द्रो यशा अग्निर् यशाः सोमो अजायत ।
यशा विश्वस्य भूतस्य अहमस्मि यशस्तमः २४८०

(अथर्व० ६ । ९३ । ३ । शन्तातिः । अग्निषोमौ वरुणः मरुतः वातपर्जन्यौ । त्रिष्टुप् ।)

त्रायध्वं नो अघविषाभ्यो वधाद् विश्वे देवा मरुतो विश्ववेदसः ।
अग्नीषोमा वरुणः पूतदक्षा वातापर्जन्ययोः सुमतौ स्याम २४८१

(अथर्व० ७ । ११४ (११९) । १-२ ॥ भार्गवः । अग्नीषोमौ । अनुष्टुप् ।)

आ ते ददे वक्षणाभ्य आ तेऽहं हृदयाद् ददे ।
आ ते मुखस्य संकाशात् सर्वं ते वर्च आ ददे २४८२
प्रेतो यन्तु व्याध्यः प्रानुध्याः प्रो अशस्तयः ।
अग्नी रक्षस्विनीर्हन्तु सोमो हन्तु दुरस्यतीः २४८३

अग्निदेवता-पुनरुक्त-मन्त्रभागाः ।

ऋग्वेदस्य प्रथमं मण्डलम् ।

[२] १ । १ । २ (मधुच्छन्दा वैश्वामित्रः । अग्निः)

स देवाँ एह वक्षति ।

(७०५) ४ । ८ । २ (वामदेवो गौतम. । अग्निः)

स देवाँ एह वक्षति ।

[४] १ । १ । ४ (मधुच्छन्दा वैश्वामित्रः । अग्निः)

विश्वतः परिभूरसि ।

(१८९२) १।९७ । ६ (कुत्स आंगिरसः । अग्निः)

विश्वतः परिभूरसि ।

[५] १ । १ । ५ (मधुच्छन्दा वैश्वामित्रः । अग्निः)

देवो देवेभिरागमत् ।

(५११) ३ । १० । ४ (विश्वामित्रो गाथिनः । अग्निः)

अग्निर्देवेभिरागमत् ।

[८] १ । १ । ८ (मधुच्छन्दा वैश्वामित्रः । अग्निः)

राजन्तमध्वराणां ।

(३८) १ । २७ । १ (शुनः शेप आजीगर्तिः । अग्निः)

सम्राजन्तमध्वराणाम् ।

(१०३) १ । ४५ । ४ (प्रस्कण्वः काण्वः । अग्निः)

राजन्तमध्वराणाम् ।

८ । ८ । १८ (सध्वंसः काण्वः । अश्विनौ)

राजन्तमध्वराणाम् ।

[१०] १ । १२ । १ (मेधातिथिः काण्वः । अग्निः)

अग्निं दूतं वृणीमहे ।

(७०) १ । ३६ । ३ **प्र त्वा दूतं वृणीमहे ।**

(८८) १ । ४४ । ३ **अद्या दूतं वृणीमहे ।**

[१०] १ । १२ । १ (मेधातिथिः काण्वः । अग्निः)

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।

अस्य यज्ञस्य सुक्रतुम् ।

(७०) १ । ३६ । ३ (कण्वो घौरः । अग्निः)

प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसम् ।

(९२) १ । ४४ । ७ (प्रस्कण्वः काण्वः । अग्निः)

होतारं विश्ववेदसम् ।

(११२६) ८ । १९ । ३ (सोभरिः काण्वः । अग्निः)

यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् ।

अस्य यज्ञस्य सुक्रतुम् ।

[१२] १ । १२ । ३ (मेधातिथिः काण्वः । अग्निः)

अग्ने देवाँ इहा वह ।

(१९) १ । १२ । १० (मेधातिथिः काण्वः । अग्निः)

अग्ने देवाँ इहा वह ।

(२२) १ । १५ । ४ (मेधातिथिः काण्वः । अग्निः ।

अग्ने देवाँ इहा वह ।

[१३] १ । १२ । ४ (मेधातिथिः काण्वः । अग्निः)

यदग्ने यासि दूत्यम् । देवैरा सत्सि बर्हिषि ।

(२२१) १ । ७४ । ७ (गोतमो राहूगणः । अग्निः)

यदग्ने यासि दूत्यम् ।

(९२४) ५ । २६ । ५ (वसूयव आत्रेयाः । अग्निः)

देवैरा सत्सि बर्हिषि ।

(१३५६) ८ । ४४ । १४ (विरूप आङ्गिरसः । अग्निः)

देवैरा सत्सि बर्हिषि ।

[१५] १ । १२ । ६ (मेधातिथिः काण्वः । अग्निः)

कविर्गृहपतिर्युवा ।

(११७८) ७ । १५ । २ (वसिष्ठो मैत्रावरुणिः । अग्निः)

कविर्गृहपतिर्युवा ।

(१४६३) ८ । १०२ । १ (प्रयोगो भार्गवः — । अग्निः)

कविर्गृहपतिर्युवा ।

[१६] १ । १२ । ७ **कविमग्निमुप स्तुहि ।**

१ । १३६ । ६ **इन्द्रमग्निमुप स्तुहि ।**

[१६] १ । १२ । ७ **सत्यधर्माणमध्वरे ।**

५ । ५१ । २ **सत्यधर्माणो अध्वरम् ।**

[१८] १ । १२ । ९ (मेधातिथिः काण्वः । अग्निः)

तस्मै पावक मृळय ।

(१३७०) ८ । ४४ । २८ (विरूप आङ्गिरसः । अग्निः)

तस्मै पावक मृळय ।

[१९] १ । १२ । १० (मेधातिथिः काण्वः । अग्निः)

स नः पावक दीदिवः ।

(५१६) ३ । १० । ८ (विश्वामित्रो गाथिनः । अग्निः)

स नः पावकः दीदिहि ।

[१९] १ । १२ । १०; (१२) १ । १२ । ३; (२२) १ । १५ । ४

अग्ने देवाँ इहा वह ।

[२०] १ । १२ । ११ (मेधातिथिः काण्वः । अग्निः)

स नः स्तवान आ भर ।

...रयिं वीरवतीमिषम् ।

८ । २४ । ३ (विश्वमना वैयश्वः । इन्द्रः)

स नः स्तवान आ भर रयिं ।

९ । ४० । ५ (बृहन्मतिराङ्गिरसः । पवमानः सोमः)

स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यम् ।

९ । ६१ । ६ अमहीयुराङ्गिरसः । पवमानः सोमः)

स नः पुनान आ भर रयिं वीरवतीमिषम् ।

[२१] १ । १२ । १२ (मेधातिथिः काण्वः । अग्निः)

अग्ने शुक्रेण शोचिषा ।

...इमं स्तोमं जुषस्व नः ।

(१३५६) ८।४४।१४ (विरूप आङ्गिरसः । अग्निः)

अग्ने शुक्रेण शोचिषा ।

(१५८८) १० । २१ । ८ (विमद ऐन्द्रः । अग्निः)

अग्ने शुक्रेण शोचिषोरू ।

(१३२५) ८।४३।१६ (विरूप आङ्गिरस । अग्निः)

इमं स्तोमं जुषस्व मे ।

[२२] १ । १५ । ४; (१२) १ । १२ । ३; (१९) १ । १२ । १०

अग्ने देवाँ इहा वह ।

[२८] १ । २६ । १; १ । १४ । ११, **सेमं नो अध्वरं यज ।**

[३१] १ । २६ । ४ (शुनः शेप आजीगर्तिः । अग्निः)

वरुणो मित्रो अर्यमा । सीदन्तु मनुषो यथा ।

१ । ४१ । १ (कण्वो घौरः । वरुणमित्रार्यमणः)

वरुणो मित्रो अर्यमा ।

४ । ५५ । १० (वामदेवो गौतमः । विश्वेदेवाः)

वरुणो मित्रो अर्यमा ।

५ । ६७ । ३ (यजत आत्रेयः । मित्रावरुणौ)

वरुणो मित्रो अर्यमा ।

८ । १८ । ३ (इरिम्बिठिः काण्वः । आदित्याः)

वरुणो मित्रो अर्यमा ।

८ । २८ । २ (मनुर्वैवस्वतः । विश्वेदेवाः)

वरुणो मित्रो अर्यमा ।

८ । ८३ । २ (कुसीदी काण्वः । विश्वेदेवाः)

वरुणो मित्रो अर्यमा ।

९ । ६४ । २९ (कश्यपो मारीचः । पवमानः सोमः)

सीदन्तो वनुषो यथा ।

[३२] १ । २६ । ५ (शुनः शेप आजीगर्तिः । अग्निः)

इमा उ षु श्रुधी गिरः ।

(१०४) १ । ४५ । ५ (प्रस्कण्वः काण्वः । अग्निः)

इमा उ षु श्रुधी गिरः ।

(४३३) २ । ६ । १ (सोमाहुतिर्भार्गवः । अग्निः)

इमा उ षु श्रुधी गिरः ।

[३७] १ । २६ । १० (शुनः शेप आजीगर्तिः । अग्निः)

इमं यज्ञमिदं वचः ।

१ । ९१ । १० (गोतमो राहूगणः । सोमः)

इमं यज्ञमिदं वचो । जुजुषाण उपागहि ।

(१६९९) १० । १५० । २ (मृळीको वासिष्ठः । अग्निः)

इमं यज्ञमिदं वचो जुजुषाण उपागहि ।

[३८] १ । २७ । १ (शुनः शेप आजीगर्तिः । अग्निः)

सम्राजन्तमध्वराणाम् ।

(८) १।१।८; (१०३) १ । ४५ । ४ **राजन्तमध्वराणां ।**

८ । ८ । १८ **राजन्तावध्वराणां ।**

[५७] १ । ३१ । ८ (हिरण्यस्तूप आङ्गिरसः । अग्निः)

यशसं कारुं कृणुहि स्तवानः ।

देवैर्द्यावापृथिवी प्रावतं नः ।

९ । ६९ । १० (हिरण्यस्तूप आङ्गिरसः । पवमानः सोमः)

भरा चन्द्राणि गृणते वसूनि देवैर्द्यावापृथिवी प्रावतं नः ।

१० । ६७ । १२ (अयास्य आङ्गिरसः । बृहस्पतिः)

देवैर्द्यावापृथिवी प्रावतं नः ।

[७०] १ । ३६ । ३ **प्र त्वा दूतं वृणीमहे;**

(१०) १ । १२ । १ **अग्निं दूतं वृणीमहे ।**

(८८) १ । ४४ । ३ **अद्या दूतं वृणीमहे ।**

[७०] १।३६।३; (१०) १ । १२ । १; (९२) १ । ४४ । ७

होतारं विश्ववेदसं ।

[७१] १ । ३६ । ४ **देवासस्त्वा वरुणो मित्रो अर्यमा ।**

१ । ४० । ५ **यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा ।**

७ । ६६ । १२ **यद्रोहते वरुणो मित्रो अर्यमा ।**

७।८२।१०; ८३।१० **अस्मे इन्द्रो वरुणो मित्रो अर्यमा ।**

८ । १९ । १६ **येन चष्टे वरुणो मित्रो अर्यमा ।**

८ । २६ । ११ **सजोषसा वरुणो मित्रो अर्यमा ।**

१० । ३६ । १ **द्यावा क्षामा वरुणो मित्रो अर्यमा ।**

१० । ६५ । १ **अग्निरिन्द्रो वरुणो मित्रो अर्यमा ।**

१० । ६५ । ९ **इन्द्रवायू वरुणो मित्रो अर्यमा ।**

१० । ९२ । ६ **तेभिश्चष्टे वरुणो मित्रो अर्यमा ।**

[७२] १ । ३६ । ५ (कण्वो घौरः । अग्निः)

अग्ने दूतो विशामसि ।

(९४) १ । ४४ । ९ (प्रस्कण्वः काण्वः । अग्निः)

अग्ने दूतो विशामसि ।

[७४] १ । ३६ । ७ (कण्वो घौरः । अग्निः)
तं घेमित्था नमस्विन उप स्वराजमासते ।
८ । ६९ । १७ (प्रियमेध आङ्गिरसः । इन्द्रः)
तं घेमित्था नमस्विन उप स्वराजमासते ।
[७५] १ । ३६ । ८ (कण्वो घौरः । अग्निः)
उरु क्षयाय चक्रिरे ।
७ । ६० । ११ (वसिष्ठः । मित्रावरुणौ)
उरु क्षयाय चक्रिरे सुधातु ।
[७७] १ । ३६ । १० (कण्वो घौरः । अग्निः)
यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन ।
(९०) १ । ४४ । ५ (प्रस्कण्वः काण्वः । अग्निः)
यजिष्ठं हव्यवाहन ।
(११८२) ७ । १५ । ६ (वसिष्ठो मैत्रावरुणिः । अग्निः)
यजिष्ठो हव्यवाहनः ।
(१२४४) ८ । १९ । २१ (सोभरिः काण्वः । अग्निः)
यजिष्ठं हव्यवाहनम् ।
[७९] १ । ३६ । १२ स नो मृळ महाँ असि ।
(७१२) ४ । ९ । १ अग्ने मृळ महाँ असि ।
१ । ३६ । १४ (कण्वो घौरः । यूपः)
कृधी न ऊर्ध्वाञ्चरथाय जीवसे ।
१ । १७२ । ३ (अगस्त्यो मैत्रावरुणः । मरुतः)
ऊर्ध्वान्नः कर्त जीवसे ।
[८०] १ । ३६ । १५ (कण्वो घौरः । अग्निः)
पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः ।
(१११२) ७ । १ । १३ (वसिष्ठो मैत्रावरुणिः । अग्निः)
पाहि नो अग्ने रक्षसो अजुष्टात्पाहि धूर्तेरररुषो अघायोः
[८७] १ । ४४ । २ (प्रस्कण्वः काण्वः । अग्निः)
अग्ने रथीरध्वराणाम् ।
(१२१५) ८ । ११ । २ (वत्सः काण्वः । अग्निः)
अग्ने रथीरध्वराणाम् ।
[८७] १ । ४४ । २; १ । ९ । ८; ८ । ६५ । ९
अस्मे धेहि श्रवो बृहत् ।
[८८] १ । ४४ । ३ अद्या दूतं वृणीमहे ।
(१०) १ । १२ । १ अग्निं दूतं वृणीमहे ।
(७०) १ । ३६ । ३ प्र त्वा दूतं वृणीमहे ।
[९०] १ । ४४ । ५; (७७) १ । ३६ । १०
यजिष्ठं हव्यवाहन । ७ । १५ । ६ यजिष्ठो
हव्यवाहनः । ८ । १९ । २१ यजिष्ठं हव्यवाहनं ।
[९२] १ । ४४ । ७; (१०) १ । १२ । १;
(७०) १।३६। ३ होतारं विश्ववेदसं ।

[९४] १ । ४४ । ९; (७२) १ । ३६ । ५
अग्ने दूतो विशामसि ।
[९६] १ । ४४ । ११ (प्रस्कण्वः काण्वः । अग्निः)
नि त्वा यज्ञस्य साधनम् ।
(५३८) ३ । २७ । २ (विश्वामित्रो गाथिनः । अग्निः)
गिरा यज्ञस्य साधनम् ।
८ । ६ । ३ (वत्सः काण्वः । इन्द्रः)
स्तोमैर्यज्ञस्य साधनम् ।
(१२७८) ८ । २३ । ९ (विश्वमना वैयश्वः । अग्निः)
यज्ञस्य साधनं गिरा ।
[९९] १ । ४४ । १४ (प्रस्कण्वः काण्वः । अग्निः)
अग्निजिह्वा ऋतावृधः ।
अश्विभ्यामुषसा सजूः ।
७ । ६६ । १० (वसिष्ठो मैत्रावरुणिः । आदित्यः)
अग्निजिह्वा ऋतावृधः ।
१० । ६५ । ७ (वसुकर्णो वासुकः । विश्वेदेवाः)
दिवक्षसो अग्निजिह्वा ऋतावृधः ।
५ । ५१ । ८ (स्वस्त्यात्रेयः । विश्वेदेवाः)
अश्विभ्यामुषसा सजूः ।
[१०३] १ । ४५ । ४ (प्रस्कण्वः काण्वः । अग्निः)
प्रियमेधा अहूषत ।
८।८।१८ (सध्वंसः काण्वः । अश्विनौ)
प्रियमेधा अहूषत ।
८।८७।३ द्युम्नीको वा वासिष्ठः । अश्विनौ)
[१०३] १,४५,४; (८) १,१,८ राजन्तमध्वराणाम् ।
८,८,१८ राजन्तावध्वराणाम् ।
(३८) १,२७,१ सम्राजन्तमध्वराणाम् ।
[१०३] १,४५,४ अग्निं शुक्रेण शोचिषा ।
(२२) १,१२,१२ अग्ने शुक्रेण शोचिषा ।
[१०४] १,४५,५; (३२) १,२६,५, २,६,१
इमा उ षु श्रुधी गिरः ।
[१०५] १,४५,६ (प्रस्कण्वः काण्वः । अग्निः)
अग्ने हव्याय वोळ्हवे ।
(५६१) ३,२९,४ (विश्वामित्रो गाथिनः अग्निः)
अग्ने हव्याय वोळ्हवे ।
[१०६] १ । ४५ । ७ (प्रस्कण्वः काण्वः । अग्निः)
श्रुत्कर्णं सप्रथस्तमं ।
(१६८९) १०,१४०,६ (अग्निः पावकः । अग्निः)
श्रुत्कर्णं सप्रथस्तमं त्वा गिरा ।

[१०७] १,४५,८, अग्ने **मर्ताय दाशुषे** १.८४,७;९,९८,४
वसु **मर्ताय दाशुषे**। ८,१,२२ देवो **मर्ताय दाशुषे**।

[१११] १,५८,२ (नोधा गौतमः । अग्निः)
दिवो न सानु स्तनयन्नचिक्रदत्।
९,८६,९ (अकृष्टा माषाः । पवमानः सोमः)

[११३] १,५८,४ (नोधा गौतमः । अग्निः)
कृष्णं त एम रुशदूर्मे अजर।
(७०१) ४,७,९ (वामदेवो गौतमः । अग्निः)
कृष्णं त एम रुशतः पुरो भाः।
(११६) १।५८।७ (नोधा गौतमः । अग्निः)
यं वाघतो वृणते अध्वरेषु।
सपर्यामि प्रयसा यामि रत्नम्।
१०, ३०, ४ (कवष ऐलूषः । आपः अपांनपात् वा)
यं विप्रास ईळते अध्वरेषु।
३,५४,३ (प्रजापतिर्वैश्वामित्रः प्रजापतिर्वाच्यो वा। विश्वेदेवाः)
सपर्यामि प्रयसा यामि रत्नम्।

[११७] १,५८,८ **अच्छिद्रा सूनो सहसो नो अद्य**
४,२,२ **इह त्वं सूनो०**-६,५०,९ **उत त्वं सूनो०**-।

[११८]१,५८,९;(१२३) १,६०,५; १,६१,१६;१,६२,१३,
१,६४, १५; ८,८०, १०; ९, ९३, ५ **प्रातर्मक्षू धियावसुर्जगम्यात्।**

[१२२] १,६०,४ (नोधा गौतमः । अग्निः)
अग्निर्भुवद्रयिपती रयीणाम्।
(१९५) १,७२,१ (पराशरः शाक्यः अग्निः)

[१४३] * १।६६।९, १० (पराशरः शाक्त्यः । अग्निः)
एनोन्नवन्त गावः स्व१ र्दृशीके।
(१७३) १, ६९, ९, १० (पराशरः शाक्त्यः । अग्निः)
नवन्त विश्वे स्व१ र्दृशीके।

[१६२] १, ६८, ९, १०, **पितुर्न पुत्राः क्रतुं जुषन्त।**
९, ९७, ३०, **पितुर्न पुत्रः क्रतुभिर्यतान।**

[१७०] १, ६९, ७ **नाकिष्ट एता व्रता मिनन्ति।**
१०, १०, ५ **नकिरस्य प्र मिनन्ति व्रतानि।**

[१७३] १, ६९, ९, १०; * (१४३) १, ६६, ९, १०

[१७८] १, ७०, ५, ६, (पराशरः शाक्त्यः । अग्निः)
स हि क्षपावाँ अग्नी रयीणां।
(११६५) ७, १०, ५ (वसिष्ठो मैत्रावरुणिः । अग्निः)
स हि क्षपावाँ अभवद्रयीणाम्।

[१८८] १,७१,४ (पराशरः शाक्त्यः । अग्निः)
मथीद्यदीं विभृतो मातरिश्वा।
(३४८) १, १४८, १ (दीर्घतमा औचथ्यः । अग्निः)
मथीद्यदीं विष्टो मातरिश्वा।

[१९३] १,७१,९ (पराशरः शाक्त्यः । अग्निः)
राजानामित्रावरुणा सुपाणी।
३, ५६, ७ (प्रजापतिर्वैश्वामित्रः प्रजापतिर्वाच्यो वा। विश्वेदेवाः)

[१९४] १, ७१, १० (पराशरः शाक्त्यः । अग्निः)
प्र मर्षिष्ठा अभि विदुष्कविः सन्।
७, १८, २ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
एवाव द्युभिरभि०— ।

[१९५] १, ७२, १ (पराशरः शाक्त्यः । अग्निः)
हस्ते दधानो नर्या पुरूणि।
७, ४५, १ (वसिष्ठो मैत्रावरुणिः । सविता)

[१९५] १,७२,१; (१२२) १,६०,४ **अग्निर्भुवद्रयिपती रयीणां।**

[१९७] १,७२,३ (पराशरः शाक्त्यः । अग्निः)
नामानि चिद्दधिरे यज्ञियानि।
(९४१) ६,१,४ (भरद्वाजो बार्हस्पत्यः । अग्निः)

[१९८] १,७२,४ **अग्निं पदे परमे तस्थिवांसम्।**
२,३५,१४ **अस्मिन् पदे०—।**

[१९९] १,७२,५ (पराशरः शाक्त्यः । अग्निः)
रिरिक्वांसस्तन्वः कृण्वत स्वाः।
४,२४,३ (वामदेवो गौतमः । इन्द्रः)
रिरिक्वांसस्तन्वः कृण्वत त्राम।

[२०३] १,७२,९ (पराशरः शाक्त्यः । अग्निः)
कृण्वानासो अमृतत्वाय गातुम्।
३,३१,९ (कुशिक ऐषीरथिः विश्वामित्रो गाथिनो वा। इन्द्रः)

[२०६] १,७३,२ (पराशरः शाक्त्यः । अग्निः)
देवो न यः सविता सत्यमन्मा।
९,९७,४८ (कुत्स आङ्गिरसः । पवमानः सोमः)

[२०७] १,७३,३ (पराशरः शाक्त्यः । अग्निः)
देवो न यः पृथिवीं विश्वधाया उपक्षेति
हितमित्रो न राजा।
पुरः सदः शर्मसदो न वीरा।
३, ५५, २१ (प्रजापतिर्वैश्वामित्रः प्रजापति वाच्यो वा। विश्वेदेवाः)
इमां च नः पृथिवीं विश्वधाया उप क्षेति०—।

[२१२] १,७३,८ (पराशरः शाक्त्यः । अग्निः)
आपप्रिवान्रोदसी अन्तरिक्षम्।

१०,१३९,२ (विश्वावसुर्देवगन्धर्वः । सविता)
[२२४] १,७३,१० (पराशरः शाक्त्यः । अग्निः)
एता ते अग्न उचथानि वेधो जुष्टानि सन्तु ।
(६६६) ४,२,२० (वामदेवो गौतमः । अग्निः)
एता ते अग्न उचथानि वेधोऽवोचाम कवये ता जुषस्व।
उच्छोचस्व कृणुहि वस्यसो नो महो **रायः** पुरुवार प्र यन्धि।
[२२७] १,७४,३ (गोतमो राहूगणः । अग्निः)
अग्निर्वृत्रहाजनि ।
धनंजयो रणेरणे ।
(१०५६) ६,१६,१५ (भरद्वाजो बार्हस्पत्यः । अग्निः)
दस्युहन्तमम् ।
धनंजयं रणेरणे ।
[२२१] १,७४,७;(१३) १,१२,४ **यदग्ने यासि दूत्यम्।**
[२२७] १,७५,४ (गोतमो राहूगणः । अग्निः)
सखा सखिभ्य ईड्यः ।
९,६६,१ (शतं वैखानसाः । पवमानः सोमः)
[२३२] १,७६,४ (गोतमो राहूगणः । अग्निः)
वेषि होत्रमुत पोत्रं यजत्र ।
(१४९३) १०,२,२ (त्रित आप्त्यः । अग्निः)
— **पोत्रं जनानां ।**
[२३४] १, ७७, १ (गोतमो राहूगणः । अग्निः)
यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ।
(६४७) ४, २, १ (वामदेवो गौतमः । अग्निः)
—० **ऋतावा ...। होता यजिष्ठो ।**
[२३७] १, ७७, ४ **वाजप्रसूता इषयन्त मन्म ।**
७, ८७, ३ **प्रचेतसो य इषयन्त मन्म ।**
[२३९] १, ७८, १ (गोतमो राहूगणः । अग्निः)
अभि त्वा गोतमा गिरा जातवेदो विचर्षणे ।
द्युम्नैरभि प्र णोनुमः ।
४,३२,९ (वामदेवो गौतमः । इन्द्रः)
अभि त्वा गोतमा गिरानूषत ।
(१०७०) ६, १६, २९ (भरद्वाजो बार्हस्पत्यः । अग्निः)
आ भर जातवेदो विचर्षणे ।
(१०७७) ६, १६, ३६ (भरद्वाजो बार्हस्पत्यः । अग्निः)
आ भर जातवेदो विचर्षणे ।
(१३११) ८, ४३, २ (विरूप आङ्गिरसः । अग्निः)
जातवेदो विचर्षणे।
[२३९ - २४३] १, ७८, १-५ **द्युम्नैरभि प्र णोनुमः ।**
[२४६] १, ७९, ३ (गोतमो राहूगणः । अग्निः)
अर्यमा मित्रो वरुणः परिज्मा ।

८, २७, १७ (मनुर्वैवस्वतः । विश्वेदेवाः)
—**वरुणः सरातयो ।**
१०, ९३, ४ (तान्वः पार्थ्यः । विश्वेदेवाः)
[२४७] १, ७९, ४ (गोतमो राहूगणः । अग्निः)
ईशानः सहसो यहो ।
(११८७) ७, १५, ११ (वसिष्ठो मैत्रावरुणिः । अग्निः)
[२४८] १,७९,५ (गोतमो राहूगणः । अग्निः)
अग्निरीळेन्यो गिरा।
(१८५५)१०,११८,३(उरुक्षय आमहीयवः। रक्षोहाऽग्निः)
[२५१] १,७९,८ (गोतमो राहूगणः । अग्निः)
सत्रासाहं वरेण्यम् ।
३,३४,८ (विश्वामित्रो गाथिनः । इन्द्रः)
—**वरेण्यं सहोदां ।**
[२५२] १,७९,९ (गोतमो राहूगणः । अग्नि :)
रयिं विश्वायुपोषसम्।
६,५९,९ (भरद्वाजो बार्हस्पत्यः । इन्द्राग्नी)
[२५५] १, ७९, १२ (गोतमो राहूगणः । अग्निः)
अग्नी रक्षांसि सेधति ।
(११८६) ७, १५, १० (वसिष्ठो मैत्रावरुणिः। अग्निः)
[२५६-२६९] १, ९४, १-१४ **अग्ने सख्ये मा रिषामा वयं तव ।**
[२५८] १, ९४, ३ (कुत्स आङ्गिरसः । अग्निः)
त्वे देवा हविरदन्त्याहुतम् ।
(३८१) २,१,१३ (गृत्समदः शौनको भार्गवः (आङ्गिरसः शौनहोत्रो) । अग्निः)
[२६८] १, ९४, १३ **शर्मन्त्स्याम तव सप्रथस्तमे।**
५, ६५, ५ **स्याम सप्रथस्तमे ।**
[२७१] १, ९४, १६; (१८७८) ९५, ११; (१८७८) ९६, ९; (१७२६) ९८, ३; १००, १९; १०२, ११; १०३, ८; १०५, १९; १०६, ७; १०७, ३; १०८, १३; १०९, ८; ११०, ९; १११, ५; ११२, २५; ११३, २०; ११४, ११; ११५, ६; ९, ९७,५८; **तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।**
[१८७२] (औषसोऽग्निः प्रकरणं) । ऋ. १। ९५। १-११
१, ९५, ५ **जिह्मानामूर्ध्वः स्वयशा उपस्थे।**
१, ३५, ९ **जिह्मानामूर्ध्वो विद्युतं वसानः ।**
[१८७५] १,९५,८ (कुत्स आङ्गिरसः । अग्निः औषसोऽग्निर्वा)
त्वेषं रूपं कृणुत उत्तरं यत्... गोभिरद्भिः।... धीः ।

९ ७१,८ (ऋषभो वैश्वामित्रः । पवमानः सोमः)
त्वेषं रूपं कृणुते वर्णो अस्य……सुष्टुती…गोअग्रया।
(ऋ१, ९६, १—९ द्रविणोदाः अग्निः प्रकरण ।)
[१८७८] १,९५,११; १,९६,९ (कुत्स आङ्गिरसः । अग्निः)
एवा नो अग्ने समिधा वृधानो
रेवत्पावक श्रवसे वि भाहि ।
तन्नो मित्रो वरुणो मामहन्तामदितिः
सिन्धुः पृथिवी उत द्यौः ।
[१८७९-१८८६] १, ९६, १-७ देवा अग्निं
धारयन्द्रविणोदाम् ।
[१८८४] १,९६,६ (कुत्स आङ्गिरसः । अग्निः
द्रविणोदा अग्निर्वा)
रायो बुध्नः संगमनो वसूनां ।
१०,१३९,३ विश्वावसुर्देव गन्धर्वः । सविता)
[१८८६] १।९६ । ८ द्रविणोदा द्रविणसस्तुरस्य ।
१,१५,७ द्रविणोदा द्रविणसो ।
[१८७८] १. ९६, ९ (१८७८) १. ९५, ११
(शुचिरग्निः प्रकरणं ऋ. १, ९७, १-८)
(१८८७-१८९४) १,९७, १, १-८.
अप नः शोशुचदघम् ।
[१८८९] १, ९७, ३ प्रास्माकासश्च सूरयः ।
(८४०) ५, १०, ६ अस्माकासश्च सूरयो ।
[१८९२] १, ९७, ६ ; (४) १, १, ४
विश्वतः परिभूरसि ।
[१७२५] १, ९८, २ (कुत्स आङ्गिरसः । अग्निः,
वैश्वानरोऽग्निर्वा)
पृष्टो दिवि पृष्टो अग्निः पृथिव्यां…।…स नो दिवा
स रिषः पातु नक्तम् ।
(१७९५) ७, ५, २ (वसिष्ठो मैत्रावरुणिः । वैश्वानरोऽग्निः)
पृष्टो दिवि धाय्यग्निःपृथिव्यां ।
(१८१८) १०, ८७, १ (पायुर्भारद्वाजः । रक्षोहाग्निः)
स नो दिवा ।
(जातवेदा अग्निः प्रकरणं)
[१८६२] १, ९९, १ स नः पर्षदति दुर्गाणि विश्वा ।
(३६२) १, १८९, २, १०, ५६, ७
स्वस्तिभिरति दुर्गाणि विश्वा ।
[२७२] १, १२७, १ वसुं सूनुं सहसो जातवेदसं ।
(१४१९) ८. ७१, ११ अग्निं सूनुं०-
[२७३] १,१२७,२ (परुच्छेपो दैवोदासिः। अग्निः) हुवेम…
विप्रेभिः शुक्र मन्मभिः । …होतारं चर्षणीनाम् ।

१०, ३ (भर्गः प्रागाथः । अग्निः)
विप्रेभिः शुक्र मन्मभिः
(१२७६) ८, २३, ७ (विश्वमना वैयश्वः । अग्निः)
अग्निं वः … हुवे होतारं चर्षणीनाम् ।
(१४०५) ८, ६०, १७ (भर्गः प्रागाथः । अग्निः)
अग्निमग्निं वो… हुवेम…। …होतारं चर्षणीनाम् ।
[२७९] १, १२७; ८ (परुच्छेपो दैवोदासिः । अग्निः)
अतिथिं मानुषाणां ।
(१२९४) ८. २३, २५ (विश्वमना वैयश्वः । अग्निः)
[२८०] १, १२७, ९ (परुच्छेपो दैवोदासिः । अग्निः)
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।
१, १७५, ५ (अगस्त्यो मैत्रावरुणः । इन्द्रः)
[२८१] १, १२७, १० (परुच्छेपो दैवोदासिः । अग्निः)
विश्वासु क्षासु जोगुवे ।
५, ६४, २ (अर्चनाना आत्रेयः । मित्रावरुणौ)
[२८४] १, १२८, २ (परुच्छेपो दैवोदासिः । अग्निः)
ऋतस्य पथा नमसा हविष्मता ।
(१९९३) १०, ७०, २ (सुमित्रो वाध्र्यश्वः ।
आप्रीसूक्तं=नराशंसः)
ऋतस्य … नमसा मियेधो ।
१०, ३१, २ (कवष ऐलूषः । विश्वे देवाः)
पथा नमसा विवासेत् ।
[२८८] १,१२८,६ (परुच्छेपो दैवोदासिः । अग्निः)
…अरतिः… ।
… देवत्रा हव्यमोहिषे ।
… अग्निर्द्वारा व्यृण्वति ।
(१२२४) ८,१९,१ (सोभरिः काण्वः । अग्निः)
अरतिं० देवत्रा हव्यमोहिरे ।
(१३०५) ८,३९,६ (नाभाकः काण्वः । अग्निः)
अग्निर्द्वारा व्यूर्णुते ।
[२९०] १,१२८,८ (परुच्छेपो दैवोदासिः । अग्निः)
अग्निं होतारमीळते वसुधितिं प्रियं चेतिष्ठमरतिं
न्येरिरे
(७६१) ५,१,७ (बुधगविष्ठिरावात्रेयौ । अग्निः)
अग्निं होतारमीळते नमोभिः ।
(१०१९) ६,१४,२ (भरद्वाजो बार्हस्पत्यः । अग्निः)
अग्निं होतारमीळते
(११९१) ७,१६,१ (वसिष्ठो मैत्रावरुणिः । प्रगाथः)
प्रियं चेतिष्ठमरतिं स्वध्वरं ।

[३०१] १,१४०,१० (दीर्घतमा औचथ्यः । अग्निः)
अस्माकमग्ने मघवत्सु दीदिहि।
(१७८५) ६,८,६ (भरद्वाजो बार्हस्पत्यः । वैश्वानरोऽग्निः)
—धारयानामि।
[३१३] १,१४१,९ **अराम नेमिः परिभूरजायथाः।**
१,३२,१५— **परि ता बभूव।**
[३१९] १,१४३,२ (दीर्घतमा औचथ्यः । अग्निः)
स जायमानः परमे व्योमन्याविरग्निः।
(१७८१) ६,८,२ (भरद्वाजो बार्हस्पत्यः । वैश्वानरोऽग्निः)
--व्योमनि व्रतान्यग्निः।
(१८००) ७,५,७ (वसिष्ठो मैत्रावरुणिः । वैश्वानरोऽग्निः)
—व्योमन।
ऋतपत्याय जातवेदो... ..।
[३२५] १, १४३, ८ **अदब्धेभिरदृपितेभिरिष्टेऽनिमिषद्भिः परि पाहि नो जाः।**
(१७८६) ६, ८, ७ **अदब्धेभिस्तव गोपाभिरिष्टेऽस्माकं पाहि त्रिषधस्थ सूरीन्।**
[३२९] १, १४४, ४ **समाने योना मिथुना समोकसा।**
१, १५९, ४ **जामी सयोनी--।**
[३३०] १, १४४, ५ (दीर्घतमा औचथ्यः । अग्निः)
देवं मर्तास ऊतये हवामहे।
(५००) ३,९,१ (विश्वामित्रो गाथिनः । अग्निः)
देवं मर्तास ऊतये।
(९०१) ५, २२, ३ (विश्वसामा आत्रेयः । अग्निः)
— ऊतये।
(१२१९) ८, ११, ६ (वत्सः काण्वः । अग्निः)
—ऊतये। अग्निं गीर्भिर्हवामहे।
[३३२] १, १४४, ७ (दीर्घतमा औचथ्यः । अग्निः)
मन्द्र स्वधाव ऋतजात सुक्रतो।
रण्वः संदृष्टौ पितुमाँइव क्षयः।
(१४४८) ८, ७४, ७ (गोपवन आत्रेयः । अग्निः)
मन्द्र सुजात सुक्रतो।
१०, ६४, ११ (गयः प्लातः । विश्वेदेवाः)
— क्षयो।
[३४०] १, १४६, ३ **समानं वत्समभि संचरन्ती।**
३, ३३, ३; १०, १७, ११ **समानं योनिमनु संचरन्ती (१०, १७, ११, संचरन्तम्)।**
[३४३] १, १४७, १ (दीर्घतमा औचथ्यः । अग्निः)
ऋतस्य साममरणयन्त देवाः।

(६९९) ४, ७, ७ (वामदेवो गौतमः । अग्निः)
—धामरणयन्त—।
[३४५] १, १४७, ३ (दीर्घतमा औचथ्यः । अग्निः)
(१८२५) ४, ४, १३ (वामदेवो गौतमः । रक्षोहाऽग्निः)
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन्। -- ररक्ष तान्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः।
[३४८] १,१४८,१ **मथीद्यदीं विष्टो मातरिश्वा।**
(१८८) १,७१,४ **— विभृतो-।**
[३५१] १,१४८,४ (दीर्घतमा औचथ्यः । अग्निः)
आदस्य वातो अनु वाति शोचिः।
(११२५) ७,३,२ (वसिष्ठो मैत्रावरुणिः । अग्निः)
[३५३] १,१४९,१ (दीर्घतमा औचथ्यः । अग्निः)
महः स राय एषते पतिर्दन्।
१०,९३,६ (तान्वः पार्थ्यः । विश्वेदेवाः)
—एषते।
[३६१] १,१८९,१ (अगस्त्यो मैत्रावरुणः । अग्निः)
विश्वानि देव वयुनानि विद्वान्।
(४७५) ३,५,६(विश्वामित्रो गाथिनः । अग्निः)
—देवो—।
[३६२] १,१८९,२ (अगस्त्यो मैत्रावरुणः । अग्निः)
स्वस्तिभिरति दुर्गाणि विश्वा।
१०,५६,७ (बृहदुक्थो वामदेव्यः । विश्वेदेवाः)
[२४३८-४६] १, १९, १-९ **मरुद्भिरग्न आ गहि।**
[२४४०] १, १९, ३ (मेधातिथिः काण्वः । अग्निर्मरुतश्च)
विश्वे देवासो अद्रुहः।
९, १०२, ५ (त्रित आप्त्यः । पवमानः सोमः)
[२४४६] १, १९, ९ (मेधातिथिः काण्वः । अग्निर्मरुतश्च)
अभि त्वा पूर्वपीतये।
८, ३, ७ (मेध्यातिथिः काण्वः । इन्द्रः)
[२४६६] १, ९३, २ (गोतमो राहूगणः । अग्नीषोमौ)
गवां पोषं स्वश्व्यम्।
९, ६५, १७ (भृगुर्वारुणिर्जमदग्निर्भार्गवो वा । पवमानः सोमः)
[२४६७] १, ९३, ३ (गोतमो राहूगणः । अग्नीषोमौ)
विश्वमायुर्व्यश्नवत्।
८, ३१, ८ (मनुर्वैवस्वतः । दम्पती)
विश्वमायुर्व्यश्नुतः।
१०, ८५, ४२ (सूर्या सावित्री ऋषिका । सूर्या सावित्री)
विश्वमायुर्व्यश्नुतम्।

[२४६८] १, ९३, ४ अग्नीषोमा चेति तद्वी...
३, १२, ९ तद्वां चेति प्र वीर्यम् ।

[२४७०] १, ९३, ६ (गोतमो राहूगणः । अग्नीषोमौ)
यज्ञाय चक्रथुरु लोकम् ।

...वरुणिः । इन्द्राविष्णू)

[२... ...मो राहूगणः । अग्नीषोमौ)
...विशे जनाय महि शर्म यच्छतम् ।
७, ८२, १ (वसिष्ठो मैत्रावरुणिः । इन्द्रावरुणौ)

ऋग्वेदस्य द्वितीयं मण्डलम् ।

[३७०] २,१,२ (गृत्समदः शौनको भार्गवः [आङ्गिरसः शौनहोत्रः] । अग्निः)
(१६६०) १०,९१,१० (अरुणो वैतहव्यः । अग्निः)
तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं
त्वमग्निदृतायतः ।
तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि
गृहपतिश्च नो दमे ।

[३८१] २,१,१३ (२५८) १,९४,३
त्वे देवा हविरदन्त्याहुतम् ।

[३८४] २,१,१६ (गृत्समदः शौनको भार्गवः [आङ्गिरसः शौनहोत्रः] । अग्निः)=
(३८४) २,२,१३; (गृत्समदः शौनकः । अग्निः)
ये स्तोतृभ्यो गो अग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य
आ बृहद्वदेम विदथे सुवीराः ।

(३८४) २,१,१६; २,१३; ११,२१; १३,१३; १४,१२; १५,१०; १६,९; १७,९; १८,९; २०,९; २३,१९; २४,१६ २७,१७; २८,११; २९,७; ३३,१५; ३५,१५; ३९,८; ४०,६; ४२,३; ९.८६.४८, बृहद्वदेम विदथ सुवीराः ।

[३८६] २,२,२ (गृत्समदः शौनकः । अग्निः)
अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न
स्वसरेषु धेनवः ।
८,८८,१ (नोधा गौतमः । इन्द्रः)
अभि वत्सं न स्वसरेषु धेनवः ।

[३८८] २,२,४ पाथो न पायुं जनसी उभे अनु ।
९,७०,३ अदाभ्यासो जनुषी उभे अनु ।

[३९२] २,२,८ (गृत्समदः शौनकः । अग्निः)
होत्राभिरग्निर्मनुषः स्वध्वरो ।
(१५४४) १०,११,५ (हविर्धान आङ्गिः । अग्निः)
होत्राभिरग्ने मनुषः स्वध्वरः ।

[४१७] २, ४,२ (सोमाहुतिर्भार्गवः । अग्निः)
इमं विधन्तो अपां सधस्थे
द्वितादधुर्भृगवो विक्ष्वा३योः ।
(१६०२) १०, ४६, २ (वत्सप्रिर्भालन्दनः । अग्निः)
—सधस्थे ।
इच्छन्तो धीरा भृगवोऽविन्दन् ।

[४२८] २, ५, ४ (सोमाहुतिर्भार्गवः । अग्निः)
वया इवानु रोहते ।
८, १३, ६ (नारदः काण्वः । इन्द्रः)
—जुषन्त यत् ।

[४३२] २, ५, ८ (सोमाहुतिर्भार्गवः । अग्निः)
अयमग्ने त्वे अपि ।
(१३७०) ८, ४४, २८ (विरूप आङ्गिरसः । अग्निः)

[४३३] २, ६, १; (३२) १, २६, ५; (१०४) १, ४५, ५
इमा उ षु श्रुधी गिरः ।

[४३७] २, ६, ५ (सोमाहुतिर्भार्गवः । अग्निः)
स नो वृष्टिं दिवस्परि ।
९, ६५, २४ (भृगुर्वारुणिर्जमदग्निर्भार्गवो वा । पवमानः सोमः)
ते नो — ।

[४४३] २, ७, ३ अति गाहेमहि द्विषः ।
(५३९) ३, २७, ३ अति द्वेषांसि तरेम ।

[४४४] २, ७, ४ (सोमाहुतिर्भार्गवः । अग्निः)
शुचिः पावक वन्द्यो ।
(११८६) ७, १५, १० (वसिष्ठो मैत्रावरुणिः । अग्निः)
—ईड्यः ।

[४०१] २, ८,५ अग्निमुक्थानि वावृधुः ।
८, ६, ३५; ८,९५, ६ इन्द्रमुक्थानि वावृधुः ।

[४०१] २, ८, ५ (गृत्समदः शौनकः । अग्निः)
विश्वा अधि श्रियो दधे ।
(१५८३) १०, २१, ३ (विमद ऐन्द्रः प्राजापत्यो वा
वसुकृद्वा वासुकः । अग्निः)
—श्रियो धिषे विवक्षसे ।

१०, १२७, १ (कुशिकः सोभरः रात्रिर्वा भारद्वाजी । रात्रिः)
—श्रियो ऽधित ।
[४०२] २, ८, ६ (गृत्समदः शौनकः । अग्निः)
अरिष्यन्तः सचेमह्यभि ष्याम पृतन्यतः ।
८, २५, ११ (विश्वमना वैयश्वः । विश्वेदेवाः)
अरिष्यन्तो नि पायुभिः सचेमहि ।

९, ३५, ३ (प्रभूवसुराङ्गिरसः । पवमानः सोमः)
अभि ष्याम पृतन्यतः ।
(९२०) ५, २६, १; (१०७३) ६, १६, २;
(१४७८) ८, १०२, १६.
आ देवान्वक्षि यक्षि च
२, २६, ४, (गृत्समदः शौनकः । अग्निः शुचिश्च)
आ वक्षि देवाँ इह विप्र यक्षि च ।

ऋग्वेदस्य तृतीयं मण्डलम् ।

[४५१] ३, १, ५, क्रतुं पुनानः कविभिः पवित्रैः ।
३, २१, १६ मध्वः पुनानाः — ।
[४५९] ३, १, १३; १, १६४, ५२
अपां गर्भं दर्शतमोषधीनां ।
[४६१] ३, १, १५ (विश्वामित्रो गाथिनः । अग्निः)
रक्षा च नो दम्येभिरनीकैः ।
३, ५४, १ (प्रजापतिर्वैश्वामित्रः, प्रजापतिर्वाच्यो वा । विश्वेदेवाः) शृणोतु नो — ।
[४६५] ३, १, १९ (विश्वामित्रो गाथिनः । अग्निः)
आ नो गहि सख्येभिः शिवेभिर्महान्
महीभिरूतिभिः सरण्यन् ।
३, ३१, १८ (कुशिक ऐषीरथिः विश्वामित्रो गाथिनो वा । इन्द्रः)
४, ३२, १ (वामदेवो गौतमः । इन्द्रः)
आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि ।
महान्महीभिरूतिभिः ।
[४६६] ३, १, २० (विश्वामित्रो गाथिनः । अग्निः)
महान्ति वृष्णे सवना कृतेमा जन्मजन्मन्
निहितो जातवेदाः ।
३, ३०, २ (विश्वामित्रो गाथिनः । इन्द्रः)
स्थिराय वृष्णे सवना कृतेमा ।
(४६६) ३, १, २१; (४६७) ३, १, २० जन्मजन्मन्
निहितो जातवेदाः ।
[४६७] ३, १, २१ (विश्वामित्रो गाथिनः । अग्निः)
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे
स्याम ।
३, ५९, ४ (विश्वामित्रो गाथिनः । मित्रः)
६, ४७, १३ (गर्गो भारद्वाजः । इन्द्रः)
१०, १३१, ७ (सुकीर्तिः काक्षीवतः । इन्द्रः)
१०, १४, ६ (यमो वैवस्वतः । अङ्गिरःपित्रथर्वभृगुसोमाः)

लिङ्गोक्तदेवताः पितरो वा)
तेषां वयं सुमतौ यज्ञियानामपि—
[४६८] ३, १, २२ (विश्वामित्रो गाथिनः । अग्निः)
अग्ने महि द्रविणमा यजस्व ।
(१६५०) १०, ८०, ७ (अग्निः सौचीको वैश्वानरो वा सप्तिर्वाजंभरो वा । अग्निः)
[४६९] ३, १, २३ = ३, ५, ११ = ३, ६, ११ = ३, ७, ११
(विश्वामित्रो गाथिनः । अग्निः) = ३, १५, ७ (उत्कीलः कात्यः । अग्निः) = ३, २२, ५ (गाथी कौशिकः । अग्निः) = ३, २३, ५
(देवश्रवा देववातश्च भारतौ । अग्निः)
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय
साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ।
[४७३] ३, ५, ४, मित्रो अग्निर्भवति यत्समिद्धो ।
(७७९) ५, ३, १ त्वं मित्रो भवसि यत्समिद्धः ।
[४७३] ३, ५, ४, (विश्वामित्रो गाथिनः । अग्निः)
मित्रो होता वरुणो जातवेदाः ।
१०, ८३, २ (मन्युस्तापसः । मन्युः)
मन्युर्होता— ।
[४७४] ३, ५, ५, (विश्वामित्रो गाथिनः । अग्निः)
पाति प्रियं रिपो अग्रं पदं वेः ।
(१७६५) ४, ५, ८, (वामदेवो गौतमः । वैश्वानरोऽग्निः)
—रूपो—
[४७५] ३, ५, ६ विश्वानि देवो वयुनानि विद्वान् ।
(६६१) १, १८९, १ —देव— ।
[४६९] ३, ५, ११ = ३, १, २३ = ३, ६, ११ = ३, ७, ११
३, १५, ७ = ३, २२, ५ = ३, २३, ५
[४८१] ३, ६, २ (विश्वामित्रो गाथिनः । अग्निः)
आ रोदसी अपृणा जायमान

४ १८, ५ (अदितिः ऋषिका । वामदेवः)

आ रोदसी अपणाज्जायमानः ।

(१८११) ७, १३, २ (वसिष्ठो म..

वैश्वानरोऽग्नि.)

—जायमानः ।

(१५९४) १०, ४५, ६ (वत्सप्रिर्भालन्दनः । अग्निः)

—अपृणाज्जायमानः ।

[४८४] ३, ६, ५ (विश्वामित्रो गाथिनः । अग्निः)

त्वं दूतो अभवो जायमानः ।

[४८५] ३, ६, ६, (विश्वामित्रो गाथिनः । अग्निः)

स्वध्वरा कृणुहि जातवेदः ।

(९९३) ६, १०, १ (भरद्वाजो बार्हस्पत्यः । अग्निः)

—करति जातवेदाः ।

(१२०६) ७, १७, ३ (वसिष्ठो मैत्रावरुणिः । अग्निः)

(१२०७) ७, १७, ४ (वसिष्ठो मैत्रावरुणिः । अग्निः)

—करति जातवेदाः ।

[४८८] ३, ६, ९ ; (१९५२) २, ३, ११ **अनुष्वधमा वह मादयस्व ।**

[४९९] ३, ६, ११; ३, १, २३; ३, ५, ११;
३, ६, ११; ३, ७, ११;
३, १५, ७; ३, २२, ५; ३, २३, ५;

[४९७] ३, ७, ८; (१९५९) ३, ४, ७

[५००] ३, ९, १ ; (९०१) ५, २२, ३; ८, ११, ६

देवं मर्तास ऊतये ।

(३३०) १, १४४, ५ **— ऊतये हवामहे ।**

[५००] ३, ९, १ (विश्वामित्रो गाथिनः । अग्निः)

अपां नपातं सुभगं सुदीदितिं ।

(१२२७) ८, १९, ४ (सोभरिः काण्वः । अग्निः)

ऊर्जो —।

[५००] ३, ९, १; १, ४०, ४ **सुप्रतूर्तिमनेहसम् ।**

[५०५] ३, ९, ६ (विश्वामित्रो गाथिनः । अग्निः)

तं त्वा मर्ता अगृभ्णत **देवेभ्यो हव्यवाहन ।**

(१८५७) १०, ११८, ५ (उरुक्षय आमहीयवः । रक्षोहाऽग्निः)

देवेभ्यो हव्यवाहन । तं त्वा हवन्त मर्त्याः ।

१०, ११९, १३ (लब ऐन्द्रः । आत्मा [इन्द्रः])

देवेभ्यो हव्यवाहनः ।

(१६९८) १०, १५०, १ (मृळीको वासिष्ठः । अग्निः)

देवेभ्यो हव्यवाहन ।

[५०७] ३, ९, ८ (विश्वामित्रो गाथिनः । अग्निः)

शीरं पावकशोचिषम् ।

..रस. । अग्निः)

.. भार्गवः, पावकोऽ
.., गृहपति – यविष्ठो सहसः
पुत्रोऽन्यतरो वा । अग्निः)

(१५८१) १०, २१, १ (विमद ऐन्द्रः प्राजापत्यो वा, वसुकृद्वा वासुकः । अग्निः)

—पावकशोचिषं विवक्षसे ।

[५०८] ३, ९, ९ (विश्वामित्रो गाथिनः । अग्निः)

१०, ५२, ६ (अग्निः सौचीकः । विश्वेदेवाः)

त्रीणि शता त्री सहस्राण्यग्निं
त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा
आदिद्धोतारं न्यसादयन्त ॥

[५०९] ३, १०, १ (विश्वामित्रो गाथिनः । अग्निः)

त्वामग्ने मनीषिणः सम्राजं चर्षणीनाम् ।

(१३६१) ८, ४४, १९ (विरूप आङ्गिरसः । अग्निः)

—मनीषिणः ।

१०, १३४, १ (मान्धाता यौवनाश्वः । इन्द्रः)

महान्तं त्वा महीनां सम्राजं चर्षणीनाम् ।

[५१०] ३, १०, २ (विश्वामित्रो गाथिनः । अग्निः)

त्वां यज्ञेष्वृत्विजमग्ने ।

गोपा ऋतस्य दीदिहि स्वे दमे ।

(१५८७) १०, २१, ७ (विमद ऐन्द्रः प्राजापत्यो वा, वसुकृद्वा वासुकः । अग्निः)

त्वां यज्ञेष्वृत्विजं चारुमग्ने नि षेदिरे ।

(१८५९) १०, ११८, ७ (उरुक्षय आमहीयवः । रक्षोहाऽग्निः)

अदाभ्येन शोचिषाग्ने रक्षस्त्वं दह । गोपा ऋतस्य दीदिहि ।

[५१०] ३, १०, २ **अग्ने होतारमीळते । (१०१९) ६, १४, २; अग्निं होतारमीळते (२९०) १, १२८, ८**

[५११] ३, १०, ३ (विश्वामित्रो गाथिनः । अग्निः)

ददाशति समिधा जातवेदसे ।

(११७४) ७, १४, १ (वसिष्ठो मैत्रावरुणिः । अग्निः)

समिधा जातवेदसे ... ।

नमस्विनो वयं दाशेमाग्नये ।

[५१२] ३, १०, ४ **अग्निर्देवेभिरागमत् ।**

(५) १, १, ५ **देवो— ।**

[५१६] ३, १०, ८ स नः पावक दीदिहि

(१९) १, १२, १० —दीदिवः ।

[५१७] ३, १०, ९ तं त्वा विप्रा विपन्यवो जागृवांसः समिन्धते । १, २२, २१ (विष्णुर्देवता)

तद्विप्रासो विपन्यवो — ।

[५१६] ३, १०, ८ द्युमदस्मे सुवीर्यम् ।

(५८०) ३, १३, ७ द्युमदग्ने— ।

[५१७] ३, १०, ९ (विश्वामित्रो गाथिनः । अग्निः)

हव्यवाहममर्त्यं सहोवृधम् ।

(७३४, ४, ८, १ (वामदेवो गौतमः । अग्निः)

हव्यवाहममर्त्यम् ।

(१४७९) ८, १०२, १७ (प्रयोगो भार्गवः पावकोऽग्निर्बार्हस्पत्यो वा, गृहपति-यविष्ठौ सहसः पुत्रोऽन्यतरो वा । अग्निः)

हव्यवाहममर्त्यम् ।

[५२०] ३, ११, ३ केतुर्यज्ञस्य पूर्व्यः ।

९, २, १० आत्मा— ।

[५२१] ३, ११, ४ (विश्वामित्रो गाथिनः । अग्निः)

वह्निं देवा अकृण्वत ।

(१२०३) ७, १६, १२ (वसिष्ठो मैत्रावरुणिः । प्रगाथः)

[५२३] ३, ११, ६ (विश्वामित्रो गाथिनः । अग्निः)

अग्निस्तुविश्रवस्तमः ।

(९१५) ५, २५, ५ (वसूयव आत्रेयाः । अग्निः)

—स्तमं ।

[५२५] ३, ११, ८ (विश्वामित्रो गाथिनः । अग्निः)

मन्मभिः । विप्रासो जातवेदसः ।

(१११८) ८, ११, ५ (वत्सः काण्वः । अग्निः)

मनामहे— ।

[५७५] ३,१३,२; १,१३४,२ दक्षं सचन्त ऊतयः ।

[५८०] ३,१३,७ द्युमदग्ने सुवीर्यं ।

(५१६) ३,१०,८ द्युमदस्मे— ।

[५८५] ३,१४,५ (ऋषभो वैश्वामित्रः । अग्निः)

उत्तानहस्ता नमसोपसद्य ।

(१०८७) ६,१६, ४६ (भरद्वाजो बार्हस्पत्यः । अग्निः)

उत्तानहस्तो नमसा विवासेत् ।

(१६३८) १०,७९,२ (अग्निः सौचीको वैश्वानरो वा सप्तिर्वाजंभरो वा । अग्निः)

उत्तानहस्ता नमसाधि विक्षु ।

[५९२] ३,१५,५ अच्छिद्रा शर्म जरितःपुरूणि ।

२,२५,५ —दधिरे— ।

(४६९) ३,१५,७=३,१,२३=३,५,११=३,६,११=३,७,११=३,२२,५=३,२३,५

[५९५] ३,१६,२ (उत्कीलः कात्यः । अग्निः)

इमं नरो मरुतः सश्चता वृधं ।

७,१८,२५ (वसिष्ठो मैत्रावरुणिः । सुदासः पैजवनः)

—मरुतः सश्चतानु ।

[५९९] ३,१६,६ तुविद्युम्न यशस्वता ।

१,९, ६ —यशस्वतः ।

[६०१] ३,१७,२ यथा दिवो जातवेदश्चिकित्वान् ।

(६७३) ४,३,८ साधा दिवो— ।

[६०३] ३,१७,४; २,४०,१ अकृण्वन्नमृतस्य देवा नाभिम् ।

[६०४] ३,१७,५ (कतो वैश्वामित्रः । अग्निः)

यस्त्वद्धोता पूर्वो अग्ने यजीयान्द्विता च सत्ता स्वधया च शंभुः ।

(७८२) ५,३,५ (वसुश्रुत आत्रेयः । अग्निः)

न त्वद्धोता पूर्वो अग्ने यजीयान्न काव्यैः परो अस्ति स्वधावः ।

[६१०] ३,१९,१ (गाथी कौशिकः । अग्निः)

स नो यक्षद्देवताता यजीयान् ।

(१६१६) १०,५३,१ (देवा अग्निः सौचीकः । अग्निः)

[६११] ३,१९,२ (गाथी कौशिकः । अग्निः)

सुद्युम्नां रातिनीं घृताचीम् ।

प्रदक्षिणिद्देवतातिमुराणः ।

(६८४) ४,६,३ (वामदेवो गौतमः । अग्निः)

यता सुजूर्णी रातिनी घृताची … ।

[६१८] ३, २१, १ (६२१) ३।२१।४ स्तोकानाम्

(३, २१, ४ स्तोकासो)

अग्ने मेदसो घृतस्य ।

[६१९] ३, २१, २ (गाथी कौशिकः । अग्निः)

श्रेष्ठं नो धेहि वार्यम् ।

१०, २४, २ (विमद ऐन्द्रः प्राजापत्यो वा, वसुकृद्वा वासुकः । इन्द्रः)

…वार्यं विवक्षसे ।

[४६९] ३, २२, ५ (गाथी कौशिकः । अग्निः)

३, १, २३ (विश्वामित्रो गाथिनः । अग्निः)

३, ५, ११ = ३, ६, ११ = ३, ७, ११=

३, १५, ७ (उत्कीलः कात्यः । अग्निः)
३, २३, ५ (देवश्रवा देववातश्च भारतौ । अग्निः)
इळामग्ने पुरुदंसं सनिं गोः …… साध ।
स्यान्नः सूनुस्तनयो………त्वस्मे ॥
[५२७] ३, २४, १; ३, ८, ३ **वर्चो धा यज्ञवाहसे ।**
[५२९] ३, २४, ३ (विश्वामित्रो गाथिनः । अग्निः)
अग्ने द्युम्नेन जागृवे **सहसः सूनवाहुत ।**
एदं बर्हिः सदो मम ।
(१२४८) ८, १९, २५ (सोभरिः काण्वः । अग्निः)
यदग्ने……… ।
सहसः सूनवाहुत ।
(१३७१) ८, ७५, ३ (विरूप आङ्गिरसः । अग्निः)
सहसः सूनवाहुत ।
८, १७, १ (इरिम्बिठिः काण्वः । इन्द्रः)
एदं बर्हिः सदो मम ।
[५३८] ३, २७, २ **गिरा यज्ञस्य साधनम् ।**
(९६) १, ४४, ११ **नि त्वा — ।**
८, ६, ३ **स्तोमैर्यज्ञस्य— ।**
(१२७८) ८, २३, ९ **यज्ञस्य साधनं गिरा ।**
[५३९] ३, २७,३ **अति द्वेषांसि तरेम ।**
(४४३) २, ७, ३ **अति गाहेमहि द्विषः ।**

[५४०] .. ... **पावक ईड्यः ।**
(११८६) ७, १५ १०, **शुचिः— ।**
[५४१] ३, २७, ५ **पृथुपाजा अमर्त्यो ।**
(१७३७; ३, २, ११ **वैश्वानरः— ।**
[५४३] ३, २७, ७ (विश्वामित्रो गाथिनः । अग्निः)
होता देवो अमर्त्यः ।
(१२४७) ८ ,१९, २४ (सोभरिः काण्वः । अग्निः)
[५४९] ३, २७,१३ (विश्वामित्रो गाथिनः । अग्निः)
तिरस्तमांसि दर्शतः ।
(१४४६) ८, ७४, ५ (गोपवन आत्रेयः । अग्निः)
…दर्शतम् ।
[५५२] ३, २८, १ (५५७) ३, २८, ६
पुरोळाशं जातवेदः ।
[५६१] ३, २९, ४ **नाभा पृथिव्या अधि ।**
(१९४८) २, ३, ७ **—अधि सानुषु त्रिषु ।**
[५६१] ३, २९, ४; (१०५) १, ४५, ६ **अग्ने हव्याय वोळ्हवे ।**
(८६२) ५, १४, ३ **अग्निं हव्याय— ।**
[५७३] ३, २९, १६ (विश्वामित्रो गाथिनः । अग्निः)
प्रजानन्विद्वाँ उप याहि सोमम् ।
३, ३५, ४ (विश्वामित्रो गाथिनः । इन्द्रः)

ऋग्वेदस्य चतुर्थं मण्डलम् ।

[२४५०] ४, १, ३, (वामदेवो गौतमः । अग्निः, **अग्नी वरुणौ**)
अग्ने मृळीकं **वरुणे** सचा विदो **मरुत्सु विश्वभानुषु ।**
८, २७, ३ (मनुर्वैवस्वतः । विश्वेदेवाः)
प्र स न एत्वध्वरो**ऽग्ना** देवेषु पूर्व्यः ।
आदित्येषु प्र **वरुणे** धृतव्रते **मरुत्सु विश्वभानुषु ।**
[६३७] ४, १, ११ **महो बुध्ने रजसो अस्य योनौ ।**
४, १७, १४ **त्वचो बुध्ने—**
[६३९] ४, १, १३ **अश्मव्रजाः सुदुघा वव्रे अन्तः ।**
५, ३१, ३ **प्राचोदयत्सुदुघा— ।**
[६४१,] ४, १, १५ (वामदेवो गौतमः । अग्निः)
दृळ्हं नरो **वचसा** दैव्येन **व्रजं गोमन्तमुशिजो वि वव्रुः ।**
४, १६, ६ (वामदेवो गौतमः । इन्द्रः)
वचोभिर्व्रजं— ।

(१५९९) १०; ४५, ११ (वत्सप्रिर्भालन्दनः । अग्निः)
व्रजं — ।
[६४३] ४, १, १७ (वामदेवो गौतमः । अग्निः)
ऋजु मर्तेषु वृजिना च पश्यन् ।
६, ५१, २ (ऋजिश्वा भारद्वाजः । विश्वेदेवाः)
७, ६०, २ (वसिष्ठो मैत्रावरुणिः । मित्रावरुणौ)
[६४६] ४, १, २० (वामदेवो गौतमः । अग्निः)
सुमृळीको भवतु जातवेदाः ।
६, ४७, १२ (गर्गो भारद्वाजः । इन्द्रः)
१०, १३१, ६ (सुकीर्तिः काक्षीवतः । इन्द्रः)
… विश्ववेदाः ।
[६४७] ४, २, १: (२३४) १, ७७, १
यो मर्त्येष्वमृत ऋतावा ।
[६४८] ४, २, २ **इह त्वं सूनो सहसो नो अद्य ।**

(११७) १, ५८, ८ अच्छिद्रा सूनो।
६, ५०, ९ उत त्वं सूनो—।
[६६४] ४, २, १८ आ यूथेव क्षुमति पश्वो अख्य·
द्देवानां यज्जनिमान्त्युग्र।
७, ६०, ३ सं यो यूथेव जनिमानि चष्टे।
८, २५, ७ अधि या बृहतो दिवो ३ भि यूथेव पश्यतः।
[६६६] ४, २, २०; (२१४) १, ७३, १० एता ते अग्न
उचथानि वेधो।
[६६६] ४, २, २० उच्छोचस्व कृणुहि वस्यसो नः।
८, ४८, ६ प्र चक्षय कृणुहि— ।
[६६७] ४, ३, २; १, १२४. ७; १०, ७१, ४; (१६६३)
१०, ९१, १३ जायेव पत्य उशती सुवासाः।
[६७३] ४, ३, ८ साधा दिवो जातवेदश्चिकित्वान्
(६०१) ३, १७, २ यथा दिवो—।
[६७५] ४, ३, १० (वामदेवो गौतमः। अग्निः)
वृषा शुक्रं दुदुहे पृश्निरूधः।
६, ६६, १ (भरद्वाजो बार्हस्पत्यः। मरुतः)
सकृच्छुक्रं दुदुहे पृश्निरूधः।
[६७६] ४, ३, ११ (वामदेवो गौतमः। अग्निः)
आविः स्वरभवज्जाते अग्नौ।
(२३९८) १०, ८८, २ मूर्धन्वानाङ्गिरसो वामदेव्यो वा।
सूर्य-वैश्वानरौ)
[६८३] ४, ६, २ (वामदेवो गौतमः। अग्निः)
ऊर्ध्वं भानुं सवितेवाश्रेन्।
(७४१) ४ १३, २ (वामदेवो गौतमः। अग्निः
[लिंगोक्तदेवता इति एके])
—सविता देवो अश्रेद्।
(७४६) ४, १४, २ (वामदेवो गौतमः। अग्निः
[लिङ्गोक्तदेवता इति एके])
ऊर्ध्वं केतुं सविता देवो अश्रेज्।
७, ७२, ४, (वसिष्ठो मैत्रावरुणिः। अश्विनौ)
—सविता देवो अश्रेद्।
[६८४] ४, ६. ३ यता सुजूर्णी रातिनी घृताची।
६, ६३, ४ प्र रातिरेति जूर्णिनी घृताची।
[६८४] ४, ६, ३; (६११) ३, १९, २
प्रदक्षिणिद्देवतातिमुराणः।
[६८५] ४, ६, ४ (वामदेवो गौतमः। अग्निः)
स्तीर्णे बर्हिषि समिधाने अग्ना।
६, ५२, १७ (ऋजिश्वा भरद्वाजः। विश्वेदेवाः)
—अग्नौ।

[६८६] ४, ६, ५ (वामदेवो गौतमः। अग्निः)
अग्निर्मन्द्रो मधुवचा ऋतावा।
(११४५) ७, ७, ४ (वसिष्ठो मैत्रावरुणिः। अग्निः)
[६९२] ४, ६, ११ (वामदेवो गौतमः। अग्निः)
होतारमग्निं मनुषो नि षेदुर्नमस्यन्त
उशिजः शंसमायोः।
(७८१) ५, ३, ४ (वसुश्रुत आत्रेयः। अग्निः)
—नि षेदुर्दशस्यन्त उशिजः—।
[६९३] ४, ७, १ (वामदेवो गौतमः। अग्निः)
होता यजिष्ठो अध्वरेष्वीड्यः।
(१३९१) ८, ६०, ३ (भर्गः प्रगाथः। अग्निः)
मन्द्रो —ड्यो।
[६९६] ४, ७, ४; १, ८६, ५; (९०३) ५, २३, १
विश्वा यश्चर्षणीरभि।
[७००] ४, ७, ८ विदुष्टरो दिव आरोधनानि।
(७०७) ४, ८, ४ विद्वाँ आरोधनं दिवः।
[७०१] ४, ७, ९ कृष्णं त एम रुशतः पुरो भाः।
(११३) १, ५८, ४— रुशदूर्मे अजर।
[७०२] ४, ७, १० यदस्य वातो अनुवाति शोचिः।
(३५१) १, १४८, ४; (११२५) ७, ३, २
आदस्य वातो अनु वाति शोचिः।
(१६९३) १०, १४२, ४ यदा ते वातो अनुवाति
शोचिः।
[७०४] ४, ८, १; (१४७९) ८, १०२, १७ हव्यवाह-
ममर्त्यम्। ३, १०, ९ —मर्त्यं सहोवृधम्।
[७०५] ४, ८, २; (२) १, १, २ स देवाँ एह वक्षति।
[७०७] ४, ८, ४ विद्वाँ आरोधनं दिवः।
(७००) ४, ७, ८ विदुष्टरो दिवं आरोधनानि।
[७०९] ४, ८, ६, (वामदेवो गौतमः। अग्निः)
ससवांसो वि शृण्विरे।
८, ५४, ६ (मातरिश्वा काण्वः। इन्द्रः)
[७१२] ४, ९, १ अग्ने मृळ महाँ असि।
(७९) १, ३६, १२ स नो मृळ......।
[७१६] ४, ९, ५ (वामदेवो गौतमः। अग्निः)
वेषि ह्यध्वरीयताम्।
हव्या......।
(९६१) ६, २, १० (भारद्वाजो बार्हस्पत्यः। अग्निः)
वेषि—।
...... हव्यम्—।
[७२४] ४, १०, ५ श्रिये रुक्मो न रोचत उपाके।

(११२९) ७. ३, ६ वि यद्रुक्मो न रोचस उपाके।
[७३२] ४, ११, ५ (वामदेवो गौतमः । अग्निः)
त्वामग्ने ...।
... ... दमूनसं गृहपतिममूरम्।
(८२१) ५, ८, १ (इष आत्रेयः । अग्निः)
त्वामग्ने— ।
...... वरेण्यम्— ।
[७३६] ४, १२,३ अग्निर्वाजस्य परमस्य रायः।
७, ६०, ११ वाजस्य सातौ ...... ।
[७३६] ४, १२, ३ (वामदेवो गौतमः । अग्निः)
दधाति रत्नं विधते यविष्ठो।
(१२०३) ७, १६, १२ (वसिष्ठो मैत्रावरुणिः । अग्निः)
—विधते सुवीर्यम्।
[७३९] ४, १२, ६ (वामदेवो गौतमः । अग्निः)
१०,१२६,८ (कुल्मलबर्हिषः शैलूषिः अंहोमुग्वा वामदेव्यः।
विश्वेदेवाः)
यथा ह त्यद्वसवो गौर्यं चित्पदि षितामुमुञ्चता यजत्राः।
एवो ष्व १ स्मन्मुञ्चता व्यंहः प्र तार्यग्ने प्रतरं न आयुः।
[७४०] ४, १३, १ यातमश्विना सुकृतो दुरोणम्।
१, ११७, २ (अश्विनौ)
[७४१] ४, १३, २; ७, ७२, ४ उर्ध्वं भानुं सविता देवो अश्रेत्। (६८३) ४, ६, २
—सवितेवाश्रेत्। (७४६) ४, १४ २ ऊर्ध्वं केतुं— ।
[७४४] ४, १३, ५=४, १४, ५ (वामदेवो गौतमः । अग्निः
(लिङ्गोक्तदेवता इति एके)
अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न।
कया याति स्वधया को ददर्श दिवः स्कम्भः समृतः पाति नाकम्।
[७४६] ४, १४, २ ऊर्ध्वं केतुं सविता देवो अश्रेत्।
(७४१) ४, १३, २

[७४६] ४, १४, २ ज्योतिर्विश्वस्मै भुवनाय कृण्वन्।
१, ९२, ४ — कृण्वती।
[७४६] ४, १४, २; १, ११५, १ आप्रा द्यावापृथिवी अन्तरिक्षं।
[७४७] ४, १४, ३; उषा ईयते सुयुजा रथेन।
१, ११३, १४ ओषा याति— ।
[७४८] ४, १४, ४ (वामदेवो गौतमः । अग्निः)
रथा अश्वास उषसो व्युष्टौ।
४, ४५, २ (वामदेवो गौतमः । अश्विनौ)
—उषसो व्युष्टिषु ।
[७४८] ४, १४, ४ अस्मिन्यज्ञे वृषणा मादयेथाम्।
१, १८४, २ अस्मे उ षु वृषणा मादयेथाम्।
[७४४] ४, १४, ५; ४, १३, ५

[७५१] ४, १५, ३ (वामदेवो गौतमः । अग्निः)
दधद्रत्नानि दाशुषे।
९, ३, ६ (शुनःशेप आजीगर्तिः स देवरातः कृत्रिमो वैश्वामित्रः। पवमानः सोमः)
[७५४] ४, १५, ६ (वामदेवो गौतमः । अग्निः)
तमर्वन्तं न सानसिम्।
(१४७४)८,१०२,१२(प्रयोगो भार्गवः,पावकोऽग्निर्बार्हस्पत्यो वा गृहपति-यविष्ठौ सहसः पुत्रौऽन्यतरो वा । अग्निः)
४, १५, ७, ९ (मं.७, देवता-सोमकः साहदेव्यः;
कुमारः साहदेव्यः। मं. ९, अश्विनौ)
४,१५,८ कुमारात्साहदेव्यात्।
[१८९७] ४, ५८, ३ (वामदेवो गौतमः। अग्निः सूर्यो वा आपो वा गावो वा घृतस्तुतिर्वा)
महो देवो मर्त्यॉं आ विवेश
८, ४८, १२ अमर्त्यो— ।
[१९०४] ४, ५८, १० अभ्यर्षत सुष्टुतिं गव्यमाजिम्।
९, ६२, ३ (पवमानः सोमः)।

ऋग्वेदस्य पञ्चमं मण्डलम्।

[७५९] ५, १, ५ (बुधगविष्ठिरावात्रेयौ । अग्निः)
दमेदमे सप्त रत्ना दधानो।
६, ७४, १ (भरद्वाजो बार्हस्पत्यः। सोमारुद्रौ)
—दधाना।

[७५९, ७६०] ५, १, ५-६ अग्निर्होता नि षसादा (६ न्यसीदत्) यजीयान्।
(९४०) ६, १, २ अधा होता न्यसीदो यजीयान्।
(९४४) ६, १, ६ होता मन्द्रो नि षसादा यजीयान्।

१०, ५२, २ अहं होता न्यसीदं यजीयान्।
[७६१] ५, १, ७ अग्निं होतारमीळते नमोभिः।
(२९०) १, १२८, ८ अग्निं होतारमीळते वसुधितिं। (१०१९) ६, १४, २ अग्निं होतारमीळते।
[७६२] ५, १, ८ सहस्रशृङ्गो वृषभस्तदोजाः।
७, ५५, ७ — वृषभः।
[७६५] ५, १, ११ एह देवान्हविरद्याय वक्षि।
(७९३) ५, ४, ४ आ च देवान्हवि ...।
[७७४] ५, २, ८ (कुमार आत्रेयः वृशो वा जानः उभौ वा, २, ९ वृशो जानः। अग्निः)
प्र मे देवानां व्रतपा उवाच।
इन्द्रो विद्वाँ अनु हि त्वा चचक्ष
तेनाहमग्ने अनुशिष्ट आगाम्।
१०, ३२, ६ (कवष ऐलूषः। इन्द्रः)
[७७७] ५, २, ११; ५,२९, १५ रथं न धीरः स्वपा अतक्षम्।
१, १३०, ६ — स्वपा अतक्षिपुः।
[७७९] ५, ३, १ त्वं मित्रो भवसि यत्समिद्धः।
(४७३) ३, ५, ४ मित्रो अग्निर्भवति यत्समिद्धो।
[७८१] ५, ३, ४, (६९२) ४, ६, ११ होतारमग्निं मनुषो नि षेदुर्दशस्यन्त (४, ६, ११ नमस्यन्त) उशिजः शंसमायोः।
[७८५] ५, ३, ८ (वसुश्रुत आत्रेयः। अग्निः)
त्वामस्या व्युषि देव पूर्वे दूतं कृण्वाना अयजन्त हव्यैः।
(१६८१) १०, १२२, ७ (चित्रमहा वासिष्ठः। अग्निः)
त्वामिदस्या उषसो व्युष्टिषु दूतं कृण्वाना अजयन्त मानुषाः।
[७९१] ५, ४, २ हव्यवाळग्निरजरः पिता नः।
(१७२८) ३, २, २ हव्यवाळग्निरजरश्चनोहितः।
[७९१] ५, ४, २; ३, ५४, २२; ६, १९, ३
असमृष्टस्कं मिमीहि श्रवांसि।
[७९२] ५, ४, ३ विशां कविं विश्पतिं मानुषीणां।
(१७३६) ३, २, १०— मानुषीरिषः।
(९४६) ६, १, ८ — शश्वतीनां।
[७९३] ५, ४, ४ यतमानो रश्मिभिः सूर्यस्य।
१, १२३, १२ यतमाना—।
[७९३] ५, ४, ४ आ च देवान्हविरद्याय वक्षि।
(७६५) ५, १, ११ एह देवान्ह—।

[७९६] ५, ४, ७ (वसुश्रुत आत्रेयः। अग्निः)
वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे।
(११७५) ७, १४, २ (वसिष्ठो मैत्रावरुणिः। अग्निः)
वयं ते अग्ने समिधा विधेम।
वयं देव हविषा भद्रशोचे।
[७९७] ५, ४, ८ (वसुश्रुत आत्रेयः। अग्निः)
अस्माकमग्ने अध्वरं जुषस्व।
६, ५२, १२ (ऋजिश्वा भारद्वाजः। विश्वेदेवाः)
इमं नो अग्ने अध्वरं।
७, ४२, ५ (वसिष्ठो मैत्रावरुणिः। विश्वेदेवाः)
इमं नो अग्ने —।
[७९८] ५, ४, ९ अस्माकं बोध्यविता तनूनाम्।;
७, ३२, ११ (इन्द्रः)
[८०१-१०] ५, ६, १ - १०; ९, २०, ४
इषं स्तोतृभ्य आ भर।
८, ७७, ८ तेन स्तोतृभ्य आ भर।
८, ९३, १९ कया स्तोतृभ्य—।
[८०५] ५, ६, ५ (वसुश्रुत आत्रेयः। अग्निः)
आ ते अग्न ऋचा हविः।
(१०८८) ६,१६,४७ (भरद्वाजो बार्हस्पत्यः। अग्निः)
— हविर्।
[८०६] ५,६,६; १,८१,९ विश्वं पुष्यन्ति वार्यम्।
१०,१३३, २ विश्वं पुष्यसि—।
[८१०] ५, ६१० (वसुश्रुत आत्रेयः। अग्निः)
दधदस्मे सुवीर्यमुत त्यदाश्वश्व्यम्।
८,६,२४ (वत्सः काण्वः। इन्द्रः)
उत त्यदाश्वश्व्यम्।
८,३१,१८ (मनुर्वैवस्वतः। दम्पत्याशिषः)
असदत्र सुवीर्यमुत त्यदाश्वश्व्यम्।
[८११] ५,७,१ ऊर्जो नप्त्रे सहस्वते।
(१४६९) ८, १०२, ७ अच्छा नप्त्रे—।
[८२१] ५,८,१ दमूनसं गृहपतिं वरेण्यम्।
(७३१) ४, ११, ५— गृहपतिममूरम्।
[८३०] ५,९,३ (गय आत्रेयः। अग्निः)
... यं शिशुं यथा ... जनिष्टारणी।
विशामग्निं स्वध्वरम्।
(१०८१) ६, १६, ४० (भरद्वाजो बार्हस्पत्यः। अग्निः)
शिशुं जातं न बिभ्रति।
विशामग्निं स्वध्वरं।

[८३३] ५,९,४ (गय आत्रेयः । अग्निः)
वनाग्ने पशुर्न यवसे ।
(९६०) ६, २, ९ (भरद्वाजो बार्हस्पत्यः । अग्निः)
अग्ने पशुर्न यवसे ।
... वना वृश्चन्ति शिक्वसः ।
[८३४] ५,९,७ (गय आत्रेयः । अग्निः)
तं नो अग्ने अभी नरो रयिं सहस्व आ भर ।
(९०४) ५,२३,१ (द्युम्नो विश्वचर्षणिरात्रेयः । अग्निः)
तमग्ने पृतनाषहं रयिं सहस्व आ भर ।
[८३४] ५,९,७; (८४१)५,१०,७; (८७५) ५,१६,५;
(८८०) ५, १७, ५, उतैधि पृत्सु नो वृधे ।
६,४६,३ भवा समत्सु ... ।
[८३५] ५,१०,१ प्र नो राया परीणसा । १,१२९,९
[८३६] ५, १०, २ क्रत्वा दक्षस्य मंहना ।
(८८२) ५, १८, २ स्वस्य दक्षस्य मंहना ।
[८४०] ५, १०, ६ अस्माकासश्च सूरयः ।
(१८८९) १, ९७, ३ प्रास्माकासश्च सूरयः ।
[८४०] ५,१०,६; ४,३७,७ विश्वा आशास्तरीषणि ।
[८४१] ५, १०, ७ स्तुतः स्तवान आ भर ।
(२०) १,१२,११ स नः स्तवान आ भर ।
[८४३] ५,११,२ (सुतंभर आत्रेयः । अग्निः)
यज्ञस्य केतुं प्रथमं पुरोहितमग्निं ।
(१६७८) १०,१२२,४ (चित्रमहा वासिष्ठः । अग्निः)
—पुरोहितं ।
शृण्वन्तमग्निं घृतपृष्ठमुक्षणं ।
[८४३] ५,११,२ इन्द्रेण देवैः सरथं स बर्हिषि ।
(१९६३) ३,४,११— सरथं तुरेभिः ।
१०,१५,१०— सरथं दधानाः ।
[८४६] ५, ११, ५ आ पृणन्ति शवसा वर्धयन्ति च ।
१०,१२०,९ हिन्वन्ति च शवसा ।
[८४९] ५,१२,२ (८५३) ५,१२,६ ऋतं स पात्यरुषस्य ।
(८४९) ५, १२, २ सपाम्यरुषस्य वृष्णः ।
[८५५] ५, १३, २ सिध्रमद्य दिविस्पृशः ।
(१९२५) १, १४२, ८; २, ४१, २० दिविस्पृशम् ।
[८५८] ५, १३, ५ (सुतंभर आत्रेयः । अग्निः)
त्वामग्ने वाजसातमं ।
स नो रास्व सुवीर्यम् ।
८, ९८, १२ (नृमेध आङ्गिरसः । इन्द्रः)
त्वां शुष्मिन्पुरुहूत वाजयन्तं ।
स नो रास्व सुवीर्यम् ।

...)
तम्...... ।
यजिष्ठं मानुषे जने ।
(१८६१) १०, ११८. ९ (उरुक्षय आमहीयवः ।
रक्षोहाऽग्निः) तं ...... ।
[८६२] ५, १४, ३ (सुतंभर आत्रेयः । अग्निः)
तं हि शश्वन्त ईळते ।
७, ९४, ५ (वसिष्ठो मैत्रावरुणिः । इन्द्राग्नी)
ता हि शश्वन्त इळते ।
[८६२] ५, १४, ३; (५६१) ३. २९, ४
[८६५] ५, १४, ६ स्तोमेभिर्विश्वचर्षणिम् ।
१, ९, ३ (इन्द्रः) स्तोमेभिर्विश्वचर्षणे ।
[८६९] ५, १५, ४ (धरुण आङ्गिरसः । अग्निः)
दधानः परि त्मना विषुरूपो जिगासि ।
७, ८४, १ (वसिष्ठो मैत्रावरुणिः । इन्द्रावरुणौ)
दधाना परि त्मना विषुरूपा जिगाति ।
[८७१] ५, १६, १ मर्तासो दधिरे पुरः ।
१, १३१, १; ८, १२, २२ देवासो ... ।
८, १२, २५ देवास्त्वा ... ।
[८७७] ५, १७, २ (पुरुरात्रेयः । अग्निः)
अस्य हि स्वयशस्तर ।
५, ८२, २ (श्यावाश्व आत्रेयः । सविता)
— स्वयशस्तरं ।
[८७७] ५, १७, २ मन्द्रं परो मनीषया ।
(१४२६) ८, ७२, ३ रुद्रं ... ।
[८८२] ५,१८,२ स्वस्य दक्षस्य मंहना ।
(८३६) ५, १०, २ क्रत्वा दक्षस्य— ।
[८९३] ५, २०, ३ (प्रयस्वन्त आत्रेयाः । अग्निः)
होतारं त्वा वृणीमहे ।
प्रयस्वन्तो हवामहे ।
(९१३) ५, २६, ४ (वसूयव आत्रेयाः । अग्निः)
होतारं त्वा वृणीमहे ।
(१३८९) ८, ६०, १ (भर्गः प्रागाथः । अग्निः)
होतारं— ।
(१५८१) १०, २१, १ (विमद ऐन्द्रः प्राजापत्यो वा,
वसुकृद्वा वासुक्रः । अग्निः)
होतारं— ।
७, ९४, ६ (वसिष्ठो मैत्रावरुणिः । इन्द्राग्नी)
प्रयस्वन्तो— ।

८,६५,६ (प्रगाथः काण्वः । इन्द्रः)
प्रयस्वन्तो— ।
[८९७] ५,२१,३ (सस आत्रेयः । अग्निः)
त्वां विश्वे सजोषसो देवासो दूतमक्रत ।
(९०५) ५,२३,३ (द्युम्नो विश्वचर्षणिरात्रेयः । अग्निः)
विश्वे हि त्वा सजोषसो ।
(१२८७) ८,२३,१८ (विश्वमना वैयश्वः । अग्निः)
विश्वे हि त्वा सजोषसो— ।
[८९७] ५,२१,३; १।१५।७;
(१०४८) ६,१६,७ **यज्ञेषु देवमीळते ।**
[८९८] ५,२१,४ **देवं वो देवयज्यया ।**
(१४२०) ८,७१,१२ **अग्निं वो— ।**
[८९८] ५, २१, ४ **ऋतस्य योनिमासदः ।** ३,६२,१३
९,८,३; ९,६४,२२ **ऋतस्य योनिमासदम् ।**
[८९९] ५.२२,१ (विश्वसामा आत्रेयः । अग्निः)
होता मन्द्रतमो विशि ।
(१४१९) ८, ७१, ११ (सुदीति- पुरुमीळ्हावाङ्गिरसौ तयोर्वान्यतरः । अग्निः)
[९००] ५,२२,२ (विश्वसामा आत्रेयः । अग्निः)
न्यग्निं जातवेदसं दधाता देवमृत्विजम् ।
प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः ।
(९२६) ५,२६,७ (९२७) ८ (वसूयव आत्रेयाः । अग्निः)
न्यग्निं जातवेदसं ।
दधाता देवमृत्विजम् ।
प्र यज्ञ— ।
[९०१] ५,२२,३; (५००) ३,९,१;
(१२१९) ८,११,६ **देवं मर्तास ऊतये ।**
(३३०) १,१४४,५ — **ऊतये हवामहे ।**
[९०२] ५,२२,४ **स्तोमैर्वर्धन्त्यत्रयो गीर्भिः शुम्भन्त्यत्रयः**
५, ३९, ५ **गिरो वर्धन्त्यत्रयो गिरः शुम्भन्त्यत्रयः ।**
[९०४] ५, २३, २; (८३४) ५, ९, ७
[९०५] ५, २३, ३; (८९७) ५, २१, ३
[९०५] ५, २३, ३; ५, ३५, ५; ८, ५, १७, ६, ३७
जनासो वृक्तबर्हिषः ।
३, ५९, ९ **जनाय वृक्तबर्हिषे ।**
[९०६] ५, २३, ४ (द्युम्नो विश्वचर्षणिरात्रेयः । अग्निः)
रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि ।
(१०९६) ६, ४८, ७ (शंयुर्बार्हस्पत्यः, तृणपाणिः । अग्निः)

[९१४] ५, २५, ४ (वसूयव आत्रेयाः । अग्निः)
अग्निं धीभिः सपर्यत ।
(१५५९) ८, १०३, ३ (सोभरिः काण्वः । अग्निः)
[९१५] ५, २५, ५; (५२३) ३, ११, ६
[९१६] ५, २५, ६; १, ११, २ **जेतारमपराजितम् ।**
[९१८] ५, २५, ८ **ग्रावेवोच्यते बृहत् ।**
१०, ६४, १५; १००।८ **ग्रावा यत्र मधुषुदुच्यते बृहत् ।**
[९१९] ५, २५, ९ (वसूयव आत्रेयाः । अग्निः)
स नो विश्वा अति द्विषः ।
६, ६१, ९ (भरद्वाजो बार्हस्पत्यः । सरस्वती)
सा नो— ।
[९२०] ५, २६, १ (वसूयव आत्रेयाः । अग्निः)
मन्द्रया देव जिह्वया ।
आ देवान्वक्षि यक्षि च ।
(१०४३) ६, १६, २ (भरद्वाजो बार्हस्पत्यः । अग्निः)
स नो **मन्द्राभिरध्वरे जिह्वाभिर्यजा** महः ।
आ देवान्वक्षि यक्षि च ।
(१४७८) ८, १०२, १६ (प्रयोगो भार्गवः , पावकोऽग्निर्बार्हस्पत्यो वा, गृहपति—यविष्ठौ सहसः पुत्रौ ऽन्यतरो वा । अग्निः) **आ देवान्वक्षि यक्षि च ।**
[९२१] ५, २६, २ (वसूयव आत्रेयाः । अग्निः)
तं त्वा घृतस्नवीमहे ।
देवाँ आ वीतये वह ।
(११९५) ७, १६, ४ (वसिष्ठो मैत्रावरुणिः । अग्निः)
तं त्वा दूतं कृणमहे यशस्तमं देवाँ आ वीतये वह । ...... तद्वस्त्वेमहे ।
[९२३] ५, २६, ४ (वसूयव आत्रेयाः । अग्निः)
अग्ने विश्वेभिरा गहि देवेभिर्हव्यदातये ।
५, ५१, १ (स्वस्त्यात्रेयः । विश्वेदेवाः)
अग्ने सुतस्य पीतये **विश्वैरूमेभिरा गहि ।**
देवेभिर्हव्यदातये ।
[९२३] ५, २६, ४; (८९३) ५, २०, ३;
(१३८९) ८, ६०, १
(१५८१) १०, ९१, १ **होतारं त्वा वृणीमहे ।**
[९२४] ५, २६, ५ (वसूयव आत्रेयाः । अग्निः)
यजमानाय सुन्वते ।
८, १४, ३ (गोषूक्त्यश्वसूक्तिनौ काण्वायनौ । इन्द्रः)
—सुन्वते ।

८, १०, १७ (इरिम्बिठिः काण्वः । इन्द्रः)
१०, १७५, ४ (ऊर्ध्वग्रावा आर्बुदिः सर्पः । ग्रावाणः)
[९२४] ५, २६, ५; (१३) १, १२, ४; (१३५६)
८, ४४, १४ देवैरा सत्सि बर्हिषि ।
(९२६) ५, २६, ७ (९२७) ८; (९००) ५, २२, २
५, २६, ९; १, ३९, ५ देवासः सर्वया विशा ।

[९२८] ५, २७, १ त्रैवृष्णो अग्ने दशभिः सहस्रैः ।
८, १, ३३ आसंगो अग्ने — ।
[९३८] ५, २८, ६ (विश्ववारात्रेयी । अग्निः)
अग्निं प्रयत्यध्वरे ।
(१५८६) १०, ११, ६ अग्ने प्रयत्यध्वरे ।
(१४१०) ८, ७१, १२ (सुदीति-पुरुमीळ्हावाङ्गिरसौ, तयोर्वान्यतरः । अग्निः)

ऋग्वेदस्य षष्ठं मण्डलम् ।

[९४०] ६, १, २ (७५९) ५, १, ५
[९४२] ६, १, ४: (९९७) १, ७२, ३ नामानि चिद्दधिरे यज्ञियानि ।
[९४४] ६, १, ६ (९४०) ६, १, २
[९४६] ६, १; ८ (७९२) ५, ४, ३
[९४७] ६, १, ९ (भरद्वाजो बार्हस्पत्यः । अग्निः)
यस्त आनट् समिधा हव्यदातिम् ।
(१६७७) १०, १२२, ३ (चित्रमहा वासिष्ठः । अग्निः)
—समिधा तं जुषस्व ।
[९४८] ६, १, १० नमोभिरग्ने समिधोत हव्यैः ।
७, ६३, ५ नमोभिर्मित्रावरुणोत हव्यैः ।
[९४८] ६, १, १० (भरद्वाजो बार्हस्पत्यः । अग्निः)
वेदी सूनो सहसो गीर्भिरुक्थैर् ।
(१०१५) ६, १३, ४ (भरद्वाजो बार्हस्पत्यः । अग्निः)
यस्ते सूनो सहसो गीर्भिरुक्थैर्यज्ञैर्मर्तो निशितिं वेद्यानट् ।
[९४९] ६, १, ११ (भरद्वाजो बार्हस्पत्यः । अग्निः)
आ यस्ततन्थ रोदसी वि भासा ।
(९७६) ६, ४, ६ (भरद्वाजो बार्हस्पत्यः । अग्निः)
अग्ने ततन्थ— ।
[९५०] ६, १, १२ (भरद्वाजो बार्हस्पत्यः । अग्निः)
पूर्वीरिषो बृहतीरारे अघा
अस्मे भद्रा सौश्रवसानि सन्तु ।
९, ८७, ९ (उशना काव्यः । पवमानः सोमः)
पूर्वीरिषो बृहतीर्जीरदानो ।
६, ७४, २ (भरद्वाजो बार्हस्पत्यः । सोमारुद्रौ)
अस्मे भद्रा— ।
[९६०] ६, २, ९; (८३१) ५, ९, ४ अग्ने पशुर्न यवसे ।
[९६१] ६, २, १०; (७१६) ४, ९, ५ वेषि ह्यध्वरीयताम् ।

[९६२] ६, २, ११= ६, १४, ६, (भरद्वाजो बार्हस्पत्यः । अग्निः)
अच्छा नो मित्रमहो देव देवानग्ने वोचः
सुमतिं रोदस्योः । वीहि स्वस्ति सुक्षितिं
दिवो नॄन्द्विषो अंहांसि दुरिता तरेम
ता तरेम तवावसा तरेम ।
(१०३७) ६, १५, १५ (भरद्वाजो बार्हस्पत्यो, वीतहव्य आङ्गिरसो वा । अग्निः)
दुरिता तरेम ता तरेम तवावसा तरेम ।
[९७३] ६, ४, ३; २, २०, ५
अश्नस्य चिच्छिश्नथत्पूर्व्याणि ।
[९७६] ६, ४, ६; (९४९) ६, १, ११
[९७८] ६, ४, ८; (९९९) १०, ७, (१०११) १२, ६; (१०१७) १३, ६; १७, १५; २४, १०,
मदेम शतहिमाः सुवीराः ।
[९७९] ६ ५, १ (भरद्वाजो बार्हस्पत्यः । अग्निः)
अद्रोघवाचं मतिभिर्यविष्ठम् ।
६, २२, २ (भरद्वाजो बार्हस्पत्यः । इन्द्रः)
— मतिभिः शविष्ठम् ।
[९८३] ६, ५, ५ यस्ते यज्ञेन समिधा य उक्थैः ।
४, ४, ७ यस्त्वा नित्येन हविषा य— ।
[९९२] ६, ६, ७ चन्द्रं रयिं पुरुवीरं बृहन्तं ।
४, ४४, ६ नू नो रयिं— ।
[१७७७] ६, ७, ५ महान्यग्ने नकिरा दधर्ष ।
५, ८५, ६, मही देवस्य नकिरा— ।
[१७७९] ६, ७, ७ वि यो रजांस्यमिमीत सुक्रतुर् ।
१, १६०, ४ वि यो ममे रजसी सुक्रतूयया ।
[१७७९] ६, ७, ७ वैश्वानरो वि दिवो रोचना कविः ।
९, ८५, ९ अरूरुचद्वि दिवो— ।

[९९३] ६, १०, १; (४८५) ३, ६, ६,
[९९९] ६, १०, ६ **अवीर्वाजस्य गध्यस्य सातौ।**
६, २६, २ **महो वाजस्य—।**
[१००४] ६, ११, ५ **वृञ्जे ह यन्नमसा बर्हिरग्नौ।**
७, २, ४ **प्र वृञ्जते नमसा—।**
[१००५] ६, ११, ६ **देवेभिरग्ने अग्निभिरिधानः।**
(१०११) ६, १२, ६ **विश्वेभिरग्ने —।**
[१००९] ६, १२, ४ (भरद्वाजो बार्हस्पत्यः। अग्निः)
अग्निः ष्टवे दम आ जातवेदाः।
(११७२) ७, १२, २ (वसिष्ठो मैत्रावरुणिः। अग्निः)
[१०११] ६, १२, ६; (१००५) ६, ११, ६
[१०१५] ६, १३, ४; (९४८) ६, १, १०
[१०१९] ६, १४, २ (७६१) ५, १, ७

[९६२] ६, १४, ६ =, ६, २, ११; (१०३७) ६, १५, १५
ता तरेम तवावसा तरेम।
[१०२५] ६, १५, ३ (भरद्वाजो बार्हस्पत्यः, वीतहव्य आङ्गिरसो वा। अग्निः)
अर्यः परस्यान्तरस्य तरुषः।
छर्दिर्यच्छ वीतहव्याय सप्रथो **भरद्वाजाय सप्रथः।**
(१६७०) १०, ११५, ५ (उपस्तुतो वार्ष्टिहव्यः। अग्निः) **अर्यः ... तरुषः।**
(१०७४) ६, १६, ३३ (भरद्वाजो बार्हस्पत्यः। अग्निः)
भरद्वाजाय सप्रथः शर्म यच्छ।
[१०२८] ६,१५,६,६ **देवो देवेषु वनते हि वार्यं**
(६ ... **नो दुवः**)।
[१०२९] ६,१५,७ (भरद्वाजो बार्हस्पत्यो, वीतहव्य आङ्गिरसो वा। अग्निः)
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम्।
(१३५१) ८,४४,१० (विरूप आङ्गिरसः। अग्निः)
विप्रं होतारमद्रुहं।
यज्ञानां केतुमीमहे।
[१०३४] ६,१५,१२ (भरद्वाजो बार्हस्पत्यो, वीतहव्य आङ्गिरसो वा। अग्निः)
(१०३४) ७,४,९ (वसिष्ठो मैत्रावरुणिः। अग्निः)
त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री।

[१०३७] ६,१५,१५ (भरद्वाजो बार्हस्पत्यः वीतहव्य आङ्गिरसो वा। अग्निः)
(१६१७) १०,५३,२ देवाः अग्निः सौचीकः। अग्निः)
— हि ख्यत्।

[१०४३] ६,१६,२ (९२०) ५,२६,१
[१०४६] ६, १६, ५ **दिवोदासाय सुन्वते।**
४, ३०, २० — **दाशुषे।**
६, ३१, ४ — **सुन्वते सुतक्रे।**
[१०४८] ६, १६, ७, **त्वामग्ने स्वाध्यो।**
(१२४०) ८, १९, १७; (१३३९) ४३, ३०
ते घेदग्ने स्वाध्यो।
[१०४८] ६, १६, ७; (८९७) ५, २१, ३
[१०५०] ६, १६, ९; १, १४, ११ **तं होता मनुर्हितः।**
[१०५०] ६, १६, ९ (भरद्वाजो बार्हस्पत्यः। अग्निः)
वह्निरासा विदुष्टरः।
(११००) ७, १६, ९ (वसिष्ठो मैत्रावरुणिः। अग्निः)
[१०५१] ६, १६, १० अग्न आ **याहि वीतये।**
५, ५१, ५ वायवा **याहि वीतये।**
[१०५६] ६, १६, १५ (११७) १, ७४, ३
[१०६१] ६, १६, २० **स हि विश्वाति पार्थिवा।**
६, ४५, २० **स हि विश्वानि पार्थिवाँ।**
[१०६३] ६, १६, २२; ५, ५२, ४ **स्तोमं यज्ञं च धृष्णुया।**
[१०६५] ६, १६, २४; १, १४, ३ **आदित्यान्मारुतं गणम्।**
[१०६९] ६, १६, २८, **अग्निस्तिग्मेन शोचिषा।**
(२१) १, १२, १२ **अग्ने शुक्रेण —।**
[१०७०] ६, १६, २९; (२३९) १, ७८, १
(१०७७) ६, १६, ३६;
(१३११) ८, ४३, २ **जातवेदो विचर्षणे।**
[१०७०] ६, १६, २९ (भरद्वाजो बार्हस्पत्यः। अग्निः)
जहि रक्षांसि सुक्रतो।
९, ६३, २८ (निध्रुविः काश्यपः। पवमानः सोमः)
[१०७१] ६, १६, ३० (भरद्वाजो बार्हस्पत्यः। अग्निः)
त्वं नः पाह्यंहसो जातवेदो अघायतः।
(११९१) ७, १५, १५ (वसिष्ठो मैत्रावरुणिः। अग्निः)
— हसो दोषावस्तरघायतः।
[१०७४] ६, १६, ३३; (१०२५) ६, १५, ३

[१०७६] ६, १६, ३५ (भरद्वाजो बार्हस्पत्यः । अग्निः)
सीदन्नृतस्य योनिमा ।
९, ३२, ४ (श्यावाश्व आत्रेयः । पवमानः सोमः)
९, ६४, ११ (कश्यपो मारीचः । पवमानः सोमः)
[१०७७] ६, १६, ३६; (१०७०) ६, १६, २९
[१०८१] ६, १६, ४०; (८३०) ५, ९, ३
[१०८५] ६, १६, ४४ **अभि प्रयांसि वीतये ।**
१, १३५, ४ ... ... **सुधितानि वीतये ।**
[१०८५] ६, १६, ४४; १, १४, ६ **आ देवान्त्सोमपीतये ।**
[१०८७] ६, १४, ४६ ; ४, ३, १ **होतारं सत्ययजं रोदस्योः ।**
[१०८७] ६, १६, ४६; (५८५) ३, १४, ५
[१०८८] ६, १६, ४७; (८०५) ५, ६, ५
[१०९०] ६, ४८, १ **प्रप्र वयममृतं जातवेदसं ।**
(१४४६) ८, ७४, ५ **अमृतं जातवेदसं ।**

[१०९२] ६, ४८, ३ (शंयुर्बार्हस्पत्यः, तृणपाणिः । अग्निः)
महा**न्विभास्यर्चिषा ।**
अजस्रेण शोचिषा शोशुचच्छुचे ।
(१७९७) ७, ५, ४ (वसिष्ठो मैत्रावरुणिः । वैश्वानरोऽग्निः)
त्वं **भासा** रोदसी आ ततन्था**जस्रेण शोचिषा शोशुचानः ।**
[१०९५] ६, ४८, ६ (शंयुर्बार्हस्पत्यः, तृणपाणिः । अग्निः)
तिरस्तमो ददृश ऊर्म्यास्वा ।
(११५६) ७, ९, २ (वसिष्ठो मैत्रावरुणिः । अग्निः)
—ददृशे राम्याणाम् ।
[१०९७] ६, ४८, ८ (शंयुर्बार्हस्पत्यः, तृणपाणिः । अग्निः)
शतं पूर्भिर्यविष्ठ पाह्यंहसः शतं हिमाः स्तोतृभ्यो ये च **ददति ।**
(११०१) ७, १६, १० वसिष्ठोमैत्रावरुणिः । अग्निः)
ये राधांसि **ददत्यश्व्या ।**
तां **अंहसः** पिपृहि पर्तृभिष्ट्वं **शतं पूर्भिर्यविष्ठय ।**

ऋग्वेदस्य सप्तमं मण्डलम् ।

[११११] ७, १, १३; (८०) १, ३६, १५
[१११०.] ७, १, २०=७, १, २५ (वसिष्ठो मैत्रावरुणिः । अग्निः)
नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।
रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः ।
[१११९] ७, १, २०, २५; (११३३) ३, १०; (११४८) ७, ७, ७; ७, ८, ७ (११६०) ९, ६; (११७०) ११, ५; (११७३) १२, ३; १३, ३; (११७६) १४, ३; १९, ११; २०, १०; २१, १०; २२, ९; २३, ६; २४, ६; २५, ६; २६, ५; २७, ५; २८, ५; २९, ५; ३०, ५; ३४, २५; ३५, १५; ३६, ९; ३७, ८; ३९, ७; ४०, ६; ४१, ७; ४२, ६; ४३, ५; ४५, ४; ४६, ४; ४७, ४; ४८, ४; ५१, ३; ५३, ३; ५४, ४; ५६, २५; ५७, ५; ५८, ६; ६०, १२; ६१, ७; ६२, ६; ६३, ६; ६४, ५; ६५, ५; ६७, १०; ६८, ९; ६९, ८; ७०, ७; ७१, ६; ७२, ५; ७३, ५; ७५, ८; ७६, ७; ७७, ६; ७८, ५; ७९, ५; ८०, ३; ८४, ५; ८५, ५; ८६, ८; ८७, ७; ८८, ७; ९०, ७; ९१, ७; ९२, ५; ९३, ८; ९५, ६; ९७, १०; ९८, ७; ९९, ७; १००, ७; १०१, ६; ९, ९०, ६; ९७, ३, ६; १०, ६५, १५; ६६, १५; १२२, ८, **यूयं पात स्वस्तिभिः सदा नः ।**

[११२५] ७, ३, २; १, १४८, ४ **आदस्य वातो अनु वाति शोचिः ।**
[११२९] ७, ३, ६; ४, १०, ५;
[११३३] ७, ३, १०; = ७, ४, १० (वसिष्ठो मैत्रावरुणिः । अग्निः)
एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम ।
विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः ।
७, ६०, ६ (वसिष्ठो मैत्रावरुणिः । मित्रावरुणौ)
अपि क्रतुं सुचेतसं वतन्तस् ।
[११३५] ७, ४, २ (वसिष्ठो मैत्रावरुणिः । अग्निः)
स गृत्सो अग्निस्तरुणश्चिदस्तु ।
सं यो वना युवते शुचिदन् ।
(१६६७) १०, ११५, २ (उपस्तुतो वार्ष्टिहव्यः । अग्निः)
अग्निर्ह नाम धायि दन्नपस्तमः **सं यो वना युवते भस्मना दता ।**

[११३७] ७, ४, ४ (वसिष्ठो मैत्रावरुणिः। अग्निः)
मर्तेष्वग्निरमृतो नि धायि।
नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै । त्वोतासो न्यर्वता २
इन्द्र त्वोतास आ वयं वज्रं घना ददीमहि । जयेम सं युधि स्पृधः ३
वयं शूरेभिरस्तृभि रिन्द्र त्वया युजा वयम् । सासह्याम पृतन्यतः ४
महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे । द्यौर्न प्रथिना शवः ५
समोहे वा य आशत नरस्तोकस्य सनितौ । विप्रासो वा धियायवः ६
यः कुक्षिः सोमपातमः समुद्र इव पिन्वते । उर्वीरापो न काकुदः ७
एवा ह्यस्य सूनृता विरप्शी गोमती मही । पक्वा शाखा न दाशुषे ८
एवा हि ते विभूतय ऊतय इन्द्र मावते । सद्यश्चित् सन्ति दाशुषे ९
एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या । इन्द्राय सोमपीतये १०

॥ ७ ॥ (ऋ० १।९।१-१०)

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाँ अभिष्टिरोजसा १
एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने । चक्रिं विश्वानि चक्रये २
मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे । सचैषु सवनेष्वा ३
असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत । अजोषा वृषभं पतिम् ४
सं चोदय चित्रमर्वाग् राध इन्द्र वरेण्यम् । असदित् ते विभु प्रभु ५
अस्मान्त्सु तत्र चोदये न्द्र राये रभस्वतः । तुविद्युम्न यशस्वतः ६
सं गोमदिन्द्र वाजव दस्मे पृथु श्रवो बृहत् । विश्वायुर्धेह्यक्षितम् ७
अस्मे धेहि श्रवो बृहद् द्युम्नं सहस्रसातमम् । इन्द्र ता रथिनीरिषः ८
वसोरिन्द्रं वसुपतिं गीर्भिर्गृणन्त ऋग्मियम् । होम गन्तारमूतये ९
सुतेसुते न्योकसे बृहद् बृहत एदरिः । इन्द्राय शूषमर्चति १०

॥ ८ ॥ (ऋ० १।१०।१-१२) अनुष्टुप् ।

गायन्ति त्वा गायत्रिणो ऽर्चन्त्यर्कमर्किणः । ब्रह्माणस्त्वा शतक्रत उद् वंशमिव येमिरे १
यत् सानोः सानुमारुहद् भूर्यस्पष्ट कर्त्वम् । तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति २
युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ३
एहि स्तोमाँ अभि स्वरा ऽभि गृणीह्या रुव । ब्रह्म च नो वसो सचे न्द्र यज्ञं च वर्धय ४

उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे । शक्रो यथा सुतेषु णो रारणत् सख्येषु च ५
तमित् सखित्व ईमहे तं राये तं सुवीर्ये । स शक्र उत नः शक — दिन्द्रो वसु दयमानः ६
सुविवृतं सुनिरज — मिन्द्र त्वादातमिद्यशः । गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ७
नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः । जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि ८ ६५
आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः। इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम् ९
विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम् । वृषन्तमस्य हूमह ऊतिं सहस्रसातमाम् १०
आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब । नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिम् ११
परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः । वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः १२ ६९

॥ ९ ॥ (ऋ० १।११।१-८)

(७०-७७) जेता माधुच्छन्दसः । अनुष्टुप् ।

इन्द्रं विश्वा अवीवृधन् त्समुद्रव्यचसं गिरः । रथीतमं रथीनां वाजानां सत्पतिं पतिम् १ ७०
सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते । त्वामभि प्र णोनुमो जेतारमपराजितम् २
पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः । यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघम् ३
पुरां भिन्दुर्युवा कवि — रमितौजा अजायत । इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ४
त्वं वलस्य गोमतो ऽपावरद्रिवो बिलम् । त्वां देवा अबिभ्युषस् तुज्यमानास आविषुः ५
तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन् । उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः ६ ७५
मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः । विदुष्टे तस्य मेधिरास् तेषां श्रवांस्युत्तिर ७
इन्द्रमीशानमोजसा — भि स्तोमा अनूषत । सहस्रं यस्य रातय उत वा सन्ति भूयसीः ८ ७७

॥ १० ॥ (१।१६।१-९)

(७८-२३९) मेधातिथिः काण्वः । गायत्री ।

आ त्वा वहन्तु हरयो वृषणं सोमपीतये । इन्द्र त्वा सूरचक्षसः १
इमा धाना घृतस्नुवो हरी इहोप वक्षतः । इन्द्रं सुखतमे रथे २
इन्द्रं प्रातर्हवामह इन्द्रं प्रयत्यध्वरे । इन्द्रं सोमस्य पीतये ३ ८०
उप नः सुतमा गहि हरिभिरिन्द्र केशिभिः । सुते हि त्वा हवामहे ४
सेमं नः स्तोममा ग — ह्युपेदं सवनं सुतम् । गौरो न तृषितः पिब ५
इमे सोमास इन्दवः सुतासो अधि बर्हिषि । ताँ इन्द्र सहसे पिब ६
अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शंतमः । अथा सोमं सुतं पिब ७

विश्वमित् सवनं सुत—मिन्द्रो मदाय गच्छति । वृत्रहा सोमपीतये ८
सेमं नः काममा पृण गोभिरश्वैः शतक्रतो । स्तवाम त्वा स्वाध्यः ९

॥ ११ ॥ (ऋ० ८।१।१-२९)

[प्रगाथो (घौरः) काण्वः; ३-२९ मेधातिथि-मेध्यातिथी काण्वौ ।] १-४ प्रगाथः=
(विषमा बृहती, समा सतोबृहती), ५-२९ बृहती ।

मा चिदन्यद् वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित् स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत १
अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहम् ।
विद्वेषणं संवननोभयंकरं मंहिष्ठमुभयाविनम् २
यच्चिद्धि त्वा जना इमे नाना हवन्त ऊतये ।
अस्माकं ब्रह्मेदमिन्द्र भूतु ते ऽहा विश्वा च वर्धनम् ३
वि तर्तूर्यन्ते मघवन् विपश्चितो ऽर्यो विपो जनानाम् ।
उप क्रमस्व पुरुरूपमा भर वाजं नेदिष्ठमूतये ४
महे चन त्वामद्रिवः परा शुल्काय देयाम् ।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ ५
वस्याँ इन्द्रासि मे पितु—रुत भ्रातुरभुञ्जतः ।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे ६
क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः ।
अलर्षि युध्म खजकृत् पुरंदर प्र गायत्रा अगासिषुः ७
प्रास्मै गायत्रमर्चत वावातुर्यः पुरंदरः ।
याभिः काण्वस्योप बर्हिरासदं यासद् वज्री भिनत् पुरः ८
ये ते सन्ति दशग्विनः शतिनो ये सहस्रिणः ।
अश्वासो ये ते वृषणो रघुद्रुव—स्तेभिर्नस्तूयमा गहि ९
आ त्व१द्य सबर्दुघां हुवे गायत्रवेपसम् ।
इन्द्रं धेनुं सुदुघामन्यामिष—मुरुधारामरंकृतम् १०
यत् तुदत् सूर एतशं वङ्कू वातस्य पर्णिना ।
वहत् कुत्समार्जुनेयं शतक्रतुः त्सरद् गन्धर्वमस्तृतम् ११

य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता संधिं मघवा पुरूवसु–रिष्कर्ता विह्रुतं पुनः १२
मा भूम निष्ट्या इवे–न्द्र त्वदरणा इव ।
वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि १३
अमन्महीदनाशवो ऽनुग्रासश्च वृत्रहन् ।
सकृत् सु ते महता शूर राधसा ऽनु स्तोमं मुदीमहि १४ १००

यदि स्तोमं मम श्रव–दस्माकमिन्द्रमिन्दवः ।
तिरः पवित्रं ससृवांस आशवो मन्दन्तु तुग्र्यावृधः १५
आ त्वद्य सधस्तुतिं वावातुः सख्युरा गहि ।
उपस्तुतिर्मघोनां प्र त्वाव–त्वधा ते वश्मि सुष्टुतिम् १६
सोता हि सोममद्रिभि–रेमेनमप्सु धावत ।
गव्या वस्त्रेव वासयन्त इन्नरो निर्धुक्षन् वक्षणाभ्यः १७
अध ज्मो अध वा दिवो बृहतो रोचनादधि ।
अया वर्धस्व तन्वा गिरा ममा ऽऽ जाता सुक्रतो पृण १८
इन्द्राय सु मदिन्तमं सोमं सोता वरेण्यम् ।
शक्र एणं पीपयद् विश्वया धिया हिन्वानं न वाजयुम् १९ १०५

मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा ।
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् २०
मदेनेषितं मद–मुग्रमुग्रेण शवसा ।
विश्वेषां तरुतारं मदच्युतं मदे हि ष्मा ददाति नः २१
शेवारे वार्या पुरु देवो मर्ताय दाशुषे ।
स सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः २२
एन्द्र याहि मत्स्व चित्रेण देव राधसा ।
सरो न प्रास्युदरं सपीतिभि–रा सोमेभिरुरु स्फिरम् २३
आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये २४ ११०

आ त्वा रथे हिरण्यये हरी मयूरशेप्या ।
शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये २५

पिबा त्व१स्य गिर्वणः सुतस्य पूर्वपा इव ।
परिष्कृतस्य रसिन इयमासुति-श्चारुर्मदाय पत्यते २६

य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः ।
गमत् स शिप्री न स योषदा गम-द्धवं न परि वर्जति २७

त्वं पुरं चरिष्ण्वं वधैः शुष्णस्य सं पिणक् ।
त्वं भा अनु चरो अध द्विता यदिन्द्र हव्यो भुवः २८

मम त्वा सूर उदिते मम मध्यन्दिने दिवः ।
मम प्रपित्वे अपिशर्वरे वस-वा स्तोमासो अवृत्सत २९ ११५

॥ १२ ॥ (ऋ० ८।२।१-४०)

[मेधातिथिः काण्वः, (आङ्गिरसः प्रियमेधश्च)] । गायत्री, २८ अनुष्टुप् ।

इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् । अनाभयिन् ररिमा ते १
नृभिर्धूतः सुतो अश्नै-रव्यो वारैः परिपूतः । अश्वो न निक्तो नदीषु २
तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः । इन्द्र त्वास्मिन्त्सधमादे ३
इन्द्र इत् सोमपा एक इन्द्रः सुतपा विश्वायुः । अन्तर्देवान् मर्त्याँश्च ४
न यं शुक्रो न दुराशी-र्न तृप्रा उरुव्यचसम् । अपस्पृण्वते सुहार्दम् ५ १२०
गोभिर्यदीमन्ये अस्मन् मृगं न व्रा मृगयन्ते । अभित्सरन्ति धेनुभिः ६
त्रय इन्द्रस्य सोमाः सुतासः सन्तु देवस्य । स्वे क्षये सुतपाव्नः ७
त्रयः कोशासः श्चोतन्ति तिस्रश्चम्व१ः सुपूर्णाः । समाने अधि भार्मन् ८
शुचिरसि पुरुनिःष्ठाः क्षीरैर्मध्यत आशीर्तः । दध्ना मन्दिष्ठः शूरस्य ९
इमे त इन्द्र सोमा-स्तीव्रा अस्मे सुतासः । शुक्रा आशिरं याचन्ते १० १२५
ताँ आशिरं पुरोळाश-मिन्द्रेमं सोमं श्रीणीहि । रेवन्तं हि त्वा शृणोमि ११
हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम् । ऊधर्न नग्ना जरन्ते १२
रेवाँ इद् रेवतः स्तोता स्यात् त्वावतो मघोनः । प्रेदु हरिवः श्रुतस्य १३
उक्थं चन शस्यमान-मगोररिरा चिकेत । न गायत्रं गीयमानं १४
मा न इन्द्र पीयत्नवे मा शर्धते परा दाः । शिक्षा शचीवः शचीभिः १५ १३०

वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः । कण्वा उक्थेभिर्जरन्ते १६
न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ । तवेदु स्तोमं चिकेत १७
इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति । यन्ति प्रमादमतन्द्राः १८
ओ षु प्र याहि वाजेभि—र्मा हृणीथा अभ्य१स्मान् । महाँ इव युवजानिः १९
मो ष्व१द्य दुर्हणावान् त्सायं करदारे अस्मत् । अश्रीर इव जामाता २० १३५
विद्मा ह्यस्य वीरस्य भूरिदावरीं सुमतिम् । त्रिषु जातस्य मनांसि २१
आ तू षिञ्च कण्वमन्तं न घा विद्म शवसानात् । यशस्तरं शतमूतेः २२
ज्येष्ठेन सोतरिन्द्राय सोमं वीराय शक्राय । भरा पिबन्नर्याय २३
यो वेदिष्ठो अव्यथि—ष्वश्वावन्तं जरितृभ्यः । वाजं स्तोतृभ्यो गोमन्तम् २४
पन्यंपन्यमित् सोतार आ धावत मद्याय । सोमं वीराय शूराय २५ १४०
पाता वृत्रहा सुत—मा घा गमन्नारे अस्मत् । नि यमते शतमूतिः २६
एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम् । गीर्भिः श्रुतं गिर्वणसम् २७
स्वादवः सोमा आ याहि श्रीताः सोमा आ याहि ।
शिप्रिन्नृषीवः शचीवो नायमच्छा सधमादम् २८
स्तुतश्च यास्त्वा वर्धन्ति महे राधसे नृम्णाय । इन्द्र कारिणं वृधन्तः २९
गिरश्च यास्ते गिर्वाह उक्था च तुभ्यं तानि । सत्रा दधिरे शवांसि ३० १४५
एवेदेष तुविकूर्मि—र्वाजाँ एको वज्रहस्तः । सनादमृक्तो दयते ३१
हन्ता वृत्रं दक्षिणेने—न्द्रः पुरू पुरुहूतः । महान् महीभिः शचीभिः ३२
यस्मिन् विश्वाश्चर्षणय उत च्यौत्ना ज्रयांसि च । अनु घेन्मन्दी मघोनः ३३
एष एतानि चकारे—न्द्रो विश्वा योऽति शृण्वे । वाजदावा मघोनाम् ३४
प्रभर्ता रथं गव्यन्त—मपाकाच्चिद् यमवति । इनो वसु स हि वोळ्हा ३५ १५०
सनिता विप्रो अर्वद्भि—र्हन्ता वृत्रं नृभिः शूरः । सत्योऽविता विधन्तम् ३६
यजध्वैनं प्रियमेधा इन्द्रं सत्राचा मनसा । यो भूत् सोमैः सत्यमद्वा ३७
गाथश्रवसं सत्पतिं श्रवस्कामं पुरुत्मानम् । कण्वासो गात वाजिनम् ३८
य ऋते चिद् गास्पदेभ्यो दात् सखा नृभ्यः शचीवान् । ये अस्मिन् काममश्रियन् ३९
इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिम् । मेषो भूतोऽभि यन्नयः ४० १५५

॥ १३ ॥ (ऋ० ८।३।१-२४)

[मेध्यातिथिः काण्वः]। प्रगाथः=(विषमा बृहती, समा सतोबृहती), २१ अनुष्टुप्, २२-२३ गायत्री, २४ बृहती।

पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
आपिर्नो बोधि सधमाद्यो वृधे३ ऽस्माँ अवन्तु ते धियः १
भूयाम ते सुमतौ वाजिनो वयं मा नः स्तरभिमातये ।
अस्माञ्चित्राभिरवतादभिष्टिभि―रा नः सुम्नेषु यामय २
इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितो ऽभि स्तोमैरनूषत ३
अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ४
इन्द्रमिद् देवतातय इन्द्रं प्रयत्यध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ५
इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।
इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः ६
अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
समीचीनास ऋभवः समस्वरन् रुद्रा गृणन्त पूर्व्यम् ७
अस्येदिन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि ।
अद्या तमस्य महिमानमायवो ऽनु ष्टुवन्ति पूर्वथा ८
तत् त्वा यामि सुवीर्यं तद् ब्रह्म पूर्वचित्तये ।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ९
येना समुद्रमसृजो महीरप―स्तदिन्द्र वृष्णि ते शवः ।
सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे १०
शग्धी न इन्द्र यत् त्वा रयिं यामि सुवीर्यम् ।
शग्धि वाजाय प्रथमं सिषासते शग्धि स्तोमाय पूर्व्य ११
शग्धी नो अस्य यद्ध पौरमाविथ धिय इन्द्र सिषासतः ।
शग्धि यथा रुशमं श्यावकं कृप―मिन्द्र प्रावः स्वर्णरम् १२
कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः ।
नही न्वस्य महिमानमिन्द्रियं स्वर्गृणन्त आनशुः १३
कदु स्तुवन्त ऋतयन्त देवत ऋषिः को विप्र ओहते ।
कदा हवं मघवन्निन्द्र सुन्वतः कदु स्तुवत आ गमः १४

उदु त्ये मधुमत्तमा गिरः स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव १५ १७०
कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमानशुः ।
इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् १६
युक्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि १७
इमे हि ते कारवो वावशुर्धिया विप्रासो मेधसातये ।
स त्वं नो मघवन्निन्द्र गिर्वणो वेनो न शृणुधी हवम् १८
निरिन्द्र बृहतीभ्यो वृत्रं धनुभ्यो अस्फुरः ।
निरर्बुदस्य मृगयस्य मायिनो निः पर्वतस्य गा आजः १९
निरग्नयो रुरुचुर्निरु सूर्यो निः सोम इन्द्रियो रसः ।
निरन्तरिक्षादधमो महामहिं कृषे तदिन्द्र पौंस्यम् । २० १७५
यं मे दुरिन्द्रो मरुतः पाकस्थामा कौरयाणः ।
विश्वेषां त्मना शोभिष्ठमुपेव दिवि धावमानम् २१
रोहितं मे पाकस्थामा सुधुरं कक्ष्यप्राम् ।
अदाद्रायो विबोधनम् २२
यस्मा अन्ये दश प्रति धुरं वहन्ति वह्नयः ।
अस्तं वयो न तुग्र्यम् २३
आत्मा पितुस्तनूर्वास ओजोदा अभ्यञ्जनम् ।
तुरीयमिद्रोहितस्य पाकस्थामानं भोजं दातारमब्रवम् २४

॥ १४ ॥ (ऋ० ८।३२।१-३०)

[मेधातिथिः काण्वः] । गायत्री ।

प्र कृतान्यृजीषिणः कण्वा इन्द्रस्य गाथया । मदे सोमस्य वोचत १ १८०
यः सृबिन्दमनर्शनिं पिप्रुं दासमहीशुवम् । वधीदुग्रो रिणन्नपः २
न्यर्बुदस्य विष्टपं वर्ष्माणं बृहतस्तिर । कृषे तदिन्द्र पौंस्यम् ३
प्रति श्रुताय वो धृषत्तूर्णाशं न गिरेरधि । हुवे सुशिप्रमूतये ४
स गोरश्वस्य वि व्रजं मन्दानः सोम्येभ्यः । पुरं न शूर दर्षसि ५
यदि मे रारणः सुत उक्थे वा दधसे चनः । आरादुप स्वधा गहि ६ १८५
वयं घा ते अपि ष्मसि स्तोतार इन्द्र गिर्वणः । त्वं नो जिन्व सोमपाः ७

उत नः पितुमा भर संरराणो अविक्षितम् । मघवन् भूरि ते वसु ८
उत नो गोमतस्कृधि हिरण्यवतो अश्विनः । इळाभिः सं रभेमहि ९
बृबदुक्थं हवामहे सृप्रकरस्नमूतये । साधु कृण्वन्तमवसे १०
यः संस्थे चिच्छतक्रतु रादीं कृणोति वृत्रहा । जरितृभ्यः पुरूवसुः ११ १९०
स नः शक्रश्चिदा शकद् दानवाँ अन्तराभरः । इन्द्रो विश्वाभिरूतिभिः १२
यो रायो३ऽवनिर्महान् त्सुपारः सुन्वतः सखा । तमिन्द्रमभि गायत १३
आयन्तारं महि स्थिरं पृतनासु श्रवोजितम् । भूरेरीशानमोजसा १४
नकिरस्य शचीनां नियन्ता सूनृतानाम् । नकिर्वक्ता न दादिति १५
न नूनं ब्रह्मणामृणं प्राशूनामस्ति सुन्वताम् । न सोमो अप्रता पपे १६ १९५
पन्य इदुप गायत पन्य उक्थानि शंसत । ब्रह्मा कृणोत पन्य इत् १७
पन्य आ दर्दिरच्छता सहस्रा वाज्यवृतः । इन्द्रो यो यज्वनो वृधः १८
वि षू चर स्वधा अनु कृष्टीनामन्वाहुवः । इन्द्र पिब सुतानाम् १९
पिब स्वधैनवानामुत यस्तुग्र्ये सचा । उतायमिन्द्र यस्तव २०
अतीहि मन्युषाविणं सुषुवांसमुपारणे । इमं रातं सुतं पिब २१ २००
इहि तिस्रः परावत इहि पञ्च जनाँ अति । धेना इन्द्रावचाकशत् २२
सूर्यो रश्मिं यथा सृजा ऽऽ त्वा यच्छन्तु मे गिरः । निम्नमापो न सध्र्यक् २३
अध्वर्यवा तु हि षिञ्च सोमं वीराय शिप्रिणे । भरा सुतस्य पीतये २४
य उद्नः फलिगं भिनन्न्यक् सिन्धूँरवासृजत् । यो गोषु पक्वं धारयत् २५
अहन् वृत्रमृचीषम और्णवाभमहीशुवम् । हिमेनाविध्यदर्बुदम् २६ २०५
प्र व उग्राय निष्टुरे ऽषाळ्हाय प्रसक्षिणे । देवत्तं ब्रह्म गायत २७
यो विश्वान्यभि व्रता सोमस्य मदे अन्धसः । इन्द्रो देवेषु चेतति २८
इह त्या सधमाद्या हरी हिरण्यकेश्या । वोळ्हामभि प्रयो हितम् २९
अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी । सोमपेयाय वक्षतः ३०

॥ १५ ॥ (ऋ० ८।३३।१-१९)

[मेध्यातिथिः काण्वः] । बृहती, १६-१८ गायत्री, १९ अनुष्टुप् ।

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते १ २१०
स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः २

कण्वेभिर्धृष्णवा धृषद् वाजं दर्षि सहस्रिणम् ।
पिशङ्गरूपं मघवन् विचर्षणे मक्षू गोमन्तमीमहे ३
पाहि गायान्धसो मद इन्द्राय मेध्यातिथे ।
यः संमिश्लो हर्योर्यः सुते सचा वज्री रथो हिरण्ययः ४
यः सुषव्यः सुदक्षिण इनो यः सुक्रतुर्गृणे ।
य आकरः सहस्रा यः शतामघ इन्द्रो यः पूर्भिदारितः ५
यो धृषितो योऽवृतो यो अस्ति श्मश्रुषु श्रितः ।
विभूतद्युम्नश्च्यवनः पुरुष्टुतः क्रत्वा गौरिव शाकिनः ६ २१५
क ईं वेद सुते सचा पिबन्तं कद् वयो दधे ।
अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ७
दाना मृगो न वारणः पुरुत्रा चरथं दधे ।
नकिष्ट्वा नि यमदा सुते गमो महाँश्चरस्योजसा ८
य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः ।
यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत् ९
सत्यमित्था वृषेदसि वृषजूतिर्नोऽवृतः
वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः १०
वृषणस्ते अभीशवो वृषा कशा हिरण्ययी ।
वृषा रथो मघवन् वृषणा हरी वृषा त्वं शतक्रतो ११ २२०
वृषा सोता सुनोतु ते वृषन्नृजीपिन्ना भर ।
वृषा दधन्वे वृषणं नदीष्वा तुभ्यं स्थातर्हरीणाम् १२
एन्द्र याहि पीतये मधु शविष्ठ सोम्यम् ।
नायमच्छा मघवा शृणवद् गिरो ब्रह्मोक्था च सुक्रतुः १३
वहन्तु त्वा रथेष्ठामा हरयो रथयुजः ।
तिरश्चिदर्यं सवनानि वृत्रहन्नन्येषां या शतक्रतो १४
अस्माकमद्यान्तमं स्तोमं धिष्व महामह ।
अस्माकं ते सवना सन्तु शंतमा मदाय द्युक्ष सोमपाः १५
नहि षस्तव नो मम शास्त्रे अन्यस्य रण्यति । यो अस्मान् वीर आनयत् १६ २२५
इन्द्रश्चिद् घा तदब्रवीत् स्त्रिया अशास्यं मनः । उतो अह क्रतुं रघुम् १७
सप्ती चिद् घा मदच्युता मिथुना वहतो रथम् । एवेद् धूर्वृष्ण उत्तरा १८

अधः पश्यस्व मोपरि संतरां पादकौ हर ।
मा ते कशप्लकौ दृशन् स्त्री हि ब्रह्मा बभूविथ १९

॥ १६ ॥ (ऋ० ८।४।१-१४)

[देवातिथिः काण्वः] । प्रगाथः= (विषमा बृहती, समा सतोबृहती) ।

यदिन्द्र प्रागपागुदङ् न्यग्वा हूयसे नृभिः ।
सिमा पुरू नृषूतो अस्यानवे ऽसि प्रशर्ध तुर्वशे १
यद् वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।
कण्वासस्त्वा ब्रह्मभिः स्तोमवाहस इन्द्रा यच्छन्त्या गहि २ २३०
यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ३
मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते ।
आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद् दधिषे सहः ४
प्र चक्रे सहसा सहो बभञ्ज मन्युमोजसा ।
विश्वे त इन्द्र पृतनायवो यहो नि वृक्षा इव येमिरे ५
सहस्रेणेव सचते यवीयुधा यस्त आनळुपस्तुतिम् ।
पुत्रं प्रावर्गं कृणुते सुवीर्ये दाश्नोति नमउक्तिभिः ६
मा भेम मा श्रमिष्मो—ग्रस्य सख्ये तव ।
महत् ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ७ २३५
सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
मध्वा संपृक्ताः सारघेण धेनव—स्तूयमेहि द्रवा पिब ८
अश्वी रथी सुरूप इद् गोमाँ इदिन्द्र ते सखा ।
श्वात्रभाजा वयसा सचते सदा चन्द्रो याति सभामुप ९
ऋश्यो न तृष्यन्नवपानमा गहि पिबा सोमं वशाँ अनु ।
निमेघमानो मघवन् दिवेदिव ओजिष्ठं दधिषे सहः १०
अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति ।
उप नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ११
स्वयं चित् स मन्यते दाशुरिर्जनो यत्रा सोमस्य तृम्पसि ।
इदं ते अन्नं युज्यं समुक्षितं तस्येहि प्र द्रवा पिब १२ २४०

रथेष्ठायाध्वर्यवः सोममिन्द्राय सोतन ।
अधि ब्रध्नस्याद्रयो वि चक्षते सुन्वन्तो दाश्वध्वरम् १३
उप ब्रध्नं वावाता वृषणा हरी इन्द्रमपसु वक्षतः ।
अर्वाञ्चं त्वा सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप १४

॥ १७ ॥ (ऋ० ८।६।१-४५)

[वत्सः काण्वः] । गायत्री ।

महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव । स्तोमैर्वत्सस्य वावृधे १
प्रजामृतस्य पिप्रतः प्र यद् भरन्त वह्नयः । विप्रा ऋतस्य वाहसा २
कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् । जामि ब्रुवत आयुधम् ३
समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः । समुद्रायेव सिन्धवः ४
ओजस्तदस्य तित्विष उभे यत् समवर्तयत् । इन्द्रश्चर्मेव रोदसी ५
वि चिद् वृत्रस्य दोधतो वज्रेण शतपर्वणा । शिरो बिभेद वृष्णिना ६
इमा अभि प्र णोनुमो विपामग्रेषु धीतयः । अग्नेः शोचिर्न दिद्युतः ७
गुहा सतीरुप त्मना प्र यच्छोचन्त धीतयः । कण्वा ऋतस्य धारया ८
प्र तमिन्द्र नशीमहि रयिं गोमन्तमश्विनम् । प्र ब्रह्म पूर्वचित्तये ९
अहमिद्धि पितुष्परि मेधामृतस्य जग्रभ । अहं सूर्य इवाजनि १०
अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत् । येनेन्द्रः शुष्ममिद् दधे ११
ये त्वामिन्द्र न तुष्टुवुर्ऋषयो ये च तुष्टुवुः । ममेद् वर्धस्व सुष्टुतः १२
यदस्य मन्युरध्वनीद् वि वृत्रं पर्वशो रुजन् । अपः समुद्रमैरयत् १३
नि शुष्ण इन्द्र धर्णसिं वज्रं जघन्थ दस्यवि । वृषा ह्युग्र शृण्विषे १४
न द्याव इन्द्रमोजसा नान्तरिक्षाणि वज्रिणम् । न विव्यचन्त भूमयः १५
यस्त इन्द्र महीरपः स्तभूयमान आशयत् । नि तं पद्यासु शिश्नथः १६
य इमे रोदसी मही समीची समजग्रभीत् । तमोभिरिन्द्र तं गुहः १७
य इन्द्र यतयस्त्वा भृगवो ये च तुष्टुवुः । ममेदुग्र श्रुधी हवम् १८
इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् । एनामृतस्य पिप्युषीः १९
या इन्द्र प्रस्वस्त्वाऽऽसा गर्भमचक्रिरन् । परि धर्मेव सूर्यम् २०
त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः । त्वां सुतास इन्दवः २१
तवेदिन्द्र प्रणीतिषूत प्रशस्तिरद्रिवः । यज्ञो वितन्तसाय्यः २२
आ न इन्द्र महीमिषं पुरं न दर्षि गोमतीम् । उत प्रजां सुवीर्यम् २३

उत त्यदाश्वश्व्यं　यदिन्द्र नाहुषीष्वा　। अग्रे विक्षु प्रदीदयत् २४
अभि व्रजं न तत्निषे　सूर उपाकचक्षसम्　। यदिन्द्र मृळयासि नः २५
यदङ्ग तविषीयस　इन्द्र प्रराजसि क्षितीः　। महाँ अपार ओजसा २६
तं त्वा हविष्मतीर्विश　उप ब्रुवत ऊतये　। उरुज्रयसमिन्दुभिः २७
उपह्वरे गिरीणां　संगथे च नदीनाम्　। धिया विप्रो अजायत २८ १७०
अतः समुद्रमुद्वतश्चिकित्वाँ अव पश्यति　। यतो विपान एजति २९
आदित् प्रत्नस्य रेतसो　ज्योतिष्पश्यन्ति वासरम्　। परो यदिध्यते दिवा ३०
कण्वास इन्द्र ते मतिं　विश्वे वर्धन्ति पौंस्यम्　। उतो शविष्ठ वृष्ण्यम् ३१
इमां म इन्द्र सुष्टुतिं　जुषस्व प्र सु मामव　। उत प्र वर्धया मतिम् ३२
उत ब्रह्मण्या वयं　तुभ्यं प्रवृद्ध वज्रिवः　। विप्रा अतक्ष्म जीवसे ३३ १७५
अभि कण्वा अनूषताऽऽपो न प्रवता यतीः　। इन्द्रं वनन्वती मतिः ३४
इन्द्रमुक्थानि वावृधुः　समुद्रमिव सिन्धवः　। अनुत्तमन्युमजरम् ३५
आ नो याहि परावतो　हरिभ्यां हर्यताभ्याम्　। इममिन्द्र सुतं पिब ३६
त्वामिद् वृत्रहन्तम　जनासो वृक्तबर्हिषः　। हवन्ते वाजसातये ३७
अनु त्वा रोदसी उभे　चक्रं न वर्त्येतशम्　। अनु सुवानास इन्दवः ३८ १८०
मन्दस्वा सु स्वर्णर　उतेन्द्र शर्यणावति　। मत्स्वा विवस्वतो मती ३९
वावृधान उप द्यवि　वृषा वज्र्यरोरवीत्　। वृत्रहा सोमपातमः ४०
ऋषिर्हि पूर्वजा अस्येक ईशान ओजसा　। इन्द्र चोष्कूयसे वसु ४१
अस्माकं त्वा सुताँ उप　वीतपृष्ठा अभि प्रयः　। शतं वहन्तु हरयः ४२
इमां सु पूर्व्यां धियं　मधोर्घृतस्य पिप्युषीम्　। कण्वा उक्थेन वावृधुः ४३ १८५
इन्द्रमिद् विमहीनां　मेधे वृणीत मर्त्यः　। इन्द्रं सनिष्युरूतये ४४
अर्वाञ्चं त्वा पुरुष्टुत　प्रियमेधस्तुता हरी　। सोमपेयाय वक्षतः ४५

॥ १८ ॥ (ऋ० ८।१२।१-३३)

[पर्वतः काण्वः]। उष्णिक्, ३३ शंकुमती (पिंगलमतेन)।

य इन्द्र सोमपातमो　मदः शविष्ठ चेतति　। येना हंसि न्यत्रिणं तमीमहे १
येना दशग्वमध्रिगुं　वेपयन्तं स्वर्णरम्　। येना समुद्रमाविथा तमीमहे २
येन सिन्धुं महीरपो　रथाँ इव प्रचोदयः　। पन्थामृतस्य यातवे तमीमहे ३ १९०
इमं स्तोममभिष्टये　घृतं न पूतमद्रिवः　। येना नु सद्य ओजसा ववक्षिथ ४
इमं जुषस्व गिर्वणः　समुद्र इव पिन्वते　। इन्द्र विश्वाभिरूतिभिर्ववक्षिथ ५

यो नो देवः परावतः सखित्वनाय मामहे । दिवो न वृष्टिं प्रथयन् ववक्षिथ ६
ववक्षुरस्य केतव उत वज्रो गभस्त्योः । यत् सूर्यो न रोदसी अवर्धयत् ७
यदि प्रवृद्ध सत्पते सहस्रं महिषाँ अघः । आदित् त इन्द्रियं महि प्र वावृधे ८ २९५
इन्द्रः सूर्यस्य रश्मिभिर्न्यर्शसानमोषति । अग्निर्वनेव सासहिः प्र वावृधे ९
इयं त ऋत्वियावती धीतिरेति नवीयसी । सपर्यन्ती पुरुप्रिया मिमीत इत् १०
गर्भो यज्ञस्य देवयुः क्रतुं पुनीत आनुषक् । स्तोमैरिन्द्रस्य वावृधे मिमीत इत् ११
सनिर्मित्रस्य पप्रथ इन्द्रः सोमस्य पीतये । प्राची वाशीव सुन्वते मिमीत इत् १२
यं विप्रा उक्थवाहसोऽभिप्रमन्दुरायवः । घृतं न पिप्य आसन्यृतस्य यत् १३ ३००
उत स्वराजे अदितिः स्तोममिन्द्राय जीजनत् । पुरुप्रशस्तमूतय ऋतस्य यत् १४
अभि वह्नय ऊतयेऽनूषत प्रशस्तये । न देव विव्रता हरी ऋतस्य यत् १५
यत् सोममिन्द्र विष्णवि यद् वा घ त्रित आप्त्ये । यद् वा मरुत्सु मन्दसे समिन्दुभिः १६
यद् वा शक्र परावति समुद्रे अधि मन्दसे । अस्माकमित् सुते रणा समिन्दुभिः १७
यद् वासि सुन्वतो वृधो यजमानस्य सत्पते । उक्थे वा यस्य रण्यसि समिन्दुभिः १८ ३०५
देवंदेवं वोऽवस इन्द्रमिन्द्रं गृणीषणि । अधा यज्ञाय तुर्वणे व्यानशुः १९
यज्ञेभिर्यज्ञवाहसं सोमेभिः सोमपातमम् । होत्राभिरिन्द्रं वावृधुर्व्यानशुः २०
महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः । विश्वा वसूनि दाशुषे व्यानशुः २१
इन्द्रं वृत्राय हन्तवे देवासो दधिरे पुरः । इन्द्रं वाणीरनूषता समोजसे २२
महान्तं महिना वयं स्तोमेभिर्हवनश्रुतम् । अर्कैरभि प्र णोनुमः समोजसे २३ ३१०
न यं विविक्तो रोदसी नान्तरिक्षाणि वज्रिणम् । अमादिदस्य तित्विषे समोजसः २४
यदिन्द्र पृतनाज्ये देवास्त्वा दधिरे पुरः । आदित् ते हर्यता हरी ववक्षतुः २५
यदा वृत्रं नदीवृतं शवसा वज्रिन्नवधीः । आदित् ते हर्यता हरी ववक्षतुः २६
यदा ते विष्णुरोजसा त्रीणि पदा विचक्रमे । आदित् ते हर्यता हरी ववक्षतुः २७
यदा ते हर्यता हरी वावृधाते दिवेदिवे । आदित् ते विश्वा भुवनानि येमिरे २८ ३१५
यदा ते मारुतीर्विशस्तुभ्यमिन्द्र नियेमिरे । आदित् ते विश्वा भुवनानि येमिरे २९
यदा सूर्यममुं दिवि शुक्रं ज्योतिरधारयः । आदित् ते विश्वा भुवनानि येमिरे ३०
इमां त इन्द्र सुष्टुतिं विप्र इयर्ति धीतिभिः । जामिं पदेव पिप्रतीं प्राध्वरे ३१
यदस्य धामनि प्रिये समीचीनासो अस्वरन् । नाभा यज्ञस्य दोहना प्राध्वरे ३२
सुवीर्यं स्वश्व्यं सुगव्यमिन्द्र दद्धि नः । होतेव पूर्वचित्तये प्राध्वरे ३३ ३२०

॥ १९ ॥ (ऋ० ८।१३।१-३३)

[नारदः काण्वः] । उष्णिक् ।

इन्द्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यम् । विदे वृधस्य दक्षसो महान् हि षः १
स प्रथमे व्योमनि देवानां सदने वृधः । सुपारः सुश्रवस्तमः समप्सुजित् २
तमह्वे वाजसातय इन्द्रं भराय शुष्मिणम् । भवा नः सुम्ने अन्तमः सखा वृधे ३
इयं त इन्द्र गिर्वणो रातिः क्षरति सुन्वतः । मन्दानो अस्य बर्हिषो वि राजसि ४
नूनं तदिन्द्र दद्धि नो यत् त्वा सुन्वन्त ईमहे । रयिं नश्चित्रमा भरा स्वर्विदम् ५
स्तोता यत् ते विचर्षणिरतिप्रशर्धयद् गिरः । वया इवानु रोहते जुषन्त यत् ६
प्रत्नवज्जनया गिरः शृणुधी जरितुर्हवम् । मदेमदे ववक्षिथा सुकृत्वने ७
क्रीळन्त्यस्य सूनृता आपो न प्रवता यतीः । अया धिया य उच्यते पतिर्दिवः ८
उतो पतिर्य उच्यते कृष्टीनामेक इद् वशी । नमोवृधैरवस्युभिः सुते रण ९
स्तुहि श्रुतं विपश्चितं हरी यस्य प्रसक्षिणा । गन्तारा दाशुषो गृहं नमस्विनः १०
तूतुजानो महेमते ऽश्वेभिः प्रुषितप्सुभिः । आ याहि यज्ञमाशुभिः शमिद्धि ते ११
इन्द्र शविष्ठ सत्पते रयिं गृणत्सु धारय । श्रवः सूरिभ्यो अमृतं वसुत्वनम् १२
हवे त्वा सूर उदिते हवे मध्यंदिने दिवः । जुषाण इन्द्र सप्तिभिर्न आ गहि १३
आ तू गहि प्र तु द्रव मत्स्वा सुतस्य गोमतः । तन्तुं तनुष्व पूर्व्यं यथा विदे १४
यच्छक्रासि परावति यदर्वावति वृत्रहन् । यद् वा समुद्रे अन्धसोऽवितेदसि १५
इन्द्रं वर्धन्तु नो गिर इन्द्रं सुतास इन्दवः । इन्द्रे हविष्मतीर्विशो अराणिषुः १६
तमिद् विप्रा अवस्यवः प्रवत्वतीभिरूतिभिः । इन्द्रं क्षोणीरवर्धयन् वया इव १७
त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत । तमिद् वर्धन्तु नो गिरः सदावृधम् १८
स्तोता यत् ते अनुव्रत उक्थान्यृतुथा दधे । शुचिः पावक उच्यते सो अद्भुतः १९
तदिद् रुद्रस्य चेतति यह्वं प्रत्नेषु धामसु । मनो यत्रा वि तद् दधुर्विचेतसः २०
यदि मे सख्यमावर इमस्य पाह्यन्धसः । येन विश्वा अति द्विषो अतारिम २१
कदा त इन्द्र गिर्वणः स्तोता भवाति शंतमः । कदा नो गव्ये अश्व्ये वसौ दधः २२
उत ते सुष्टुता हरी वृषणा वहतो रथम् । अजुर्यस्य मदिन्तमं यमीमहे २३
तमीमहे पुरुष्टुतं यह्वं प्रत्नाभिरूतिभिः । नि बर्हिषि प्रिये सदध द्विता २४
वर्धस्वा सु पुरुष्टुत ऋषिष्टुताभिरूतिभिः । धुक्षस्व पिप्युषीमिषमवा च नः २५
इन्द्र त्वमवितेदसीत्था स्तुवतो अद्रिवः । ऋतादियर्मि ते धियं मनोयुजम् २६
इह त्या सधमाद्या युजानः सोमपीतये । हरी इन्द्र प्रतद्वसू अभि स्वर २७

अभि स्वरन्तु ये तव रुद्रासः सक्षत श्रियम् । उतो मरुत्वतीर्विशो अभि प्रयः २८
इमा अस्य प्रतूर्तयः पदं जुषन्त यद् दिवि । नाभा यज्ञस्य सं दधुर्यथा विदे २९
अयं दीर्घाय चक्षसे प्राचि प्रयत्यध्वरे । मिमीते यज्ञमानुषग्विचक्ष्य ३० ३५०
वृषायमिन्द्र ते रथ उतो ते वृषणा हरी । वृषा त्वं शतक्रतो वृषा हवः ३१
वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः । वृषा यज्ञो यमिन्वसि वृषा हवः ३२
वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः । वावन्थ हि प्रतिष्टुतिं वृषा हवः ३३

॥ २० ॥ (ऋ० ८।१४।१-१५)

[गोषूक्त्यश्वसूक्तिनौ काण्वायनौ] । गायत्री ।

यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् । स्तोता मे गोषखा स्यात् १
शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे । यदहं गोपतिः स्याम् २ ३५५
धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते । गामश्वं पिप्युषी दुहे ३
न ते वर्तास्ति राधस इन्द्र देवो न मर्त्यः । यद् दित्ससि स्तुतो मघम् ४
यज्ञ इन्द्रमवर्धयद् यद् भूमिं व्यवर्तयत् । चक्राण ओपशं दिवि ५
वावृधानस्य ते वयं विश्वा धनानि जिग्युषः । ऊतिमिन्द्रा वृणीमहे ६
व्यन्तरिक्षमतिरन्मदे सोमस्य रोचना । इन्द्रो यदभिनद् वलम् ७ ३६०
उद् गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः । अर्वाञ्चं नुनुदे वलम् ८
इन्द्रेण रोचना दिवो दृळ्हानि दृंहितानि च । स्थिराणि न पराणुदे ९
अपामूर्मिर्मदन्निव स्तोम इन्द्राजिरायते । वि ते मदा अराजिषुः १०
त्वं हि स्तोमवर्धन इन्द्रास्युक्थवर्धनः । स्तोतॄणामुत भद्रकृत् ११
इन्द्रमित् केशिना हरी सोमपेयाय वक्षतः । उप यज्ञं सुराधसम् १२ ३६५
अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः । विश्वा यदजयः स्पृधः १३
मायाभिरुत्सिसृप्सत इन्द्र द्यामारुरुक्षतः । अव दस्यूँरधूनुथाः १४
असुन्वामिन्द्र संसदं विषूचीं व्यनाशयः । सोमपा उत्तरो भवन् १५

॥ २१ ॥ (ऋ० ८।१५।१-१३)

[गोषूक्त्यश्वसूक्तिनौ काण्वायनौ] । उष्णिक् ।

तम्वभि प्र गायत पुरुहूतं पुरुष्टुतम् । इन्द्रं गीर्भिस्तविषमा विवासत १
यस्य द्विबर्हसो बृहत् सहो दाधार रोदसी । गिरीँरज्राँ अपः स्वर्वृषत्वना २ ३७०
स राजसि पुरुष्टुतँ एको वृत्राणि जिघ्नसे । इन्द्र जैत्रा श्रवस्या च यन्तवे ३
तं ते मदं गृणीमसि वृषणं पृत्सु सासहिम् । उ लोककृत्नुमद्रिवो हरिश्रियम् ४

येन ज्योतींष्यायवे मनवे च विवेदिथ । मन्दानो अस्य बर्हिषो वि राजसि ५
तदद्या चित् त उक्थिनोऽनु ष्टुवन्ति पूर्वथा । वृषपत्नीरपो जया दिवेदिवे ६
तव त्यदिन्द्रियं बृहत् तव शुष्ममुत क्रतुम् । वज्रं शिशाति धिषणा वरेण्यम् ७ ३७५
तव द्यौरिन्द्र पौंस्यं पृथिवी वर्धति श्रवः । त्वामापः पर्वतासश्च हिन्विरे ८
त्वां विष्णुर्बृहन् क्षयो मित्रो गृणाति वरुणः । त्वां शर्धो मदत्यनु मारुतम् ९
त्वं वृषा जनानां मंहिष्ठ इन्द्र जज्ञिषे । सत्रा विश्वा स्वपत्यानि दधिषे १०
सत्रा त्वं पुरुष्टुतँ एको वृत्राणि तोशसे । नान्य इन्द्रात् करणं भूय इन्वति ११
यदिन्द्र मन्मशस्त्वा नाना हवन्त ऊतये । अस्माकेभिर्नृभिरत्रा स्वर्जय १२ ३८०
अरं क्षयाय नो महे विश्वा रूपाण्याविशन् । इन्द्रं जैत्राय हर्षया शचीपतिम् १३

॥ २२ ॥ (ऋ० ८।१६।१-१२)

[इरिम्बिठिः काण्वः] । गायत्री ।

प्र सम्राजं चर्षणीना-मिन्द्रं स्तोता नव्यं गीर्भिः । नरं नृषाहं मंहिष्ठम् १
यस्मिन्नुक्थानि रण्यन्ति विश्वानि च श्रवस्या । अपामवो न समुद्रे २
तं सुष्टुत्या विवासे ज्येष्ठराजं भरे कृत्नुम् । महो वाजिनं सनिभ्यः ३
यस्यानूना गभीरा मदा उरवस्तरुत्राः । हर्षुमन्तः शूरसातौ ४ ३८५
तमिद् धनेषु हितेष्व-धिवाकाय हवन्ते । येषामिन्द्रस्ते जयन्ति ५
तमिच्च्यौत्नैरार्यन्ति तं कृतेभिश्चर्षणयः । एष इन्द्रो वरिवस्कृत् ६
इन्द्रो ब्रह्मेन्द्र ऋषि-रिन्द्रः पुरू पुरुहूतः । महान् महीभिः शचीभिः ७
सः स्तोम्यः स हव्यः सत्यः सत्वा तुविकूर्मिः । एकश्चित् सन्नभिभूतिः ८
तमर्केभिस्तं सामभि-स्तं गायत्रैश्चर्षणयः । इन्द्रं वर्धन्ति क्षितयः ९ ३९०
प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु । सासह्वांसं युधामित्रान् १०
स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः । इन्द्रो विश्वा अति द्विषः ११
स त्वं न इन्द्र वाजेभि-र्दशस्या च गातुया च । अच्छा च नः सुम्नं नेषि १२

॥ २३ ॥ (ऋ० ८।१७।१-१५)

[इरिम्बिठिः काण्वः] । [१४ वास्तोष्पतिर्वा] । गायत्री, प्रगाथः= (१४ बृहती, १५ सतोबृहती)।

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् । एदं बर्हिः सदो मम १
आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना । उप ब्रह्माणि नः शृणु २ ३९५
ब्रह्माणस्त्वा वयं युजा सोमपामिन्द्र सोमिनः । सुतावन्तो हवामहे ३
आ नो याहि सुतावतो ऽस्माकं सुष्टुतीरुप । पिबा सु शिप्रिन्नन्धसः ४

आ ते सिञ्चामि कुक्ष्यो॒रनु गात्रा वि धावतु । गृभाय जिह्वया मधु ५
स्वादुष्टे अस्तु संसुदे मधुमान् तन्वे३ तव । सोमः शमस्तु ते हृदे ६
अयमु त्वा विचर्षणे जनीरिवाभि संवृतः । प्र सोम इन्द्र सर्पतु ७ ४००
तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे । इन्द्रो वृत्राणि जिघ्नते ८
इन्द्र प्रेहि पुरस्त्वं विश्वस्येशान ओजसा । वृत्राणि वृत्रहञ्जहि ९
दीर्घस्ते अस्त्वङ्कुशो येना वसु प्रयच्छसि । यजमानाय सुन्वते १०
अयं त इन्द्र सोमो निपूतो अधि बर्हिषि । एहीमस्य द्रवा पिब ११
शाचिगो शाचिपूजना॒ऽयं रणाय ते सुतः । आखण्डल प्र हूयसे १२ ४०५
यस्ते शृङ्गवृषो नपात् प्रणपात् कुण्डपाय्यः । न्यस्मिन् दध्र आ मनः १३
वास्तोष्पते ध्रुवा स्थूणा॒ऽसत्रं सोम्यानाम् ।
द्रप्सो भेत्ता पुरां शश्वतीना॒मिन्द्रो मुनीनां सखा १४
पृदाकुसानुर्यजतो गवेषण एकः सन्नभि भूयसः ।
भूर्णिमश्वं नयत् तुजा पुरो गृभे॒न्द्रं सोमस्य पीतये १५

॥ २४ ॥ (ऋ० ८।१११।१-१६)

[सोभरिः काण्वः] । प्रगाथः- (विषमा ककुप्, समा सतोबृहती) ।

वयमु त्वामपूर्व्य स्थूरं न कच्चिद् भरन्तोऽवस्यवः । वाजे चित्रं हवामहे १
उप त्वा कर्मन्नूतये स नो युवो॒ग्रश्चक्राम यो धृषत् ।
त्वामिद्ध्यवितारं ववृमहे सखाय इन्द्र सानसिम् २ ४१०
आ याहीम इन्दवो ऽश्वपते गोपत उर्वरापते । सोमं सोमपते पिब ३
वयं हि त्वा बन्धुमन्तमबन्धवो विप्रास इन्द्र येमिम ।
या ते धामानि वृषभ तेभिरा गहि विश्वेभिः सोमपीतये ४
सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे । अभि त्वामिन्द्र नोनुमः ५
अच्छा च त्वैना नमसा वदामसि किं मुहुश्चिद् वि दीधयः ।
सन्ति कामासो हरिवो ददिष्ट्वं स्मो वयं सन्ति नो धियः ६
नूत्ना इदिन्द्र ते वय॒मूती अभूम नहि नू ते अद्रिवः । विद्मा पुरा परीणसः ७ ४१५
विद्मा सखित्वमुत शूर भोज्य१॒मा ते ता वज्रिन्नीमहे ।
उतो समस्मिन्ना शिशीहि नो वसो वाजे सुशिप्र गोमति ८
यो न इदमिदं पुरा प्र वस्य आनिनाय तमु वः स्तुषे । सखाय इन्द्रमूतये ९
हर्यश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमन्दत ।
आ तु नः स वयति गव्यमश्व्यं स्तोतृभ्यो मघवा शतम् १०

त्वया ह स्विद् युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि । संस्थे जनस्य गोमतः ११
जयेम कारे पुरुहूत कारिणो ऽभि तिष्ठेम दूढ्यः ।
नृभिर्वृत्रं हन्याम शूशुयाम चा ऽवेरिन्द्र प्र णो धियः १२ ४२०
अभ्रातृव्यो अना त्व मनापिरिन्द्र जनुषा सनादसि । युधेदापित्वमिच्छसे १३
नकी रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
यदा कृणोषि नदनुं समूहस्या दित् पितेव हूयसे १४
मा ते अमाजुरो यथा मूरास इन्द्र सख्ये त्वावतः । नि षदाम सचा सुते १५
मा ते गोदत्र निरराम राधस इन्द्र मा ते गृहामहि ।
दृळ्हा चिदर्यः प्र मृशाभ्या भर न ते दामान आदभे १६

॥ २५ ॥ (ऋ० ८।३४।१-१८)

[नीपातिथिः काण्वः, १६-१८ सहस्रं वसुरोचिषोऽङ्गिरसः] । अनुष्टुप्, १६-१८ गायत्री ।

एन्द्र याहि हरिभि रुप कण्वस्य सुष्टुतिम् । दिवो अमुष्य शासतो दिवं यय दिवावसो १ ४२५
आ त्वा ग्रावा वदन्निह सोमी घोषेण यच्छतु । दिवो अमुष्य शासतो दिवं यय दिवावसो २
अत्रा वि नेमिरेषा मुरां न धूनुते वृकः । दिवो अमुष्य शासतो दिवं यय दिवावसो ३
आ त्वा कण्वा इहावसे हवन्ते वाजसातये । दिवो अमुष्य शासतो दिवं यय दिवावसो ४
दधामि ते सुतानां वृष्णे न पूर्वपाय्यम् । दिवो अमुष्य शासतो दिवं यय दिवावसो ५
स्मत्पुरन्धिर्न आ गहि विश्वतोधीर्न ऊतये । दिवो अमुष्य शासतो दिवं यय दिवावसो ६ (४३०)
आ नो याहि महेमते सहस्रोते शतामघ । दिवो अमुष्य शासतो दिवं यय दिवावसो ७
आ त्वा होता मनुर्हितो देवत्रा वक्षदीड्यः । दिवो अमुष्य शासतो दिवं यय दिवावसो ८
आ त्वा मदच्युता हरी श्येनं पक्षेव वक्षतः । दिवो अमुष्य शासतो दिवं यय दिवावसो ९
आ याह्यर्य आ परि स्वाहा सोमस्य पीतये । दिवो अमुष्य शासतो दिवं यय दिवावसो १०
आ नो याह्युपश्रु त्युक्थेषु रणया इह । दिवो अमुष्य शासतो दिवं यय दिवावसो ११ (४३५)
सरूपैरा सु नो गहि संभृतैः संभृताश्वः । दिवो अमुष्य शासतो दिवं यय दिवावसो १२
आ याहि पर्वतेभ्यः समुद्रस्याधि विष्टपः । दिवो अमुष्य शासतो दिवं यय दिवावसो १३
आ नो गव्यान्यश्व्या सहस्रा शूर दर्दृहि । दिवो अमुष्य शासतो दिवं यय दिवावसो १४
आ नः सहस्रशो भरा ऽयुतानि शतानि च । दिवो अमुष्य शासतो दिवं यय दिवावसो १५
आ यदिन्द्रश्च दद्वहे सहस्रं वसुरोचिषः । ओजिष्ठमश्व्यं पशुम् १६ (४४०)
य ऋज्रा वातरंहसो ऽरुषासो रघुष्यदः । भ्राजन्ते सूर्या इव १७
पारावतस्य रातिषु द्रवच्चक्रेष्वाशुषु । तिष्ठं वनस्य मध्य आ १८

॥ २६ ॥ (ऋ० ८।४५।१-४२)

[त्रिशोकः काण्वः] । [१ अग्नीन्द्रौ] । गायत्री ।

आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा १
बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः । येषामिन्द्रो युवा सखा २
अयुद्ध इद् युधा वृतं शूर आजति सत्वभिः । येषामिन्द्रो युवा सखा ३ ४४५
आ बुन्दं वृत्रहा ददे जातः पृच्छद् वि मातरम् । क उग्राः के ह शृण्विरे ४
प्रति त्वा शवसी वदद् गिरावप्सो न योधिषत् । यस्ते शत्रुत्वमाचके ५
उत त्वं मघवञ्छृणु यस्ते वष्टि ववक्षि तत् । यद् वीळयासि वीळु तत् ६
यदाजिं यात्याजिकृ- दिन्द्रः स्वश्वयुरुप । रथीतमो रथीनाम् ७
वि षु विश्वा अभियुजो वज्रिन् विष्वग्यथा वृह । भवा नः सुश्रवस्तमः ८ ४५०
अस्माकं सु रथं पुर इन्द्रः कृणोतु सातये । न यं धूर्वन्ति धूर्तयः ९
वृज्याम ते परि द्विषो ऽरं ते शक्र दावने । गमेमेदिन्द्र गोमतः १०
शनैश्चिद् यन्तो अद्रिवो ऽश्वावन्तः शतग्विनः । विवक्षणा अनेहसः ११
ऊर्ध्वा हि ते दिवेदिवे सहस्रा सूनृता शता । जरितृभ्यो विमंहते १२
विद्मा हि त्वा धनंजय- मिन्द्र दृळ्हा चिदारुजम् । आदारिणं यथा गयम् १३ ४५५
ककुहं चित् त्वा कवे मन्दन्तु धृष्णविन्दवः । आ त्वा पणिं यदीमहे १४
यस्ते रेवाँ अदाशुरिः प्रममर्ष मघत्तये । तस्य नो वेद आ भर १५
इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः । पुष्टावन्तो यथा पशुम् १६
उत त्वाबधिरं वयं श्रुत्कर्णं सन्तमूतये । दूरादिह हवामहे १७
यच्छुश्रूया इमं हवं दुर्मर्षं चक्रिया उत । भवेरापिर्नो अन्तमः १८ ४६०
यच्चिद्धि ते अपि व्यथि- र्जगन्वांसो अमन्महि । गोदा इदिन्द्र बोधि नः १९
आ त्वा रम्भं न जिव्रयो ररम्भा शवसस्पते । उश्मसि त्वा सधस्थ आ २०
स्तोत्रमिन्द्राय गायत पुरुनृम्णाय सत्वने । नकिर्यं वृण्वते युधि २१
अभि त्वा वृषभा सुते सुतं सृजामि पीतये । तृम्पा व्यश्नुही मदम् २२
मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन् । माकीं ब्रह्मद्विषो वनः २३ ४६५
इह त्वा गोपरीणसा महे मन्दन्तु राधसे । सरो गौरो यथा पिब २४
या वृत्रहा परावति सना नवा च चुच्युवे । ता संसत्सु प्र वोचत २५
अपिबत् कद्रुवः सुत- मिन्द्रः सहस्रबाह्वे । अत्रादेदिष्ट पौंस्यम् २६
सत्यं तत् तुर्वशे यदौ विदानो अह्नवाय्यम् । व्यानट् तुर्वणे शमि २७

तरणिं वो जनानां त्रदं वाजस्य गोमतः । समानमु प्र शंसिषम् २८ ४७०
ऋभुक्षणं न वर्तव उक्थेषु तुग्र्यावृधम् । इन्द्रं सोमे सचा सुते २९
यः कृन्तदिद् वि योन्यं त्रिशोकाय गिरिं पृथुम् । गोभ्यो गातुं निरेतवे ३०
यद् दधिषे मनस्यसि मन्दानः प्रेदियक्षसि । मा तत् करिन्द्र मृळय ३१
दभ्रं चिद्धि त्वावतः कृतं शृण्वे अधि क्षमि । जिगात्विन्द्र ते मनः ३२
तवेदु ताः सुकीर्तयो ऽसन्नुत प्रशस्तयः । यदिन्द्र मृळयासि नः ३३ ४७५
मा न एकस्मिन्नागसि मा द्वयोरुत त्रिषु । वधीर्मा शूर भूरिषु ३४
बिभया हि त्वावत उग्रादभिप्रभङ्गिणः । दस्मादहमृतीषहः ३५
मा सख्युः शूनमा विदे मा पुत्रस्य प्रभूवसो । आवृत्वद् भूतु ते मनः ३६
को नु मर्या अमिथितः सखा सखायमब्रवीत् । जहा को अस्मदीषते ३७
एवारे वृषभा सुते ऽसिन्वन् भूर्यावयः । श्वघ्नीव निवता चरन् ३८ ४८०
आ त एता वचोयुजा हरी गृभ्णे सुमद्रथा । यदीं ब्रह्मभ्य इद्ददः ३९
भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः । वसु स्पार्हं तदा भर ४०
यद्वीळाविन्द्र यत् स्थिरे यत् पर्शाने पराभृतम् । वसु स्पार्हं तदा भर ४१
यस्य ते विश्वमानुषो भूरेर्दत्तस्य वेदति । वसु स्पार्हं तदा भर ४२

॥ २७ ॥ (ऋ० ८।४९।१-१०)

[प्रस्कण्वः काण्वः] । प्रगाथः= (विषमा बृहती, समा सतोबृहती) ।

अभि प्र वः सुराधस—मिन्द्रमर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति १ ४८५
शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः २
आ त्वा सुतास इन्दवो मदा य इन्द्र गिर्वणः ।
आपो न वज्रिन्नन्वोक्यं सरः पृणन्ति शूर राधसे ३
अनेहसं प्रतरणं विवक्षणं मध्वः स्वादिष्ठमीं पिब ।
आ यथा मन्दसानः किरासि नः प्र क्षुद्रेव त्मना धृषत् ४
आ नः स्तोममुप द्रव—द्धियानो अश्वो न सोतृभिः ।
यं ते स्वधावन्त्स्वदयन्ति धेनव इन्द्र कण्वेषु रातयः ५
उग्रं न वीरं नमसोप सेदिम विभूतिमक्षितावसुम् ।
उद्रीव वज्रिन्नवतो न सिञ्चते क्षरन्तीन्द्र धीतयः ६ ४९०

यद्ध नूनं यद्वा यज्ञे यद्वा पृथिव्यामधि ।
अतो नो यज्ञमाशुभिर्महेमत उग्र उग्रेभिरा गहि ७
अजिरासो हरयो ये त आशवो वाता इव प्रसक्षिणः ।
येभिरपत्यं मनुषः परीयसे येभिर्विश्वं स्वर्दृशे ८
एतावतस्त ईमह इन्द्र सुम्नस्य गोमतः ।
यथा प्रावो मघवन् मेध्यातिथिं यथा नीपातिथिं धने ९
यथा कण्वे मघवन् त्रसदस्यवि यथा पक्थे दशव्रजे ।
यथा गोशर्ये असनोर्ऋजिश्वनी न्द्र गोमद्धिरण्यवत् १०

॥ २८ ॥ (ऋ० ८।५०।१-१०)

[पुष्टिगुः काण्वः] । प्रगाथः- (विषमा बृहती, समा सतोबृहती) ।

प्र सु श्रुतं सुराधस मर्चा शक्रमभिष्टये ।
यः सुन्वते स्तुवते काम्यं वसु सहस्रेणेव मंहते १ ४९५
शतानीका हेतयो अस्य दुष्टरा इन्द्रस्य समिषो महीः ।
गिरिर्न भुज्मा मघवत्सु पिन्वते यदीं सुता अमन्दिषुः २
यदीं सुतास इन्दवो ऽभि प्रियममन्दिषुः ।
आपो न धायि सवनं म आ वसो दुघा इवोप दाशुषे ३
अनेहसं वो हवमानमूतये मध्वः क्षरन्ति धीतयः ।
आ त्वा वसो हवमानास इन्दव उप स्तोत्रेषु दधिरे ४
आ नः सोमे स्वध्वर इयानो अत्यो न तोशते ।
यं ते स्वदावन्त्स्वदन्ति गूर्तयः पौरे छन्दयसे हवम् ५
प्र वीरमुग्रं विविचिं धनस्पृतं विभूतिं राधसो महः ।
उद्रीव वज्रिन्नवतो वसुत्वना सदा पीपेथ दाशुषे ६ ५००
यद्ध नूनं परावति यद् वा पृथिव्यां दिवि ।
युजान इन्द्र हरिभिर्महेमत ऋष्व ऋष्वेभिरा गहि ७
रथिरासो हरयो ये ते अस्रिध ओजो वातस्य पिप्रति ।
येभिर्नि दस्युं मनुषो निघोषयो येभिः स्वः परीयसे ८
एतावतस्ते वसो विद्याम शूर नव्यसः ।
यथा प्राव एतशं कृत्व्ये धने यथा वशं दशव्रजे ९
यथा कण्वे मघवन् मेधे अध्वरे दीर्घनीथे दमूनसि ।
यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रं हरिश्रियम् १०

॥ २९ ॥ (ऋ० ८।५१।१-१०)

(५०५-५१४) श्रुष्टिगुः काण्वः । प्रगाथः- (विषमा बृहती; समा सतोबृहती) ।

यथा मनौ सांवरणौ सोममिन्द्रापिबः सुतम् ।
नीपातिथौ मघवन् मेध्यातिथौ पुष्टिगौ श्रुष्टिगौ सचा १ ५०५
पार्षद्वाणः प्रस्कण्वं समसादयच्छयानं जिव्रिमुद्धितम् ।
सहस्राण्यसिषासद् गवामृषिस्त्वोतो दस्यवे वृकः २
य उक्थेभिर्न विन्धते चिकिद्य ऋषिचोदनः ।
इन्द्रं तमच्छा वद नव्यस्या मत्यरिष्यन्तं न भोजसे ३
यस्मा अर्कं सप्तशीर्षाणमानृचुस्त्रिधातुमुत्तमे पदे ।
स त्विमा विश्वा भुवनानि चिक्रददादिज्जनिष्ट पौंस्यम् ४
यो नो दाता वसूनामिन्द्रं तं हूमहे वयम् ।
विद्मा ह्यस्य सुमतिं नवीयसीं गमेम गोमति व्रजे ५
यस्मै त्वं वसो दानाय शिक्षसि स रायस्पोषमश्नुते ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ६ ५१०
कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ७
प्र यो ननक्षे अभ्योजसा क्रिविं वधैः शुष्णं निघोषयन् ।
यदेदस्तम्भीत् प्रथयन्नमूं दिवमादिज्जनिष्ट पार्थिवः ८
यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत् सो अज्यते रयिः ९
तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः ।
अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे सुवानास इन्दवः १०

॥ ३० ॥ (ऋ० ८।५२।१-१०)

(५१५-५२४) आयुः काण्वः । प्रगाथः- (विषमा बृहती, समा सतोबृहती) ।

यथा मनौ विवस्वति सोमं शक्रापिबः सुतम् ।
यथा त्रिते छन्द इन्द्र जुजोषस्यायौ मादयसे सचा १ ५१५
पृषध्रे मेध्ये मातरिश्वनीन्द्र सुवाने अमन्दथाः ।
यथा सोमं दशशिप्रे दशोण्ये स्यूमरश्मावृजूनसि २
य उक्था केवला दधे यः सोमं धृषितापिबत् ।
यस्मै विष्णुस्त्रीणि पदा विचक्रम उप मित्रस्य धर्मभिः ३

यस्य त्वमिन्द्र स्तोमेषु चाकनो वाजे वाजिञ्छतक्रतो ।
तं त्वा वयं सुदुघामिव गोदुहो जुहूमसि श्रवस्यवः ४
यो नो दाता स नः पिता महाँ उग्र ईशानकृत् ।
अयामन्नुग्रो मघवा पुरूवसु-र्गोरश्वस्य प्र दातु नः ५
यस्मै त्वं वसो दानाय मंहसे स रायस्पोषमिन्वति ।
वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे ६ ५२०
कदा चन प्र युच्छस्यु-भे नि पासि जन्मनी ।
तुरीयादित्य हवनं त इन्द्रिय-मा तस्थावमृतं दिवि ७
यस्मै त्वं मघवन्निन्द्र गिर्वणः शिक्षो शिक्षसि दाशुषे ।
अस्माकं गिर उत सुष्टुतिं वसो कण्ववच्छृणुधी हवम् ८
अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत ।
पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ९
समिन्द्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यम् ।
सं शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः १०

॥ ३१ ॥ (ऋ० ८।५३।१-८)

(५२५-५३२) मेध्यः काण्वः । प्रगाथः = (विषमा बृहती, समा सतोबृहती) ।

उपमं त्वा मघोनां ज्येष्ठं च वृषभाणाम् ।
पूर्भित्तमं मघवन्निन्द्र गोविद-मीशानं राय ईमहे १ ५२५
य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवेदिवे ।
तं त्वा वयं हर्यश्वं शतक्रतुं वाजयन्तो हवामहे २
आ नो विश्वेषां रसं मध्वः सिञ्चन्त्वद्रयः ।
ये परावति सुन्विरे जनेष्वा ये अर्वावतीन्दवः ३
विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वन्त्वा वसु ।
शीष्टेषु चित् ते मदिरासो अंशवो यत्रा सोमस्य तृम्पसि ४
इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः ।
आ शंतम शंतमाभिरभिष्टिभि-रा स्वापे स्वापिभिः ५
आजितुरं सत्पतिं विश्वचर्षणिं कृधि प्रजास्वाभगम् ।
प्र सू तिरा शचीभिर्ये त उक्थिनः क्रतुं पुनत आनुषक् ६ ५३०
यस्ते साधिष्ठोऽवसे ते स्याम भरेषु ते ।
यं होत्राभिरुत देवहूतिभिः ससवांसो मनामहे ७

अहं हि ते हरिवो ब्रह्म वाजयु राजिं यामि सदोतिभिः ।
त्वामिदेव तममे समश्वयु र्गव्युरग्रे मथीनाम् ८

॥ ३२ ॥ (ऋ० ८।५४।१-६)

(५३३-५३८) मातरिश्वा काण्वः । प्रगाथः = (विषमा बृहती, समा सतोबृहती) ।

एतत् त इन्द्र वीर्यं गीर्भिर्गृणन्ति कारवः ।
ते स्तोभन्त ऊर्जमावन् घृतश्चुतं पौरासो नक्षन् धीतिभिः १
नक्षन्त इन्द्रमवसे सुकृत्यया येषां सुतेषु मन्दसे ।
यथा संवर्ते अमदो यथा कृश एवास्मे इन्द्र मत्स्व २
यदिन्द्र राधो अस्ति ते माघोनं मघवत्तम ।
तेन नो बोधि सधमाद्यो वृधे भगो दानाय वृत्रहन् ५ ५३५
आजिपते नृपते त्वमिद्धि नो वाज आ वक्षि सुक्रतो ।
वीती होत्राभिरुत देववीतिभिः ससवांसो वि शृण्विरे ६
सन्ति ह्यर्य आशिष इन्द्र आयुर्जनानाम् ।
अस्मान् नक्षस्व मघवन्नुपावसे धुक्षस्व पिप्युषीमिषम् ७
वयं त इन्द्र स्तोमेभिर्विधेम त्वमस्माकं शतक्रतो ।
महि स्थूरं शशयं राधो अह्रयं प्रस्कण्वाय नि तोशय ८

॥ ३३ ॥ (ऋ० ८।५५।१-५)

(५३९-५४३) कृशः काण्वः । [प्रस्कण्वश्च] । गायत्री, ३, ५ अनुष्टुप् ।

भूरीदिन्द्रस्य वीर्यं व्यख्यमभ्यायति । राधस्ते दस्यवे वृक १
शतं श्वेतास उक्षणो दिवि तारो न रोचन्ते । मह्ना दिवं न तस्तभुः २ ५४०
शतं वेणूञ्छतं शुनः शतं चर्माणि म्लातानि ।
शतं मे बल्बजस्तुका अरुषीणां चतुःशतम् ३
सुदेवाः स्थ काण्वायना वयोवयो विचरन्तः । अश्वासो न चङ्क्रमत ४
आदित् साप्तस्य चर्किर न्नानूनस्य महि श्रवः ।
श्यावीरतिध्वसन् पथ श्चक्षुषा चन संनशे ५

॥ ३४ ॥ (ऋ० ८।५६।१-४)

(५४४-५४७) पृषध्रः काण्वः । गायत्री ।

प्रति ते दस्यवे वृक राधो अदर्श्यह्रयम् । द्यौर्न प्रथिना शवः १
दश मह्यं पौतक्रतः सहस्रा दस्यवे वृकः । नित्याद्रायो अमंहत २ ५४५
शतं मे गर्दभानां शतमूर्णावतीनाम् । शतं दासाँ अति स्रजः ३

तन्नो अपि प्राणीयत पूतक्रतायै व्यक्ता । अश्वानामिन्न यूथ्याम् ४

॥ ३५ ॥ (ऋ० ८।६१।१-१८)

(५४८-५६५) भर्गः प्रागाथः । प्रगाथः- (विषमा बृहती, समा सतोबृहती); १७ शंकुमती ।

उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः ।
सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत् १
तं हि स्वराजं वृषभं तमोजसे धिषणे निष्टतक्षतुः ।
उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः २
आ वृषस्व पुरूवसो सुतस्येन्द्रान्धसः ।
विद्मा हि त्वा हरिवः पृत्सु सासहि—मधृष्टं चिद् दधृष्वणिम् ३ ५५०
अप्रामिसत्य मघवन् तथेदस—दिन्द्र क्रत्वा यथा वशः ।
सनेम वाजं तव शिप्रिन्नवसा मक्षू चिद्यन्तो अद्रिवः ४
शग्ध्यूषु शचीपत इन्द्र विश्वाभिरूतिभिः ।
भगं न हि त्वा यशसं वसुविद—मनु शूर चरामसि ५
पौरो अश्वस्य पुरुकृद् गवाम—स्युत्सो देव हिरण्ययः ।
नकिर्हि दानं परिमर्धिषत् त्वे यद्यद्यामि तदा भर ६
त्वं ह्येहि चेरवे विदा भगं वसुत्तये ।
उद्वावृषस्व मघवन् गविष्टय उदिन्द्राश्वमिष्टये ७
त्वं पुरू सहस्राणि शतानि च यूथा दानाय मंहसे ।
आ पुरंदरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे ८ ५५५
अविप्रो वा यदविध—द्विप्रो वेन्द्र ते वचः ।
स प्र ममन्दत् त्वाया शतक्रतो प्राचामन्यो अहंसन ९
उग्रबाहुर्म्रक्षकृत्वा पुरंदरो यदि मे शृणवद्धवम् ।
वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे १०
न पापासो मनामहे नारायासो न जल्हवः ।
यदिन्न्विन्द्रं वृषणं सचा सुते सखायं कृणवामहै ११
उग्रं युयुज्म पृतनासु सासहि—मृणकातिमदाभ्यम् ।
वेदा भृमं चित् सनिता रथीतमो वाजिनं यमिदू नशत् १२
यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवञ्छग्धि तव तन्न ऊतिभि—र्वि द्विषो वि मृधो जहि १३ ५६०

त्वं हि राधस्पते राधसो महः क्षयस्यासि विधतः ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे १४
इन्द्रः स्पळुत वृत्रहा परस्पा नो वरेण्यः ।
स नो रक्षिषच्चरमं स मध्यमं स पश्चात् पातु नः पुरः १५
त्वं नः पश्चादधरादुत्तरात् पुर इन्द्र नि पाहि विश्वतः ।
आरे अस्मत् कृणुहि दैव्यं भय—मारे हेतीरदेवीः १६
अद्याद्या श्वःश्व इन्द्र त्रास्व परे च नः ।
विश्वा च नो जरितृन्त्सत्पते अहा दिवा नक्तं च रक्षिषः १७
प्रभङ्गी शूरो मघवा तुवीमघः संमिश्लो वीर्याय कम् ।
उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः १८ ५६५

॥ ३६ ॥ (ऋ० ८।६२।१-१२)

(५६६-५७७) प्रगाथो घौरः काण्वः । पङ्क्तिः, ७-९ बृहती ।

प्रो अस्मा उपस्तुतिं भरता यज्जुजोषति ।
उक्थैरिन्द्रस्य माहिनं वयो वर्धन्ति सोमिनो भद्रा इन्द्रस्य रातयः १
अयुजो असमो नृभि—रेकः कृष्टीरयास्यः ।
पूर्वीरति प्र वावृधे विश्वा जातान्योजसा भद्रा इन्द्रस्य रातयः २
अहितेन चिदर्वता जीरदानुः सिषासति ।
प्रवाच्यमिन्द्र तत् तव वीर्याणि करिष्यतो भद्रा इन्द्रस्य रातयः ३
आ याहि कृणवाम त इन्द्र ब्रह्माणि वर्धना ।
येभिः शविष्ठ चाकनो भद्रमिह श्रवस्यते भद्रा इन्द्रस्य रातयः ४
धृषतश्चिद् धृषन्मनः कृणोषीन्द्र यत् त्वम् ।
तीव्रैः सोमैः सपर्यतो नमोभिः प्रतिभूषतो भद्रा इन्द्रस्य रातयः ५ ५७०
अव चष्ट ऋचीषमो ऽवताँ इव मानुषः ।
जुष्ट्वी दक्षस्य सोमिनः सखायं कृणुते युजं भद्रा इन्द्रस्य रातयः ६
विश्वे त इन्द्र वीर्यं देवा अनु क्रतुं ददुः ।
भुवो विश्वस्य गोपतिः पुरुष्टुत भद्रा इन्द्रस्य रातयः ७
गृणे तदिन्द्र ते शव उपमं देवतातये ।
यद्धंसि वृत्रमोजसा शचीपते भद्रा इन्द्रस्य रातयः ८
समनेव वपुष्यतः कृणवन्मानुषा युगा ।
विदे तदिन्द्रश्चेतनमध श्रुतो भद्रा इन्द्रस्य रातयः ९

उज्जातमिन्द्र ते शव उत् त्वामुत् तव क्रतुम् ।
भूरिगो भूरि वावृधु- र्मघवन् तव शर्मणि भद्रा इन्द्रस्य रातयः १० ५७५
अहं च त्वं च वृत्रहन् त्सं युज्याव सनिभ्य आ ।
अरातीवा चिदद्रिवो ऽनु नौ शूर मंसते भद्रा इन्द्रस्य रातयः ११
सत्यमिद् वा उ तं वय- मिन्द्रं स्तवाम नानृतम् ।
महाँ असुन्वतो वधो भूरि ज्योतींषि सुन्वतो भद्रा इन्द्रस्य रातयः १२

॥ ३७ ॥ (ऋ० ८।६३।१-११)

(५७८-६११) प्रगाथः काण्वः । गायत्री; १, ४-५, ७ अनुष्टुप् ।

स पूर्व्यो महानां वेनः क्रतुभिरानजे । यस्य द्वारा मनुष्पिता देवेषु धिय आनजे १
दिवो मानं नोत्सदन् त्सोमपृष्ठासो अद्रयः । उक्था ब्रह्म च शंस्या २
स विद्वाँ अङ्गिरोभ्य इन्द्रो गा अवृणोदप । स्तुषे तदस्य पौंस्यम् ३ ५८०
स प्रत्नथा कविवृध इन्द्रो वाकस्य वक्षणिः । शिवो अर्कस्य होम- न्यस्मत्रा गन्त्ववसे ४
आदू नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः । श्वात्रमर्का अनूषते- न्द्र गोत्रस्य दावने ५
इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च । यमर्का अध्वरं विदुः ६
यत् पाञ्चजन्यया विशे- न्द्रे घोषा असृक्षत । अस्तृणाद्बर्हणा विपो ऽर्यो मानस्य स क्षयः ७
इयमु ते अनुष्टुति- श्चकृषे तानि पौंस्या । प्रावश्चक्रस्य वर्तनिम् ८ ५८५
अस्य वृष्णो व्योदन उरु क्रमिष्ट जीवसे । यवं न पश्व आ ददे ९
तद्दधाना अवस्यवो युष्माभिर्दक्षपितरः । स्याम मरुत्वतो वृधे १०
बळृत्वियाय धाम्न ऋक्वभिः शूर नोनुमः । जेषमिन्द्र त्वया युजा ११

॥ ३८ ॥ (ऋ० ८।६४।१-१२) गायत्री ।

उत त्वा मन्दन्तु स्तोमाः कृणुष्व राधो अद्रिवः । अव ब्रह्मद्विषो जहि १
पदा पणीँरराधसो नि बाधस्व महाँ असि । नहि त्वा कश्चन प्रति २ ५९०
त्वमीशिषे सुताना- मिन्द्र त्वमसुतानाम् । त्वं राजा जनानाम् ३
एहि प्रेहि क्षयो दि- व्याऽघोषञ्चर्षणीनाम् । ओभे पृणासि रोदसी ४
त्यं चित् पर्वतं गिरिं शतवन्तं सहस्रिणम् । वि स्तोतृभ्यो रुरोजिथ ५
वयमु त्वा दिवा सुते वयं नक्तं हवामहे । अस्माकं काममा पृण ६
क्व स्य वृषभो युवा तुविग्रीवो अनानतः । ब्रह्मा कस्तं सपर्यति ७ ५९५
कस्य स्वित् सवनं वृषा जुजुष्वाँ अव गच्छति । इन्द्रं क उ स्विदा चके ८

कं ते दाना असक्षत वृत्रहन् कं सुवीर्या । उक्थे क उ स्विदन्तमः ९
अयं ते मानुषे जने सोमः पूरुषु सूयते । तस्येहि प्र द्रवा पिब १०
अयं ते शर्यणावति सुषोमायामधि प्रियः । आर्जीकीये मदिन्तमः ११
तमद्य राधसे महे चारुं मदाय घृष्वये । एहीमिन्द्र द्रवा पिब १२ ६००

॥ ३९ ॥ (ऋ० ८।६५।१-१२)

यदिन्द्र प्रागपागुदङ् न्यग्वा हूयसे नृभिः । आ याहि तूयमाशुभिः १
यद्वा प्रस्रवणे दिवो मादयासे स्वर्णरे । यद्वा समुद्रे अन्धसः २
आ त्वा गीर्भिर्महामुरुं हुवे गामिव भोजसे । इन्द्र सोमस्य पीतये ३
आ त इन्द्र महिमानं हरयो देव ते महः । रथे वहन्तु बिभ्रतः ४
इन्द्र गृणीष उ स्तुषे महाँ उग्र ईशानकृत् । एहि नः सुतं पिब ५ ६०५
सुतावन्तस्त्वा वयं प्रयस्वन्तो हवामहे । इदं नो बर्हिरासदे ६
यच्चिद्धि शश्वतामसी न्द्र साधारणस्त्वम् । तं त्वा वयं हवामहे ७
इदं ते सोम्यं मध्व धुक्षन्नद्रिभिर्नरः । जुषाण इन्द्र तत् पिब ८
विश्वाँ अर्यो विपश्चितो ऽति ख्यस्तूयमा गहि । अस्मे धेहि श्रवो बृहत् ९
दाता मे पृषतीनां राजा हिरण्यवीनाम् । मा देवा मघवा रिषत् १० ६१०
सहस्रे पृषतीना मधि श्चन्द्रं बृहत् पृथु । शुक्रं हिरण्यमा ददे ११
नपातो दुर्गहस्य मे सहस्रेण सुराधसः । श्रवो देवेष्वक्रत १२

॥ ४० ॥ (ऋ० ८।६६।१-१५)

(६१३-६१७) कलिः प्रागाथः । प्रगाथः= (विषमा बृहती, समा सतोबृहती), १५ अनुष्टुप् ।

तरोभिर्वो विदद्वसु मिन्द्रं सबाध ऊतये ।
बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् १
न यं दुध्रा वरन्ते न स्थिरा मुरो मदे सुशिप्रमन्धसः ।
य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम् २
यः शक्रो मृक्षो अश्व्यो यो वा कीजो हिरण्ययः ।
स ऊर्वस्य रेजयत्यपावृति मिन्द्रो गव्यस्य वृत्रहा ३ ६१५
निखातं चिद्यः पुरुसंभृतं वसू द्विद्वपति दाशुषे ।
वज्री सुशिप्रो हर्यश्व इत् कर दिन्द्रः क्रत्वा यथा वशत् ४
यद् वावन्थ पुरुष्टुत पुरा चिच्छूर नृणाम् ।
वयं तत् त इन्द्र सं भरामसि यज्ञमुक्थं तुरं वचः ५

सचा सोमेषु पुरुहूत वज्रिवो मदाय द्युक्ष सोमपाः ।
त्वमिद्धि ब्रह्मकृते काम्यं वसु देष्ठः सुन्वते भुवः ६
वयमेनमिदा ह्यो ऽपीपेमेह वज्रिणम् ।
तस्मा उ अद्य समना सुतं भरा ऽऽ नूनं भूषत श्रुते ७
वृकश्चिदस्य वारण उरामथि रा वयुनेषु भूषति ।
सेमं नः स्तोमं जुजुषाण आ गही न्द्र प्र चित्रया धिया ८ ६२०
कदू न्व१स्याकृत मिन्द्रस्यास्ति पौंस्यम् ।
केनो नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृत्रहा ९
कदू महीरधृष्टा अस्य तविषीः कदु वृत्रघ्नो अस्तृतम् ।
इन्द्रो विश्वान् बेकनाटाँ अहर्दृश उत क्रत्वा पणीँरभि १०
वयं घा ते अपूर्व्ये न्द्र ब्रह्माणि वृत्रहन् ।
पुरूतमासः पुरुहूत वज्रिवो भृतिं न प्र भरामसि ११
पूर्वीश्चिद्धि त्वे तुविकूर्मिन्नाशसो हवन्त इन्द्रोतयः ।
तिरश्चिदर्यः सवना वसो गहि शविष्ठ श्रुधि मे हवम् १२
वयं घा ते त्वे इ द्धिन्द्र विप्रा अपि ष्मसि ।
नहि त्वदन्यः पुरुहूत कश्चन मघवन्नस्ति मर्डिता १३ ६२५
त्वं नो अस्या अमतेरुत क्षुधो ऽभिशस्तेरव स्पृधि ।
त्वं न ऊती तव चित्रया धिया शिक्षा शचिष्ठ गातुवित् १४
सोम इद्वः सुतो अस्तु कलयो मा बिभीतन ।
अपेदेष ध्वस्मायति स्वयं घैषो अपायति १५

॥ ४१ ॥ (ऋ० ८।७६।१-१२)

(६२८-६४०) कुरुसुतिः काण्वः । गायत्री ।

इमं नु मायिनं हुव इन्द्रमीशानमोजसा । मरुत्वन्तं न वृञ्जसे १
अयमिन्द्रो मरुत्सखा वि वृत्रस्याभिनच्छिरः । वज्रेण शतपर्वणा २
वावृधानो मरुत्सखे न्द्रो वि वृत्रमैरयत् । सृजन्त्समुद्रिया अपः ३ ६३०
अयं ह येन वा इदं स्वर्मरुत्वता जितम् । इन्द्रेण सोमपीतये ४
मरुत्वन्तमृजीषिण मोजस्वन्तं विरप्शिनम् । इन्द्रं गीर्भिर्हवामहे ५
इन्द्रं प्रत्नेन मन्मना मरुत्वन्तं हवामहे । अस्य सोमस्य पीतये ६
मरुत्वाँ इन्द्र मीढ्वः पिबा सोमं शतक्रतो । अस्मिन् यज्ञे पुरुष्टुत ७

तुभ्येदिन्द्र मरुत्वते सुताः सोमासो अद्रिवः । हृदा हूयन्त उक्थिनः ८ ६३५
पिबेदिन्द्र मरुत्सखा सुतं सोमं दिविष्टिषु । वज्रं शिशान ओजसा ९
उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः । सोममिन्द्र चमू सुतम् १०
अनु त्वा रोदसी उभे क्रक्षमाणमकृपेताम् । इन्द्र यद् दस्युहाभवः ११
वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम् । इन्द्रात परि तन्वं ममे १२

॥ ४२ ॥ (ऋ० ८।७७।१-११)

[गायत्री. १०-११ प्रगाथः = (बृहती, सतोबृहती)]

जज्ञानो नु शतक्रतु--र्वि पृच्छदिति मातरम् । क उग्राः के ह शृण्विरे १ ६४०
आदीं शवस्यब्रवी--दौर्णवाभमहीशुवम् । ते पुत्र सन्तु निष्टुरः २
समित् तान् वृत्रहाखिदत् खे अराँ इव खेदया । प्रवृद्धो दस्युहाभवत् ३
एकया प्रतिधापिबत् साकं सरांसि त्रिंशतम् । इन्द्रः सोमस्य काणुका ४
अभि गन्धर्वमतृण--दबुध्नेषु रजःस्वा । इन्द्रो ब्रह्मभ्य इद् वृधे ५
निराविध्यद् गिरिभ्य आ धारयत् पक्वमोदनम् । इन्द्रो बुन्दं स्वाततम् ६ ६४५
शतब्रध्न इषुस्तव सहस्रपर्ण एक इत् । यमिन्द्र चकृषे युजम् ७
तेन स्तोतृभ्य आ भर नृभ्यो नारिभ्यो अत्तवे । सद्यो जात ऋभुष्ठिर ८
एता च्यौत्नानि ते कृता वर्षिष्ठानि परीणसा । हृदा वीड्वधारयः ९
विश्वेत् ता विष्णुराभर--दुरुक्रमस्त्वेषितः ।
शतं महिषान् क्षीरपाकमोदनं वराहमिन्द्र एमुषम् १०
तुविक्षं ते सुकृतं सूमयं धनुः साधुर्बुन्दो हिरण्ययः ।
उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूवृधा ११ ६५०

॥ ४३ ॥ (ऋ० ८।७८।१-१०)

[गायत्री, १० बृहती ।]

पुरोळाशं नो अन्धस इन्द्र सहस्रमा भर । शता च शूर गोनाम् १
आ नो भर व्यञ्जनं गामश्वमभ्यञ्जनम् । सचा मना हिरण्यया २
उत नः कर्णशोभना पुरूणि धृष्णवा भर । त्वं हि शृण्विषे वसो ३
नकीं वृधीक इन्द्र ते न सुषा न सुदा उत । नान्यस्त्वच्छूर वाघतः ४
नकीमिन्द्रो निकर्तवे न शक्रः परिशक्तवे । विश्वं शृणोति पश्यति ५ ६५५
स मन्युं मर्त्यानाम--दब्धो नि चिकीषते । पुरा निदश्चिकीषते ६
क्रत्व इत् पूर्णमुदरं तुरस्यास्ति विधतः । वृत्रघ्नः सोमपाव्नः ७

त्वं वसूनि संगता विश्वा च सोम सौभगा । सुदात्वपरिह्वृता ८
त्वामिद्यवयुर्मम कामो गव्युर्हिरण्ययुः । त्वामश्वयुरेषते ९
तवेदिन्द्राहमाशसा हस्ते दात्रं चना ददे ।
दिनस्य वा मघवन्त्संभृतस्य वा पूर्धि यवस्य काशिना १० ६६०

॥ ४४ ॥ (ऋ० ८।८०।१-९)
(६६१-६६९) एकद्यूर्नौधसः । गायत्री ।

नह्य१न्यं बळाकरं मर्डितारं शतक्रतो । त्वं न इन्द्र मृळय १
यो नः शश्वत्पुराविथा-ऽमृध्रो वाजसातये । स त्वं न इन्द्र मृळय २
किमङ्ग रध्रचोदनः सुन्वानस्यावितेदसि । कुवित्स्विन्द्र णः शकः ३
इन्द्र प्र णो रथमव पश्चाच्चित्सन्तमद्रिवः । पुरस्तादेनं मे कृधि ४
हन्तो नु किमाससे प्रथमं नो रथं कृधि । उपमं वाजयु श्रवः ५ ६६५
अवा नो वाजयुं रथं सुकरं ते किमित्परि । अस्मान्त्सु जिग्युषस्कृधि ६
इन्द्र दृह्यस्व पूरसि भद्रा त एति निष्कृतम् । इयं धीर्ऋत्वियावती ७
मा सीमवद्य आ भागु-र्वी काष्ठा हितं धनम् । अपावृक्ता अरत्नयः ८
तुरीयं नाम यज्ञियं यदा करस्तदुश्मसि । आदित्पतिर्न ओहसे ९

॥ ४५ ॥ (ऋ० ८।८१।१-९)
(६७०-६८७) कुसीदी काण्वः ।

आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय । महाहस्ती दक्षिणेन १ ६७०
विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् । तुविमात्रमवोभिः २
नहि त्वा शूर देवा न मर्तासो दित्सन्तम् । भीमं न गां वारयन्ते ३
एतो न्विन्द्रं स्तवामे-शानं वस्वः स्वराजम् । न राधसा मर्धिषन्नः ४
प्र स्तोषदुप गासिष-च्छ्रवत्साम गीयमानम् । अभि राधसा जुगुरत् ५
आ नो भर दक्षिणेना-ऽभि सव्येन प्र मृश । इन्द्र मा नो वसोर्निर्भाक् ६ ६७५
उप क्रमस्वा भर धृषता धृष्णो जनानाम् । अदाशूष्टरस्य वेदः ७
इन्द्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः । अस्माभिः सु तं सनुहि ८
सद्योजुवस्ते वाजा अस्मभ्यं विश्वश्चन्द्राः । वशैश्च मक्षू जरन्ते ९

॥ ४६ ॥ (ऋ० ८।८२।१-९)

आ प्र द्रव परावतो ऽर्वावतश्च वृत्रहन् । मध्वः प्रति प्रभर्मणि १
तीव्राः सोमास आ गहि सुतासो मादयिष्णवः । पिबा दधृग्यथोचिषे २ ६८०

इषा मन्दस्वादु ते ऽरं वराय मन्यवे । भुवत् त इन्दु शं हृदे ३
आ त्वशत्रवा गहि न्युक्थानि च हूयसे । उपमे रोचने दिवः ४
तुभ्यायमद्रिभिः सुतो गोभिः श्रीतो मदाय कम् । प्र सोम इन्द्र हूयते ५
इन्द्र श्रुधि सु मे हव मस्मे सुतस्य गोमतः । वि पीतिं तृप्तिमश्नुहि ६
य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः । पिबेदस्य त्वमीशिषे ७ ६८५
यो अप्सु चन्द्रमा इव सोमश्चमूषु ददृशे । पिबेदस्य त्वमीशिषे ८
यं ते श्येनः पदाभरत् तिरो रजांस्यस्पृतम् । पिबेदस्य त्वमीशिषे ९

॥ ४७ ॥ (ऋ० १।२८।१-४)

(६८८-७१४) आजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातः । अनुष्टुप् ।

यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे । उलूखलसुताना मवेद्विन्द्र जल्गुलः १
यत्र द्वाविव जघना धिषवण्या कृता । उलूखलसुताना मवेद्विन्द्र जल्गुलः २
यत्र नार्यपच्यव मुपच्यवं च शिक्षते । उलूखलसुताना मवेद्विन्द्र जल्गुलः ३ ६९०
यत्र मन्थां विबध्नते रश्मीन् यमितवा इव । उलूखलसुताना मवेद्विन्द्र जल्गुलः ४

॥ ४८ ॥ (ऋ० १।२९।१-७) पंक्तिः ।

यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ १
शिप्रिन् वाजानां पते शचीवस्तव दंसना ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ २
नि ष्वापया मिथूदृशा सस्तामबुध्यमाने ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ३
ससन्तु त्या अरातयो बोधन्तु शूर रातयः ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ४ ६९५
समिन्द्र गर्दभं मृण नुवन्तं पापयामुया ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ५
पताति कुण्डृणाच्या दूरं वातो वनादधि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ६
सर्वं परिक्रोशं जहि जम्भया कृकदाश्वम् ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ७

॥ ४९ ॥ (ऋ० १।३०।१-१६)
१-१०, १२-१५ गायत्री, ११ पादनिचृद्गायत्री, १६ त्रिष्टुप् ।

आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम् । मंहिष्ठं सिञ्च इन्दुभिः १
शतं वा यः शुचीनां सहस्रं वा समाशिराम् । एदु निम्नं न रीयते २ ७००
सं यन्मदाय शुष्मिण एना ह्यस्योदरे । समुद्रो न व्यचो दधे ३
अयमु ते समतसि कपोत इव गर्भधिम् । वचस्तच्चिन्न ओहसे ४
स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते । विभूतिरस्तु सूनृता ५
ऊर्ध्वस्तिष्ठा न ऊतये ऽस्मिन् वाजे शतक्रतो । समन्येषु ब्रवावहै ६
योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये ६ ७०५
आ घा गमद्यदि श्रवत् सहस्रिणीभिरूतिभिः । वाजेभिरुप नो हवम् ८
अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् । यं ते पूर्वं पिता हुवे ९
तं त्वा वयं विश्ववारा ऽऽशास्महे पुरुहूत । सखे वसो जरितृभ्यः १०
अस्माकं शिप्रिणीनां सोमपाः सोमपाव्नाम् । सखे वज्रिन्त्सखीनाम् ११
तथा तदस्तु सोमपाः सखे वज्रिन् तथा कृणु । यथा त उश्मसीष्टये १२ ७१०
रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम १३
आ घ त्वावान् त्मनाप्तः स्तोतृभ्यो धृष्णवियानः । ऋणोरक्षं न चक्र्योः १४
आ यद् दुवः शतक्रत वा कामं जरितॄणाम् । ऋणोरक्षं न शचीभिः १५
शश्वदिन्द्रः पोप्रुथद्भिर्जिगाय नानदद्भिः शाश्वसद्भिर्धनानि ।
स नो हिरण्यरथं दंसनावान् त्स नः सनिता सनये स नोऽदात् १६ ७१४

॥ ५० ॥ (ऋ० १।३२।१-१५)
(७१५-७४४) हिरण्यस्तूप आङ्गिरसः । त्रिष्टुप् ।

इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम् १ ७१५
अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः २
वृषायमाणो ऽवृणीत सोमं त्रिकद्रुकेष्वपिबत् सुतस्य ।
आ सायकं मघवादत्त वज्र महन्नेनं प्रथमजामहीनाम् ३
यदिन्द्राहन् प्रथमजामहीना मान्मायिनाममिनाः प्रोत मायाः ।
आत् सूर्यं जनयन् द्यामुषासं तादीत्ना शत्रुं न किला विवित्से ४

अहन् वृत्रं वृत्रतरं व्यंस—मिन्द्रो वज्रेण महता वधेन ।
स्कन्धांसीव कुलिशेना विवृक्णा—ऽहिः शयत उपपृक् पृथिव्याः ५
अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधमृजीषम् ।
नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः ६ ७१०
अपादहस्तो अपृतन्यदिन्द्र—मास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूषन् पुरुत्रा वृत्रो अशयद् व्यस्तः ७
नदं न भिन्नममुया शयानं मनो रुहाणा अति यन्त्यापः ।
याश्चिद् वृत्रो महिना पर्यतिष्ठत् तासामहिः पत्सुतःशीर्बभूव ८
नीचावया अभवद् वृत्रपुत्रे—न्द्रो अस्या अव वधर्जभार ।
उत्तरा सूरधरः पुत्र आसीद् दानुः शये सहवत्सा न धेनुः ९
अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् ।
वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः १०
दासपत्नीरहिगोपा अतिष्ठन् निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासीद् वृत्रं जघन्वाँ अप तद् ववार ११ ७१५
अश्व्यो वारो अभवस्तदिन्द्र सृके यत् त्वा प्रत्यहन् देव एकः ।
अजयो गा अजयः शूर सोम—मवासृजः सर्तवे सप्त सिन्धून् १२
नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद् ध्रादुनिं च ।
इन्द्रश्च यद् युयुधाते अहिश्चो—तापरीभ्यो मघवा वि जिग्ये १३
अहेर्यातारं कमपश्य इन्द्र हृदि यत् ते जघ्नुषो भीरगच्छत् ।
नव च यन्नवतिं च स्रवन्तीः श्येनो न भीतो अतरो रजांसि १४
इन्द्रो यातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः ।
सेदु राजा क्षयति चर्षणीना—मरान् न नेमिः परि ता बभूव १५

॥ ५१ ॥ (ऋ० १।३२।१-१५)

एतायामोप गव्यन्त इन्द्र—मस्माकं सु प्रमतिं वावृधाति ।
अनामृणः कुविदादस्य रायो गवां केतं परमावर्जते नः १ ७२०
उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि ।
इन्द्रं नमस्यन्नुपमेभिरर्कै—र्यः स्तोतृभ्यो हव्यो अस्ति यामन् २
नि सर्वसेन इषुधीँरसक्त समर्यो गा अजति यस्य वष्टि ।
चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध ३

वधीर्हि दस्युं धनिनं घनेनँ एकश्चरन्नुपशाकेभिरिन्द्र ।
धनोरधि विषुणक् ते व्यायु—न्नयज्वानः सनकाः प्रेतिमीयुः ४
परा चिच्छीर्षा ववृजुस्त इन्द्रा—ऽयज्वानो यज्वभिः स्पर्धमानाः ।
प्र यद् दिवो हरिवः स्थातरुग्र निरव्रताँ अधमो रोदस्योः ५
अयुयुत्सन्ननवद्यस्य सेना—मयातयन्त क्षितयो नवग्वाः ।
वृषायुधो न वध्रयो निरष्टाः प्रवद्भिरिन्द्राच्चितयन्त आयन् ६ ७३५
त्वमेतान् रुदतो जक्षतश्चा—योधयो रजस इन्द्र पारे ।
अवादहो दिव आ दस्युमुच्चा प्र सुन्वतः स्तुवतः शंसमावः ७
चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुम्भमानाः ।
न हिन्वानासस्तितिरुस्त इन्द्रं परि स्पशो अदधात् सूर्येण ८
परि यदिन्द्र रोदसी उभे अबुभोजीर्महिना विश्वतः सीम् ।
अमन्यमानाँ अभि मन्यमानै—र्निर्ब्रह्मभिरधमो दस्युमिन्द्र ९
न ये दिवः पृथिव्या अन्तमापु—र्न मायाभिर्धनदां पर्यभूवन् ।
युजं वज्रं वृषभश्चक्र इन्द्रो निर्ज्योतिषा तमसो गा अदुक्षत् १०
अनु स्वधामक्षरन्नापो अस्या—ऽवर्धत मध्य आ नाव्यानाम् ।
सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ११ ७४०
न्याविध्यदिलीबिशस्य दृळ्हा वि शृङ्गिणमभिनच्छुष्णमिन्द्रः ।
यावत्तरो मघवन् यावदोजो वज्रेण शत्रुमवधीः पृतन्युम् १२
अभि सिध्मो अजिगादस्य शत्रून् वि तिग्मेन वृषभेणा पुरोऽभेत ।
सं वज्रेणासृजद् वृत्रमिन्द्रः प्र स्वां मतिमतिरच्छाशदानः १३
आवः कुत्समिन्द्र यस्मिञ्चाकन् प्रावो युध्यन्तं वृषभं दशद्युम् ।
शफच्युतो रेणुर्नक्षत द्या—मुच्छ्वैत्रेयो नृषाह्याय तस्थौ १४
आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गाम् ।
ज्योक् चिदत्र तस्थिवांसो अक्र—ञ्छत्रूयतामधरा वेदनाकः १५

॥५२॥ (ऋ० १।३३।१-१५)

(७४५-८१३) सव्य आङ्गिरसः । जगती, १४-१५ त्रिष्टुप् ।

अभि त्यं मेषं पुरुहूतमृग्मिय—मिन्द्रं गीर्भिर्मदता वस्वो अर्णवम् ।
यस्य द्यावो न विचरन्ति मानुषा भुजे मंहिष्ठमभि विप्रमर्चत १ ७४५
अभीमवन्वन्त्स्वभिष्टिमूतयो ऽन्तरिक्षप्रां तविषीभिरावृतम् ।
इन्द्रं दक्षास ऋभवो मदच्युतं शतक्रतुं जवनी सूनृतारुहत २

त्वं गोत्रमङ्गिरोभ्योऽवृणोरपो—तात्रये शतदुरेषु गातुवित्।
ससेन चिद् विमदायावहो वस्वा—जावद्रिं वावसानस्य नर्तयन् ३
त्वमपामपिधानावृणोरपा—ऽधारयः पर्वते दानुमद् वसु।
वृत्रं यदिन्द्र शवसावधीरहि—मादित् सूर्यं दिव्यारोहयो दृशे। ४
त्वं मायाभिरप मायिनोऽधमः   स्वधाभिर्ये अधि शुप्तावजुह्वत।
त्वं पिप्रोर्नृमणः प्रारुजः पुरः   प्र ऋजिश्वानं दस्युहत्येष्वाविथ ५
त्वं कुत्सं शुष्णहत्येष्वाविथा—ऽरन्धयोऽतिथिग्वाय शम्बरम्।
महान्तं चिदर्बुदं नि क्रमीः पदा   सनादेव दस्युहत्याय जज्ञिषे ६ ७१०
त्वे विश्वा तविषी सध्र्यग्घिता   तव राधः सोमपीथाय हर्षते
तव वज्रश्चिकिते बाह्वोर्हितो   वृश्चा शत्रोरव विश्वानि वृष्ण्या ७
वि जानीह्यार्यान् ये च दस्यवो   बर्हिष्मते रन्धया शासदव्रतान्।
शाकी भव यजमानस्य चोदिता   विश्वेत् ता ते सधमादेषु चाकन ८
अनुव्रताय रन्धयन्नपव्रता—नाभूभिरिन्द्रः श्नथयन्ननाभुवः।
वृद्धस्य चिद् वर्धतो द्यामिनक्षतः   स्तवानो वम्रो वि जघान संदिहः ९
तक्षद् यत् त उशना सहसा सहो   वि रोदसी मज्मना बाधते शवः।
आ त्वा वातस्य नृमणो मनोयुज   आ पूर्यमाणमवहन्नभि श्रवः १०
मन्दिष्ट यदुशने काव्ये सचाँ   इन्द्रो वङ्कू वङ्कुतराधि तिष्ठति।
उग्रो ययिं निरपः स्रोतसासृजद्   वि शुष्णस्य दृंहिता ऐरयत् पुरः ११ ७१५
आ स्मा रथं वृषपाणेषु तिष्ठसि   शार्यातस्य प्रभृता येषु मन्दसे।
इन्द्र यथा सुतसोमेषु चाकनो   ऽनर्वाणं श्लोकमा रोहसे दिवि १२
अददा अर्भां महते वचस्यवे   कक्षीवते वृचयामिन्द्र सुन्वते।
मेनाभवो वृषणश्वस्य सुक्रतो   विश्वेत् ता ते सवनेषु प्रवाच्या १३
इन्द्रो अश्रायि सुध्यो निरेके   पज्रेषु स्तोमो दुर्यो न यूपः।
अश्वयुर्गव्यू रथयुर्वसूयु—रिन्द्र इद्रायः क्षयति प्रयन्ता १४
इदं नमो वृषभाय स्वराजे   सत्यशुष्माय तवसेऽवाचि।
अस्मिन्निन्द्र वृजने सर्ववीराः   स्मत् सूरिभिस्तव शर्मन्त्स्याम १५

॥ ५३ ॥ (ऋ० १।५१।१-१५) जगती; १३; १५ त्रिष्टुप्।

त्यं सु मेषं महया स्वर्विदं   शतं यस्य सुभ्वः साकमीरते।
अत्यं न वाजं हवनस्यदं रथ—मेन्द्रं ववृत्यामवसे सुवृक्तिभिः १ ७६०

स पर्वतो न धरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे ।
इन्द्रो यद् वृत्रमवधीन्नदीवृत--मुब्जन्नर्णांसि जर्हृषाणो अन्धसा २
स हि द्वरो द्वरिषु वव्र ऊधनि चन्द्रबुध्नो मदवृद्धो मनीषिभिः ।
इन्द्रं तमह्वे स्वपस्यया धिया मंहिष्ठरातिं स हि पप्रिरन्धसः ३
आ यं पृणन्ति दिवि सद्मबर्हिषः समुद्रं न सुभ्व१: स्वा अभिष्टयः ।
तं वृत्रहत्ये अनु तस्थुरूतयः शुष्मा इन्द्रमवाता अह्रुतप्सवः ४
अभि स्ववृष्टिं मदे अस्य युध्यतो रघ्वीरिव प्रवणे सस्रुरूतयः ।
इन्द्रो यद् वज्री धृषमाणो अन्धसा भिनद् वलस्य परिधींरिव त्रितः ५
परीं घृणा चरति तित्विषे शवो ऽपो वृत्वी रजसो बुध्नमाशयत् ।
वृत्रस्य यत् प्रवणे दुर्गृभिश्वनो निजघन्थ हन्वोरिन्द्र तन्यतुम् ६ ७६५

ह्रदं न हि त्वा न्यृषन्त्यूर्मयो ब्रह्माणीन्द्र तव यानि वर्धना ।
त्वष्टा चित् ते युज्यं वावृधे शव--स्ततक्ष वज्रमभिभूत्योजसम् ७
जघन्वाँ उ हरिभिः संभृतक्रत--विन्द्र वृत्रं मनुषे गातुयन्नपः ।
अयच्छथा बाह्वोर्वज्रमायस--मधारयो दिव्या सूर्यं दृशे ८
बृहत् स्वश्चन्द्रममवद् यदुक्थ्य१--मकृण्वत भियसा रोहणं दिवः ।
यन्मानुषप्रधना इन्द्रमूतयः स्वर्नृषाचो मरुतोऽमदन्ननु ९
द्यौश्चिदस्यामवाँ अहेः स्वना--दयोयवीद् भियसा वज्र इन्द्र ते ।
वृत्रस्य यद् बद्बधानस्य रोदसी मदे सुतस्य शवसाभिनच्छिरः १०
यदिन्न्विन्द्र पृथिवी दशभुजि--रहानि विश्वा ततनन्त कृष्टयः ।
अत्राह ते मघवन् विश्रुतं सहो द्यामनु शवसा बर्हणा भुवत् ११ ७७०

त्वमस्य पारे रजसो व्योमनः स्वभूत्योजा अवसे धृषन्मनः ।
चकृषे भूमिं प्रतिमानमोजसो ऽपः स्वः परिभूरेष्या दिवम् १२
त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः ।
विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान् १३
न यस्य द्यावापृथिवी अनु व्यचो न सिन्धवो रजसो अन्तमानशुः ।
नोत स्ववृष्टिं मदे अस्य युध्यत एको अन्यच्चकृषे विश्वमानुषक् १४
आर्चन्नत्र मरुतः सस्मिन्नाजौ विश्वे देवासो अमदन्ननु त्वा ।
वृत्रस्य यद् भृष्टिमता वधेन नि त्वमिन्द्र प्रत्यानं जघन्थ १५

॥ ५४ ॥ (ऋ० १।५३।१-११) जगती. १०-११ त्रिष्टुप्।

न्यू३ षु वाचं प्र महे भरामहे गिर इन्द्राय सदने विवस्वतः ।
नू चिद्धि रत्नं ससतामिवाविद—न्न दुष्टुतिर्द्रविणोदेषु शस्यते १ ७७५
दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इनस्पतिः ।
शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि २
शचीव इन्द्र पुरुकृद् द्युमत्तम तवेदिदमभितश्चेकिते वसु ।
अतः संगृभ्याभिभूत आ भर मा त्वायतो जरितुः काममूनयीः ३
एभिर्द्युभिः सुमना एभिरिन्दुभि—र्निरुन्धानो अमतिं गोभिरश्विना ।
इन्द्रेण दस्युं दरयन्त इन्दुभि—र्युतद्वेषसः समिषा रभेमहि ४
समिन्द्र राया समिषा रभेमहि सं वाजेभिः पुरुश्चन्द्रैरभिद्युभिः ।
सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि ५
ते त्वा मदा अमदन् तानि वृष्ण्या ते सोमासो वृत्रहत्येषु सत्पते ।
यत् कारवे दश वृत्राण्यप्रति बर्हिष्मते नि सहस्राणि बर्हयः ६ ७८०
युधा युधमुप घेदेषि धृष्णुया पुरा पुरं समिदं हंस्योजसा ।
नम्या यदिन्द्र सख्या परावति निबर्हयो नमुचिं नाम मायिनम् ७
त्वं करञ्जमुत पर्णयं वधी—स्तेजिष्ठयातिथिग्वस्य वर्तनी ।
त्वं शता वङ्गृदस्याभिनत् पुरो ऽनानुदः परिषूता ऋजिश्वना ८
त्वमेताञ्जनराज्ञो द्विर्दशा—ऽबन्धुना सुश्रवसोपजग्मुषः ।
षष्टिं सहस्रा नवतिं नव श्रुतो नि चक्रेण रथ्या दुष्पदावृणक् ९
त्वमाविथ सुश्रवसं तवोतिभि—स्तव त्रामभिरिन्द्र तूर्वयाणम् ।
त्वमस्मै कुत्समतिथिग्वमायुं महे राज्ञे यूने अरन्धनायः १०
य उदृचीन्द्र देवगोपाः सखायस्ते शिवतमा असाम ।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ११ ७८५

॥ ५५ ॥ (ऋ० १।५४।१-११) जगती; ६, ८-९, ११ त्रिष्टुप्।

मा नो अस्मिन् मघवन् पृत्स्वंहसि नहि ते अन्तः शवसः परीणशे ।
अक्रन्दयो नद्यो३ रोरुवद् वना कथा न क्षोणीर्भियसा समारत १
अर्चा शक्राय शाकिने शचीवते शृण्वन्तमिन्द्रं महयन्नभि ष्टुहि ।
यो धृष्णुना शवसा रोदसी उभे वृषा वृषत्वा वृषभो न्यृञ्जते २

अर्चा दिवे बृहते शूष्यं१ वचः स्वक्षत्रं यस्य धृषतो धृषन्मनः ।
बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः ३
त्वं दिवो बृहतः सानु कोपयो ऽव त्मना धृषता शम्बरं भिनत् ।
यन्मायिनो व्रन्दिनो मन्दिना धृष-च्छितां गभस्तिमशनिं पृतन्यसि ४
नि यद्वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चिद्व्रन्दिनो रोरुवद्वना ।
प्राचीनेन मनसा बर्हणावता यदद्या चित्कृणवः कस्त्वा परि ५ ७९०
त्वमाविथ नर्यं तुर्वशं यदुं त्वं तुर्वीतिं वय्यं शतक्रतो ।
त्वं रथमेतशं कृत्व्ये धने त्वं पुरो नवतिं दम्भयो नव ६
स घा राजा सत्पतिः शूशुवज्जनो रातहव्यः प्रति यः शासमिन्वति ।
उक्था वा यो अभिगृणाति राधसा दानुरस्मा उपरा पिन्वते दिवः ७
असमं क्षत्रमसमा मनीषा प्र सोमपा अपसा सन्तु नेमे ।
ये त इन्द्र ददुषो वर्धयन्ति महि क्षत्रं स्थविरं वृष्ण्यं च ८
तुभ्येदेते बहुला अद्रिदुग्धा-श्चमूषदश्चमसा इन्द्रपानाः ।
व्यश्नुहि तर्पया काममेषा-मथा मनो वसुदेयाय कृष्व ९
अपामतिष्ठद्धरुणह्वरं तमो ऽन्तर्वृत्रस्य जठरेषु पर्वतः ।
अभीमिन्द्रो नद्यो वव्रिणा हिता विश्वा अनुष्ठाः प्रवणेषु जिघ्नते १० ७९५
स शेवृधमधि धा द्युम्नमस्मे महि क्षत्रं जनाषाळिन्द्र तव्यम् ।
रक्षा च नो मघोनः पाहि सूरीन् राये च नः स्वपत्या इषे धाः ११

॥ ५६ ॥ (ऋ० १।५५।१-८) जगती ।

दिवश्चिदस्य वरिमा वि पप्रथ इन्द्रं न मह्ना पृथिवी चन प्रति ।
भीमस्तुविष्माञ्चर्षणिभ्य आतपः शिशीते वज्रं तेजसे न वंसगः १
सो अर्णवो न नद्यः समुद्रियः प्रति गृभ्णाति विश्रिता वरीमभिः ।
इन्द्रः सोमस्य पीतये वृषायते सनात्स युध्म ओजसा पनस्यते २
त्वं तमिन्द्र पर्वतं न भोजसे महो नृम्णस्य धर्मणामिरज्यसि ।
प्र वीर्येण देवताति चेकिते विश्वस्मा उग्रः कर्मणे पुरोहितः ३
स इद्वने नमस्युभिर्वचस्यते चारु जनेषु प्रब्रुवाण इन्द्रियम् ।
वृषा छन्दुर्भवति हर्यतो वृषा क्षेमेण धेनां मघवा यदिन्वति ४ ८००
स इन्महानि समिथानि मज्मना कृणोति युध्म ओजसा जनेभ्यः ।
अधा चन श्रद्दधति त्विषीमत इन्द्राय वज्रं निघनिघ्नते वधम् ५

स हि श्रवस्युः सदनानि कृत्रिमा क्ष्मया वृधान ओजसा विनाशयन् ।
ज्योतींषि कृण्वन्नवृकाणि यज्यवे ऽव सुक्रतुः सर्तवा अपः सृजत ६
दानाय मनः सोमपावन्नस्तु ते ऽर्वाञ्चा हरी वन्दनश्रुदा कृधि ।
यमिष्ठासः सारथयो य इन्द्र ते न त्वा केता आ दभ्नुवन्ति भूर्णयः ७
अप्रक्षितं वसु बिभर्षि हस्तयो रषाळ्हं सहस्तन्वि श्रुतो दधे ।
आवृतासोऽवतासो न कर्तृभि स्तनूषु ते क्रतव इन्द्र भूरयः ८

॥५७॥ (ऋ० १।५५।६-८)

एष प्र पूर्वीरव तस्य चम्रिषो ऽत्यो न योषामुदयंस्त भुर्वणिः ।
दक्षं महे पाययते हिरण्ययं रथमावृत्या हरियोगमृभ्वसम् १ ८०५
तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः ।
पतिं दक्षस्य विदथस्य नू सहो गिरिं न वेना अधि रोह तेजसा २
स तुर्वणिर्महाँ अरेणु पौंस्ये गिरेर्भृष्टिर्न भ्राजते तुजा शवः ।
येन शुष्णं मायिनमायसो मदे दुध्र आभूषु रामयन्नि दामनि ३
देवी यदि तविषी त्वावृधोतय इन्द्रं सिषक्त्युषसं न सूर्यः ।
यो धृष्णुना शवसा बाधते तम इयर्ति रेणुं बृहदर्हरिष्वणिः ४
वि यत् तिरो धरुणमच्युतं रजो ऽतिष्ठिपो दिव आतासु बर्हणा ।
स्वर्मीळ्हे यन्मद इन्द्र हर्ष्याहन् वृत्रं निरपामौब्जो अर्णवम् ५
त्वं दिवो धरुणं धिष ओजसा पृथिव्या इन्द्र सदनेषु माहिनः ।
त्वं सुतस्य मदे अरिणा अपो वि वृत्रस्य समया पाष्यारुजः ६ ८१०

॥५८॥ (ऋ० १।५६।१-६)

प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे ।
अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम् १
अध ते विश्वमनु हासदिष्टय आपो निम्नेव सवना हविष्मतः ।
यत् पर्वते न समशीत हर्यत इन्द्रस्य वज्रः श्नथिता हिरण्ययः २
अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे ।
यस्य धाम श्रवसे नामेन्द्रियं ज्योतिरकारि हरितो नायसे ३
इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
नहि त्वदन्यो गिर्वणो गिरः सघत् क्षोणीरिव प्रति नो हर्य तद् वचः ४
भूरि त इन्द्र वीर्यं तव स्मस्य स्य स्तोतुर्मघवन् काममा पृण ।
अनु ते द्यौर्बृहती वीर्यं मम इयं च ते पृथिवी नेम ओजसे ५ ८१५

त्वं तमिन्द्र पर्वतं महामुरुं वज्रेण वज्रिन् पर्वशश्चकर्तिथ ।
अवासृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ६

॥ ५९ ॥ (ऋ० १।१०१।८-११)

(८१७-८५५) कुत्स आङ्गिरसः । (१ गर्भस्राविण्युपनिषद्) । जगती, ८-११ त्रिष्टुप् ।

प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे १
यो व्यंसं जाहृषाणेन मन्युना यः शम्बरं यो अहन् पिप्रुमव्रतम् ।
इन्द्रो यः शुष्णमशुषं न्यावृणङ् मरुत्वन्तं सख्याय हवामहे २
यस्य द्यावापृथिवी पौंस्यं महद् यस्य व्रते वरुणो यस्य सूर्यः ।
यस्येन्द्रस्य सिन्धवः सश्चति व्रतं मरुत्वन्तं सख्याय हवामहे ३
यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः ।
वीळोश्चिदिन्द्रो यो असुन्वतो वधो मरुत्वन्तं सख्याय हवामहे ४ ८२०
यो विश्वस्य जगतः प्राणतस्पति-र्यो ब्रह्मणे प्रथमो गा अविन्दत् ।
इन्द्रो यो दस्यूँरधराँ अवातिरन् मरुत्वन्तं सख्याय हवामहे ५
यः शूरेभिर्हव्यो यश्च भीरुभि-र्यो धावद्भिर्हूयते यश्च जिग्युभिः ।
इन्द्रं यं विश्वा भुवनाभि संदधु-र्मरुत्वन्तं सख्याय हवामहे ६
रुद्राणामेति प्रदिशा विचक्षणो रुद्रेभिर्योषा तनुते पृथु ज्रयः ।
इन्द्रं मनीषा अभ्यर्चति श्रुतं मरुत्वन्तं सख्याय हवामहे ७
यद् वा मरुत्वः परमे सधस्थे यद् वावमे वृजने मादयासे ।
अत आ याह्यध्वरं नो अच्छा त्वाया हविश्चकृमा सत्यराधः ८
त्वायेन्द्र सोमं सुषुमा सुदक्ष त्वाया हविश्चकृमा ब्रह्मवाहः ।
अधा नियुत्वः सगणो मरुद्भि-रस्मिन् यज्ञे बर्हिषि मादयस्व ९ ८२५
मादयस्व हरिभिर्ये त इन्द्र वि ष्यस्व शिप्रे वि सृजस्व धेने ।
आ त्वा सुशिप्र हरयो वहन्तू-शन् हव्यानि प्रति नो जुषस्व १०
मरुत्स्तोत्रस्य वृजनस्य गोपा वयमिन्द्रेण सनुयाम वाजम् ।
तन्नो मित्रो वरुणो मामहन्ता-मदितिः सिन्धुः पृथिवी उत द्यौः ११

॥ ६० ॥ (ऋ० १।१०२।१-११) १-१० जगती; ११ त्रिष्टुप् ।

इमां ते धियं प्र भरे महो महीं-मस्य स्तोत्रे धिषणा यत् त आनजे ।
तमुत्सवे च प्रसवे च सासहि-मिन्द्रं देवासः शवसामदन्ननु १

अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः।
अस्मे सूर्याचन्द्रमसाभिचक्षे श्रद्धे कमिन्द्र चरतो वितर्तुरम् २
तं स्मा रथं मघवन् प्राव सातये जैत्रं यं ते अनुमदाम संगमे।
आजा न इन्द्र मनसा पुरुष्टुत त्वायद्भ्यो मघवञ्छर्म यच्छ नः ३ ८३०
वयं जयेम त्वया युजा वृत-मस्माकमंशमुदवा भरेभरे।
अस्मभ्यमिन्द्र वरिवः सुगं कृधि प्र शत्रूणां मघवन् वृष्ण्या रुज ४
नाना हि त्वा हवमाना जना इमे धनानां धर्तरवसा विपन्यवः।
अस्माकं स्मा रथमा तिष्ठ सातये जैत्रं हीन्द्र निभृतं मनस्तव ५
गोजिता बाहू अमितक्रतुः सिमः कर्मन्कर्मञ्छतमूतिः खजंकरः।
अकल्प इन्द्रः प्रतिमानमोजसा-ऽथा जना वि ह्वयन्ते सिषासवः ६
उत ते शतान्मघवन्नुच्च भूयस उत सहस्राद् रिरिचे कृष्टिषु श्रवः।
अमात्रं त्वा धिषणा तित्विषे म-ह्यधा वृत्राणि जिघ्नसे पुरंदर ७
त्रिविष्टिधातु प्रतिमानमोजस-स्तिस्रो भूमीर्नृपते त्रीणि रोचना।
अतीदं विश्वं भुवनं ववक्षिथा-ऽशत्रुरिन्द्र जनुषा सनादसि ८ ८३५
त्वां देवेषु प्रथमं हवामहे त्वं बभूथ पृतनासु सासहिः।
सेमं नः कारुमुपमन्युमुद्भिद-मिन्द्रः कृणोतु प्रसवे रथं पुरः ९
त्वं जिगेथ न धना रुरोधिथा-ऽर्भेष्वाजा मघवन् महत्सु च।
त्वामुग्रमवसे सं शिशीम-स्यथा न इन्द्र हवनेषु चोदय १०
विश्वाहेन्द्रो अधिवक्ता नो अ-स्त्वपरिह्वृताः सनुयाम वाजम्।
तन्नो मित्रो वरुणो मामहन्ता-मदितिः सिन्धुः पृथिवी उत द्यौः ११

॥ ३१ ॥ (ऋ० १।१०३।१-८) त्रिष्टुप्।

तत् त इन्द्रियं परमं पराचै-रधारयन्त कवयः पुरेदम्।
क्षमेदमन्यद् दिव्य१न्यदस्य समी पृच्यते समनेव केतुः १
स धारयत् पृथिवीं पप्रथच्च वज्रेण हत्वा निरपः ससर्ज।
अहन्नहिमभिनद्रौहिणं व्यहन् व्यंसं मघवा शचीभिः २ ८४०
स जातूभर्मा श्रद्दधान ओजः पुरो विभिन्दन्नचरद् वि दासीः।
विद्वान् वज्रिन् दस्यवे हेतिमस्या-ऽऽर्यं सहो वर्धया द्युम्नमिन्द्र ३
तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत्।
उपप्रयन् दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे ४

तदस्येदं पश्यता भूरि पुष्टं श्रदिन्द्रस्य धत्तन वीर्याय ।
स गा अविन्दत् सो अविन्ददश्वान् त्स ओषधीः सो अपः स वनानि ५
भूरिकर्मणे वृषभाय वृष्णे सत्यशुष्माय सुनवाम सोमम् ।
य आहत्या परिपन्थीव शूरो ऽयज्वनो विभजन्नेति वेदः ६
तदिन्द्र प्रेव वीर्यं चकर्थ यत् ससन्तं वज्रेणाबोधयोऽहिम् ।
अनु त्वा पत्नीर्हृषितं वयश्च विश्वे देवासो अमदन्ननु त्वा ७ ८४५
शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र यदावधीर्वि पुरः शम्बरस्य ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ८

॥ ६१ ॥ (ऋ० १।१०३।१-८)

योनिष्ट इन्द्र निषदे अकारि तमा नि षीद स्वानो नार्वा ।
विमुच्या वयोऽवसायाश्वान् दोषा वस्तोर्वहीयसः प्रपित्वे १
ओ त्ये नर इन्द्रमूतये गुर्नू चित् तान्त्सद्यो अध्वनो जगम्यात् ।
देवासो मन्युं दासस्य श्चम्नन् ते न आ वक्षन्त्सुविताय वर्णम् २
अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन् ।
क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः ३
युयोप नाभिरुपरस्यायोः प्र पूर्वाभिस्तिरते राष्टि शूरः ।
अञ्जसी कुलिशी वीरपत्नी पयो हिन्वाना उदभिर्भरन्ते ४ ८५०
प्रति यत् स्या नीथादर्शि दस्योरोको नाच्छा सदनं जानती गात् ।
अध स्मा नो मघवञ्चर्कृतादिन्मा नो मघेव निष्षपी परा दाः ५
स त्वं न इन्द्र सूर्ये सो अप्स्वनागास्त्व आ भज जीवशंसे ।
मान्तरां भुजमा रीरिषो नः श्रद्धितं ते महत इन्द्रियाय ६
अधा मन्ये श्रत् ते अस्मा अधायि वृषा चोदस्व महते धनाय ।
मा नो अकृते पुरुहूत योनाविन्द्र क्षुध्यद्भ्यो वय आसुतिं दाः ७
मा नो वधीरिन्द्र मा परा दा मा नः प्रिया भोजनानि प्र मोषीः ।
आण्डा मा नो मघवञ्छक्र निर्भेन्मा नः पात्रा भेत् सहजानुषाणि ८
अर्वाङेहि सोमकामं त्वाहुरयं सुतस्तस्य पिबा मदाय ।
उरुव्यचा जठर आ वृषस्व पितेव नः शृणुहि हूयमानः ९ ८५५

॥ ६२ ॥ (ऋ० १।१०४।१-९)

[८५६-८९९] नोधा गौतमः ।

अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय ।
ऋचीषमायाध्रिगव ओहमिन्द्राय ब्रह्माणि राततमा १

अस्मा इदु प्रय इव प्र यंसि भराम्याङ्गूषं बाधे सुवृक्ति ।
इन्द्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयन्त २
अस्मा इदु त्यमुपमं स्वर्षां भराम्याङ्गूषमास्येन ।
मंहिष्ठमच्छोक्तिभिर्मतीनां सुवृक्तिभिः सूरिं वावृधध्यै ३
अस्मा इदु स्तोमं सं हिनोमि रथं न तष्टेव तत्सिनाय ।
गिरश्च गिर्वाहसे सुवृक्ती—न्द्राय विश्वमिन्वं मेधिराय ४
अस्मा इदु सप्तिमिव श्रवस्ये—न्द्रायार्कं जुह्वा समञ्जे ।
वीरं दानौकसं वन्दध्यै पुरां गूर्तश्रवसं दर्माणम् ५ ८६०
अस्मा इदु त्वष्टा तक्षद् वज्रं स्वपस्तमं स्वर्यं रणाय ।
वृत्रस्य चिद् विदद् येन मर्म तुजन्नीशानस्तुजता कियेधाः ६
अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवाञ्चार्वन्ना ।
मुषायद् विष्णुः पचतं सहीयान् विध्यद् वराहं तिरो अद्रिमस्ता ७
अस्मा इदु ग्नाश्चिद् देवपत्नी—रिन्द्रायार्कमहिहत्य ऊवुः ।
परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परि ष्टः ८
अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यन्तरिक्षात् ।
स्वराळिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ९
अस्येदेव शवसा शुषन्तं वि वृश्चद् वज्रेण वृत्रमिन्द्रः ।
गा न व्राणा अवनीरमुञ्च—दभि श्रवो दावने सचेताः १० ८६५
अस्येदु त्वेषसा रन्त सिन्धवः परि यद् वज्रेण सीमयच्छत् ।
ईशानकृद् दाशुषे दशस्यन् तुर्वीतये गाधं तुर्वणिः कः ११
अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः ।
गोर्न पर्व वि रदा तिरश्चे—ष्यन्नर्णांस्यपां चरध्यै १२
अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः ।
युधे यदिष्णान आयुधा—न्यृघायमाणो निरिणाति शत्रून् १३
अस्येदु भिया गिरयश्च दृळ्हा द्यावा च भूमा जनुषस्तुजेते ।
उपो वेनस्य जोगुवान ओणिं सद्यो भुवद् वीर्याय नोधाः १४
अस्मा इदु त्यदनु दाय्येषा—मेको यद् वव्ने भूरेरीशानः ।
प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रः १५ ८७०

एवा ते हारियोजना सुवृक्ती—न्द्र ब्रह्माणि गोतमासो अक्रन् ।
ऐषु विश्वपेशसं धियं धाः प्रातर्मक्षू धियावसुर्जगम्यात् १६

॥ ६४ ॥ (ऋ० १।६२।१-१३)

प्र मन्महे शवसानाय शूष—माङ्गूषं गिर्वणसे अङ्गिरस्वत् ।
सुवृक्तिभिः स्तुवत ऋग्मियाया—ऽर्चामार्कं नरे विश्रुताय १
प्र वो महे महि नमो भरध्व—माङ्गूष्यं शवसानाय साम ।
येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन् २
इन्द्रस्याङ्गिरसां चेष्टौ विदत् सरमा तनयाय धासिम् ।
बृहस्पतिर्भिनदद्रिं विदद् गाः समुस्रियाभिर्वावशन्त नरः ३
स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो३ नवग्वैः ।
सरण्युभिः फलिगमिन्द्र शक्र वलं रवेण दरयो दशग्वैः ४ ८७५
गृणानो अङ्गिरोभिर्दस्म वि व—रुषसा सूर्येण गोभिरन्धः ।
वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभायः ५
तदु प्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः ।
उपह्वरे यदुपरा अपिन्वन् मध्वर्णसो नद्य१श्चतस्रः ६
द्विता वि वव्रे सनजा सनीळे अयास्यः स्तवमानेभिरर्कैः ।
भगो न मेने परमे व्योम—न्नधारयद् रोदसी सुदंसाः ७
सनाद् दिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवैः ।
कृष्णेभिरक्तोषा रुशद्भि—र्वपुर्भिरा चरतो अन्यान्या ८
सनेमि सख्यं स्वपस्यमानः सूनुर्दाधार शवसा सुदंसाः ।
आमासु चिद् दधिषे पक्वमन्तः पयः कृष्णासु रुशद् रोहिणीषु ९ ८८०
सनात् सनीळा अवनीरवाता व्रता रक्षन्ते अमृताः सहोभिः ।
पुरू सहस्रा जनयो न पत्नी—र्दुवस्यन्ति स्वसारो अह्रयाणम् १०
सनायुवो नमसा नव्यो अर्कै—र्वसूयवो मतयो दस्म दद्रुः ।
पतिं न पत्नीरुशतीरुशन्तं स्पृशन्ति त्वा शवसावन् मनीषाः ११
सनादेव तव रायो गभस्तौ न क्षीयन्ते नोप दस्यन्ति दस्म ।
द्युमाँ असि क्रतुमाँ इन्द्र धीरः शिक्षा शचीवस्तव नः शचीभिः १२
सनायते गोतम इन्द्र नव्य—मतक्षद् ब्रह्म हरियोजनाय ।
सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात् १३

॥ ६५ ॥ (ऋ० १।६३।१-९)

त्वं महाँ इन्द्र यो ह शुष्मैर्द्यावा जज्ञानः पृथिवी अमे धाः।
यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृळ्हासः किरणा नैजन् १ ८८५
आ यद्धरी इन्द्र विव्रता वेरा ते वज्रं जरिता बाह्वोर्धात्।
येनाविहर्यतक्रतो अमित्रान् पुर इष्णासि पुरुहूत पूर्वीः २
त्वं सत्य इन्द्र धृष्णुरेतान् त्वमृभुक्षा नर्यस्त्वं षाट्।
त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते सचाहन् ३
त्वं ह त्यदिन्द्र चोदीः सखा वृत्रं यद् वज्रिन् वृषकर्मन्नुभ्नाः।
यद्ध शूर वृषमणः पराचैर्वि दस्यूँर्योनावकृतो वृथाषाट् ४
त्वं ह त्यदिन्द्रारिषण्यन् दृळ्हस्य चिन्मर्तानामजुष्टौ।
व्य१स्मदा काष्ठा अर्वते वर्घनेव वज्रिञ्छ्नथिह्यमित्रान् ५
त्वां ह त्यदिन्द्रार्णसातौ स्वर्मीळ्हे नर आजा हवन्ते।
तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत् ६ ८९०
त्वं ह त्यदिन्द्र सप्त युध्यन् पुरो वज्रिन् पुरुकुत्साय दर्दः।
बर्हिर्न यत् सुदासे वृथा वर्गंहो राजन् वरिवः पूरवे कः ७
त्वं त्यां न इन्द्र देव चित्रामिषमापो न पीपयः परिज्मन्।
यया शूर प्रत्यस्मभ्यं यंसि त्मनमूर्जं न विश्वध क्षरध्यै ८
अकारि त इन्द्र गोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्याम्।
सुपेशसं वाजमा भरा नः प्रातर्मक्षू धियावसुर्जगम्यात् ९

॥ ६६ ॥ (ऋ० ८।८८।१-६)

[प्रगाथः= (विषमा बृहती, समा सतोबृहती)।]

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे १
द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम्।
क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे २ ८९५
न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीळवः।
यद् दित्ससि स्तुवते मावते वसु नकिष्टदा मिनाति ते ३
योद्धासि क्रत्वा शवसोत दंसना विश्वा जाताभि मज्मना।
आ त्वायमर्क ऊतये ववर्तति यं गोतमा अजीजनन् ४

प्र हि रिरिक्ष ओजसा दिवो अन्तेभ्यस्परि
न त्वा विव्याच रज इन्द्र पार्थिव—मनु स्वधां ववक्षिथ ५
नकिः परिष्टिर्मघवन् मघस्य ते यद् दाशुषे दशस्यसि ।
अस्माकं बोध्युचथस्य चोदिता मंहिष्ठो वाजसातये ६

॥ २७ ॥ (ऋ० १।८०।१-१६)

[१००-११५] गोतमो राहूगणः । (अथर्वा, मनुः, दध्यङ् च) । पंक्तिः ।

इत्था हि सोम इन्मदे ब्रह्मा चकार वर्धनम् ।
शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहि—मर्चन्ननु स्वराज्यम् १ १००
स त्वामदद् वृषा मदः सोमः श्येनाभृतः सुतः ।
येना वृत्रं निरद्भ्यो जघन्थ वज्रिन्नोजसा—ऽर्चन्ननु स्वराज्यम् २
प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते ।
इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपो ऽर्चन्ननु स्वराज्यम् ३
निरिन्द्र भूम्या अधि वृत्रं जघन्थ निर्दिवः ।
सृजा मरुत्वतीरव जीवधन्या इमा अपो ऽर्चन्ननु स्वराज्यम् ४
इन्द्रो वृत्रस्य दोधतः सानुं वज्रेण हीळितः ।
अभिक्रम्याव जिघ्नते ऽपः सर्माय चोदय—न्नर्चन्ननु स्वराज्यम् ५
अधि सानौ नि जिघ्नते वज्रेण शतपर्वणा ।
मन्दान इन्द्रो अन्धसः सखिभ्यो गातुमिच्छ—त्यर्चन्ननु स्वराज्यम् ६ १०५
इन्द्र तुभ्यमिदद्रिवो ऽनुत्तं वज्रिन् वीर्यम् ।
यद्ध त्यं मायिनं मृगं तमु त्वं माययावधी—रर्चन्ननु स्वराज्यम् ७
वि ते वज्रासो अस्थिर—न्नवतिं नाव्याः अनु ।
महत् त इन्द्र वीर्यं बाह्वोस्ते बलं हित—मर्चन्ननु स्वराज्यम् ८
सहस्रं साकमर्चत परि ष्टोभत विंशतिः ।
शतैनमन्वनोनवु—रिन्द्राय ब्रह्मोद्यत—मर्चन्ननु स्वराज्यम् ९
इन्द्रो वृत्रस्य तविषीं निरहन्त्सहसा सहः ।
महत् तदस्य पौंस्यं वृत्रं जघन्वाँ असृज—दर्चन्ननु स्वराज्यम् १०
इमे चित् तव मन्यवे वेपेते भियसा मही ।
यदिन्द्र वज्रिन्नोजसा वृत्रं मरुत्वाँ अवधी—रर्चन्ननु स्वराज्यम् ११ ११०

न वेपसा न तन्यते—न्द्रं वृत्रो वि बीभयत् ।
अभ्येनं वज्र आयसः सहस्रभृष्टिरायता—ऽर्चन्ननु स्वराज्यम् १२
यद् वृत्रं तव चाशनिं वज्रेण समयोधयः ।
अहिमिन्द्र जिघांसतो दिवि ते बद्बधे शवो ऽर्चन्ननु स्वराज्यम् १३
अभिष्टने ते अद्रिवो यत् स्था जगच्च रेजते ।
त्वष्टा चित् तव मन्यव इन्द्र वेविज्यते भिया—ऽर्चन्ननु स्वराज्यम् १४
नहि नु यादधीमसी—न्द्रं को वीर्या परः ।
तस्मिन्नृम्णमुत क्रतुं देवा ओजांसि सं दधु—रर्चन्ननु स्वराज्यम् १५
यामथर्वा मनुष्पिता दध्यङ् धियमत्नत ।
तस्मिन् ब्रह्माणि पूर्वथे—न्द्र उक्था समग्मता—ऽर्चन्ननु स्वराज्यम् १६ ९१५

॥ ६८ ॥ (ऋ० १।८१।१-९)

इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषू—तेमर्भे हवामहे स वाजेषु प्र नोऽविषत् १
असि हि वीर सेन्यो ऽसि भूरि परादिः ।
असि दभ्रस्य चिद् वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु २
यदुदीरत आजयो धृष्णवे धीयते धना ।
युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधो ऽस्माँ इन्द्र वसौ दधः ३
क्रत्वा महाँ अनुष्वधं भीम आ वावृधे शवः ।
श्रिय ऋष्व उपाकयो—र्नि शिप्री हरिवान् दधे हस्तयोर्वज्रमायसम् ४
आ पप्रौ पार्थिवं रजो बद्बधे रोचना दिवि ।
न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यते ऽति विश्वं ववक्षिथ ५ ९२०
यो अर्यो मर्तभोजनं परादादाति दाशुषे ।
इन्द्रो अस्मभ्यं शिक्षतु वि भजा भूरि ते वसु भक्षीय तव राधसः ६
मदेमदे हि नो ददि—र्यूथा गवामृजुक्रतुः ।
सं गृभाय पुरू शतो—भयाहस्त्या वसु शिशीहि राय आ भर ७
मादयस्व सुते सचा शवसे शूर राधसे ।
विद्मा हि त्वा पुरूवसु—मुप कामान्त्ससृज्महे ऽथा नोऽविता भव ८
एते त इन्द्र जन्तवो विश्वं पुष्यन्ति वार्यम् ।
अन्तर्हि ख्यो जनाना—मर्यो वेदो अदाशुषां तेषां नो वेद आ भर ९

*

॥६९॥ (ऋ० १।८२।१-६) पंक्तिः; ६ जगती।

उपो षु शृणुही गिरो मघवन् मातथा इव।
यदा नः सूनृतावतः कर आदर्थयास इद् योजा न्विन्द्र ते हरी १ ११५
अक्षन्नमीमदन्त ह्यव प्रिया अधूषत।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी २
सुसंदृशं त्वा वयं मघवन् वन्दिषीमहि।
प्र नूनं पूर्णवन्धुरः स्तुतो याहि वशाँ अनु योजा न्विन्द्र ते हरी ३
स घा तं वृषणं रथमधि तिष्ठाति गोविदम्।
यः पात्रं हारियोजनं पूर्णमिन्द्र चिकेतति योजा न्विन्द्र ते हरी ४
युक्तस्ते अस्तु दक्षिण उत सव्यः शतक्रतो।
तेन जायामुप प्रियां मन्दानो याह्यन्धसो योजा न्विन्द्र ते हरी ५
युनज्मि ते ब्रह्मणा केशिना हरी उप प्र याहि दधिषे गभस्त्योः
उत त्वा सुतासो रभसा अमन्दिषुः पूषण्वान् वज्रिन्त्समु पत्न्यामदः ६ १२०

॥७०॥ (ऋ० १।८३।१-६) जगती।

अश्वावति प्रथमो गोषु गच्छति सुप्रावीरिन्द्र मर्त्यस्तवोतिभिः।
तमित् पृणक्षि वसुना भवीयसा सिन्धुमापो यथाभितो विचेतसः १
आपो न देवीरुप यन्ति होत्रियमवः पश्यन्ति विततं यथा रजः।
प्राचैर्देवासः प्र णयन्ति देवयुं ब्रह्मप्रियं जोषयन्ते वरा इव २
अधि द्वयोरदधा उक्थ्यं वचो यतस्रुचा मिथुना या सपर्यतः।
असंयत्तो व्रते ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वते ३
आदङ्गिराः प्रथमं दधिरे वय इद्धाग्नयः शम्या ये सुकृत्यया।
सर्वं पणेः समविन्दन्त भोजनमश्वावन्तं गोमन्तमा पशुं नरः ४
यज्ञैरथर्वा प्रथमः पथस्तते ततः सूर्यो व्रतपा वेन आजनि।
आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे ५ १२५
बर्हिर्वा यत् स्वपत्याय वृज्यते ऽर्को वा श्लोकमाघोषते दिवि।
ग्रावा यत्र वदति कारुरुक्थ्य१स्तस्येदिन्द्रो अभिपित्वेषु रण्यति ६

॥७१॥ (ऋ० १।८४।१-२०)

[१-६ अनुष्टुप्; ७-९ उष्णिक्; १०-१२ पंक्तिः; १३-१५ गायत्री; १६-१८ त्रिष्टुप्;
(प्रगाथः= १९ बृहती; २० सतोबृहती।)]

असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि। आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः १

इन्द्रमिद्धरी वहतो ऽप्रतिधृष्टशवसम्। ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् २
आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी। अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ३
इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम्। शुक्रस्य त्वाभ्यक्षरन् धारा ऋतस्य सादने ४ ९४०
इन्द्राय नूनमर्चतो-क्थानि च ब्रवीतन। सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ५
नकिष्ट्वद् रथीतरो हरी यदिन्द्र यच्छसे। नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे ६
य एक इद् विदयते वसु मर्ताय दाशुषे। ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ७
कदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत्। कदा नः शुश्रवद् गिर इन्द्रो अङ्ग ८
यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति। उग्रं तत् पत्यते शव इन्द्रो अङ्ग ९ ९४५

स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः।
या इन्द्रेण सयावरी-र्वृष्णा मदन्ति शोभसे वस्वीरनु स्वराज्यम् १०
ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः।
प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीरनु स्वराज्यम् ११
ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः।
व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् १२
इन्द्रो दधीचो अस्थभि-र्वृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव १३
इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम्। तद् विदच्छर्यणावति १४ ९५०
अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम्। इत्था चन्द्रमसो गृहे १५
को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून्।
आसन्निषून् हृत्स्वसो मयोभून् य एषां भृत्यामृणधत् स जीवात् १६
क ईषते तुज्यते को बिभाय को मंसते सन्तमिन्द्रं को अन्ति।
कस्तोकाय क इभायोत राये ऽधि ब्रवत् तन्वे को जनाय १७
को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः।
कस्मै देवा आ वहानाशु होम को मंसते वीतिहोत्रः सुदेवः १८
त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम्।
न त्वदन्यो मघवन्नस्ति मर्डिते-न्द्र ब्रवीमि ते वचः १९ ९५५
मा ते राधांसि मा त ऊतयो वसो ऽस्मान् कदा चना दभन्।
विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ २०

॥७१॥ (ऋ० १।१००।१-१९)

(९५७-९७५) वार्षागिराः ऋज्राश्वाऽम्बरीष-सहदेव-भयमान-सुराधसः। त्रिष्टुप्।

स यो वृषा वृष्ण्येभिः समोका महो दिवः पृथिव्याश्च सम्राट्।
सतीनसत्वा हव्यो भरेषु मरुत्वान् नो भवत्विन्द्र ऊती १
यस्यानाप्तः सूर्यस्येव यामो भरेभरे वृत्रहा शुष्मो अस्ति।
वृषन्तमः सखिभिः स्वेभिरेवै-र्मरुत्वान् नो भवत्विन्द्र ऊती २
दिवो न यस्य रेतसो दुघानाः पन्थासो यन्ति शवसापरीताः
तरद्द्वेषाः सासहिः पौंस्येभि-र्मरुत्वान् नो भवत्विन्द्र ऊती ३
सो अङ्गिरोभिरङ्गिरस्तमो भूद् वृषा वृषभिः सखिभिः सखा सन्।
ऋग्मिभिर्ऋग्मी गातुभिर्ज्येष्ठो मरुत्वान् नो भवत्विन्द्र ऊती ४ ९६०
स सूनुभिर्न रुद्रेभिर्ऋभ्वा नृषाह्ये सासह्वाँ अमित्रान्।
सनीळेभिः श्रवस्यानि तूर्वन् मरुत्वान् नो भवत्विन्द्र ऊती ५
स मन्युमीः समदनस्य कर्ता ऽस्माकेभिर्नृभिः सूर्यं सनत्।
अस्मिन्नहन्त्सत्पतिः पुरुहूतो मरुत्वान् नो भवत्विन्द्र ऊती ६
तमूतयो रणयञ्छूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्राम्।
स विश्वस्य करुणस्येश एको मरुत्वान् नो भवत्विन्द्र ऊती ७
तमप्सन्त शवस उत्सवेषु नरो नरमवसे तं धनाय।
सो अन्धे चित् तमसि ज्योतिर्विदन् मरुत्वान् नो भवत्विन्द्र ऊती ८
स सव्येन यमति व्राधतश्चित् स दक्षिणे संगृभीता कृतानि।
स कीरिणा चित् सनिता धनानि मरुत्वान् नो भवत्विन्द्र ऊती ९ ९६५
स ग्रामेभिः सनिता स रथेभि-र्विदे विश्वाभिः कृष्टिभिर्न्वद्य।
स पौंस्येभिरभिभूरशस्ती-र्मरुत्वान् नो भवत्विन्द्र ऊती १०
स जामिभिर्यत् समजाति मीळ्हे ऽजामिभिर्वा पुरुहूत एवैः।
अपां तोकस्य तनयस्य जेषे मरुत्वान् नो भवत्विन्द्र ऊती ११
स वज्रभृद् दस्युहा भीम उग्रः सहस्रचेताः शतनीथ ऋभ्वा।
चम्रीषो न शवसा पाञ्चजन्यो मरुत्वान् नो भवत्विन्द्र ऊती १२
तस्य वज्रः क्रन्दति स्मत् स्वर्षा दिवो न त्वेषो रवथः शिमीवान्।
तं सचन्ते सनयस्तं धनानि मरुत्वान् नो भवत्विन्द्र ऊती १३

यस्याजस्रं शवसा मानमुक्थं परिभुजद् रोदसी विश्वतः सीम्।
स पारिषत् क्रतुभिर्मन्दसानो मरुत्वान् नो भवत्विन्द्र ऊती १४ ९७०
न यस्य देवा देवता न मर्ता आपश्चन शवसो अन्तमापुः।
स प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च मरुत्वान् नो भवत्विन्द्र ऊती १५
रोहिच्छ्यावा सुमदंशुर्ललामी- र्द्युक्षा राय ऋज्राश्वस्य।
वृषण्वन्तं बिभ्रती धूर्षु रथं मन्द्रा चिकेत नाहुषीषु विक्षु १६
एतत् त्यत् त इन्द्र वृष्ण उक्थं वार्षागिरा अभि गृणन्ति राधः।
ऋज्राश्वः प्रष्टिभिरम्बरीषः सहदेवो भयमानः सुराधाः १७
दस्यूञ्छिम्यूंश्च पुरुहूत एवै- र्हत्वा पृथिव्यां शर्वा नि बर्हीत्।
सनत् क्षेत्रं सखिभिः श्वित्न्येभिः सनत् सूर्यं सनदपः सुवज्रः १८
विश्वाहेन्द्रो अधिवक्ता नो अ- स्त्वपरिह्वृताः सनुयाम वाजम्।
तन्नो मित्रो वरुणो मामहन्ता- मदितिः सिन्धुः पृथिवी उत द्यौः १९ ९७५

॥ ७३ ॥ (ऋ० ८।९७।१-१५)

(९७६--९९०) रेभः काश्यपः। बृहती, १०, १३ अतिजगती, ११-१२ उपरिष्टाद्बृहती, १४ त्रिष्टुप्, १५ जगती।

या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः
स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः १
यमिन्द्र दधिषे त्व- मश्वं गां भागमव्ययम्।
यजमाने सुन्वति दक्षिणावति तस्मिन् तं धेहि मा पणौ २
य इन्द्र सस्त्यव्रतो ऽनुष्वापमदेवयुः।
स्वैः ष एवैर्मुमुरत् पोष्यं रयिं सनुतर्धेहि तं ततः ३
यच्छक्रासि परावति यदर्वावति वृत्रहन्।
अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाँ आ विवासति ४
यद्वासि रोचने दिवः समुद्रस्याधि विष्टपि।
यत् पार्थिवे सदने वृत्रहन्तम यदन्तरिक्ष आ गहि ५ ९८०
स नः सोमेषु सोमपाः सुतेषु शवसस्पते।
मादयस्व राधसा सूनृतावते- न्द्र राया परीणसा ६
मा न इन्द्र परा वृणग् भवा नः सधमाद्यः।
त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परा वृणक् ७

अस्मे इन्द्र सचा सुते नि षदा पीतये मधु ।
कृधी जरित्रे मघवन्नवो मह-दस्मे इन्द्र सचा सुते ८
न त्वा देवास आशत न मर्त्यासो अद्रिवः ।
विश्वा जातानि शवसाभिभूरसि न त्वा देवास आशत ९
विश्वाः पृतना अभिभूतरं नरं सजू-स्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वा वरिष्ठं वर आमुरिमुतो-ग्रमोजिष्ठं तवसं तरस्विनम् १० १८५
समीं रेभासो अस्वर-न्निन्द्रं सोमस्य पीतये ।
स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा समूतिभिः ११
नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा ।
सुदीतयो वो अद्रुहो ऽपि कर्णे तरस्विनः समृक्वभिः १२
तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं शवांसि ।
मंहिष्ठो गीर्भिरा च यज्ञियो ववर्तद् राये नो विश्वा सुपथा कृणोतु वज्री १३
त्वं पुर इन्द्र चिकिदेना व्योजसा शविष्ठ शक्र नाशयध्यै ।
त्वद् विश्वानि भुवनानि वज्रिन् द्यावा रेजेते पृथिवी च भीषा १४
तन्म ऋतमिन्द्र शूर चित्र पात्व-पो न वज्रिन् दुरिताति पर्षि भूरि ।
कदा न इन्द्र राय आ दशस्ये-र्विश्वप्स्न्यस्य स्पृहयाय्यस्य राजन् १५ १९०

॥ ७४ ॥ (ऋ० ८।१००।१-९)

(१९१-१९९) नेमो भार्गवः, ४-५ इन्द्रः, ९ वज्रो वा । त्रिष्टुप्, ६ जगती, ७,९ अनुष्टुप् ।

अयं त एमि तन्वा पुरस्ताद् विश्वे देवा अभि मा यन्ति पश्चात् ।
यदा मह्यं दीधरो भागमिन्द्रा-ऽऽदिन्मया कृणवो वीर्याणि १
दधामि ते मधुनो भक्षमग्रे हितस्ते भागः सुतो अस्तु सोमः ।
असश्च त्वं दक्षिणतः सखा मे ऽधा वृत्राणि जङ्घनाव भूरि २
प्र सु स्तोमं भरत वाजयन्त इन्द्राय सत्यं यदि सत्यमस्ति ।
नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभि ष्टवाम ३
अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना ।
ऋतस्य मा प्रदिशो वर्धयन्त्या-दर्दिरो भुवना दर्दरीमि ४
आ यन्मा वेना अरुहन्नृतस्यँ एकमासीनं हर्यतस्य पृष्ठे ।
मनश्चिन्मे हृद आ प्रत्यवोच-दचिक्रदञ्छिशुमन्तः सखायः ५ १९५

विश्वेत् ता ते सवनेषु प्रवाच्या या चकर्थ मघवन्निन्द्र सुन्वते ।
पारावतं यत् पुरुसंभृतं व- स्वपावृणोः शरभाय ऋषिबन्धवे ६
प्र नूनं धावता पृथङ् नेह यो वो अवावरीत् ।
नि षीं वृत्रस्य मर्मणि वज्रमिन्द्रो अपीपतत् ७
समुद्रे अन्तः शयत उद्ना वज्रो अभीवृतः ।
भरन्त्यस्मै संयतः पुरःप्रस्रवणा बलिम् ९
सखे विष्णो वितरं वि क्रमस्व द्यौर्देहि लोकं वज्राय विष्कभे ।
हनाव वृत्रं रिणचाव सिन्धू- निन्द्रस्य यन्तु प्रसवे विसृष्टाः १२ ९९९

॥ ७५ ॥ (ऋ० १।१२९।१-११)

(१०००-१०४१) परुच्छेपो दैवोदासिः । अत्यष्टिः; ८-९ अतिशक्वर्यौ; ११ अष्टिः ।

यं त्वं रथमिन्द्र मेधसातये ऽपाका सन्तमिषिर प्रणयसि प्रानवद्य नयसि ।
सद्यश्चित् तमभिष्टये करो वशश्च वाजिनम् ।
सास्माकमनवद्य तूतुजान वेधसा- मिमां वाचं न वेधसाम् १ १०००
स श्रुधि यः स्मा पृतनासु कासु चिद् दक्षाय्य इन्द्र भरहूतये नृभि- रसि प्रतूर्तये नृभिः ।
यः शूरैः स्वः सनिता यो विप्रैर्वाजं तरुता ।
तमीशानास इरधन्त वाजिनं पृक्षमत्यं न वाजिनम् २
दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद् यावीरररुं शूर मर्त्यं परिवृणक्षि मर्त्यम् ।
इन्द्रोत तुभ्यं तद् दिवे तद् रुद्राय स्वयशसे ।
मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय सप्रथः ३
अस्माकं व इन्द्रमुश्मसीष्टये सखायं विश्वायुं प्रासहं युजं वाजेषु प्रासहं युजम् ।
अस्माकं ब्रह्मोतये ऽवा पृत्सुषु कासु चित् ।
नहि त्वा शत्रुः स्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि यम् ४
नि षू नमातिमतिं कयस्य चित् तेजिष्ठाभिररणिभिर्नोतिभि- रुग्राभिरुग्रोतिभिः ।
नेषि णो यथा पुरा ऽनेनाः शूर मन्यसे ।
विश्वानि पूरोरप पर्षि वह्नि- रासा वह्निर्नो अच्छ ५
प्र तद् वोचेयं भव्यायेन्दवे हव्यो न य इषवान् मन्म रेजति रक्षोहा मन्म रेजति ।
स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिम् ।
अव स्रवेदघशंसोऽवतर- मव क्षुद्रमिव स्रवेत् ६ १००५

वनेम तद्धोत्रया चितन्त्या वनेम रयिं रयिवः सुवीर्यं रण्वं सन्तं सुवीर्यम् ।
दुर्मन्मानं सुमन्तुभि—रेमिषा पृचीमहि ।
आ सत्याभिरिन्द्रं द्युम्नहूतिभि—र्यजत्रं द्युम्नहूतिभिः ७
प्रप्रा वो अस्मे स्वयशोभिरूती परिवर्ग इन्द्रो दुर्मतीनां दरीमन् दुर्मतीनाम् ।
स्वयं सा रिषयध्यै या न उपेषे अत्रैः ।
हतेमसन्न वक्षति क्षिप्ता जूर्णिर्न वक्षति ८
त्वं न इन्द्र राया परीणसा याहि पथाँ अनेहसा पुरो याह्यरक्षसा ।
सचस्व नः पराक आ सचस्वास्तमीक आ ।
पाहि नो दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः ९
त्वं न इन्द्र राया तरूषसो—ग्रं चित् त्वा महिमा सक्षदवसे महे मित्रं नावसे ।
ओजिष्ठ त्रातरविता रथं कं चिदमर्त्य ।
अन्यमस्मद् रिरिषेः कं चिदद्रिवो रिरिक्षन्तं चिदद्रिवः १०
पाहि न इन्द्र सुष्टुत स्रिधो ऽवयाता सदमिद् दुर्मतीनां देवः सन् दुर्मतीनाम् ।
हन्ता पापस्य रक्षस—स्त्राता विप्रस्य मावतः ।
अधा हि त्वा जनिता जीजनद् वसो रक्षोहणं त्वा जीजनद् वसो ११ १०१०

॥ ७६ ॥ (ऋ० १।१३०।१-१०) अत्यष्टिः; १० त्रिष्टुप् ।

एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पति—रस्तं राजेव सत्पतिः ।
हवामहे त्वा वयं प्रयस्वन्तः सुते सचा ।
पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये १
पिबा सोममिन्द्र सुवानमद्रिभिः कोशेन सिक्तमवतं न वंसग—स्तातृषाणो न वंसगः ।
मदाय हर्यताय ते तुविष्टमाय धायसे ।
आ त्वा यच्छन्तु हरितो न सूर्य—महा विश्वेव सूर्यम् २
अविन्दद् दिवो निहितं गुहा निधिं वेर्न गर्भं परिवीतमश्म—न्यनन्ते अन्तरश्मनि ।
व्रजं वज्री गवामिव सिषासन्नङ्गिरस्तमः ।
अपावृणोदिष इन्द्रः परीवृता द्वार इषः परीवृताः ३
दादृहाणो वज्रमिन्द्रो गभस्त्योः क्षद्मेव तिग्ममसनाय सं श्य—दहिहत्याय सं श्यत् ।
संविव्यान ओजसा शवोभिरिन्द्र मज्मना ।
तष्टेव वृक्षं वनिनो नि वृश्चसि परश्वेव नि वृश्चसि ४

त्वं वृथा नद्यं इन्द्र सर्तवे ऽच्छा समुद्रमसृजो रथाँ इव वाजयतो रथाँ इव ।
इत ऊतीरयुञ्जत समानमर्थमक्षितम् ।
धेनूरिव मनवे विश्वदोहसो जनाय विश्वदोहसः ५ १०२५
इमां ते वाचं वसूयन्त आयवो रथं न धीरः स्वपा अतक्षिपुः सुम्नाय त्वामतक्षिपुः ।
शुम्भन्तो जेन्यं यथा वाजेषु विप्र वाजिनम् ।
अत्यमिव शवसे सातये धना विश्वा धनानि सातये ६
भिनत् पुरो नवतिमिन्द्र पूरवे दिवोदासाय महि दाशुषे नृतो वज्रेण दाशुषे नृतो ।
अतिथिग्वाय शम्बरं गिरेरुग्रो अवाभरत् ।
महो धनानि दयमान ओजसा विश्वा धनान्योजसा ७
इन्द्रः समत्सु यजमानमार्यं प्रावद् विश्वेषु शतमूतिराजिषु स्वर्मीळ्हेष्वाजिषु ।
मनवे शासदव्रतान् त्वचं कृष्णामरन्धयत् ।
दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति ८
सूरश्चक्रं प्र वृहज्जात ओजसा प्रपित्वे वाचमरुणो मुषायती-शान आ मुषायति ।
उशना यत् परावतो ऽजगन्नूतये कवे ।
सुम्नानि विश्वा मनुषेव तुर्वणि-रहा विश्वेव तुर्वणिः ९
स नो नव्येभिर्वृषकर्मन्नुक्थैः पुरां दर्तः पायुभिः पाहि शग्मैः ।
दिवोदासेभिरिन्द्र स्तवानो वावृधीथा अहोभिरिव द्यौः १० १०३०

॥ ७७ ॥ (ऋ० १।१३१।१-७) अत्यष्टिः ।

इन्द्राय हि द्यौरसुरो अनम्नते-न्द्राय मही पृथिवी वरीमभि-र्द्युम्नसाता वरीमभिः ।
इन्द्रं विश्वे सजोषसो देवासो दधिरे पुरः ।
इन्द्राय विश्वा सवनानि मानुषा रातानि सन्तु मानुषा १
विश्वेषु हि त्वा सवनेषु तुञ्जते समानमेकं वृषमण्यवः पृथक् स्वः सनिष्यवः पृथक् ।
तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि ।
इन्द्रं न यज्ञैश्चितयन्त आयवः स्तोमेभिरिन्द्रमायवः २
वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता गव्यस्य निःसृजः सक्षन्त इन्द्र निःसृजः ।
यद् गव्यन्ता द्वा जना स्व१र्यन्ता समूहसि ।
आविष्करिक्रद् वृषणं सचाभुवं वज्रमिन्द्र सचाभुवम् ३
विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिन्द्र शारदीरवातिरः सासहानो अवातिरः ।
शासस्तमिन्द्र मर्त्य-मयज्युं शवसस्पते ।
महीममुष्णाः पृथिवीमिमा अपो मन्दसान इमा अपः ४

आदित् ते अस्य वीर्यस्य चर्किरन् मदेषु वृषन्नुशिजो यदाविथ सखीयतो यदाविथ ।
चकर्थ कारमेभ्यः पृतनासु प्रवन्तवे ।
ते अन्यामन्यां नद्यं सनिष्णत श्रवस्यन्तः सनिष्णत ५ १०२५
उतो नो अस्या उषसो जुषेत ह्यर्कस्य बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः ।
यदिन्द्र हन्तवे मृधो वृषा वज्रिञ्चिकेतसि ।
आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः ६
त्वं तमिन्द्र वावृधानो अस्मयुरमित्रयन्तं तुविजात मर्त्यं वज्रेण शूर मर्त्यम् ।
जहि यो नो अघायति शृणुष्व सुश्रवस्तमः ।
रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वाप भूतु दुर्मतिः ७

॥ ७८ ॥ (ऋ० १।१३२।१-६) [६ (अर्धर्चस्य) इन्द्रापर्वतौ]।

त्वया वयं मघवन् पूर्व्ये धन इन्द्रत्वोताः सासह्याम पृतन्यतो वनुयाम वनुष्यतः ।
नेदिष्ठे अस्मिन्नहन्यधि वोचा नु सुन्वते ।
अस्मिन् यज्ञे वि चयेमा भरे कृतं वाजयन्तो भरे कृतम् १
स्वर्जेषे भर आप्रस्य वक्मन्युषर्बुधः स्वस्मिन्नञ्जसि क्राणस्य स्वस्मिन्नञ्जसि ।
अहन्निन्द्रो यथा विदे शीर्ष्णाशीर्ष्णोपवाच्यः ।
अस्मत्रा ते सध्र्यक् सन्तु रातयो भद्रा भद्रस्य रातयः २
तत् तु प्रयः प्रत्नथा ते शुशुक्वनं यस्मिन् यज्ञे वारमकृण्वत क्षयमृतस्य वारसि क्षयम् ।
वि तद् वोचेरध द्वितान्तः पश्यन्ति रश्मिभिः ।
स घा विदे अन्विन्द्रो गवेषणो बन्धुक्षिद्भ्यो गवेषणः ३ १०३०
नू इत्था ते पूर्वथा च प्रवाच्यं यदङ्गिरोभ्योऽवृणोरप व्रजमिन्द्र शिक्षन्नप व्रजम् ।
ऐभ्यः समान्या दिशाऽस्मभ्यं जेषि योत्सि च ।
सुन्वद्भ्यो रन्धया कं चिदव्रतं हृणायन्तं चिदव्रतम् ४
सं यज्जनान् क्रतुभिः शूर ईक्षयद् धने हिते तरुषन्त श्रवस्यवः प्र यक्षन्त श्रवस्यवः ।
तस्मा आयुः प्रजावदिद् बाधे अर्चन्त्योजसा ।
इन्द्र ओक्यं दिधिषन्त धीतयो देवाँ अच्छा न धीतयः ५
युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तंतमिद्धतं वज्रेण तंतमिद्धतम् ।
दूरे चत्ताय च्छन्त्सद् गहनं यदिनक्षत् ।
अस्माकं शत्रून् परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ६

॥ ७९ ॥ (ऋ० १।१३३।१-७) १ त्रिष्टुप्, २-४ अनुष्टुप्, ५ गायत्री, ६ धृतिः, ७ अष्टिः ।

उभे पुनामि रोदसी ऋतेन द्रुहो दहामि सं महीरनिन्द्राः ।
अभिव्लग्य यत्र हता अमित्रा वैलस्थानं परि तृळ्हा अशेरन् १
अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनाम्। छिन्धि वटूरिणा पदा महावटूरिणा पदा २ १०३५
अवासां मघवञ्जहि शर्धो यातुमतीनाम् । वैलस्थानके अर्मके महावैलस्थे अर्मके ३
यासां तिस्रः पञ्चाशतो ऽभिव्लङ्गैरपावपः । तत् सु ते मनायति तकत् सु ते मनायति ४
पिशङ्गभृष्टिमम्भृणं पिशाचिमिन्द्र सं मृण । सर्वं रक्षो नि बर्हय ५
अवर्मह इन्द्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो घृणान्न भीषाँ अद्रिवः ।
शुष्मिन्तमो हि शुष्मिभि--र्वधैरुग्रेभिरीयसे ।
अपूरुषघ्नो अप्रतीत शूर सत्वभि--स्त्रिसप्तैः शूर सत्वभिः ६
वनोति हि सुन्वन् क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो देवानामव द्विषः ।
सुन्वान इत् सिषासति सहस्रा वाज्यवृतः ।
सुन्वानायेन्द्रो ददात्याभुवं रयिं ददात्याभुवम् ७ १०४०

॥ ८० ॥ (ऋ० १।१३९।६) अत्यष्टिः ।

वृषन्निन्द्र वृषपाणास इन्दव इमे सुता अद्रिषुतास उद्भिद--स्तुभ्यं सुतास उद्भिदः ।
ते त्वा मन्दन्तु दावने महे चित्राय राधसे ।
गीर्भिर्गिर्वाहः स्तवमान आ गहि सुमृळीको न आ गहि ६ १०४१

॥ ८१ ॥ (ऋ० १।१६७।१) (१०४२-११००) अगस्त्यो मैत्रावरुणिः । त्रिष्टुप् ।

सहस्रं त इन्द्रोतयो नः सहस्रमिषो हरिवो गूर्ततमाः ।
सहस्रं रायो मादयध्यै सहस्रिण उप नो यन्तु वाजाः १

॥ ८२ ॥ (ऋ० १।१६९।१-८) त्रिष्टुप्, २ चतुष्पदा विराट् ।

महश्चित् त्वमिन्द्र यत एतान् महश्चिदसि त्यजसो वरूता ।
स नो वेधो मरुतां चिकित्वान् त्सुम्ना वनुष्व तव हि प्रेष्ठा १
अयुञ्जन्त इन्द्र विश्वकृष्टी--र्विदानासो निष्षिधो मर्त्यत्रा ।
मरुतां पृत्सुतिर्हासमाना स्वर्मीळ्हस्य प्रधनस्य सातौ २
अम्यक् सा त इन्द्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनन्ति ।
अग्निश्चिद्धि ष्मातसे शुशुक्वा--नापो न द्वीपं दधति प्रयांसि ३ १०४५
त्वं तू न इन्द्र तं रयिं दा ओजिष्ठया दक्षिणयेव रातिम् ।
स्तुतश्च यास्ते चकनन्त वायोः स्तनं न मध्वः पीपयन्त वाजैः ४

त्वे राय इन्द्र तोशतमाः प्रणेतारः कस्य चिदृतायोः ।
ते षु णो मरुतो मृळयन्तु ये स्मा पुरा गातूयन्तीव देवाः ५
प्रति प्र याहीन्द्र मीळ्हुषो नॄन् महः पार्थिवे सदने यतस्व ।
अध यदेषां पृथुबुध्नास एता—स्तीर्थे नार्यः पौंस्यानि तस्थुः ६
प्रति घोराणामेतानामयासां मरुतां शृण्व आयतामुपब्दिः ।
ये मर्त्यं पृतनायन्तमूमै—र्ऋणावानं न पतयन्त सर्गैः ७
त्वं मानेभ्य इन्द्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः ।
स्तवानेभिः स्तवसे देव देवै—र्विद्यामेषं वृजनं जीरदानुम् ८ १०५०

॥८३॥ (ऋ० १।१७०।१-५)

[इन्द्रः; (४ अगस्त्यो वा); २, ५ अगस्त्यो मैत्रावरुणिः]। १ बृहती, २-४ अनुष्टुप्, ५ त्रिष्टुप् ।

न नूनमस्ति नो श्वः कस्तद् वेद यदद्भुतम् ।
अन्यस्य चित्तमभि संचरेण्य—मुताधीतं वि नश्यति १
किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव । तेभिः कल्पस्व साधुया मा नः समरणे वधीः २
किं नो भ्रातरगस्त्य सखा सन्नति मन्यसे । विद्मा हि ते यथा मनो ऽस्मभ्यमिन्न दित्ससि ३
अरं कृण्वन्तु वेदिं समग्निमिन्धतां पुरः । तत्रामृतस्य चेतनं यज्ञं ते तनवावहै ४
त्वमीशिषे वसुपते वसूनां त्वं मित्राणां मित्रपते धेष्ठः ।
इन्द्र त्वं मरुद्भिः सं वदस्वा—ऽध प्राशान ऋतुथा हवींषि ५ १०५५

॥८४॥ (ऋ० १।१७३।१-१३) त्रिष्टुप्, ४ विराट्स्थाना विषमपदा वा ।

गायत् साम नभन्यं१ यथा वे—रर्चाम तद् वावृधानं स्वर्वत् ।
गावो धेनवो बर्हिष्यदब्धा आ यत् सद्मानं दिव्यं विवासान् १
अर्चद् वृषा वृषभिः स्वेदुहव्यै—र्मृगो नाश्नो अति यज्जुगुर्यात् ।
प्र मन्दयुर्मनां गूर्त होता भरते मर्यो मिथुना यजत्रः २
नक्षद्धोता परि सद्म मिता यन् भरद् गर्भमा शरदः पृथिव्याः ।
क्रन्ददश्वो नयमानो रुवद् गौ—रन्तर्दूतो न रोदसी चरद् वाक् ३
ता कर्माषतरास्मै प्र च्यौत्नानि देवयन्तो भरन्ते ।
जुजोषदिन्द्रो दस्मवर्चा नासत्येव सुग्म्यो रथेष्ठाः ४
तमु ष्टुहीन्द्रं यो ह सत्वा यः शूरो मघवा यो रथेष्ठाः ।
प्रतीचश्चिद् योधीयान् वृषण्वान् ववव्रुषश्चित् तमसो विहन्ता ५ १०६०
प्र यदित्था महिना नृभ्यो अ—स्त्यरं रोदसी कक्ष्ये३ नास्मै ।
सं विव्य इन्द्रो वृजनं न भूमा भर्ति स्वधावाँ ओपशमिव द्याम् ६

समत्सु त्वा शूर सतामुराणं प्रपथिन्तमं परितंसयध्यै ।
सजोषस इन्द्रं मदे क्षोणीः सूरिं चिद् ये अनुमदन्ति वाजैः ७
एवा हि ते शं सवना समुद्र आपो यत् त आसु मदन्ति देवीः ।
विश्वा ते अनु जोष्या भूद् गौः सूरींश्चिद् यदि धिषा वेषि जनान् ८
असाम यथा सुषखाय एन स्वभिष्टयो नरां न शंसैः ।
असद् यथा न इन्द्रो वन्दनेष्ठा स्तुरो न कर्म नयमान उक्था ९
विष्पर्धसो नरां न शंसै रस्माकासदिन्द्रो वज्रहस्तः ।
मित्रायुवो न पूर्पतिं सुशिष्टौ मध्यायुव उप शिक्षन्ति यज्ञैः १० १०६५
यज्ञो हि ष्मेन्द्रं कश्चिदृन्ध ञ्जुहुराणश्चिन्मनसा परियन् ।
तीर्थे नाच्छा तातृषाणमोको दीर्घो न सिध्रमा कृणोत्यध्वा ११
मो षू ण इन्द्रात्र पृत्सु देवै रस्ति हि ष्मा ते शुष्मिन्नवयाः ।
महश्चिद् यस्य मीळ्हुषो यव्या हविष्मतो मरुतो वन्दते गीः १२
एष स्तोम इन्द्र तुभ्यमस्मे एतेन गातुं हरिवो विदो नः
आ नो ववृत्याः सुविताय देव विद्यामेषं वृजनं जीरदानुम् १३

॥ ८५ ॥ (ऋ० १।१७४।१-१०) त्रिष्टुप् ।

त्वं राजेन्द्र ये च देवा रक्षा नॄन् पाह्यसुर त्वमस्मान् ।
त्वं सत्पतिर्मघवा नस्तरुत्र स्त्वं सत्यो वसवानः सहोदाः १
दनो विश इन्द्र मृध्रवाचः सप्त यत् पुरः शर्म शारदीर्दर्त् ।
ऋणोरपो अनवद्यार्णा यूने वृत्रं पुरुकुत्साय रन्धीः २ १०७०
अजा वृत इन्द्र शूरपत्नी र्द्यां च येभिः पुरुहूत नूनम् ।
रक्षो अग्निमशुषं तूर्वयाणं सिंहो न दमे अपांसि वस्तोः ३
शेषन् नु त इन्द्र सस्मिन् योनौ प्रशस्तये पवीरवस्य मह्ना ।
सृजदर्णांस्यव यद् युधा गा स्तिष्ठद्धरी धृषता मृष्ट वाजान् ४
वह कुत्समिन्द्र यस्मिंश्चाकन् त्स्यूमन्यू ऋज्रा वातस्याश्वा ।
प्र सूरश्चक्रं वृहतादभीके ऽभि स्पृधो यासिषद् वज्रबाहुः ५
जघन्वाँ इन्द्र मित्रेरू श्चोदप्रवृद्धो हरिवो अदाशून् ।
प्र ये पश्यन्नर्यमणं सचायो स्त्वया शूर्ता वहमाना अपत्यम् ६
रपत् कविरिन्द्रार्कसातौ क्षां दासायोपबर्हणीं कः ।
करत् तिस्रो मघवा दानुचित्रा नि दुर्योणे कुयवाचं मृधि श्रेत् ७ १०७५

सना ता त इन्द्र नव्या आगुः सहो नभोऽविरणाय पूर्वीः
भिनत् पुरो न भिदो अदेवी र्ननमो वधरदेवस्य पीयोः ८
त्वं धुनिरिन्द्र धुनिमती र्ऋणोरपः सीरा न स्रवन्तीः ।
प्र यत् समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ९
त्वमस्माकमिन्द्र विश्वध स्या अवृकतमो नरां नृपाता ।
स नो विश्वासां स्पृधां सहोदा विद्यामेषं वृजनं जीरदानुम् १०

॥ ८६ ॥ (ऋ० १।१७५।१-६) १ स्कन्धोग्रीवी बृहती; २-५ अनुष्टुप्, ६ त्रिष्टुप् ।

मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः । वृषा ते वृष्ण इन्दु र्वाजी सहस्रसातमः १
आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः । सहावाँ इन्द्र सानसिः पृतनाषाळमर्त्यः २ १०८०
त्वं हि शूरः सनिता चोदयो मनुषो रथम् । सहावान् दस्युमव्रत मोषः पात्रं न शोचिषा ३
मुषाय सूर्यं कवे चक्रमीशान ओजसा । वह शुष्णाय वधं कुत्सं वातस्याश्वैः ४
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः । वृत्रघ्ना वरिवोविदा मंसीष्ठा अश्वसातमः ५
यथा पूर्वेभ्यो जरितृभ्य इन्द्र मय इवापो न तृष्यते बभूथ ।
तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ६

॥ ८७ ॥ (ऋ० १।१७६।१-६) अनुष्टुप्; ६ त्रिष्टुप् ।

मत्सि नो वस्यइष्टय इन्द्रमिन्दो वृषा विश । ऋघायमाण इन्वसि शत्रुमन्ति न विन्दसि १ १०८५
तस्मिन्ना वेशया गिरो य एकश्चर्षणीनाम् । अनु स्वधा यमुप्यते यवं न चर्कृषद् वृषा २
यस्य विश्वानि हस्तयोः पञ्च क्षितीनां वसु । स्पाशयस्व यो अस्मध्रुग् दिव्येवाशनिर्जहि ३
असुन्वन्तं समं जहि दूणाशं यो न ते मयः । अस्मभ्यमस्य वेदनं दद्धि सूरिश्चिदोहते ४
आवो यस्य द्विबर्हसो ऽर्केषु सानुषगसत् । आजाविन्द्रस्येन्दो प्रावो वाजेषु वाजिनम् ५
यथा पूर्वेभ्यो जरितृभ्य इन्द्र मय इवापो न तृष्यते बभूथ ।
तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ६ १०९०

॥ ८८ ॥ (ऋ० १।१७७।१-६) त्रिष्टुप् ।

आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनां पुरुहूत इन्द्रः ।
स्तुतः श्रवस्यन्नवसोप मद्रिग् युक्त्वा हरी वृषणा याह्यर्वाङ् १
ये ते वृषणो वृषभास इन्द्र ब्रह्मयुजो वृषरथासो अत्याः ।
ताँ आ तिष्ठ तेभिरा याह्यर्वाङ् हवामहे त्वा सुत इन्द्र सोमे २
आ तिष्ठ रथं वृषणं वृषा ते सुतः सोमः परिषिक्ता मधूनि ।
युक्त्वा वृषभ्यां वृषभ क्षितीनां हरिभ्यां याहि प्रवतोप मद्रिक् ३

अयं यज्ञो देवया अयं मियेध इमा ब्रह्माण्ययमिन्द्र सोमः ।
स्तीर्णं बर्हिरा तु शक्र प्र याहि पिबा निषद्य वि मुचा हरी इह ४
ओ सुष्टुत इन्द्र याह्यर्वाङुप ब्रह्माणि मान्यस्य कारोः ।
विद्याम वस्तोरवसा गृणन्तो विद्यामेषं वृजनं जीरदानुम् ५ १०९५

॥ ८९ ॥ (ऋ० १।१७८।१-५)

यद्ध स्या त इन्द्र श्रुष्टिरस्ति यया बभूथ जरितृभ्य ऊती ।
मा नः कामं महयन्तमा धग् विश्वा ते अश्यां पर्याप आयोः १
न घा राजेन्द्र आ दभन्नो या नु स्वसारा कृणवन्त योनौ ।
आपश्चिदस्मै सुतुका अवेषन् गमन्न इन्द्रः सख्या वयश्च २
जेता नृभिरिन्द्रः पृत्सु शूरः श्रोता हवं नाधमानस्य कारोः ।
प्रभर्ता रथं दाशुष उपाक उद्यन्ता गिरो यदि च त्मना भूत् ३
एवा नृभिरिन्द्रः सुश्रवस्या प्रखादः पृक्षो अभि मित्रिणो भूत् ।
समर्य इषः स्तवते विवाचि सत्राकरो यजमानस्य शंसः ४
त्वया वयं मघवन्निन्द्र शत्रूनभि ष्याम महतो मन्यमानान् ।
त्वं त्राता त्वमु नो वृधे भूर्विद्यामेषं वृजनं जीरदानुम् ५ ११००

॥ ९० ॥ (ऋ० २।११।१-२१)

(११०१-११२७) गृत्समद (आंगिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः। विराट्स्थाना; २१ त्रिष्टुप्।

श्रुधी हवमिन्द्र मा रिषण्यः स्याम ते दावने वसूनाम् ।
इमा हि त्वामूर्जो वर्धयन्ति वसूयवः सिन्धवो न क्षरन्तः १
सृजो महीरिन्द्र या अपिन्वः परिष्ठिता अहिना शूर पूर्वीः ।
अमर्त्यं चिद् दासं मन्यमानमवाभिनदुक्थैर्वावृधानः २
उक्थेष्विन्नु शूर येषु चाकन् त्स्तोमेष्विन्द्र रुद्रियेषु च ।
तुभ्येदेता यासु मन्दसानः प्र वायवे सिस्रते न शुभ्राः ३
शुभ्रं नु ते शुष्मं वर्धयन्तः शुभ्रं वज्रं बाह्वोर्दधानाः ।
शुभ्रस्त्वमिन्द्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः ४
गुहा हितं गुह्यं गूळ्हमप्स्वपीवृतं मायिनं क्षियन्तम् ।
उतो अपो द्यां तस्तभ्वांसमहन्नहिं शूर वीर्येण ५ ११०५
स्तवा नु त इन्द्र पूर्व्या महान्युत स्तवाम नूतना कृतानि ।
स्तवा वज्रं बाह्वोरुशन्तं स्तवा हरी सूर्यस्य केतू ६

हरी नु त इन्द्र वाजयन्ता घृतश्चुतं स्वारमस्वार्ष्टाम् ।
वि समना भूमिरप्रथिष्टा—ऽरंस्त पर्वतश्चित् सरिष्यन् ७
नि पर्वतः साद्यप्रयुच्छन् सं मातृभिर्वावशानो अक्रान् ।
दूरे पारे वाणीं वर्धयन्त इन्द्रेषितां धमनिं पप्रथन् नि ८
इन्द्रो महां सिन्धुमाशयानं मायाविनं वृत्रमस्फुरन्निः ।
अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात् ९
अरोरवीद् वृष्णो अस्य वज्रो ऽमानुषं यन्मानुषो निजूर्वात् ।
नि मायिनो दानवस्य माया अपादयत् पपिवान्त्सुतस्य १० १११०

पिबापिबेदिन्द्र शूर सोमं मन्दन्तु त्वा मन्दिनः सुतासः ।
पृणन्तस्ते कुक्षी वर्धयन्त्वि—त्था सुतः पौर इन्द्रमाव ११
त्वे इन्द्राप्यभूम विप्रा धियं वनेम ऋतया सपन्तः ।
अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्याम १२
स्याम ते त इन्द्र ये त ऊती अवस्यव ऊर्जं वर्धयन्तः ।
शुष्मिन्तमं यं चाकनाम देवा—ऽस्मे रयिं रासि वीरवन्तम् १३
रासि क्षयं रासि मित्रमस्मे रासि शर्ध इन्द्र मारुतं नः ।
सजोषसो ये च मन्दसानाः प्र वायवः पान्त्यग्रणीतिम् १४
व्यन्त्विन्नु येषु मन्दसान—स्तृपत् सोमं पाहि द्रह्यदिन्द्र ।
अस्मान्त्सु पृत्स्वा तरुत्रा—ऽवर्धयो द्यां बृहद्भिरर्कैः १५ १११५

बृहन्त इन्नु ये ते तरुत्रो—क्थेभिर्वा सुम्नमाविवासान् ।
स्तृणानासो बर्हिः पस्त्यावत् त्वोता इदिन्द्र वाजमग्मन् १६
उग्रेष्विन्नु शूर मन्दसान—स्त्रिकद्रुकेषु पाहि सोममिन्द्र ।
प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिम् १७
धिष्वा शवः शूर येन वृत्र—मवाभिनद् दानुमौर्णवाभम् ।
अपावृणोर्ज्योतिरार्याय नि सव्यतः सादि दस्युरिन्द्र १८
सनेम ये त ऊतिभिस्तरन्तो विश्वाः स्पृध आर्येण दस्यून् ।
अस्मभ्यं तत् त्वाष्ट्रं विश्वरूप—मरन्धयः साख्यस्य त्रिताय १९
अस्य सुवानस्य मन्दिनस्त्रितस्य न्यर्बुदं वावृधानो अस्तः ।
अवर्तयत् सूर्यो न चक्रं भिनद् वलमिन्द्रो अङ्गिरस्वान् २० ११२०

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद् वदेम विदथे सुवीराः २१

॥ ९१ ॥ (ऋ० २।१२।१-१५) त्रिष्टुप् ।

यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत् ।
यस्य शुष्माद् रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः १
यः पृथिवीं व्यथमानामदृंहद् यः पर्वतान् प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात् स जनास इन्द्रः २
यो हत्वाहिमरिणात् सप्त सिन्धून् यो गा उदाजदपधा वलस्य ।
यो अश्मनोरन्तरग्निं जजान संवृक् समत्सु स जनास इन्द्रः ३
येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः ।
श्वघ्नीव यो जिगीवाँ लक्षमाद—दर्यः पुष्टानि स जनास इन्द्रः ४ ११२५
यं स्मा पृच्छन्ति कुह सेति घोर—मुतेमाहुर्नैषो अस्तीत्येनम् ।
सो अर्यः पुष्टीर्विज इवा मिनाति श्रदस्मै धत्त स जनास इन्द्रः ५
यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः ।
युक्तग्राव्णो योऽविता सुशिप्रः सुतसोमस्य स जनास इन्द्रः ६
यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः ।
यः सूर्यं य उषसं जजान यो अपां नेता स जनास इन्द्रः ७
यं क्रन्दसी संयती विह्वयेते परेऽवर उभया अमित्राः ।
समानं चिद् रथमातस्थिवांसा नाना हवेते स जनास इन्द्रः ८
यस्मान्न ऋते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत् स जनास इन्द्रः ९ ११३०
यः शश्वतो मह्येनो दधाना—नमन्यमानाञ्छर्वा जघान ।
यः शर्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः १०
यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत् ।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ११
यः सप्तरश्मिर्वृषभस्तुविष्मा—नवासृजत् सर्तवे सप्त सिन्धून् ।
यो रौहिणमस्फुरद् वज्रबाहु—र्द्यामारोहन्तं स जनास इन्द्रः १२
द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते ।
यः सोमपा निचितो वज्रबाहु—र्यो वज्रहस्तः स जनास इन्द्रः १३

यः सुन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमानमूती ।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः १४ ११३५
यः सुन्वते पचते दुध्र आ चिद् वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इन्द्र विश्वह प्रियासः सुवीरासो विदथमा वदेम १५

॥ ९१ ॥ (ऋ० २।१३।१-१३) जगती; १३ त्रिष्टुप् ।

ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद् यासु वर्धते ।
तदाहना अभवत् पिप्युषी पयो ऽंशोः पीयूषं प्रथमं तदुक्थ्यम् १
सध्रीमा यन्ति परि बिभ्रतीः पयो विश्वप्स्न्याय प्र भरन्त भोजनम् ।
समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः २
अन्वेको वदति यद् ददाति तद् रूपा मिनन्तदपा एक ईयते ।
विश्वा एकस्य विनुदस्तितिक्षते यस्ताकृणोः प्रथमं सास्युक्थ्यः ३
प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते ।
असिन्वन् दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः ४ ११४०
अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनामहिहन्नारिणक् पथः ।
तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्त्सास्युक्थ्यः ५
यो भोजनं च दयसे च वर्धन- मार्द्रादा शुष्कं मधुमद् दुदोहिथ ।
स शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः ६
यः पुष्पिणीश्च प्रस्वश्च धर्मणा ऽधि दाने व्यवनीरधारयः ।
यश्चासमा अजनो दिद्युतो दिव उरुरूर्वाँ अभितः सास्युक्थ्यः ७
यो नार्मरं सहवसुं निहन्तवे पृक्षाय च दासवेशाय चावहः ।
ऊर्जयन्त्या अपरिविष्टमास्य- मुतैवाद्य पुरुकृत् सास्युक्थ्यः ८
शतं वा यस्य दश साकमाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ ।
अरज्जौ दस्यून्त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः ९ ११४५
विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनम् ।
षळस्तभ्ना विष्टिरः पञ्च संदृशः परि परो अभवः सास्युक्थ्यः १०
सुप्रवाचनं तव वीर वीर्यं यदेकेन क्रतुना विन्दसे वसु ।
जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः ११

अरमयः सरपसस्तराय कं तुर्वीतये च वय्याय च स्रुतिम् ।
नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन्त्सास्युक्थ्यः १२
अस्मभ्यं तद् वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून् बृहद् वदेम विदथे सुवीराः १३

॥ ९३ ॥ (ऋ०२।१४।१-१२) त्रिष्टुप् ।

अध्वर्यवो भरतेन्द्राय सोम—मामत्रेभिः सिञ्चता मद्यमन्धः ।
कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि १ ११५०
अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षम् ।
तस्मा एतं भरत तद्वशायँ एष इन्द्रो अर्हति पीतिमस्य २
अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं वः ।
तस्मा एतमन्तरिक्षे न वात—मिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः ३
अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून् ।
यो अर्बुदमव नीचा बबाधे तमिन्द्रं सोमस्य भृथे हिनोत ४
अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसम् ।
यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत ५
अध्वर्यवो यः शतं शम्बरस्य पुरो बिभेदाश्मनेव पूर्वीः ।
यो वर्चिनः शतमिन्द्रः सहस्र—मपावपद् भरता सोममस्मै ६ ११५५
अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान् ।
कुत्सस्यायोरतिथिग्वस्य वीरान् न्यावृणग् भरता सोममस्मै ७
अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहन्तो नशथा तदिन्द्रे ।
गभस्तिपूतं भरत श्रुताये—न्द्राय सोमं यज्यवो जुहोत ८
अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम् ।
जुषाणो हस्त्यमभि वावशे व इन्द्राय सोमं मदिरं जुहोत ९
अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता भोजमिन्द्रम् ।
वेदाहमस्य निभृतं म एतद् दित्सन्तं भूयो यजतश्चिकेत १०
अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा ।
तमूर्दरं न पृणता यवेने—न्द्रं सोमेभिस्तदपो वो अस्तु ११ ११६०
अस्मभ्यं तद् वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून् बृहद् वदेम विदथे सुवीराः १२

॥ ९४ ॥ (ऋ० २।१५।१-१०)

प घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम् ।
त्रिकद्रुकेष्वपिबत् सुतस्या ऽस्य मदे अहिमिन्द्रो जघान १
अवंशे द्यामस्तभायद् बृहन्त मा रोदसी अपृणदन्तरिक्षम् ।
स धारयत् पृथिवीं पप्रथच्च सोमस्य ता मद इन्द्रश्चकार २
सद्मेव प्राचो वि मिमाय मानै र्वज्रेण खान्यतृणन्नदीनाम् ।
वृथासृजत् पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार ३
स प्रवोळ्हृन् परिगत्या दभीते र्विश्वमधागायुधमिद्धे अग्नौ ।
सं गोभिरश्वैरसृजद् रथेभिः सोमस्य ता मद इन्द्रश्चकार ४ ११६५
स ईं महीं धुनिमेतोररम्णात् सो अस्नातृनपारयत् स्वस्ति ।
त उत्स्नाय रयिमभि प्र तस्थुः सोमस्य ता मद इन्द्रश्चकार ५
सोदञ्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष ।
अजवसो जविनीभिर्विवृश्चन् त्सोमस्य ता मद इन्द्रश्चकार ६
स विद्वाँ अपगोहं कनीना माविर्भवन्नुदतिष्ठत् परावृक् ।
प्रति श्रोणः स्थाद् व्य१नगचष्ट सोमस्य ता मद इन्द्रश्चकार ७
भिनद् वलमङ्गिरोभिर्गृणानो वि पर्वतस्य दृंहितान्यैरत् ।
रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इन्द्रश्चकार ८
स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युं प्र दभीतिमावः
रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार ९ ११७०
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद् वदेम विदथे सुवीराः १०

॥ ९५ ॥ (ऋ० २।१६।१-९) जगती; ९ त्रिष्टुप् ।

प्र वः सतां ज्येष्ठतमाय सुष्टुति मग्नाविव समिधाने हविर्भरे ।
इन्द्रमजुर्यं जरयन्तमुक्षितं सनाद् युवानमवसे हवामहे १
यस्मादिन्द्राद् बृहतः किं चनेमृते विश्वान्यस्मिन्त्संभृताधि वीर्या ।
जठरे सोमं तन्वी३ सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुम् २
न क्षोणीभ्यां परिभ्वे त इन्द्रियं न समुद्रैः पर्वतैरिन्द्र ते रथः ।
न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुरु ३

विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरन्ति वृषभाय सश्चते ।
वृषा यजस्व हविषा विदुष्टरः पिबेन्द्र सोमं वृषभेण भानुना ४ ११७५
वृष्णः कोशः पवते मध्व ऊर्मि- र्वृषभान्नाय वृषभाय पातवे ।
वृषणाध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति ५
वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा ।
वृष्णो मदस्य वृषभ त्वमीशिष इन्द्र सोमस्य वृषभस्य तृप्णुहि ६
प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः ।
कुविन्नो अस्य वचसो निबोधिष- दिन्द्रमुत्सं न वसुनः सिचामहे ७
पुरा संबाधादभ्या ववृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी ।
सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि ८
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद् वदेम विदथे सुवीराः ९ ११८०

॥ १६ ॥ (ऋ० १।१७१।१-९) जगती; ८-९ त्रिष्टुप् ।

तदस्मै नव्यमङ्गिरस्वदर्चत शुष्मा यदस्य प्रत्नथोदीरते ।
विश्वा यद् गोत्रा सहसा परीवृता मदे सोमस्य दृंहितान्यैरयत् १
स भूतु यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत् ।
शूरो यो युत्सु तन्वं परिव्यत शीर्षणि द्यां महिना प्रत्यमुञ्चत २
अधाकृणोः प्रथमं वीर्यं महद् यदस्याग्रे ब्रह्मणा शुष्ममैरयः ।
रथेष्ठेन हर्यश्वेन विच्युताः प्र जीरयः सिस्रते सध्र्यक् पृथक् ३
अधा यो विश्वा भुवनाभि मज्मने- शानकृत् प्रवया अभ्यवर्धत ।
आद् रोदसी ज्योतिषा वह्निरातनोत् सीव्यन् तमांसि दुधिता समव्ययत् ४
स प्राचीनान् पर्वतान् दृंहदोजसा ऽधराचीनमकृणोदपामपः ।
अधारयत् पृथिवीं विश्वधायस- मस्तभ्नान्मायया द्यामवस्रसः ५ ११८५
सास्मा अरं बाहुभ्यां यं पिताकृणोद् विश्वस्मादा जनुषो वेदसस्परि ।
येना पृथिव्यां नि क्रिविं शयध्यै वज्रेण हत्व्यवृणक् तुविष्वणिः ६
अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगम् ।
कृधि प्रकेतमुप मास्या भर दद्धि भागं तन्वो३ येन मामहः ७

भोजं त्वामिन्द्र वयं हुवेम ददिष्ट्वमिन्द्रापांसि वाजान् ।
अविड्ढीन्द्र चित्रया न ऊती कृधि वृषन्निन्द्र वस्यसो नः ८
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद् वदेम विदथे सुवीराः ९

॥ ९७ ॥ (ऋ० २।१८।१-९) त्रिष्टुप् ।

प्राता रथो नवो योजि सस्नि–श्चतुर्युगस्त्रिकशः सप्तरश्मिः ।
दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत् १ ११९०
सास्मा अरं प्रथमं स द्वितीय–मुतो तृतीयं मनुषः स होता ।
अन्यस्या गर्भमन्य ऊं जनन्त सो अन्येभिः सचते जेन्यो वृषा २
हरी नु कं रथ इन्द्रस्य योज–मायै सूक्तेन वचसा नवेन ।
मो षु त्वामत्र बहवो हि विप्रा नि रीरमन् यजमानासो अन्ये ३
आ द्वाभ्यां हरिभ्यामिन्द्र या–ह्या चतुर्भिरा षड्भिर्हूयमानः ।
आष्टाभिर्दशभिः सोमपेय–मयं सुतः सुमख मा मृधस्कः ४
आ विंशत्या त्रिंशता याह्यर्वा–ङा चत्वारिंशता हरिभिर्युजानः ।
आ पञ्चाशता सुरथेभिरिन्द्रा–ऽऽ षष्ट्या सप्तत्या सोमपेयम् ५
आशीत्या नवत्या याह्यर्वा–ङा शतेन हरिभिरुह्यमानः ।
अयं हि ते शुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय ६ ११९५
मम ब्रह्मेन्द्र याह्यच्छा विश्वा हरी धुरि धिष्वा रथस्य ।
पुरुत्रा हि विहव्यो बभूथा–ऽस्मिञ्छूर सवने मादयस्व ७
न म इन्द्रेण सख्यं वि योष–दस्मभ्यमस्य दक्षिणा दुहीत ।
उप ज्येष्ठे वरूथे गभस्तौ प्रायेप्राये जिगीवांसः स्याम ८
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद् वदेम विदथे सुवीराः ९

॥ ९८ ॥ (ऋ० २।१९।१-९)

अपाय्यस्यान्धसो मदाय मनीषिणः सुवानस्य प्रयसः ।
यस्मिन्निन्द्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यन्तश्च नरः १
अस्य मन्दानो मध्वो वज्रहस्तो ऽहिमिन्द्रो अर्णोवृतं वि वृश्चत् ।
प्र यद् वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमन्त २ ११००

स माहिन इन्द्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रम् ।
अजनयत् सूर्यं विदद् गा अक्तुनाह्नां वयुनानि साधत् ३
सो अप्रतीनि मनवे पुरूणी—न्द्रो दाशद् दाशुषे हन्ति वृत्रम् ।
सद्यो यो नृभ्यो अतसाय्यो भूत् पस्पृधानेभ्यः सूर्यस्य सातौ ४
स सुन्वत इन्द्रः सूर्यमा—ऽऽदेवो रिणङ्मर्त्याय स्तवान् ।
आ यद् रयिं गुहदवद्यमस्मै भरदंशं नैतशो दशस्यन् ५
स रन्धयत् सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय ।
दिवोदासाय नवतिं च नवे—न्द्रः पुरो व्यैरच्छम्बरस्य ६
एवा त इन्द्रोचथमहेम श्रवस्या न त्मना वाजयन्तः ।
अश्याम तत् साप्तमाशुषाणा ननमो वधरदेवस्य पीयोः ७ १२०५
एवा ते गृत्समदाः शूर मन्मा—ऽवस्यवो न वयुनानि तक्षुः ।
ब्रह्मण्यन्त इन्द्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः ८
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद् वदेम विदथे सुवीराः ९

॥ ९९ ॥ (ऋ० २।२०।१-९) त्रिष्टुप्; ३ विराड्रूपा ।

वयं ते वय इन्द्र विद्धि षु णः प्र भरामहे वाजयुर्न रथम् ।
विपन्यवो दीध्यतो मनीषा सुम्नमियक्षन्तस्त्वावतो नॄन् १
त्वं न इन्द्र त्वाभिरूती त्वायतो अभिष्टिपासि जनान् ।
त्वमिनो दाशुषो वरूते—त्थाधीरभि यो नक्षति त्वा २
स नो युवेन्द्रो जोहूत्रः सखा शिवो नरामस्तु पाता ।
यः शंसन्तं यः शशमानमूती पचन्तं च स्तुवन्तं च प्रणेषत् ३ १२१०
तमु स्तुष इन्द्रं तं गृणीषे यस्मिन् पुरा वावृधुः शाशदुश्च ।
स वस्वः कामं पीपरदियानो ब्रह्मण्यतो नूतनस्यायोः ४
सो अङ्गिरसामुचथा जुजुष्वान् ब्रह्मा तूतोदिन्द्रो गातुमिष्णन् ।
मुष्णन्नुषसः सूर्येण स्तवा—नश्नस्य चिच्छिश्नथत् पूर्व्याणि ५
स ह श्रुत इन्द्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः ।
अव प्रियमर्शसानस्य साह्वा—ञ्छिरो भरद् दासस्य स्वधावान् ६
स वृत्रहेन्द्रः कृष्णयोनीः पुरंदरो दासीरैरयद् वि ।
अजनयन् मनवे क्षामपश्च सत्रा शंसं यजमानस्य तूतोत् ७

तस्मै तवस्य१मनु दायि सत्रे—न्द्राय देवेभिर्णसातौ ।
प्रति यदस्य वज्रं बाह्वोर्धु—र्हत्वी दस्यून् पुर आयसीर्नि तारीत् ८ १२१५
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद् वदेम विदथे सुवीराः ९

॥ १०० ॥ (ऋ० २।२१।१-६) जगती; ६ त्रिष्टुप् ।

विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्वराजिते ।
अश्वजिते गोजिते अब्जिते भरे—न्द्राय सोमं यजताय हर्यतम् १
अभिभुवेऽभिभङ्गाय वन्वते ऽषाळ्हाय सहमानाय वेधसे ।
तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इन्द्राय वोचत २
सत्रासाहो जनभक्षो जनंसह—श्च्यवनो युध्मो अनु जोषमुक्षितः ।
वृतंचयः सहुरिर्विक्ष्वारित इन्द्रस्य वोचं प्र कृतानि वीर्या ३
अनानुदो वृषभो दोधतो वधो गम्भीर ऋष्वो असमष्टकाव्यः ।
रध्रचोदः श्नथनो वीळितस्पृथु—रिन्द्रः सुयज्ञ उषसः स्वर्जनत् ४ १२२०
यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः ।
अभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना द्रविणान्याशत ५
इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम् ६

॥ १०१ ॥ (ऋ० २।२२।१-४) १ अष्टिः, २-३ अतिशक्करी, ४ अष्टिः अतिशक्करी वा ।

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्म—स्तृपत् सोममपिबद् विष्णुना सुतं यथावशत् ।
स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद् देवो देवं सत्यमिन्द्रं सत्य इन्दुः १
अध त्विषीमाँ अभ्योजसा क्रिविं युधाभव—दा रोदसी अपृणदस्य मज्मना प्र वावृधे ।
अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद् देवो देवं सत्यमिन्द्रं सत्य इन्दुः २
साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः ।
दाता राधः स्तुवते काम्यं वसु सैनं सश्चद् देवो देवं सत्यमिन्द्रं सत्य इन्दुः ३ १२२५
तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
यद् देवस्य शवसा प्रारिणा असुं रिणन्नपः ।
भुवद् विश्वमभ्यादेवमोजसा विदादूर्जं शतक्रतुर्विदादिषम् ४

॥ १०२ ॥ (ऋ० २।३०।१-५; ७-८; १०) [८ पूर्वाऽर्धर्चस्य सरस्वती] । त्रिष्टुप् ।

ऋतं देवाय कृण्वते सवित्र इन्द्रायाहिघ्ने न रमन्त आपः ।
अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसाम् १

यो वृत्राय सिनमत्राभरिष्यत् प्र तं जनित्री विदुष उवाच ।
पथो रदन्तीरनु जोषमस्मै दिवेदिवे धुनयो यन्त्यर्थम् २
ऊर्ध्वो ह्यस्थादध्यन्तरिक्षे ऽधा वृत्राय प्र वधं जभार ।
मिहं वसान उप हीमदुद्रोत् तिग्मायुधो अजयच्छत्रुमिन्द्रः ३
बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो असुरस्य वीरान् ।
यथा जघन्थ धृषता पुरा चि-देवा जहि शत्रुमस्माकमिन्द्र ४ १२३०
अव क्षिप दिवो अश्मानमुच्चा येन शत्रुं मन्दसानो निजूर्वाः ।
तोकस्य सातौ तनयस्य भूरे-रस्माँ अर्धं कृणुतादिन्द्र गोनाम् ५
न मा तमन्न श्रमन्नोत तन्द्र-न्न वोचाम मा सुनोतेति सोमम् ।
यो मे पृणाद् यो ददद् यो निबोधाद् यो मा सुन्वन्तमुप गोभिरायत ७
सरस्वति त्वमस्माँ अविड्ढि मरुत्वती धृषती जेषि शत्रून् ।
त्यं चिच्छर्धन्तं तविषीयमाण-मिन्द्रो हन्ति वृषभं शण्डिकानाम् ८
अस्माकेभिः सत्वभिः शूर शूरै-र्वीर्या कृधि यानि ते कर्त्वानि ।
ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि १०

॥ १०३ ॥ (ऋ० २।४१।१०-१२) गायत्री ।

इन्द्रो अङ्ग महद् भय-मभी षदप चुच्यवत् । स हि स्थिरो विचर्षणिः १० १२३५
इन्द्रश्च मृळयाति नो न नः पश्चादघं नशत् । भद्रं भवाति नः पुरः ११
इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् । जेता शत्रून् विचर्षणिः १२ १२३७

॥ १०४ ॥ (ऋ० ३।३०।१-२२) (१२३८-१२५९) गाथिनो विश्वामित्रः । त्रिष्टुप् ।

इच्छन्ति त्वा सोम्यासः सखायः सुन्वन्ति सोमं दधति प्रयांसि ।
तितिक्षन्ते अभिशस्तिं जनाना-मिन्द्र त्वदा कश्चन हि प्रकेतः १
न ते दूरे परमा चिद् रजां-स्या तु प्र याहि हरिवो हरिभ्याम् ।
स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ २
इन्द्रः सुशिप्रो मघवा तरुत्रो महाव्रातस्तुविकूर्मिर्ऋघावान् ।
यदुग्रो धा बाधितो मर्त्येषु क्व१ त्या ते वृषभ वीर्याणि ३ १२४०
त्वं हि ष्मा च्यावयन्नच्युता-न्येको वृत्रा चरसि जिघ्नमानः ।
तव द्यावापृथिवी पर्वतासो ऽनु व्रताय निमितेव तस्थुः ४
उताभये पुरुहूत श्रवोभि-रेको दृळ्हमवदो वृत्रहा सन् ।
इमे चिदिन्द्र रोदसी अपारे यत् संगृभ्णा मघवन् काशिरित् ते ५

*

प्र सू त इन्द्र प्रवता हरिभ्यां प्र ते वज्रः प्रमृणन्नेतु शत्रून् ।
जहि प्रतीचो अनूचः पराचो विश्वं सत्यं कृणुहि विष्टमस्तु ६
यस्मै धायुरदधा मर्त्यायाऽभक्तं चिद् भजते गेह्यं सः ।
भद्रा त इन्द्र सुमतिर्घृताची सहस्रदाना पुरुहूत रातिः ७
सहदानुं पुरुहूत क्षियन्तमहस्तमिन्द्र सं पिणक् कुणारुम् ।
अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ ८ ११४५
नि सामनामिषिरामिन्द्र भूमिं महीमपारां सदने ससत्थ ।
अस्तभ्नाद् द्यां वृषभो अन्तरिक्षमर्षन्त्वापस्त्वयेह प्रसूताः ९
अलातृणो वल इन्द्र व्रजो गोः पुरा हन्तोर्भयमानो व्यार ।
सुगान् पथो अकृणोन्निरजे गाः प्रावन् वाणीः पुरुहूतं धमन्तीः १०
एको द्वे वसुमती समीची इन्द्र आ पप्रौ पृथिवीमुत द्याम् ।
उतान्तरिक्षादभि नः समीक इषो रथीः सयुजः शूर वाजान् ११
दिशः सूर्यो न मिनाति प्रदिष्टा दिवेदिवे हर्यश्वप्रसूताः ।
सं यदानळध्वन आदिदश्वैर्विमोचनं कृणुते तत् त्वस्य १२
दिदृक्षन्त उषसो यामन्नक्तोर्विवस्वत्या महि चित्रमनीकम् ।
विश्वे जानन्ति महिना यदागादिन्द्रस्य कर्म सुकृता पुरूणि १३ ११५०
महि ज्योतिर्निहितं वक्षणास्वामा पक्वं चरति बिभ्रती गौः ।
विश्वं स्वाद्म संभृतमुस्रियायां यत् सीमिन्द्रो अदधाद् भोजनाय १४
इन्द्र दृह्य यामकोशा अभूवन् यज्ञाय शिक्ष गृणते सखिभ्यः ।
दुर्मायवो दुरेवा मर्त्यासो निषङ्गिणो रिपवो हन्त्वासः १५
सं घोषः शृण्वेऽवमैरमित्रैर्जही न्येष्वशनिं तपिष्ठाम् ।
वृश्चेमधस्ताद् वि रुजा सहस्व जहि रक्षो मघवन् रन्धयस्व १६
उद् वृह रक्षः सहमूलमिन्द्र वृश्चा मध्यं प्रत्यग्रं शृणीहि ।
आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य १७
स्वस्तये वाजिभिश्च प्रणेतः सं यन्महीरिष आसत्सि पूर्वीः ।
रायो वन्तारो बृहतः स्यामाऽस्मे अस्तु भग इन्द्र प्रजावान् १८ ११५५
आ नो भर भगमिन्द्र द्युमन्तं नि ते देष्णस्य धीमहि प्ररेके ।
ऊर्व इव पप्रथे कामो अस्मे तमा पृण वसुपते वसूनाम् १९
इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च ।
स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् २०

आ नो गोत्रा दर्द्दहि गोपते गाः समस्मभ्यं सनयो यन्तु वाजाः ।
दिवक्षा असि वृषभ सत्यशुष्मो ऽस्मभ्यं सु मघवन् बोधि गोदाः २१
शुनं हुवेम मघवानमिन्द्र—मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् २२

॥ १०५ ॥ (ऋ० ३।३१।१-२२) कुशिक ऐषीरथिः, गाथिनो विश्वामित्रो वा ।

शासद् वह्निर्दुहितुर्नप्त्यं गाद् विद्वाँ ऋतस्य दीधितिं सपर्यन् ।
पिता यत्र दुहितुः सेकमृञ्जन् त्सं शग्म्येन मनसा दधन्वे १ १२६०
न जामये तान्वो रिक्थमारैक् चकार गर्भं सनितुर्निधानम् ।
यदी मातरो जनयन्त वह्नि—मन्यः कर्ता सुकृतोरन्य ऋन्धन् २
अग्निर्जज्ञे जुह्वा३ रेजमानो महस्पुत्राँ अरुषस्य प्रयक्षे ।
महान् गर्भो मह्या जातमेषां मही प्रवृद्धर्यश्वस्य यज्ञैः ३
अभि जैत्रीरसचन्त स्पृधानं महि ज्योतिस्तमसो निरजानन् ।
तं जानतीः प्रत्युदायन्नुषासः पतिर्गवामभवदेक इन्द्रः ४
वीळौ सतीरभि धीरा अतृन्दन् प्राचाहिन्वन् मनसा सप्त विप्राः ।
विश्वामविन्दन् पथ्यामृतस्य प्रजानन्नित्ता नमसा विवेश ५
विदद् यदी सरमा रुग्णमद्रे—र्महि पाथः पूर्व्यं सध्र्यक्कः ।
अग्रं नयत् सुपद्यक्षराणा—मच्छा रवं प्रथमा जानती गात् ६ १२६५
अगच्छदु विप्रतमः सखीय—न्नसूदयत् सुकृते गर्भमद्रिः ।
ससान मर्यो युवभिर्मखस्य—न्नथाभवदङ्गिराः सद्यो अर्चन् ७
सतःसतः प्रतिमानं पुरोभू—र्विश्वा वेद जनिमा हन्ति शुष्णम् ।
प्र णो दिवः पदवीर्गव्युरर्चन् त्सखा सखीरँमुञ्चन्निरवद्यात् ८
नि गव्यता मनसा सेदुरर्कैः कृण्वानासो अमृतत्वाय गातुम् ।
इदं चिन्नु सदनं भूर्येषां येन मासाँ असिषासन्नृतेन ९
संपश्यमाना अमदन्नभि स्वं पयः प्रत्नस्य रेतसो दुघानाः ।
वि रोदसी अतपद् घोष एषां जाते निःष्ठामदधुर्गोषु वीरान् १०
स जातेभिर्वृत्रहा सेदु हव्यै—रुदुस्रिया असृजदिन्द्रो अर्कैः ।
उरूच्यस्मै घृतवद् भरन्ती मधु स्वाद्म दुदुहे जेन्या गौः ११ १२७०
पित्रे चिच्चक्रुः सदनं समस्मै महि त्विषीमत् सुकृतो वि हि ख्यन् ।
विष्कभ्नन्तः स्कम्भनेना जनित्री आसीना ऊर्ध्वं रभसं वि मिन्वन् १२

मही यदि धिषणा शिश्नथे धात् सद्योवृधं विभ्वं१ रोदस्योः ।
गिरो यस्मिन्ननवद्याः समीची—र्विश्वा इन्द्राय तविषीरनुत्ताः १३
मह्या ते सख्यं वश्मि शक्ती—रा वृत्रघ्ने नियुतो यन्ति पूर्वीः ।
महि स्तोत्रमव आगन्म सूरे—रस्माकं सु मघवन् बोधि गोपाः १४
महि क्षेत्रं पुरु श्चन्द्रं विविद्वा—नादित् सखिभ्यश्चरथं समैरत् ।
इन्द्रो नृभिरजनद् दीद्यानः साकं सूर्यमुषसं गातुमग्निम् १५
अपश्चिदेष विभ्वो३ दमूनाः प्र सध्रीचीरसृजद् विश्वश्चन्द्राः ।
मध्वः पुनानाः कविभिः पवित्रै—र्द्युभिर्हिन्वत्यक्तुभिर्धनुत्रीः १६ ११७५
अनु कृष्णे वसुधिती जिहाते उभे सूर्यस्य मंहना यजत्रे ।
परि यत् ते महिमानं वृजध्यै सखाय इन्द्र काम्या ऋजिप्याः १७
पतिर्भव वृत्रहन्त्सूनृतानां गिरां विश्वायुर्वृषभो वयोधाः ।
आ नो गहि सख्येभिः शिवेभि—र्महान् महीभिरूतिभिः सरण्यन् १८
तमङ्गिरस्वन्नमसा सपर्यन् नव्यं कृणोमि सन्यसे पुराजाम् ।
द्रुहो वि याहि बहुला अदेवीः स्वश्च नो मघवन्त्सातये धाः १९
मिहः पावकाः प्रतता अभूवन् त्स्वस्ति नः पिपृहि पारमासाम् ।
इन्द्र त्वं रथिरः पाहि नो रिषो मक्षूमक्षू कृणुहि गोजितो नः २०
अदेदिष्ट वृत्रहा गोपतिर्गा अन्तः कृष्णाँ अरुषैर्धामभिर्गात् ।
प्र सूनृता दिशमान ऋतेन दुरश्च विश्वा अवृणोदप स्वाः २१ ११८०
शुनं हुवेम मघवानमिन्द्र—मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् २२

॥ १०६ ॥ (ऋ० ३।३१।१-२२)

इन्द्र सोमं सोमपते पिबेमं माध्यंदिनं सवनं चारु यत् ते ।
प्रपुथ्या शिप्रे मघवन्नृजीषिन् विमुच्या हरी इह मादयस्व १
गवाशिरं मन्थिनमिन्द्र शुक्रं पिबा सोमं ररिमा ते मदाय ।
ब्रह्मकृता मारुतेना गणेन सजोषा रुद्रैस्तृपदा वृषस्व २
ये ते शुष्मं ये तविषीमवर्ध—न्नर्चन्त इन्द्र मरुतस्त ओजः ।
माध्यंदिने सवने वज्रहस्त पिबा रुद्रेभिः सगणः सुशिप्र ३
त इन्न्वस्य मधुमद् विविप्र इन्द्रस्य शर्धो मरुतो य आसन् ।
येभिर्वृत्रस्येषितो विवेदा—ऽमर्मणो मन्यमानस्य मर्म ४ ११८५

मनुष्वदिन्द्र सवनं जुषाणः   पिबा सोमं शश्वते वीर्याय ।
स आ ववृत्स्व हर्यश्व यज्ञैः   सरण्युभिरपो अर्णा सिसर्षि   ५
त्वमपो यद्ध वृत्रं जघन्वाँ   अत्याँ इव प्रासृजः सर्तवाजौ ।
शयानमिन्द्र चरता वधेन   वव्रिवांसं परि देवीरदेवम्   ६
यजाम इन्नमसा वृद्धमिन्द्रं   बृहन्तमृष्वमजरं युवानम् ।
यस्य प्रिये ममतुर्यज्ञियस्य   न रोदसी महिमानं ममाते   ७
इन्द्रस्य कर्म सुकृता पुरूणि   व्रतानि देवा न मिनन्ति विश्वे ।
दाधार यः पृथिवीं द्यामुतेमां   जजान सूर्यमुषसं सुदंसाः   ८
अद्रोघ सत्यं तव तन्महित्वं   सद्यो यज्जातो अपिबो ह सोमम् ।
न द्याव इन्द्र तवसस्त ओजो   नाहा न मासाः शरदो वरन्त   ९   ११९०
त्वं सद्यो अपिबो जात इन्द्र   मदाय सोमं परमे व्योमन् ।
यद्ध द्यावापृथिवी आविवेशी—रथाभवः पूर्व्यः कारुधायाः   १०
अहन्नहिं परिशयानमर्ण   ओजायमानं तुविजात तव्यान् ।
न ते महित्वमनु भूदध द्यौ—र्यदन्यया स्फिग्या३ क्षामवस्थाः   ११
यज्ञो हि त इन्द्र वर्धनो भू—दुत प्रियः सुतसोमो मियेधः ।
यज्ञेन यज्ञमव यज्ञियः सन्   यज्ञस्ते वज्रमहिहत्य आवत्   १२
यज्ञेनेन्द्रमवसा चक्रे अर्वा—गैनं सुम्नाय नव्यसे ववृत्याम् ।
यः स्तोमेभिर्वावृधे पूर्व्येभि—र्यो मध्यमेभिरुत नूतनेभिः   १३
विवेष यन्मा धिषणा जजान   स्तवै पुरा पार्यादिन्द्रमह्नः ।
अंहसो यत्र पीपरद् यथा नो   नावेव यान्तमुभये हवन्ते   १४   ११९५
आपूर्णो अस्य कलशः स्वाहा   सेक्तेव कोशं सिसिचे पिबध्यै ।
समु प्रिया आववृत्रन् मदाय   प्रदक्षिणिदभि सोमास इन्द्रम्   १५
न त्वा गभीरः पुरुहूत सिन्धु—र्नाद्रयः परि षन्तो वरन्त ।
इत्था सखिभ्य इषितो यदिन्द्रा—ऽऽदृळ्हं चिदरुजो गव्यमूर्वम्   १६
शुनं हुवेम मघवानमिन्द्र—मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु   घ्नन्तं वृत्राणि संजितं धनानाम्   १७

॥ १०७ ॥ (ऋ० ३।३३।६-७)

इन्द्रो अस्माँ अरदद् वज्रबाहु—रपाहन् वृत्रं परिधिं नदीनाम् ।
देवोऽनयत् सविता सुपाणि—स्तस्य वयं प्रसवे याम उर्वीः   ६

प्रवाच्यं शश्वधा वीर्यं१ त-दिन्द्रस्य कर्म यदहिं विवृश्चत ।
वि वज्रेण परिषदो जघाना-ऽऽयन्नापोऽयनमिच्छमानाः ७ १३००

॥ १०८ ॥ (ऋ० ३।३४।१-११)

इन्द्रः पूर्भिदातिरद् दासमर्कै-र्विददद् वसुर्दयमानो वि शत्रून् ।
ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद् रोदसी उभे १
मखस्य ते तविषस्य प्र जूति-मियर्मि वाचममृताय भूषन् ।
इन्द्र क्षितीनामसि मानुषीणां विशां दैवीनामुत पूर्वयावा २
इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद् वर्पणीतिः ।
अहन् व्यंसमुशधग्वने-ष्वाविर्धेना अकृणोद् राम्याणाम् ३
इन्द्रः स्वर्षा जनयन्नहानि जिगायोशिग्भिः पृतना अभिष्टिः ।
प्रारोचयन्मनवे केतुमह्ना-मविन्दज्ज्योतिर्बृहते रणाय ४
इन्द्रस्तुजो बर्हणा आ विवेश नृवद् दधानो नर्या पुरूणि ।
अचेतयद् धिय इमा जरित्रे प्रेमं वर्णमतिरच्छुक्रमासाम् ५ १३०५
महो महानि पनयन्त्यस्ये-न्द्रस्य कर्म सुकृता पुरूणि ।
वृजनेन वृजिनान्त्सं पिपेष मायाभिर्दस्यूँरभिभूत्योजाः ६
युधेन्द्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः ।
विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति ७
सत्रासाहं वरेण्यं सहोदां ससवांसं स्वरपश्च देवीः ।
ससान यः पृथिवीं द्यामुतेमा-मिन्द्रं मदन्त्यनु धीरणासः ८
ससानात्याँ उत सूर्यं ससाने-न्द्रः ससान पुरुभोजसं गाम् ।
हिरण्ययमुत भोगं ससान हत्वी दस्यून् प्रार्यं वर्णमावत् ९
इन्द्र ओषधीरसनोदहानि वनस्पतींरसनोदन्तरिक्षम् ।
बिभेद वलं नुनुदे विवाचो ऽथाभवद् दमिताभिक्रतूनाम् १० १३१०
शुनं हुवेम मघवानमिन्द्र-मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ११

॥ १०९ ॥ (ऋ० ३।३५।१-११)

तिष्ठा हरी रथ आ युज्यमाना याहि वायुर्न नियुतो नो अच्छ ।
पिबास्यन्धो अभिसृष्टो अस्मे इन्द्र स्वाहा ररिमा ते मदाय १
उपाजिरा पुरुहूताय सप्ती हरी रथस्य धूर्ष्वा युनज्मि ।
द्रवद् यथा संभृतं विश्वतश्चि-दुपेमं यज्ञमा वहात इन्द्रम् २

उपो नयस्व वृषणा तपुष्पो‍तेमव त्वं वृषभ स्वधावः ।
ग्रसेतामश्वा वि मुचेह शोणा दिवेदिवे सदृशीरद्धि धानाः । ३
ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमाद आशू ।
स्थिरं रथं सुखमिन्द्राधितिष्ठन् प्रजानन् विद्वाँ उप याहि सोमम् ४ १३१५
मा ते हरी वृषणा वीतपृष्ठा नि रीरमन् यजमानासो अन्ये ।
अत्यायाहि शश्वतो वयं तेऽरं सुतेभिः कृणवाम सोमैः ५
तवायं सोमस्त्वमेह्यर्वाङ् शश्वत्तमं सुमना अस्य पाहि ।
अस्मिन् यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इन्दुमिन्द्र ६
स्तीर्णं ते बर्हिः सुत इन्द्र सोमः कृता धाना अत्तवे ते हरिभ्याम् ।
तदोकसे पुरुशाकाय वृष्णे मरुत्वते तुभ्यं राता हवींषि ७
इमं नरः पर्वतास्तुभ्यमापः समिन्द्र गोभिर्मधुमन्तमक्रन् ।
तस्यागत्या सुमना ऋष्व पाहि प्रजानन् विद्वान् पथ्या३ अनु स्वाः ८
याँ आभजो मरुत इन्द्र सोमे ये त्वामवर्धन्नभवन् गणस्ते ।
तेभिरेतं सजोषा वावशानो३ऽग्नेः पिब जिह्वया सोममिन्द्र ९ १३२०
इन्द्र पिब स्वधया चित् सुतस्या‍ऽग्नेर्वा पाहि जिह्वया यजत्र ।
अध्वर्योर्वा प्रयतं शक्र हस्ता‍द्धोतुर्वा यज्ञं हविषो जुषस्व १०
शुनं हुवेम मघवानमिन्द्र‍मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ११

॥ ११० ॥ (ऋ० ३।३६।१-११) [१० घोर आङ्गिरसः ।]

इमामू षु प्रभृतिं सातये धाः शश्वच्छश्वदूतिभिर्यादमानः ।
सुतेसुते वावृधे वर्धनेभि‍र्यः कर्मभिर्महद्भिः सुश्रुतो भूत् १
इन्द्राय सोमाः प्रदिवो विदाना ऋभुर्येभिर्वृषपर्वा विहायाः ।
प्रयम्यमानान् प्रति षू गृभाये‍न्द्र पिब वृषधूतस्य वृष्णः २
पिबा वर्धस्व तव घा सुतास इन्द्र सोमासः प्रथमा उतेमे ।
यथापिबः पूर्व्याँ इन्द्र सोमाँ एवा पाहि पन्यो अद्या नवीयान् ३ १३२५
महाँ अमत्रो वृजने विरप्श्यु१‍ग्रं शवः पत्यते धृष्ण्वोजः ।
नाह विव्याच पृथिवी चनैनं यत् सोमासो हर्यश्वममन्दन् ४
महाँ उग्रो वावृधे वीर्याय समाचक्रे वृषभः काव्येन ।
इन्द्रो भगो वाजदा अस्य गावः प्र जायन्ते दक्षिणा अस्य पूर्वीः ५

प्र यत् सिन्धवः प्रसवं यथाय—न्नापः समुद्रं रथ्येव जग्मुः ।
अतश्चिदिन्द्रः सदसो वरीयान् यदीं सोमः पृणति दुग्धो अंशुः ६
समुद्रेण सिन्धवो यादमाना इन्द्राय सोमं सुषुतं भरन्तः ।
अंशुं दुहन्ति हस्तिनो भरित्रै—र्मध्वः पुनन्ति धारया पवित्रैः ७
ह्रदा इव कुक्षयः सोमधानाः समीं विव्याच सवना पुरूणि ।
अन्ना यदिन्द्रः प्रथमा व्याश वृत्रं जघन्वाँ अवृणीत सोमम् ८ १३३०
आ तू भर माकिरेतत् परि ष्ठाद् विद्मा हि त्वा वसुपतिं वसूनाम् ।
इन्द्र यत् ते माहिनं दत्रम—स्त्यस्मभ्यं तद्धर्यश्व प्र यन्धि ९
अस्मे प्र यन्धि मघवन्नृजीषि—न्निन्द्र रायो विश्ववारस्य भूरेः ।
अस्मे शतं शरदो जीवसे धा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन् १०
शुनं हुवेम मघवानमिन्द्र—मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ११

॥ १११ ॥ (ऋ० ३।३७।१-११) गायत्री, ११ अनुष्टुप् ।

वार्त्रहत्याय शवसे पृतनाषाह्याय च । इन्द्र त्वा वर्तयामसि १
अर्वाचीनं सु ते मन उत चक्षुः शतक्रतो । इन्द्र कृण्वन्तु वाघतः २ १३३५
नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे । इन्द्राभिमातिषाह्ये ३
पुरुष्टुतस्य धामभिः शतेन महयामसि । इन्द्रस्य चर्षणीधृतः ४
इन्द्रं वृत्राय हन्तवे पुरुहूतमुप ब्रुवे । भरेषु वाजसातये ५
वाजेषु सासहिर्भव त्वामीमहे शतक्रतो । इन्द्र वृत्राय हन्तवे ६
द्युम्नेषु पृतनाज्ये पृत्सुतूर्षु श्रवःसु च । इन्द्र साक्ष्वाभिमातिषु ७ १३४०
शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम् । इन्द्र सोमं शतक्रतो ८
इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु । इन्द्र तानि त आ वृणे ९
अगन्निन्द्र श्रवो बृहद् द्युम्नं दधिष्व दुष्टरम् । उत ते शुष्मं तिरामसि १०
अर्वावतो न आ ग—ह्यथो शक्र परावतः ।
उ लोको यस्ते अद्रिव इन्द्रेह तत आ गहि ११

॥ ११२ ॥ (ऋ० ३।३८।१-१०)

[प्रजापतिर्वैश्वामित्रः, प्रजापतिर्वाच्यो वा; तावुभावपि वा गाथिनो विश्वामित्रो वा ।] त्रिष्टुप् ।

अभि तष्टेव दीधया मनीषा—मत्यो न वाजी सुधुरो जिहानः ।
अभि प्रियाणि मर्मृशत् पराणि कवीँरिच्छामि संदृशे सुमेधाः १ १३४५

इनोत पृच्छ जनिमा कवीनां मनोधृतः सुकृतस्तक्षत द्याम् ।
इमा उ ते प्रण्योऽ वर्धमाना मनोवाता अध नु धर्मणि ग्मन् २
नि षीमिदत्र गुह्या दधाना उत क्षत्राय रोदसी समञ्जन् ।
सं मात्राभिर्ममिरे येमुरुर्वी अन्तर्मही समृते धायसे धुः ३
आतिष्ठन्तं परि विश्वे अभूष ञ्छ्रियो वसानश्चरति स्वरोचिः ।
महत् तद् वृष्णो असुरस्य नामा ऽऽ विश्वरूपो अमृतानि तस्थौ ४
असूत पूर्वो वृषभो ज्याया निमा अस्य शुरुधः सन्ति पूर्वीः ।
दिवो नपाता विदथस्य धीभिः क्षत्रं राजाना प्रदिवो दधाथे ५
त्रीणि राजाना विदथे पुरूणि परि विश्वानि भूषथः सदांसि ।
अपश्यमत्र मनसा जगन्वान् व्रते गन्धर्वाँ अपि वायुकेशान् ६ १३५०
तदिन्न्वस्य वृषभस्य धेनो रा नामभिर्ममिरे सक्म्यं गोः ।
अन्यदन्यदसुर्यं१ वसाना नि मायिनो ममिरे रूपमस्मिन् ७
तदिन्न्वस्य सवितुर्नकिर्मे हिरण्ययीममतिं यामशिश्रेत् ।
आ सुष्टुती रोदसी विश्वमिन्वे अपीव योषा जनिमानि वव्रे ८
युवं प्रत्नस्य साधथो महो यद् दैवी स्वस्तिः परि णः स्यातम् ।
गोपाजिह्वस्य तस्थुषो विरूपा विश्वे पश्यन्ति मायिनः कृतानि ९
शुनं हुवेम मघवानमिन्द्र मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् १०

॥ ११३ ॥ (ऋ० ३।३८।१-९)

इन्द्रं मतिर्हृद आ वच्यमाना ऽच्छा पतिं स्तोमतष्टा जिगाति ।
या जागृविर्विदथे शस्यमाने न्द्र यत् ते जायते विद्धि तस्य १ १३५५
दिवश्चिदा पूर्व्या जायमाना वि जागृविर्विदथे शस्यमाना ।
भद्रा वस्त्राण्यर्जुना वसाना सेयमस्मे सनजा पित्र्या धीः २
यमा चिदत्र यमसूरसूत जिह्वाया अग्रं पतदा ह्यस्थात् ।
वपूंषि जाता मिथुना सचेते तमोहना तपुषो बुध्न एता ३
नकिरेषां निन्दिता मर्त्येषु ये अस्माकं पितरो गोषु योधाः ।
इन्द्र एषां दृंहिता माहिनावा नुद् गोत्राणि ससृजे दंसनावान् ४
सखा ह यत्र सखिभिर्नवग्वै रभिज्ञ्वा सत्वभिर्गा अनुग्मन् ।
सत्यं तदिन्द्रो दशभिर्दशग्वैः सूर्यं विवेद तमसि क्षियन्तम् ५

इन्द्रो मधु संभृतमुस्रियायां पद्वद् विवेद शफवन्नमे गोः ।
गुहा हितं गुह्यं गूळ्हमप्सु हस्ते दधे दक्षिणे दक्षिणावान् ६ १३६०
ज्योतिर्वृणीत तमसो विजान-न्नारे स्याम दुरिताद्भीके ।
इमा गिरः सोमपाः सोमवृद्ध जुषस्वेन्द्र पुरुतमस्य कारोः ७
ज्योतिर्यज्ञाय रोदसी अनु ष्या-दारे स्याम दुरितस्य भूरेः ।
भूरि चिद्धि तुजतो मर्त्यस्य सुपारासो वसवो बर्हणावत् ८
शुनं हुवेम मघवानमिन्द्र-मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ९

॥ ११४ ॥ (ऋ० ३।४०।१-९) गायत्री ।

इन्द्र त्वा वृषभं वयं सुते सोमे हवामहे । स पाहि मध्वो अन्धसः १
इन्द्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत । पिबा वृषस्व तातृपिम् २ १३६५
इन्द्र प्र णो धितावानं यज्ञं विश्वेभिर्देवेभिः । तिर स्तवान विश्पते ३
इन्द्र सोमाः सुता इमे तव प्र यन्ति सत्पते । क्षयं चन्द्रास इन्दवः ४
दधिष्वा जठरे सुतं सोममिन्द्र वरेण्यम् । तव द्युक्षास इन्दवः ५
गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे । इन्द्र त्वादातमिद् यशः ६
अभि द्युम्नानि वनिन इन्द्रं सचन्ते अक्षिता । पीत्वी सोमस्य वावृधे ७ १३७०
अर्वावतो न आ गहि परावतश्च वृत्रहन् । इमा जुषस्व नो गिरः ८
यदन्तरा परावत-मर्वावतं च हूयसे । इन्द्रेह तत आ गहि ९

॥ ११५ ॥ (ऋ० ३।४१।१-९)

आ तू न इन्द्र मद्र्य-ग्घुवानः सोमपीतये । हरिभ्यां याह्यद्रिवः १
सत्तो होता न ऋत्विय-स्तिस्तिरे बर्हिरानुषक् । अयुज्रन् प्रातरद्रयः २
इमा ब्रह्म ब्रह्मवाहः क्रियन्त आ बर्हिः सीद । वीहि शूर पुरोळाशम् ३ १३७५
रारन्धि सवनेषु ण एषु स्तोमेषु वृत्रहन् । उक्थेष्विन्द्र गिर्वणः ४
मतयः सोमपामुरुं रिहन्ति शवसस्पतिम् । इन्द्रं वत्सं न मातरः ५
स मन्दस्वा ह्यन्धसो राधसे तन्वा महे । न स्तोतारं निदे करः ६
वयमिन्द्र त्वायवो हविष्मन्तो जरामहे । उत त्वमस्मयुर्वसो ७
मारे अस्मद् वि मुमुचो हरिप्रियार्वाङ् याहि । इन्द्र स्वधावो मत्स्वेह ८ १३८०
अर्वाञ्चं त्वा सुखे रथे वहतामिन्द्र केशिना । घृतस्नू बर्हिरासदे ९

॥ ११६ ॥ (ऋ० ३।४२।१-९)

उप नः सुतमा गहि सोममिन्द्र गवाशिरम् । हरिभ्यां यस्ते अस्मयुः १

तमिन्द्र मदमा गहि बर्हिःष्ठां ग्रावभिः सुतम् । कुविन्न्वस्य तृप्णवः २
इन्द्रमित्था गिरो ममाऽच्छागुरिषिता इतः । आवृते सोमपीतये ३
इन्द्रं सोमस्य पीतये स्तोमैरिह हवामहे । उक्थेभिः कुविदागमत् ४ १३८५
इन्द्र सोमाः सुता इमे तान् दधिष्व शतक्रतो । जठरे वाजिनीवसो ५
विद्मा हि त्वा धनंजयं वाजेषु दधृषं कवे । अधा ते सुम्नमीमहे ६
इममिन्द्र गवाशिरं यवाशिरं च नः पिब । आगत्या वृषभिः सुतम् ७
तुभ्येदिन्द्र स्व ओक्ये३ सोमं चोदामि पीतये । एष रारन्तु ते हृदि ८
त्वां सुतस्य पीतये प्रत्नमिन्द्र हवामहे । कुशिकासो अवस्यवः ९ १३९०

॥ ११७ ॥ (ऋ० ३।४३।१-८) त्रिष्टुप् ।

आ याह्यर्वाङुप वन्धुरेष्ठास्तवेदनु प्रदिवः सोमपेयम् ।
प्रिया सखाया वि मुचोप बर्हिस्त्वामिमे हव्यवाहो हवन्ते १
आ याहि पूर्वीरति चर्षणीराँ अर्य आशिष उप नो हरिभ्याम् ।
इमा हि त्वा मतयः स्तोमतष्टा इन्द्र हवन्ते सख्यं जुषाणाः २
आ नो यज्ञं नमोवृधं सजोषा इन्द्र देव हरिभिर्याहि तूयम् ।
अहं हि त्वा मतिभिर्जोहवीमि घृतप्रयाः सधमादे मधूनाम् ३
आ च त्वामेता वृषणा वहातो हरी सखाया सुधुरा स्वङ्गा ।
धानावदिन्द्रः सवनं जुषाणः सखा सख्युः शृणवद् वन्दनानि ४
कुविन्मा गोपां करसे जनस्य कुविद् राजानं मघवन्नृजीषिन् ।
कुविन्म ऋषिं पपिवांसं सुतस्य कुविन्मे वस्वो अमृतस्य शिक्षाः ५ १३९५
आ त्वा बृहन्तो हरयो युजाना अर्वागिन्द्र सधमादो वहन्तु ।
प्र ये द्विता दिव ऋञ्जन्त्याताः सुसंमृष्टासो वृषभस्य मूराः ६
इन्द्र पिब वृषधूतस्य वृष्ण आ यं ते श्येन उशते जभार ।
यस्य मदे च्यावयसि प्र कृष्टीर्यस्य मदे अप गोत्रा ववर्थ ७
शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ८

॥ ११८ ॥ (ऋ० ३।४४।१-५) बृहती ।

अयं ते अस्तु हर्यतः सोम आ हरिभिः सुतः ।
जुषाण इन्द्र हरिभिर्न आ गह्या तिष्ठ हरितं रथम् १
हर्यन्नुषसमर्चयः सूर्यं हर्यन्नरोचयः ।
विद्वांश्चिकित्वान् हर्यश्व वर्धस इन्द्र विश्वा अभि श्रियः २ १४००

द्यामिन्द्रो हरिधायसं पृथिवीं हरिवर्पसम् ।
अधारयद्धरितोर्भूरि भोजनं ययोरन्तर्हरिश्चरत् ३

जज्ञानो हरितो वृषा विश्वमा भाति रोचनम् ।
हर्यश्वो हरितं धत्त आयुध—मा वज्रं बाह्वोर्हरिम् ४

इन्द्रो हर्यन्तमर्जुनं वज्रं शुक्रैरभीवृतम् ।
अपावृणोद्धरिभिरद्रिभिः सुत—मुद् गा हरिभिराजत ५

॥ ११९ ॥ (ऋ० ३।४५।१-५)

आ मन्द्रैरिन्द्र हरिभि—र्याहि मयूररोमभिः ।
मा त्वा के चिन्नि यमन्विं न पाशिनो ऽति धन्वेव ताँ इहि १

वृत्रखादो वलंरुजः पुरां दर्मो अपामजः ।
स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृळ्हा चिदारुजः २ १४०५

गम्भीराँ उदधीँरिव क्रतुं पुष्यसि गा इव ।
प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ३

आ नस्तुजं रयिं भरा—ऽंशं न प्रतिजानते ।
वृक्षं पक्वं फलमङ्कीव धूनुही—न्द्र संपारणं वसु ४

स्वयुरिन्द्र स्वराळसि स्मद्दिष्टिः स्वयशस्तरः ।
स वावृधान ओजसा पुरुष्टुत भवा नः सुश्रवस्तमः ५

॥ १२० ॥ (ऋ० ३।४६।१-५) त्रिष्टुप् ।

युध्मस्य ते वृषभस्य स्वराज उग्रस्य यूनः स्थविरस्य घृष्वेः ।
अजूर्यतो वज्रिणो वीर्या३णी—न्द्र श्रुतस्य महतो महानि १

महाँ असि महिष वृष्ण्येभि—र्धनस्पृदुग्र सहमानो अन्यान् ।
एको विश्वस्य भुवनस्य राजा स योधया च क्षयया च जनान् २ १४१०

प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर्विश्वतो अप्रतीतः ।
प्र मज्मना दिव इन्द्रः पृथिव्याः प्रोरोर्महो अन्तरिक्षादृजीषी ३

उरुं गभीरं जनुषाभ्यु१ग्रं विश्वव्यचसमवतं मतीनाम् ।
इन्द्रं सोमासः प्रदिवि सुतासः समुद्रं न स्रवत आ विशन्ति ४

यं सोममिन्द्र पृथिवीद्यावा गर्भं न माता बिभृतस्त्वाया ।
तं ते हिन्वन्ति तमु ते मृजन्त्य—ध्वर्यवो वृषभ पातवा उ ५

॥ १११ ॥ (ऋ० ३।४७।१-५)

मरुत्वाँ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम् १
सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूँरप मृधो नुदस्वा ऽथाभयं कृणुहि विश्वतो नः २ १४१५
उत ऋतुभिर्ऋतुपाः पाहि सोम मिन्द्र देवेभिः सखिभिः सुतं नः ।
याँ आभजो मरुतो ये त्वा ऽन्वहन् वृत्रमदधुस्तुभ्यमोजः ३
ये त्वाहिहत्ये मघवन्नवर्धन् ये शाम्बरे हरिवो ये गविष्टौ ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमं सगणो मरुद्भिः ४
मरुत्वन्तं वृषभं वावृधान मकवारिं दिव्यं शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायो ग्रं सहोदामिह तं हुवेम ५

॥ ११२ ॥ (ऋ० ३।४८।१-५)

सद्यो ह जातो वृषभः कनीनः प्रभर्तुमावदन्धसः सुतस्य ।
साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सोम्यस्य १
यज्जायथास्तदहरस्य कामे ऽशोः पीयूषमपिबो गिरिष्ठाम् ।
तं ते माता परि योषा जनित्री महः पितुर्दम आसिञ्चदग्रे २ १४२०
उपस्थाय मातरमन्नमैट्ट तिग्ममपश्यदभि सोममूधः ।
प्रयावयन्नचरद् गृत्सो अन्यान् महानि चक्रे पुरुधप्रतीकः ३
उग्रस्तुराषाळभिभूत्योजा यथावशं तन्वं चक्र एषः ।
त्वष्टारमिन्द्रो जनुषाभिभूया ऽऽमुष्या सोममपिबच्चमूषु ४
शुनं हुवेम मघवानमिन्द्र मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ५

॥ ११३ ॥ (ऋ० ३।४९।१-५)

शंसा महामिन्द्रं यस्मिन् विश्वा आ कृष्टयः सोमपाः काममव्यन् ।
यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयन्त देवाः १
यं नु नकिः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठाम् ।
इनतमः सत्वभिर्यो ह शूषैः पृथुज्रया अमिनादायुर्दस्योः २ १४२५
सहावा पृत्सु तरणिर्नार्वा व्यानशी रोदसी मेहनावान् ।
भगो न कारे हव्यो मतीनां पितेव चारुः सुहवो वयोधाः ३

धर्ता दिवो रजसस्पृष्ट ऊर्ध्वो रथो न वायुर्वसुभिर्नियुत्वान् ।
क्षपां वस्ता जनिता सूर्यस्य विभक्ता भागं धिषणेव वाजम् ४
शुनं हुवेम मघवानमिन्द्र—मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ५

॥ १२४ ॥ (ऋ० ३।५०।१-५)

इन्द्रः स्वाहा पिबतु यस्य सोम आगत्या तुम्रो वृषभो मरुत्वान् ।
ओरुव्यचाः पृणतामेभिरन्नै—रास्य हविस्तन्वः१ः काममृध्याः १
आ ते सपर्यू जवसे युनज्मि ययोरनु प्रदिवः श्रुष्टिमावः ।
इह त्वा धेयुर्हरयः सुशिप्र पिबा त्व१स्य सुषुतस्य चारोः २ १४३०
गोभिर्मिमिक्षुं दधिरे सुपार—मिन्द्रं ज्यैष्ठ्याय धायसे गृणानाः ।
मन्दानः सोमं पपिवाँ ऋजीषिन् त्समस्मभ्यं पुरुधा गा इषण्य ३
इमं कामं मन्दया गोभिरश्वै—श्चन्द्रवता राधसा पप्रथश्च ।
स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ४
शुनं हुवेम मघवानमिन्द्र—मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ५

॥ १२५ ॥ (ऋ० ३।५१।१-१२) त्रिष्टुप्, १-३ जगती, १०-१२ गायत्री ।

चर्षणीधृतं मघवानमुक्थ्य१—मिन्द्रं गिरो बृहतीरभ्यनूषत ।
वावृधानं पुरुहूतं सुवृक्तिभि—रमर्त्यं जरमाणं दिवेदिवे १
शतक्रतुमर्णवं शाकिनं नरं गिरो म इन्द्रमुप यन्ति विश्वतः ।
वाजसनिं पूर्भिदं तूर्णिमप्तुरं धामसाचमभिषाचं स्वर्विदम् २ १४३५
आकरे वसोर्जरिता पनस्यते ऽनेहसः स्तुभ इन्द्रो दुवस्यति ।
विवस्वतः सदन आ हि पिप्रिये सत्रासाहमभिमातिहनं स्तुहि ३
नृणामु त्वा नृतमं गीर्भिरुक्थै—रभि प्र वीरमर्चता सबाधः ।
सं सहसे पुरुमायो जिहीते नमो अस्य प्रदिव एक ईशे ४
पूर्वीरस्य निष्षिधो मर्त्येषु पुरू वसूनि पृथिवी बिभर्ति ।
इन्द्राय द्याव ओषधीरुतापो रयिं रक्षन्ति जीरयो वनानि ५
तुभ्यं ब्रह्माणि गिर इन्द्र तुभ्यं सत्रा दधिरे हरिवो जुषस्व ।
बोध्या३पिरवसो नूतनस्य सखे वसो जरितृभ्यो वयो धाः ६
इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।
तव प्रणीती तव शूर शर्म—न्ना विवासन्ति कवयः सुयज्ञाः ७ १४४०

स वावशान इह पाहि सोमं मरुद्भिरिन्द्र सखिभिः सुतं नः ।
जातं यत् त्वा परि देवा अभूषन् महे भराय पुरुहूत विश्वे ८
अप्तूर्ये मरुत आपिरेषो ऽमन्दन्निन्द्रमनु दातिवाराः ।
तेभिः साकं पिबतु वृत्रखादः सुतं सोमं दाशुषः स्वे सधस्थे ९
इदं ह्यन्वोजसा सुतं राधानां पते । पिबा त्व१स्य गिर्वणः १०
यस्ते अनु स्वधामसत् सुते नि यच्छ तन्वम् । स त्वा ममत्तु सोम्यम् ११
प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः । प्र बाहू शूर राधसे १२ १४४५

॥ १२६ ॥ (ऋ० ३।५२।१-८) त्रिष्टुप्, १-४ गायत्री, ६ जगती ।

धानावन्तं करम्भिण मपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्व नः १
पुरोळाशं पचत्यं जुषस्वेन्द्रा गुरस्व च । तुभ्यं हव्यानि सिस्रते २
पुरोळाशं च नो घसो जोषयासे गिरश्च नः । वधूयुरिव योषणाम् ३
पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः । इन्द्र क्रतुर्हि ते बृहन् ४
माध्यंदिनस्य सवनस्य धानाः पुरोळाशमिन्द्र कृष्वेह चारुम् ।
प्र यत् स्तोता जरिता तूर्ण्यर्थो वृषायमाण उप गीर्भिरीट्टे ५ १४५०
तृतीये धानाः सवने पुरुष्टुत पुरोळाशमाहुतं मामहस्व नः ।
ऋभुमन्तं वाजवन्तं त्वा कवे प्रयस्वन्त उप शिक्षेम धीतिभिः ६
पूषण्वते ते चकृमा करम्भं हरिवते हर्यश्वाय धानाः ।
अपूपमद्धि सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ७
प्रति धाना भरत तूयमस्मै पुरोळाशं वीरतमाय नृणाम् ।
दिवेदिवे सदृशीरिन्द्र तुभ्यं वर्धन्तु त्वा सोमपेयाय धृष्णो ८

॥ १२७ ॥ (ऋ० ३।५३।१-१४) त्रिष्टुप्; १० जगती, ११ अनुष्टुप्, १३ गायत्री ।

तिष्ठा सु कं मघवन् मा परा गाः सोमस्य नु त्वा सुषुतस्य यक्षि ।
पितुर्न पुत्रः सिचमा रभे त इन्द्र स्वादिष्ठया गिरा शचीवः २
शंसावाध्वर्यो प्रति मे गृणीही न्द्राय वाहः कृणवाव जुष्टम् ।
एदं बर्हिर्यजमानस्य सीदा ऽथा च भूदुक्थमिन्द्राय शस्तम् ३ १४५५
जायेदस्तं मघवन्त्सेदु योनि स्तदित् त्वा युक्ता हरयो वहन्तु ।
यदा कदा च सुनवाम सोम मग्निष्ट्वा दूतो धन्वात्यच्छ ४
परा याहि मघवन्ना च याही न्द्र भ्रातरुभयत्रा ते अर्थम् ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो रासभस्य ५

अपाः सोममस्तमिन्द्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत् ६
इमे भोजा अङ्गिरसो विरूपा दिवस्पुत्रासो असुरस्य वीराः ।
विश्वामित्राय ददतो मघानि सहस्रसावे प्र तिरन्त आयुः ७
रूपंरूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं१ परि स्वाम् ।
त्रिर्यद् दिवः परि मुहूर्तमागात् स्वैर्मन्त्रैरनृतुपा ऋतावा ८ १४६०
महाँ ऋषिर्देवजा देवजूतो ऽस्तभ्नात् सिन्धुमर्णवं नृचक्षाः ।
विश्वामित्रो यदवहत् सुदास—मप्रियायत कुशिकेभिरिन्द्रः ९
हंसा इव कृणुथ श्लोकमद्रिभि—र्मदन्तो गीर्भिरध्वरे सुते सचा ।
देवेभिर्विप्रा ऋषयो नृचक्षसो वि पिबध्वं कुशिकाः सोम्यं मधु १०
उप प्रेत कुशिकाश्चेतयध्व—मश्वं राये प्र मुञ्चता सुदासः ।
राजा वृत्रं जङ्घनत् प्रागपागुद—गथा यजाते वर आ पृथिव्याः ११
य इमे रोदसी उभे अहमिन्द्रमतुष्टवम् ।
विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम् १२
विश्वामित्रा अरासत ब्रह्मेन्द्राय वज्रिणे । करदिन्नः सुराधसः १३ १४६५
किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम् ।
आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन् रन्धया नः १४ १४६६

॥ ११८ ॥ (ऋ० ४।१६।१-२१) (१४६७-१४८७) वामदेवो गौतमः । त्रिष्टुप् ।

आ सत्यो यातु मघवाँ ऋजीषी द्रवन्त्वस्य हरय उप नः ।
तस्मा इदन्धः सुषुमा सुदक्ष—मिहाभिपित्वं करते गृणानः १
अव स्य शूराध्वनो नान्ते ऽस्मिन् नो अद्य सवने मन्दध्यै ।
शंसात्युक्थमुशनेव वेधा—श्चिकितुषे असुर्याय मन्म २
कविर्न निण्यं विदथानि साधन् वृषा यत् सेकं विपिपानो अर्चात् ।
दिव इत्था जीजनत् सप्त कारू—नह्ना चिच्चक्रुर्वयुना गृणन्तः ३
स्व१र्यद् वेदि सुदृशीकमर्कै—र्महि ज्योती रुरुचुर्यद्ध वस्तोः ।
अन्धा तमांसि दुधिता विचक्षे नृभ्यश्चकार नृतमो अभिष्टौ ४ १४७०
ववक्ष इन्द्रो अमितमृजी—ष्यु१भे आ पप्रौ रोदसी महित्वा ।
अतश्चिदस्य महिमा वि रे—च्यभि यो विश्वा भुवना बभूव ५

विश्वानि शक्रो नर्याणि विद्वा—नपो रिरेच सखिभिर्निकामैः ।
अश्मानं चिद् ये बिभिदुर्वचोभि—र्व्रजं गोमन्तमुशिजो वि वव्रुः ६
अपो वृत्रं वव्रिवांसं पराहन् प्रावत् ते वज्रं पृथिवी सचेताः ।
प्रार्णांसि समुद्रियाण्यैनोः पतिर्भवञ्छवसा शूर धृष्णो ७
अपो यदद्रिं पुरुहूत दर्द—राविर्भुवत् सरमा पूर्व्यं ते ।
स नो नेता वाजमा दर्षि भूरिं गोत्रा रुजन्नङ्गिरोभिर्गृणानः ८
अच्छा कविं नृमणो गा अभिष्टौ स्वर्षाता मघवन्नाधमानम् ।
ऊतिभिस्तमिषणो द्युम्नहूतौ नि मायावानब्रह्मा दस्युरर्त ९ १४७९
आ दस्युघ्ना मनसा याह्यस्तं भुवत् ते कुत्सः सख्ये निकामः ।
स्वे योनौ नि षदतं सरूपा वि वां चिकित्सदृतचिद्ध नारी १०
यासि कुत्सेन सरथमवस्यु—स्तोदो वातस्य हर्योरीशानः ।
ऋज्रा वाजं न गध्यं युयूषन् कविर्यदहन् पार्याय भूषात् ११
कुत्साय शुष्णमशुषं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा ।
सद्यो दस्यून् प्र मृण कुत्स्येन प्र सूरश्चक्रं वृहतादभीके १२
त्वं पिप्रुं मृगयं शूशुवांस—मृजिश्वने वैदथिनाय रन्धीः ।
पञ्चाशत् कृष्णा नि वपः सहस्रा ऽत्कं न पुरो जरिमा वि दर्दः १३
सूर उपाके तन्वं१ दधानो वि यत् ते चेत्यमृतस्य वर्पः ।
मृगो न हस्ती तविषीमुषाणः सिंहो न भीम आयुधानि बिभ्रत् १४ १४८०
इन्द्रं कामा वसूयन्तो अग्मन् त्स्वर्मीळ्हे न सवने चकानाः ।
श्रवस्यवः शशमानास उक्थै—रोको न रण्वा सुदृशीव पुष्टिः १५
तमिद् व इन्द्रं सुहवं हुवेम यस्ता चकार नर्या पुरूणि ।
यो मावते जरित्रे गध्यं चि—न्मक्षू वाजं भरति स्पार्हराधाः १६
तिग्मा यदन्तरशनिः पताति कस्मिञ्चिच्छूर मुहुके जनानाम् ।
घोरा यदर्य समृतिर्भवा—त्यध स्मा नस्तन्वो बोधि गोपाः १७
भुवोऽविता वामदेवस्य धीनां भुवः सखावृको वाजसातौ ।
त्वामनु प्रमतिमा जगन्मो—रुशंसो जरित्रे विश्वध स्याः १८
एभिर्नृभिरिन्द्र त्वायुभिष्ट्वा मघवद्भिर्मघवन् विश्व आजौ ।
द्यावो न द्युम्नैरभि सन्तो अर्यः क्षपो मदेम शरदश्च पूर्वीः १९ १४८१

एवेदिन्द्राय वृषभाय वृष्णे ब्रह्माकर्म भृगवो न रथम् ।
नू चिद् यथा नः सख्या वियोष- दसन्न उग्रोऽविता तनूपाः २०
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः २१

॥ १२९ ॥ (ऋ० ४।१७।१-२१) त्रिष्टुप्, १५ एकपदा विराट् ।

त्वं महाँ इन्द्र तुभ्यं ह क्षा अनु क्षत्रं मंहना मन्यत द्यौः ।
त्वं वृत्रं शवसा जघन्वान् त्सृजः सिन्धूँरहिना जग्रसानान् १
तव त्विषो जनिमन् रेजत द्यौ रेजद् भूमिर्भियसा स्वस्य मन्योः ।
ऋघायन्त सुभ्वः पर्वतास आर्दन् धन्वानि सरयन्त आपः २
भिनद् गिरिं शवसा वज्रमिष्ण- न्नाविष्कृण्वानः सहसान ओजः ।
वधीद् वृत्रं वज्रेण मन्दसानः सरन्नापो जवसा हतवृष्णीः ३ १४९०
सुवीरस्ते जनिता मन्यत द्यौ- रिन्द्रस्य कर्ता स्वपस्तमो भूत् ।
य ईं जजान स्वर्यं सुवज्र- मनपच्युतं सदसो न भूम ४
य एक इच्च्यावयति प्र भूमा राजा कृष्टीनां पुरुहूत इन्द्रः
सत्यमेनमनु विश्वे मदन्ति रातिं देवस्य गृणतो मघोनः ५
सत्रा सोमा अभवन्नस्य विश्वे सत्रा मदासो बृहतो मदिष्ठाः
सत्राभवो वसुपतिर्वसूनां दत्रे विश्वा अधिथा इन्द्र कृष्टीः ६
त्वमध प्रथमं जायमानो ऽमे विश्वा अधिथा इन्द्र कृष्टीः ।
त्वं प्रति प्रवत आशयान- महिं वज्रेण मघवन् वि वृश्चः ७
सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृषभं सुवज्रम् ।
हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः ८ १४९५
अयं वृतश्चातयते समीची- र्य आजिषु मघवा शृण्व एकः ।
अयं वाजं भरति यं सनोत्य- स्य प्रियासः सख्ये स्याम ९
अयं शृण्वे अध जयन्नुत घ्न- न्नयमुत प्र कृणुते युधा गाः ।
यदा सत्यं कृणुते मन्युमिन्द्रो विश्वं दृळ्हं भयत एजदस्मात् १०
समिन्द्रो गा अजयत् सं हिरण्या समश्विया मघवा यो ह पूर्वीः ।
एभिर्नृभिर्नृतमो अस्य शाकै रायो विभक्ता संभरश्च वस्वः ११
कियत् स्विदिन्द्रो अध्येति मातुः कियत् पितुर्जनितुर्यो जजान ।
यो अस्य शुष्मं मुहुकैरियर्ति वातो न जूतः स्तनयद्भिरभ्रैः १२

क्षियन्तं त्वमक्षियन्तं कृणोती- यर्ति रेणुं मघवा समोहम् ।
विभञ्जनुरशनिमाँ इव द्यौ- रुत स्तोतारं मघवा वसौ धात् १३ १५००
अयं चक्रमिषणत् सूर्यस्य न्येतशं रीरमत् ससृमाणम् ।
आ कृष्ण ईं जुहुराणो जिघर्ति त्वचो बुध्ने रजसो अस्य योनौ १४
असिक्न्यां यजमानो न होता १५
गव्यन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः ।
जनीयन्तो जनिदामक्षितोति- मा च्यावयामोऽवते न कोशम् १६
त्राता नो बोधि ददृशान आपि- रभिख्याता मर्डिता सोम्यानाम् ।
सखा पिता पितृतमः पितृणां कर्तेमु लोकमुशते वयोधाः १७
सखीयतामविता बोधि सखा गृणान इन्द्र स्तुवते वयो धाः ।
वयं ह्या ते चकृमा सबाध आभिः शमीभिर्महयन्त इन्द्र १८ १५०५
स्तुत इन्द्रो मघवा यद्ध वृत्रा भूरीण्येको अप्रतीनि हन्ति ।
अस्य प्रियो जरिता यस्य शर्म- न्नकिर्देवा वारयन्ते न मर्ताः १९
एवा न इन्द्रो मघवा विरप्शी करत् सत्या चर्षणीधृदनर्वा ।
त्वं राजा जनुषां धेह्यस्मे अधि श्रवो माहिनं यज्जरित्रे २०
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः २१

॥ १३० ॥ (ऋ० ४।१८।१-१३)

[१३ वामदेवो गौतमः, १ इन्द्रः, ४ (उत्तरार्धर्चस्य), ७ अदितिः] ।

[१ वामदेवः, २-४ (पूर्वार्धर्चस्य), ४ (उत्तरार्धर्चस्य), ७ वामदेवः] । त्रिष्टुप् ।

अयं पन्था अनुवित्तः पुराणो यतो देवा उदजायन्त विश्वे ।
अतश्चिदा जनिषीष्ट प्रवृद्धो मा मातरममुया पत्तवे कः १
नाहमतो निरया दुर्गहैतत् तिरश्चता पार्श्वान्निर्गमाणि ।
बहूनि मे अकृता कर्त्वानि युध्यै त्वेन सं त्वेन पृच्छै २ १५१०
परायतीं मातरमन्वचष्ट न नानु गान्यनु नू गमानि ।
त्वष्टुर्गृहे अपिबत् सोममिन्द्रः शतधन्यं चम्वोः सुतस्य ३
किं स ऋधक् कृणवद् यं सहस्रं मासो जभार शरदश्च पूर्वीः ।
नही न्वस्य प्रतिमानम- स्त्यन्तर्जातेषूत ये जनित्वाः ४

अवद्यमिव मन्यमाना गुहाक—रिन्द्रं माता वीर्येणा न्यृष्टम् ।
अथोदस्थात् स्वयमत्कं वसान आ रोदसी अपृणाज्जायमानः ५
एता अर्षन्त्यललाभवन्ती—र्ऋतावरीरिव संक्रोशमानाः ।
एता वि पृच्छ किमिदं भनन्ति कमापो अद्रिं परिधिं रुजन्ति ६
किमु ष्विदस्मै निविदो भनन्ते—न्द्रस्यावद्यं दिधिषन्त आपः ।
ममैतान् पुत्रो महता वधेन वृत्रं जघन्वाँ असृजद् वि सिन्धून् ७ १५१५
ममच्चन त्वा युवतिः परास ममच्चन त्वा कुषवा जगार ।
ममच्चिदापः शिशवे ममृड्यु—र्ममच्चिदिन्द्रः सहसोदतिष्ठत् ८
ममच्चन ते मघवन् व्यंसो निविविध्वाँ अप हनू जघान ।
अधा निविद्ध उत्तरो बभूवा—ञ्छिरो दासस्य सं पिणग्वधेन ९
गृष्टिः ससूव स्थविरं तवागा—मनाधृष्यं वृषभं तुम्रमिन्द्रम् ।
अरीळ्हं वत्सं चरथाय माता स्वयं गातुं तन्व इच्छमानम् १०
उत माता महिषमन्ववेन—दमी त्वा जहति पुत्र देवाः ।
अथाब्रवीद् वृत्रमिन्द्रो हनिष्यन् त्सखे विष्णो वितरं वि क्रमस्व ११
कस्ते मातरं विधवामचक्र—च्छयुं कस्त्वामजिघांसच्चरन्तम् ।
कस्ते देवो अधि मार्डीक आसीद् यत् प्राक्षिणाः पितरं पादगृह्य १२ १५२०
अवर्त्या शुन आन्त्राणि पेचे न देवेषु विविदे मर्डितारम् ।
अपश्यं जायाममहीयमाना—मधा मे श्येनो मध्वा जभार १३

॥ १३१ ॥ (ऋ० ४।१९।१-११)

एवा त्वामिन्द्र वज्रिन्नत्र विश्वे देवासः सुहवास ऊमाः ।
महामुभे रोदसी वृद्धमृष्वं निरेकमिद् वृणते वृत्रहत्ये १
अवासृजन्त जिव्रयो न देवा भुवः सम्राळिन्द्र सत्ययोनिः ।
अहन्नहिं परिशयानमर्णः प्र वर्तनीररदो विश्वधेनाः २
अतृप्णुवन्तं वियतमबुध्य—मबुध्यमानं सुषुपाणमिन्द्र ।
सप्त प्रति प्रवत आशयान—महिं वज्रेण वि रिणा अपर्वन् ३
अक्षोदयच्छवसा क्षाम बुध्नं वार्ण वातस्तविषीभिरिन्द्रः ।
यदिन्द्र दिवि पार्ये यदृधग् यद् वा स्वे सदने यत्र वासि ।
अतो नो यज्ञमवसे नियुत्वान् त्सजोषाः पाहि गिर्वणो मरुद्भिः ५

॥ १७८ ॥ (ऋ० ६।४०।१-५)

अहेळमान उप याहि यज्ञं तुभ्यं पवन्त इन्दवः सुतासः ।
गावो न वज्रिन्त्स्वमोको अच्छे—न्द्रा गहि प्रथमो यज्ञियानाम् १
या ते काकुत् सुकृता या वरिष्ठा यया शश्वत् पिबसि मध्व ऊर्मिम् ।
तया पाहि प्र ते अध्वर्युरस्थात् सं ते वज्रो वर्ततामिन्द्र गव्युः २
एष द्रप्सो वृषभो विश्वरूप इन्द्राय वृष्णे समकारि सोमः
एतं पिब हरिवः स्थातरुग्र यस्येशिषे प्रदिवि यस्ते अन्नम् ३ १९९५
सुतः सोमो असुतादिन्द्र वस्या—नयं श्रेयाञ्चिकितुषे रणाय ।
एतं तितिर्व उप याहि यज्ञं तेन विश्वास्तविषीरा पृणस्व ४
ह्वयामसि त्वेन्द्र याह्यर्वा—ङरं ते सोमस्तन्वे भवाति ।
शतक्रतो मादयस्वा सुतेषु प्रास्माँ अव पृतनासु प्र विक्षु ५

॥ १७९ ॥ (ऋ० ६।४१।१-५) अनुष्टुप्, ४ बृहती ।

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर । अरंगमाय जग्मये ऽपश्चादध्वने नरे १
एमेनं प्रत्येतन सोमेभिः सोमपातमम् । अमत्रेभिर्ऋजीषिण—मिन्द्रं सुतेभिरिन्दुभिः २
यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ । वेदा विश्वस्य मेधिरो धृषत् तंतमिदेषते ३ २०००
अस्माअस्मा इदन्धसो ऽध्वर्यो प्र भरा सुतं । कुवित् समस्य जेन्यस्य शर्धतो ऽभिशस्तेरवस्परत् ४

॥ १८० ॥ (ऋ० ६।४२।१-४) उष्णिक् ।

यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयः । अयं स सोम इन्द्र ते सुतः पिब १
यस्य तीव्रसुतं मदं मध्यमन्तं च रक्षसे । अयं स सोम इन्द्र ते सुतः पिब २
यस्य गा अन्तरश्मनो मदे दृळ्हा अवासृजः । अयं स सोम इन्द्र ते सुतः पिब ३
यस्य मन्दानो अन्धसो माघोनं दधिषे शवः । अयं स सोम इन्द्र ते सुतः पिब ४ २००५

॥ १८१ ॥ (ऋ० ६।४३।१-४)

(२००६-२०१५) सुहोत्रो भारद्वाजः । त्रिष्टुप्, ४ शक्करी ।

अभूरेको रयिपते रयीणा—मा हस्तयोरधिथा इन्द्र कृष्टीः ।
वि तोके अप्सु तनये च सूरे ऽवोचन्त चर्षणयो विवाचः १

त्वद्भियेन्द्र पार्थिवानि विश्वा ऽच्युता चिच्च्यावयन्ते रजांसि ।
द्यावाक्षामा पर्वतासो वनानि विश्वं दृळ्हं भयते अज्मन्ना ते २
त्वं कुत्सेनाभि शुष्णमिन्द्रा—ऽशुषं युध्य कुयवं गविष्टौ ।
दश प्रपित्वे अध सूर्यस्य मुषायश्चक्रमविवे रपांसि ३
त्वं शतान्यव शम्बरस्य पुरो जघन्थाप्रतीनि दस्योः ।
अशिक्षो यत्र शच्या शचीवो दिवोदासाय सुन्वते सुतक्रे भरद्वाजाय गृणते वसूनि ४
स सत्यसत्वन् महते रणाय रथमा तिष्ठ तुविनृम्ण भीमम् ।
याहि प्रपथिन्नवसोप मद्रिक् प्र च श्रुत श्रावय चर्षणिभ्यः ५ १०१०

॥ १८२ ॥ (ऋ० ६।३१।१-५)

अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
विरप्शिने वज्रिणे शंतमानि वचांस्यासा स्थविराय तक्षम् १
स मातरा सूर्येणा कवीना—मवासयद्रुजदद्रिं गृणानः ।
स्वाधीभिर्ऋक्वभिर्वावशान उदुस्रियाणामसृजन्निदानम् २
स वह्निभिर्ऋक्वभिर्गोषु शश्वन् मितज्ञुभिः पुरुकृत्वा जिगाय ।
पुरः पुरोहा सखिभिः सखीयन् दृळ्हा रुरोज कविभिः कविः सन् ३
स नीव्याभिर्जरितारमच्छा महो वाजेभिर्महद्भिश्च शुष्मैः ।
पुरुवीराभिर्वृषभ क्षितीना—मा गिर्वणः सुविताय प्र याहि ४
स सर्गेण शवसा तक्तो अत्यै—रप इन्द्रो दक्षिणतस्तुराषाट् ।
इत्था सृजाना अनपावृदर्थं दिवेदिवे विविषुरप्रमृष्यम् ५ १०१५

॥ १८३ ॥ (ऋ० ६।३२।१-५)

(१०१६-१०२५) शुनहोत्रो भारद्वाजः । त्रिष्टुप् ।

य ओजिष्ठ इन्द्र तं सु नो दा मदो वृषन्त्स्वभिष्टिर्दास्वान् ।
सौवश्व्यं यो वनवत् स्वश्वो वृत्रा समत्सु सासहदमित्रान् १
त्वां हीऽन्द्रावसे विवाचो हवन्ते चर्षणयः शूरसातौ ।
त्वं विप्रेभिर्वि पणीँरशाय—स्त्वोत इत् सनिता वाजमर्वा २
त्वं ताँ इन्द्रोभयाँ अमित्रान् दासा वृत्राण्यार्या च शूर ।
वधीर्वनेव सुधितेभिरत्कै—रा पृत्सु दर्षि नृणां नृतम ३
स त्वं न इन्द्राकवाभिरूती सखा विश्वायुरविता वृधे भूः ।
स्वर्षाता यद्ध्वयामसि त्वा युध्यन्तो नेमधिता पृत्सु शूर ४

नूनं न इन्द्रापराय च स्या   भवा मृळीक उत नो अभिष्टौ।
इत्था गृणन्तो महिनस्य शर्मन्   दिवि ष्याम पार्ये गोषतमाः   ५   २०२०

॥ १८४ ॥ (ऋ० ६।३४।१-५)

सं च त्वे जग्मुर्गिर इन्द्र पूर्वी—र्वि च त्वद् यन्ति विभ्वो मनीषाः।
पुरा नूनं च स्तुतय ऋषीणां   पस्पृध्र इन्द्रे अध्युक्थार्का   १
पुरुहूतो यः पुरुगूर्त ऋभ्वाँ   एकः पुरुप्रशस्तो अस्ति यज्ञैः।
रथो न महे शवसे युजानो३   ऽस्माभिरिन्द्रो अनुमाद्यो भूत्   २
न यं हिंसन्ति धीतयो न वाणी—रिन्द्रं नक्षन्तीदभि वर्धयन्तीः।
यदि स्तोतारः शतं यत् सहस्रं   गृणन्ति गिर्वणसं शं तदस्मै   ३
अस्मा एतद् दिव्य१र्चेव मासा   मिमिक्ष इन्द्रे न्ययामि सोमः।
जनं न धन्वन्नभि सं यदापः   सत्रा वावृधुर्हवनानि यज्ञैः   ४
अस्मा एतन्मह्याङ्गूषमस्मा   इन्द्राय स्तोत्रं मतिभिरवाचि।
असद् यथा महति वृत्रतूर्य   इन्द्रो विश्वायुरविता वृधश्च   ५   २०२५

॥ १८५ ॥ (ऋ० ६।३५।१-५)
(२०२६-२०३५) नरो भारद्वाजः। त्रिष्टुप्।

कदा भुवन् रथक्षयाणि ब्रह्म   कदा स्तोत्रे सहस्रपोष्यं दाः।
कदा स्तोमं वासयोऽस्य राया   कदा धियः करसि वाजरत्नाः   १
कर्हि स्वित् तदिन्द्र यन्नृभिर्नॄन्   वीरैर्वीरान् नीळयासे जयाजीन्।
त्रिधातु गा अधि जयासि गोष्वि—न्द्र द्युम्नं स्वर्वद् धेह्यस्मे   २
कर्हि स्वित् तदिन्द्र यज्जरित्रे   विश्वप्सु ब्रह्म कृणवः शविष्ठ।
कदा धियो न नियुतो युवासे   कदा गोमघा हवनानि गच्छाः   ३
स गोमघा जरित्रे अश्वश्चन्द्रा   वाजश्रवसो अधि धेहि पृक्षः।
पीपिहीषः सुदुघामिन्द्र धेनुं   भरद्वाजेषु सुरुचो रुरुच्याः   ४
तमा नूनं वृजनमन्यथा चि—च्छूरो यच्छक्र वि दुरो गृणीषे।
मा निररं शुक्रदुघस्य धेनो—राङ्गिरसान् ब्रह्मणा विप्र जिन्व   ५   २०३०

॥ १८६ ॥ (ऋ० ६।३६।१-५)

सत्रा मदासस्तव विश्वजन्याः   सत्रा रायोऽध ये पार्थिवासः।
सत्रा वाजानामभवो विभक्ता   यद् देवेषु धारयथा असुर्यम्   १

अनु प्र येजे जन ओजो अस्य सत्रा दधिरे अनु वीर्याय ।
स्यूमगृभे दुधयेऽर्वते च क्रतुं वृञ्जन्त्यपि वृत्रहत्ये २
तं सध्रीचीरूतयो वृष्ण्यानि पौंस्यानि नियुतः सश्चुरिन्द्रम् ।
समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसं गिर आ विशन्ति ३
स रायस्खामुप सृजा गृणानः पुरुश्चन्द्रस्य त्वमिन्द्र वस्वः ।
पतिर्बभूथासमो जनाना—मेको विश्वस्य भुवनस्य राजा ४
स तु श्रुधि श्रुत्या यो दुवोयु—र्द्यौर्न भूमाभि रायो अर्यः ।
असो यथा नः शवसा चकानो युगेयुगे वयसा चेकितानः ५ २०३५

॥ १८७ ॥ (ऋ० ६।४४।१-२४)

(२०३६-२१०३) शंयुर्बार्हस्पत्यः । त्रिष्टुप्, १-६ अनुष्टुप्, ७-९ (८ वा) विराट् ।

यो रयिवो रयिंतमो यो द्युम्नैर्द्युम्नवत्तमः । सोमः सुतः स इंद्र ते ऽस्ति स्वधापते मदः १
यः शग्मस्तुविशग्म ते रायो दामा मतीनाम् । सोमः सुतः स इंद्र ते ऽस्ति स्वधापते मदः २
येन वृद्धो न शवसा तुरो न स्वाभिरूतिभिः । सोमः सुतः स इंद्र ते ऽस्ति स्वधापते मदः ३
त्यमु वो अप्रहणं गृणीषे शवसस्पतिम् । इंद्रं विश्वासाहं नरं मंहिष्ठं विश्वचर्षणिम् ४
यं वर्धयंतीद् गिरः पतिं तुरस्य राधसः । तमिन्न्वस्य रोदसी देवी शुष्मं सपर्यतः ५ २०४०
तद् व उक्थस्य बर्हणे—न्द्रायोपस्तृणीषणि ।
विपो न यस्योतयो वि यद् रोहंति सक्षितः ६
अविदद् दक्षं मित्रो नवीयान् पपानो देवेभ्यो वस्यो अचैत् ।
ससवान्स्तौलाभिर्धौतरीभि—रुरुष्या पायुरभवत् सखिभ्यः ७
ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन् ।
दधानो नाम महो वचोभि—र्वपुर्दृशये वेन्यो व्यावः ८
द्युमत्तमं दक्षं धेह्यस्मे सेधा जनानां पूर्वीररातीः ।
वर्षीयो वयः कृणुहि शचीभि—र्धनस्य सातावस्माँ अविड्ढि ९
इंद्र तुभ्यमिन्मघवन्नभूम वयं दात्रे हरिवो मा वि वेनः ।
नकिरापिर्ददृशे मर्त्यत्रा किमङ्ग रध्रचोदनं त्वाहुः १० २०४५
मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम ।
पूर्वीष्ट इंद्र निष्षिधो जनेषु जह्यसुष्वीन् प्र वृहापृणतः ११
उदभ्राणीव स्तनयन्नियर्ती—न्द्रो राधांस्यश्व्यानि गव्या ।
त्वमसि प्रदिवः कारुधाया मा त्वादामान आ दभन् मघोनः १२

अध्वर्यो वीर प्र महे सुताना-मिन्द्राय भर स ह्यस्य राजा ।
यः पूर्व्याभिरुत नूतनाभि-र्गीर्भिर्वावृधे गृणतामृषीणाम् १३
अस्य मदे पुरु वर्पांसि विद्वा-निन्द्रो वृत्राण्यप्रती जघान ।
तमु प्र होषि मधुमन्तमस्मै सोमं वीराय शिप्रिणे पिबध्यै १४
पाता सुतमिन्द्रो अस्तु सोमं हन्ता वृत्रं वज्रेण मन्दसानः ।
गन्ता यज्ञं परावतश्चिदच्छा वसुर्धीनामविता कारुधायाः १५ २०५०

इदं त्यत् पात्रमिन्द्रपान-मिन्द्रस्य प्रियममृतमपायि ।
मत्सद् यथा सौमनसाय देवं व्य१स्मद् द्वेषो युयवद् व्यंहः १६
एना मन्दानो जहि शूर शत्रू-ञ्जामिमजामिं मघवन्नमित्रान् ।
अभिषेणाँ अभ्या३देदिशाना-न् पराच इन्द्र प्र मृणा जही च १७
आसु ष्मा णो मघवन्निन्द्र पृ-त्स्व१स्मभ्यं महि वरिवः सुगं कः ।
अपां तोकस्य तनयस्य जेष इन्द्र सूरीन् कृणुहि स्मा नो अर्धम् १८
आ त्वा हरयो वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः ।
अस्मत्राञ्चो वृषणो वज्रवाहो वृष्णे मदाय सुयुजो वहन्तु १९
आ ते वृषन् वृषणो द्रोणमस्थु-र्घृतप्रुषो नोर्मयो मदन्तः ।
इन्द्र प्र तुभ्यं वृषभिः सुतानां वृष्णे भरन्ति वृषभाय सोमम् २० २०५५

वृषासि दिवो वृषभः पृथिव्या वृषा सिन्धूनां वृषभः स्तियानाम् ।
वृष्णे त इन्दुर्वृषभ पीपाय स्वादू रसो मधुपेयो वराय २१
अयं देवः सहसा जायमान इन्द्रेण युजा पणिमस्तभायत् ।
अयं स्वस्य पितुरायुधानी-न्दुरमुष्णादशिवस्य मायाः २२
अयमकृणोदुषसः सुपत्नी-रयं सूर्ये अदधाज्ज्योतिरन्तः ।
अयं त्रिधातु दिवि रोचनेषु त्रितेषु विन्ददमृतं निगूळ्हम् २३
अयं द्यावापृथिवी वि ष्कभाय-दयं रथमयुनक् सप्तरश्मिम् ।
अयं गोषु शच्या पक्वमन्तः सोमो दाधार दशयन्त्रमुत्सम् २४

॥ १८८ ॥ (ऋ० ६।४५।१-३०) गायत्री, २९ अतिनिचृत् ।

य आनयत् परावतः सुनीती तुर्वशं यदुम् । इन्द्रः स नो युवा सखा १ २०६०
अविप्रे चिद् वयो दध-दनाशुना चिदर्वता । इन्द्रो जेता हितं धनम् २

महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः । नास्य क्षीयन्त ऊतयः ३
सखायो ब्रह्मवाहसे ऽर्चत प्र च गायत । स हि नः प्रमतिर्मही ४
त्वमेकस्य वृत्रहन्नविता द्वयोरसि । उतेदृशे यथा वयम् ५
नयसीद्वति द्विषः कृणोष्युक्थशंसिनः । नृभिः सुवीर उच्यसे ६
ब्रह्माणं ब्रह्मवाहसं गीर्भिः सखायमृग्मियम् । गां न दोहसे हुवे ७
यस्य विश्वानि हस्तयोरूचुर्वसूनि नि द्विता । वीरस्य पृतनाषहः ८
वि दृळ्हानि चिदद्रिवो जनानां शचीपते । वृह माया अनानत ९
तमु त्वा सत्य सोमपा इन्द्र वाजानां पते । अहूमहि श्रवस्यवः १०
तमु त्वा यः पुरासिथ यो वा नूनं हिते धने । हव्यः स श्रुधी हवम् ११

धीभिरर्वद्भिरर्वतो वाजाँ इन्द्र श्रवाय्यान् । त्वया जेष्म हितं धनम् १२
अभूरु वीर गिर्वणो महाँ इन्द्र धने हिते । भरे वितन्तसाय्यः १३
या त ऊतिरमित्रहन् मक्षूजवस्तमासति । तया नो हिनुही रथम् १४
स रथेन रथीतमो ऽस्माकेनाभियुग्वना । जेषि जिष्णो हितं धनम् १५
य एक इत् तमु ष्टुहि कृष्टीनां विचर्षणिः । पतिर्जज्ञे वृषक्रतुः १६

यो गृणतामिदासिथाऽऽपिरूती शिवः सखा । स त्वं न इन्द्र मृळय १७
धिष्व वज्रं गभस्त्यो रक्षोहत्याय वज्रिवः । सासहीष्ठा अभि स्पृधः १८
प्रत्नं रयीणां युजं सखायं कीरिचोदनम् । ब्रह्मवाहस्तमं हुवे १९
स हि विश्वानि पार्थिवाँ एको वसूनि पत्यते । गिर्वणस्तमो अध्रिगुः २०
स नो नियुद्भिरा पृण कामं वाजेभिरश्विभिः । गोमद्भिर्गोपते धृषत् २१

तद् वो गाय सुते सचा पुरुहूताय सत्वने । शं यद् गवे न शाकिने २२
न घा वसुर्नि यमते दानं वाजस्य गोमतः । यत् सीमुप श्रवद् गिरः २३
कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत् । शचीभिरप नो वरत् २४
इमा उ त्वा शतक्रतो ऽभि प्र णोनुवुर्गिरः । इन्द्र वत्सं न मातरः २५
दूणाशं सख्यं तव गौरसि वीर गव्यते । अश्वो अश्वायते भव २६

स मन्दस्वा ह्यन्धसो राधसे तन्वा महे । न स्तोतारं निदे करः २७
इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः । वत्सं गावो न धेनवः २८
पुरूतमं पुरूणां स्तोतॄणां विवाचि । वाजेभिर्वाजयताम् २९
अस्माकमिन्द्र भूतु ते स्तोमो वाहिष्ठो अन्तमः । अस्मान् राये महे हिनु ३०

॥ १८९ ॥ (ऋ० ६।४६।१-१४) प्रगाथः (= विषमा बृहती, समा सतोबृहती) ।

त्वामिद्धि हवामहे   साता वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नर—स्त्वां काष्ठास्ववंतः   १   २०९०
स त्वं नश्चित्र वज्रहस्त धृष्णुया   महः स्तवानो अद्रिवः ।
गामश्वं रथ्यमिन्द्र सं किर   सत्रा वाजं न जिग्युषे   २
यः सत्राहा विचर्षणि—रिन्द्रं तं हूमहे वयम् ।
सहस्रमुष्क तुविनृम्ण सत्पते   भवा समत्सु नो वृधे   ३
बाधसे जनान् वृषभेव मन्युना   घृषौ मीळ्ह ऋचीषम ।
अस्माकं बोध्यविता महाधने   तनूष्वप्सु सूर्ये   ४
इन्द्र ज्येष्ठं न आ भरँ   ओजिष्ठं पपुरि श्रवः ।
येनेमे चित्र वज्रहस्त रोदसी   ओभे सुशिप्र प्राः   ५
त्वामुग्रमवसे चर्षणीसहं   राजन् देवेषु हूमहे ।
विश्वा सु नो विथुरा पिब्दना वसो   ऽमित्रान्त्सुषहान् कृधि   ६   २०९५
यदिन्द्र नाहुषीष्वाँ   ओजो नृम्णं च कृष्टिषु ।
यद् वा पञ्च क्षितीनां द्युम्नमा भर   सत्रा विश्वानि पौंस्या   ७
यद् वा तृक्षौ मघवन् द्रुह्यावा जने   यत् पूरौ कच्च वृष्ण्यम् ।
अस्मभ्यं तद् रिरीहि सं नृषाह्ये   ऽमित्रान् पृत्सु तुर्वणे   ८
इन्द्र त्रिधातु शरणं   त्रिवरूथं स्वस्तिमत् ।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च   यावया दिद्युमेभ्यः   ९
ये गव्यता मनसा शत्रुमादभु—रभिप्रघ्नन्ति धृष्णुया ।
अध स्मा नो मघवन्निन्द्र गिर्वण—स्तनूपा अन्तमो भव   १०
अध स्मा नो वृधे भवे—न्द्र नायमवा युधि ।
यदन्तरिक्षे पतयन्ति पर्णिनो   दिद्यवस्तिग्ममूर्धानः   ११   २१००
यत्र शूरासस्तन्वो वितन्वते   प्रिया शर्म पितृणाम् ।
अध स्मा यच्छ तन्वे३ तने च छर्दि—रचित्तं यावय द्वेषः   १२
यदिन्द्र सर्गे अर्वत—श्चोदयासे महाधने ।
असमने अध्वनि वृजिने पथि   श्येनाँ इव श्रवस्यतः ।   १३
सिन्धूँरिव प्रवण आशुया यतो   यदि क्रोशमनु ष्वणि ।
आ ये वयो न वर्वृतत्यामिषि   गृभीता बाह्वोर्गवि   १४   २१०३

❀

॥ १९० ॥ (ऋ० ६।४७।६-१९; २१) (११०४-१११८) गर्गो भारद्वाजः। त्रिष्टुप्; १९ बृहती।

धृषत् पिब कलशे सोममिन्द्र वृत्रहा शूर समरे वसूनाम्।
माध्यंदिने सवन आ वृषस्व रयिस्थानो रयिमस्मासु धेहि ६
इन्द्र प्र णः पुरएतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ।
भवा सुपारो अतिपारयो नो भवा सुनीतिरुत वामनीतिः ७ ११०५
उरुं नो लोकमनु नेषि विद्वान् त्स्वर्वज्ज्योतिरभयं स्वस्ति।
ऋष्वा त इन्द्र स्थविरस्य बाहू उप स्थेयाम शरणा बृहन्ता ८
वरिष्ठे न इन्द्र वन्धुरे धा वहिष्ठयोः शतावन्नश्वयोरा।
इषमा वक्षीषां वर्षिष्ठां मा नस्तारीन्मघवन् रायो अर्यः ९
इन्द्र मृळ मह्यं जीवातुमिच्छ चोदय धियमयसो न धाराम्।
यत् किं चाहं त्वायुरिदं वदामि तज्जुषस्व कृधि मा देववन्तम् १०
त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम्।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ११
इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम १२ १११०
तस्य वयं सुमतौ यज्ञियस्याऽपि भद्रे सौमनसे स्याम।
स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु १३
अव त्वे इन्द्र प्रवतो नोर्मिर्गिरो ब्रह्माणि नियुतो धवन्ते।
उरू न राधः सवना पुरूण्यपो गा वज्रिन् युवसे समिन्दून् १४
क ईं स्तवत् कः पृणात् को यजाते यदुग्रमिन्मघवा विश्वहावेत्।
पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्वमपरं शचीभिः १५
शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः।
एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान् १६
परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति।
अनानुभूतीरवधून्वानः पूर्वीरिन्द्रः शरदस्तर्तरीति १७ १११५
रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश १८
युजानो हरिता रथे भूरि त्वष्टेह राजति।
को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु १९

दिवेदिवे सदृशीरन्यमर्धं कृष्णा असेधदप सद्मनो जाः ।
अहन् दासा वृषभो वस्नयन्तो दब्रजे वर्चिनं शम्बरं च २१ २११८

॥१९१॥ (ऋ० ७।१८।१-२१) (२११९-२१९२) मैत्रावरुणिर्वसिष्ठः । त्रिष्टुप् ।

त्वे ह यत् पितरश्चिन्न इन्द्र विश्वा वामा जरितारो असन्वन् ।
त्वे गावः सुदुघास्त्वे ह्यश्वा स्त्वं वसु देवयते वनिष्ठः १
राजेव हि जनिभिः क्षेष्येवा ऽव द्युभिरभि विदुष्कविः सन् ।
पिशा गिरो मघवन् गोभिरश्वै स्त्वायतः शिशीहि राये अस्मान् २ २१२०
इमा उ त्वा पस्पृधानासो अत्र मन्द्रा गिरो देवयन्तीरुप स्थुः ।
अर्वाची ते पथ्या राय एतु स्याम ते सुमताविन्द्र शर्मन् ३
धेनुं न त्वा सूयवसे दुदुक्ष न्नुप ब्रह्माणि ससृजे वसिष्ठः ।
त्वामिन्मे गोपतिं विश्व आहा ऽऽ न इन्द्रः सुमतिं गन्त्वच्छ ४
अर्णांसि चित् पप्रथाना सुदास इन्द्रो गाधान्यकृणोत् सुपारा ।
शर्धन्तं शिम्युमुचथस्य नव्यः शापं सिन्धूनामकृणोदशस्तीः ५
पुरोळा इत् तुर्वशो यक्षुरासीद् राये मत्स्यासो निशिता अपीव ।
श्रुष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद् विषूचोः ६
आ पक्थासो भलानसो भनन्ता ऽलिनासो विषाणिनः शिवासः ।
आ योऽनयत् सधमा आर्यस्य गव्या तृत्सुभ्यो अजगन् युधा नॄन् ७ २१२५
दुराध्यो३ अदितिं स्रेवयन्तो ऽचेतसो वि जगृभ्रे परुष्णीम् ।
मह्नाविव्यक् पृथिवीं पत्यमानः पशुष्कविरशयच्चायमानः ८
ईयुरर्थं न न्यर्थं परुष्णी माशुश्चनेदभिपित्वं जगाम ।
सुदास इन्द्रः सुतुकाँ अमित्रा नरन्धयन्मानुषे वध्रिवाचः ९
ईयुर्गावो न यवसादगोपा यथाकृतमभि मित्रं चितासः ।
पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं चक्रुर्नियुतो रन्तयश्च १०
एकं च यो विंशतिं च श्रवस्या वैकर्णयोर्जनान् राजा न्यस्तः ।
दस्मो न सद्मन् नि शिशाति बर्हिः शूरः सर्गमकृणोदिन्द्र एषाम् ११
अध श्रुतं कवषं वृद्धमप्स्व नु द्रुह्युं नि वृणग्वज्रबाहुः ।
वृणाना अत्र सख्याय सख्यं त्वायन्तो ये अमदन्ननु त्वा १२ २१३०
वि सद्यो विश्वा दृंहितान्येषा मिन्द्रः पुरः सहसा सप्त दर्दः ।
व्यानवस्य तृत्सवे गयं भाग् जेष्म पूरुं विदथे मृध्रवाचम् १३

नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट् सहस्रा ।
षष्टिर्वीरासो अधि षड् दुवोयु विश्वेदिन्द्रस्य वीर्या कृतानि १४
इन्द्रेणैते तृत्सवो वेविषाणा आपो न सृष्टा अधवन्त नीचीः ।
दुर्मित्रासः प्रकलविन्मिमाना जहुर्विश्वानि भोजना सुदासे १५
अर्धं वीरस्य शृतपामनिन्द्रं परा शर्धन्तं नुनुदे अभि क्षाम् ।
इन्द्रो मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनिं पत्यमानः १६
आध्रेण चित् तद्वेकं चकार सिंह्यं चित् पेत्वेना जघान ।
अव स्रक्तीर्वेश्यावृश्चदिन्द्रः प्रायच्छद् विश्वा भोजना सुदासे १७ ११३५
शश्वन्तो हि शत्रवो रारधुष्टे भेदस्य चिच्छर्धतो विन्द रन्धिम् ।
मर्ताँ एनः स्तुवतो यः कृणोति तिग्मं तस्मिन् नि जहि वज्रमिन्द्र १८
आवदिन्द्रं यमुना तृत्सवश्च प्रात्र भेदं सर्वताता मुषायत् ।
अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्व्यानि १९
न त इन्द्र सुमतयो न रायः संचक्षे पूर्वा उषसो न नूत्नाः ।
देवकं चिन्मान्यमानं जघन्थाऽव त्मना बृहतः शम्बरं भेत् २०
प्र ये गृहादममदुस्त्वाया पराशरः शतयातुर्वसिष्ठः ।
न ते भोजस्य सख्यं मृषन्ताऽधा सूरिभ्यः सुदिना व्युच्छान् २१

॥ १९१ ॥ (ऋ० ७।१९।१-११)

यस्तिग्मशृङ्गो वृषभो न भीम एकः कृष्टीश्च्यावयति प्र विश्वाः ।
यः शश्वतो अदाशुषो गयस्य प्रयन्तासि सुष्वितराय वेदः १ ११४०
त्वं ह त्यदिन्द्र कुत्समावः शुश्रूषमाणस्तन्वा समर्ये ।
दासं यच्छुष्णं कुयवं न्यस्मा अरन्धय आर्जुनेयाय शिक्षन् २
त्वं धृष्णो धृषता वीतहव्यं प्रावो विश्वाभिरूतिभिः सुदासम् ।
प्र पौरुकुत्सिं त्रसदस्युमावः क्षेत्रसाता वृत्रहत्येषु पूरुम् ३
त्वं नृभिर्नृमणो देववीतौ भूरीणि वृत्रा हर्यश्व हंसि ।
त्वं नि दस्युं चुमुरिं धुनिं चाऽस्वापयो दभीतये सुहन्तु ४
तव च्यौत्नानि वज्रहस्त तानि नव यत् पुरो नवतिं च सद्यः ।
निवेशने शततमाविवेषीरहञ्च वृत्रं नमुचिमुताहन् ५
सना ता त इन्द्र भोजनानि रातहव्याय दाशुषे सुदासे ।
वृष्णे ते हरी वृषणा युनज्मि व्यन्तु ब्रह्माणि पुरुशाक वाजम् ६ ११४५

मा ते अस्यां सहसावन् परिष्टा—वघाय भूम हरिवः परादै ।
त्रायस्व नोऽवृकेभिर्वरूथै—स्तव प्रियासः सूरिषु स्याम　७
प्रियास इत् ते मघवन्नभिष्टौ　नरो मदेम शरणे सखायः ।
नि तुर्वशं नि याद्वं शिशी—ह्यतिथिग्वाय शंस्यं करिष्यन्　८
सद्यश्चिन्नु ते मघवन्नभिष्टौ　नरः शंसन्त्युक्थशास उक्था ।
ये ते हवेभिर्वि पणीँरदाश—न्नस्मान् वृणीष्व युज्याय तस्मै　९
एते स्तोमा नरां नृतम तुभ्य—मस्मद्र्यञ्चो ददतो मघानि ।
तेषामिन्द्र वृत्रहत्ये शिवो भूः　सखा च शूरोऽविता च नृणाम्　१०
नू इन्द्र शूर स्तवमान ऊती　ब्रह्मजूतस्तन्वा वावृधस्व ।
उप नो वाजान् मिमीह्युप स्तीन्　यूयं पात स्वस्तिभिः सदा नः　११　२१५०

॥ १९३ ॥ (ऋ० ७।२०।१-१०)

उग्रो जज्ञे वीर्याय स्वधावा—ञ्चक्रिरपो नर्यो यत् करिष्यन् ।
जग्मिर्युवा नृषदनमवोभि—स्त्राता न इन्द्र एनसो महश्चित्　१
हन्ता वृत्रमिन्द्रः शूशुवानः　प्रावीन्नु वीरो जरितारमूती ।
कर्ता सुदासे अह वा उ लोकं　दाता वसु मुहुरा दाशुषे भूत्　२
युध्मो अनर्वा खजकृत् समद्वा　शूरः सत्राषाड् जनुषेमषाळ्हः ।
व्यास इन्द्रः पृतनाः स्वोजा　अधा विश्वं शत्रूयन्तं जघान　३
उभे चिदिन्द्र रोदसी महित्वा　ऽऽ पप्राथ तविषीभिस्तुविष्मः ।
नि वज्रमिन्द्रो हरिवान् मिमिक्षन्　त्समन्धसा मदेषु वा उवोच　४
वृषा जजान वृषणं रणाय　तमु चिन्नारी नर्यं ससूव ।
प्र यः सेनानीरध नृभ्यो अस्ती—नः सत्वा गवेषणः स धृष्णुः　५　२१५५
नू चित् स भ्रेषते जनो न रेषन्　मनो यो अस्य घोरमाविवासात् ।
यज्ञैर्य इन्द्रे दधते दुवांसि　क्षयत् स राय ऋतपा ऋतेजाः　६
यदिन्द्र पूर्वो अपराय शिक्ष—न्नयज्ज्यायान् कनीयसो देष्णम् ।
अमृत इत् पर्यासीत दूर—मा चित्र चित्र्यं भरा रयिं नः　७
यस्त इन्द्र प्रियो जनो ददाश—दसन्निरेके अद्रिवः सखा ते ।
वयं ते अस्यां सुमतौ चनिष्ठाः　स्याम वरूथे अघ्नतो नृपीतौ　८
एष स्तोमो अचिक्रदद् वृषा त　उत स्तामुर्मघवन्नक्रपिष्ट ।
रायस्कामो जरितारं त आगन्　त्वमङ्ग शक्र वस्व आ शको नः　९

स नं इन्द्र त्वयंताया इषे धा—स्त्मनां च ये मघवानो जुनन्ति ।
वस्वी षु ते जरित्रे अस्तु शक्ति—र्यूयं पात स्वस्तिभिः सदां नः १० ११६०

॥ १९४ ॥ (ऋ० ७।२१।१-१०)

असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच ।
बोधामसि त्वा हर्यश्व यज्ञै—र्बोधा नः स्तोममन्धसो मदेषु १
प्र यन्ति यज्ञं विपयन्ति बर्हिः सोममादो विदथे दुध्रवाचः ।
न्यु भ्रियन्ते यशसो गृभादा दूरउपब्दो वृषणो नृषाचः २
त्वमिन्द्र स्रवितवा अपस्कः परिष्ठिता अहिना शूर पूर्वीः ।
त्वद् वावक्रे रथ्योऽ न धेना रेजन्ते विश्वा कृत्रिमाणि भीषा ३
भीमो विवेषायुधेभिरेषा—मपांसि विश्वा नर्याणि विद्वान् ।
इंद्रः पुरो जर्हृषाणो वि दूधोत् वि वज्रहस्तो महिना जघान ४
न यातव इंद्र जूजुवुर्नो न वंदना शविष्ठ वेद्याभिः ।
स शर्धदर्यो विषुणस्य जंतो—र्मा शिश्नदेवा अपि गुर्ऋतं नः ५ ११६५
अभि क्रत्वेंद्र भूरध ज्मन् न ते विव्यङ् महिमानं रजांसि ।
स्वेना हि वृत्रं शवसा जघंथ न शत्रुरंतं विविदद् युधा ते ६
देवाश्चित् ते असुर्याय पूर्वे ऽनु क्षत्राय ममिरे सहांसि ।
इंद्रो मघानि दयते विषह्ये—द्रं वाजस्य जोहुवंत सातौ ७
कीरिश्चिद्धि त्वामवसे जुहावे—शानमिंद्र सौभगस्य भूरेः ।
अवो बभूथ शतमूते अस्मे अभिक्षत्तुस्त्वावतो वरूता ८
सखायस्त इंद्र विश्वह स्याम नमोवृधासो महिना तरुत्र ।
वन्वन्तु स्मा तेऽवसा समीकेऽ ऽभीतिमर्यो वनुषां शवांसि ९
स नं इंद्र त्वयंताया इषे धा—स्त्मनां च ये मघवानो जुनन्ति ।
वस्वी षु ते जरित्रे अस्तु शक्ति—र्यूयं पात स्वस्तिभिः सदां नः १० ११७०

॥ १९५ ॥ (ऋ० ७।२२।१-९) विराट्, ९ त्रिष्टुप् ।

पिबा सोममिंद्र मंदतु त्वा यं ते सुषाव हर्यश्वाद्रिः । सोतुर्बाहुभ्यां सुयतो नार्वा १
यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि । स त्वामिन्द्र प्रभूवसो ममत्तु २
बोधा सु मे मघवन् वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् । इमा ब्रह्म सधमादे जुषस्व ३
श्रुधी हवं विपिपानस्याद्रे—र्बोधा विप्रस्यार्चतो मनीषाम् । कृष्वा दुवांस्यन्तमा सचेमा ४
न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् । सदा ते नाम स्वयशो विवक्मि ५ ११७५

भूरि हि ते सवना मानुषेषु   भूरि मनीषी हवते त्वामित् । मारे अस्मन्मघवञ्ज्योक् कः   ६
तुभ्येदिमा सवना शूर विश्वा   तुभ्यं ब्रह्माणि वर्धना कृणोमि । त्वं नृभिर्हव्यो विश्वधासि   ७
नू चिन्नु ते मन्यमानस्य दस्मो—दश्नुवन्ति महिमानमुग्र । न वीर्यमिन्द्र ते न राधः   ८
ये च पूर्व ऋषयो ये च नूत्ना   इन्द्र ब्रह्माणि जनयन्त विप्राः ।
अस्मे ते सन्तु सख्या शिवानि   यूयं पात स्वस्तिभिः सदा नः   ९

॥ १९६ ॥ (ऋ० ७।२३।१-६)

उदु ब्रह्माण्यैरत श्रवस्ये—न्द्रं समर्ये महया वसिष्ठ ।
आ यो विश्वानि शवसा ततानो—पश्रोता म ईवतो वचांसि   १   २१८०
अयामि घोष इन्द्र देवजामि—रिरज्यन्त यच्छुरुधो विवाचि ।
नहि स्वमायुश्चिकिते जनेषु   तानीदंहांस्यति पर्ष्यस्मान्   २
युजे रथं गवेषणं हरिभ्या—मुप ब्रह्माणि जुजुषाणमस्थुः ।
वि बाधिष्ट स्य रोदसी महित्वे—न्द्रो वृत्राण्यप्रती जघन्वान्   ३
आपश्चित् पिप्युः स्तर्यो३ न गावो   नक्षन्नृतं जरितारस्त इन्द्र ।
याहि वायुर्न नियुतो नो अच्छा   त्वं हि धीभिर्दयसे वि वाजान्   ४
ते त्वा मदा इन्द्र मादयन्तु   शुष्मिणं तुविराधसं जरित्रे ।
एको देवत्रा दयसे हि मर्ता—नस्मिञ्छूर सवने मादयस्व   ५
एवेदिन्द्रं वृषणं वज्रबाहुं   वसिष्ठासो अभ्यर्चन्त्यर्कैः ।
स नः स्तुतो वीरवद् धातु गोमद्   यूयं पात स्वस्तिभिः सदा नः   ६   २१८५

॥ १९७ ॥ (ऋ० ७।२४।१-६)

योनिष्ट इन्द्र सदने अकारि   तमा नृभिः पुरुहूत प्र याहि ।
असो यथा नोऽविता वृधे च   ददो वसूनि ममदश्च सोमैः   १
गृभीतं ते मन इन्द्र द्विबर्हाः   सुतः सोमः परिषिक्ता मधूनि ।
विसृष्टधेना भरते सुवृक्ति—रियमिन्द्रं जोहुवती मनीषा   २
आ नो दिव आ पृथिव्या ऋजीषि—न्निदं बर्हिः सोमपेयाय याहि ।
वहन्तु त्वा हरयो मद्र्यञ्च—माङ्गूषमच्छा तवसं मदाय   ३
आ नो विश्वाभिरूतिभिः सजोषा   ब्रह्म जुषाणो हर्यश्व याहि ।
वरीवृजत् स्थविरेभिः सुशिप्रा—ऽस्मे दधद् वृषणं शुष्ममिन्द्र   ४
एष स्तोमो मह उग्राय वाहे   धुरी३वात्यो न वाजयन्नधायि ।
इन्द्र त्वायमर्क ईट्टे वसूनां   दिवीव द्यामधि नः श्रोमतं धाः   ५   २१९०

एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।
इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ६

॥ १९८ ॥ (ऋ० ७।२५।१-६)

आ ते मह इन्द्रोत्युग्र समन्यवो यत् समरन्त सेनाः ।
पताति दिद्युन्नर्यस्य बाह्वो-र्मा ते मनो विष्वद्र्यग्वि चारीत् १
नि दुर्ग इन्द्र श्नथिह्यमित्रा-नभि ये नो मर्तासो अमन्ति ।
आरे तं शंसं कृणुहि निनित्सो-रा नो भर संभरणं वसूनाम् २
शतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु ।
जहि वधर्वनुषो मर्त्यस्या-ऽस्मे द्युम्नमधि रत्नं च धेहि ३
त्वावतो हीन्द्र क्रत्वे अस्मि त्वावतोऽवितुः शूर रातौ ।
विश्वेदहानि तविषीव उग्रँ ओकः कृणुष्व हरिवो न मर्धीः ४ ११९५
कुत्सा एते हर्यश्वाय शूष-मिन्द्रे सहो देवजूतमियानाः ।
सत्रा कृधि सुहना शूर वृत्रा वयं तरुत्राः सनुयाम वाजम् ५
एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।
इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ६

॥ १९९ ॥ (ऋ० ७।२६।१-५)

न सोम इन्द्रमसुतो ममाद् नाब्रह्माणो मघवानं सुतासः ।
तस्मा उक्थं जनये यज्जुजोष-न्नृवन्नवीयः शृणवद् यथा नः १
उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानं सुतासः ।
यदीं सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते २
चकार ता कृणवन्नूनमन्या यानि ब्रुवन्ति वेधसः सुतेषु ।
जनीरिव पतिरेकः समानो नि मामृजे पुर इन्द्रः सु सर्वाः ३ ११००
एवा तमाहुरुत शृण्व इन्द्र एको विभक्ता तरणिर्मघानाम् ।
मिथस्तुर ऊतयो यस्य पूर्वी-रस्मे भद्राणि सश्चत प्रियाणि ४
एवा वसिष्ठ इन्द्रमूतये नॄन् कृष्टीनां वृषभं सुते गृणाति ।
सहस्रिण उप नो माहि वाजान् यूयं पात स्वस्तिभिः सदा नः ५

॥ २०० ॥ (ऋ० ७।२७।१-५)

इन्द्रं नरो नेमधिता हवन्ते यत् पार्या युनजते धियस्ताः ।
शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः १

य इन्द्र शुष्मो मघवन् ते अस्ति शिक्षा सखिभ्यः पुरुहूत नृभ्यः ।
त्वं हि दृळ्हा मघवन् विचेता अपा वृधि परिवृतं न राधः २
इन्द्रो राजा जगतश्चर्षणीना—मधि क्षमि विषुरूपं यदस्ति ।
ततो ददाति दाशुषे वसूनि चोदद् राध उपस्तुतश्चिदर्वाक् ३ २२०५
नू चिन्न इन्द्रो मघवा सहूती दानो वाजं नि यमते न ऊती ।
अनूना यस्य दक्षिणा पीपाय वामं नृभ्यो अभिवीता सखिभ्यः ४
नू इन्द्र राये वरिवस्कृधी न आ ते मनो ववृत्याम मघाय ।
गोमदश्वावद् रथवद् व्यन्तो यूयं पात स्वस्तिभिः सदा नः ५

॥ २०१ ॥ (ऋ० ७।२८।१-५)

ब्रह्मा ण इन्द्रोप याहि विद्वा—नर्वाञ्चस्ते हरयः सन्तु युक्ताः ।
विश्वे चिद्धि त्वा विहवन्त मर्ता अस्माकमिच्छृणुहि विश्वमिन्व १
हवं त इन्द्र महिमा व्यानड् ब्रह्म यत् पासि शवसिन्नृषीणाम् ।
आ यद् वज्रं दधिषे हस्त उग्र घोरः सन् क्रत्वा जनिष्ठा अषाळ्हः २
तव प्रणीतीन्द्र जोहुवानान् त्सं यन्नॄन् न रोदसी निनेथ ।
महे क्षत्राय शवसे हि जज्ञे ऽतूतुजिं चित् तूतुजिरशिश्नत् ३ २२१०
एभिर्न इन्द्राहभिर्दशस्य दुर्मित्रासो हि क्षितयः पवन्ते ।
प्रति यच्चष्टे अनृतमनेना अव द्विता वरुणो मायी नः सात् ४
वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद् ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ५

॥ २०२ ॥ (ऋ० ७।२९।१-५)

अयं सोम इन्द्र तुभ्यं सुन्व आ तु प्र याहि हरिवस्तदोकाः ।
पिबा त्वस्य सुषुतस्य चारो—र्ददो मघानि मघवन्नियानः १
ब्रह्मन् वीर ब्रह्मकृतिं जुषाणो ऽर्वाचीनो हरिभिर्याहि तूयम् ।
अस्मिन्नू षु सवने मादयस्वो—प ब्रह्माणि शृणव इमा नः २
का ते अस्त्यरंकृतिः सूक्तैः कदा नूनं ते मघवन् दाशेम ।
विश्वा मतीरा ततने त्वाया ऽधा म इन्द्र शृणवो हवेमा ३ २२१५
उतो घा ते पुरुष्या३ इदासन् येषां पूर्वेषामशृणोर्ऋषीणाम् ।
अधाहं त्वा मघवञ्जोहवीमि त्वं न इन्द्रासि प्रमतिः पितेव ४
वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद् ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ५

॥ २०३ ॥ (ऋ० ७।३०।१-५)

आ नो देव शवसा याहि शुष्मिन् भवा वृध इन्द्र रायो अस्य ।
महे नृम्णाय नृपते सुवज्र महि क्षत्राय पौंस्याय शूर १
हवन्त उ त्वा हव्यं विवाचि तनूषु शूराः सूर्यस्य सातौ ।
त्वं विश्वेषु सेन्यो जनेषु त्वं वृत्राणि रन्धया सुहन्तु २
अहा यदिन्द्र सुदिना व्युच्छान् दधो यत् केतुमुपमं समत्सु ।
न्य१ग्निः सीददसुरो न होता हुवानो अत्र सुभगाय देवान् ३ ११२०
वयं ते त इन्द्र ये च देव स्तवन्त शूर ददतो मघानि ।
यच्छा सूरिभ्य उपमं वरूथं स्वाभुवो जरणामश्नवन्त ४
वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद् ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ५

॥ २०४ ॥ (ऋ० ७।३१।१-१२) गायत्री, १०-१२ विराट् ।

प्र व इन्द्राय मादनं हर्यश्वाय गायत । सखायः सोमपाव्ने १
शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः । चकृमा सत्यराधसे २
त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो । त्वं हिरण्ययुर्वसो ३ ११२५
वयमिन्द्र त्वायवोऽभि प्र णोनुमो वृषन् । विद्धी त्व१स्य नो वसो ४
मा नो निदे च वक्तवेऽर्यो रन्धीरराव्णे । त्वे अपि क्रतुर्मम ५
त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन् । त्वया प्रति ब्रुवे युजा ६
महाँ उतासि यस्य तेऽनु स्वधावरी सहः । मम्नाते इन्द्र रोदसी ७
तं त्वा मरुत्वती परि भुवद् वाणी सयावरी । नक्षमाणा सह द्युभिः ८ ११३०
ऊर्ध्वासस्त्वान्विन्दवो भुवन् दस्ममुप द्यवि । सं ते नमन्त कृष्टयः ९
प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् । विशः पूर्वीः प्र चरा चर्षणिप्राः १०
उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः । तस्य व्रतानि न मिनन्ति धीराः ११
इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै । हर्यश्वाय बर्हया समापीन् १२

॥ २०५ ॥ (ऋ० ७।३२।१-२७) २६ पूर्वार्धर्चस्य शक्तिर्वासिष्ठो वा (शाट्यायने ब्राह्मणे), २६-२७ शक्तिर्वासिष्ठो वा (ताण्डके ब्राह्मणे)। प्रगाथः- (बृहती, सतोबृहती), ३ द्विपदा विराट् ।

मो षु त्वा वाघतश्चना ऽऽरे अस्मन्नि रीरमन् ।
आरात्ताच्चित् सधमादं न आ गहीह वा सन्नुप श्रुधि १ ११३५
इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते ।
इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः २

रायस्कामो वज्रहस्तं सुदक्षिणं   पुत्रो न पितरं हुवे   ३
इम इन्द्राय सुन्विरे   सोमासो दध्याशिरः ।
ताँ आ मदाय वज्रहस्त पीतये   हरिभ्यां याह्योक आ   ४
श्रवच्छ्रुत्कर्ण ईयते वसूनां   नू चिन्नो मर्धिषद् गिरः ।
सद्यश्चिद् यः सहस्राणि शता दद--न्नकिर्दित्सन्तमा मिनत्   ५
स वीरो अप्रतिष्कुत   इन्द्रेण शूशुवे नृभिः ।
यस्ते गभीरा सवनानि वृत्रहन्   त्सुनोत्या च धावति   ६   ११४०
भवा वरूथं मघवन् मघोनां   यत् समजासि शर्धतः ।
वि त्वाहतस्य वेदनं भजेम--ह्या दूणाशो भरा गयम्   ७
सुनोता सोमपाव्ने   सोममिन्द्राय वज्रिणे ।
पचता पक्तीरवसे कृणुध्वमित्   पृणन्नित् पृणते मयः   ८
मा स्रेधत सोमिनो दक्षता महे   कृणुध्वं राय आतुजे ।
तरणिरिज्जयति क्षेति पुष्यति   न देवासः कवत्नवे   ९
नकिः सुदासो रथं   पर्यास न रीरमत् ।
इन्द्रो यस्याविता यस्य मरुतो   गमत् स गोमति व्रजे   १०
गमद् वाजं वाजयन्निन्द्र मर्त्यो   यस्य त्वमविता भुवः ।
अस्माकं बोध्यविता रथाना--मस्माकं शूर नृणाम्   ११   ११४५
उदिन्न्वस्य रिच्यते--ऽशो धनं न जिग्युषः ।
य इन्द्रो हरिवान् न दभन्ति तं रिपो   दक्षं दधाति सोमिनि   १२
मन्त्रमखर्वं सुधितं सुपेशसं   दधात यज्ञियेष्वा ।
पूर्वीश्चन प्रसितयस्तरन्ति तं   य इन्द्रे कर्मणा भुवत्   १३
कस्तमिन्द्र त्वावसु--मा मर्त्यो दधर्षति ।
श्रद्धा इत् ते मघवन् पार्ये दिवि   वाजी वाजं सिषासति   १४
मघोनः स्म वृत्रहत्येषु चोदय   ये ददति प्रिया वसु ।
तव प्रणीती हर्यश्व सूरिभि--र्विश्वा तरेम दुरिता   १५
तवेदिन्द्रावमं वसु   त्वं पुष्यसि मध्यमम् ।
सत्रा विश्वस्य परमस्य राजसि   नकिष्ट्वा गोषु वृण्वते   १६   ११५०
त्वं विश्वस्य धनदा असि श्रुतो   य ईं भवन्त्याजयः ।
तवायं विश्वः पुरुहूत पार्थिवो   ऽवस्युर्नाम भिक्षते   १७

यदिन्द्र यावतस्त्व-मेतावदहमीशीय ।
स्तोतारमिद् दिधिषेय रदावसो न पापत्वाय रासीय १८
शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
नहि त्वदन्यन्मघवन् न आप्यं वस्यो अस्ति पिता चन १९
तरणिरित् सिषासति वाजं पुरंध्या युजा ।
आ व इंद्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्र्वम् २०
न दुष्टुती मर्त्यो विन्दते वसु न स्रेधन्तं रयिर्नशत् ।
सुशक्तिरिन्मघवन् तुभ्यं मावते देष्णं यत् पार्ये दिवि २१ ११५५
अभि त्वा शूर नोनुमो ऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृश-मीशानमिन्द्र तस्थुषः २२
न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे २३
अभी षतस्तदा भरे-न्द्र ज्यायः कनीयसः ।
पुरूवसुर्हि मघवन्त्सनादसि भरेभरे च हव्यः २४
परा णुदस्व मघवन्नमित्रान् त्सुवेदा नो वसू कृधि ।
अस्माकं बोध्यविता महाधने भवा वृधः सखीनाम् २५
इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि २६ ११६०
मा नो अज्ञाता वृजना दुराध्यो३ माशिवासो अव क्रमुः ।
त्वया वयं प्रवतः शश्वतीरपो ऽति शूर तरामसि २७

॥ १०६ ॥ (ऋ० ७।३३।१-९) १-९ वसिष्ठपुत्राः इन्द्रो वा । त्रिष्टुप् ।

श्वित्यञ्चो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि हि प्रमन्दुः ।
उत्तिष्ठन् वोचे परि बर्हिषो नॄन् न मे दूरादवितवे वसिष्ठाः १
दूरादिन्द्रमनयन्ना सुतेन तिरो वैशन्तमति पान्तमुग्रम् ।
पाशद्युम्नस्य वायतस्य सोमात् सुतादिन्द्रोऽवृणीता वसिष्ठान् २
एवेन्नु कं सिन्धुमेभिस्ततारे-वेन्नु कं भेदमेभिर्जघान ।
एवेन्नु कं दाशराज्ञे सुदासं प्रावदिन्द्रो ब्रह्मणा वो वसिष्ठाः ३
जुष्टी नरो ब्रह्मणा वः पितॄणा-मक्षमव्ययं न किला रिषाथ ।
यच्छक्वरीषु बृहता रवेणे-न्द्रे शुष्ममदधाता वसिष्ठाः ४ ११६५

उद् द्यामिवेत् तृष्णजो नाथितासो ऽदीधयुर्दाशराज्ञे वृतासः ।
वसिष्ठस्य स्तुवत इन्द्रो अश्रो-दुरुं तृत्सुभ्यो अकृणोदु लोकम् ५
दण्डा इवेद् गोअजनास आसन् परिच्छिन्ना भरता अर्भकासः ।
अभवच्च पुरएता वसिष्ठ आदित् तृत्सूनां विशो अप्रथन्त ६
त्रयः कृण्वन्ति भुवनेषु रेत-स्तिस्रः प्रजा आर्या ज्योतिरग्राः ।
त्रयो घर्मास उषसं सचन्ते सर्वाँ इत् ताँ अनु विदुर्वसिष्ठाः ७
सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः ।
वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ८
त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि सं चरन्ति ।
यमेन ततं परिधिं वयन्तो ऽप्सरस उप सेदुर्वसिष्ठाः ९ २२७०

॥ १०७ ॥ (ऋ० ७।५५।२-८) (प्रस्वापिनी उपनिषद्) । २-४ उपरिष्टाद्बृहती, ५-८ अनुष्टुप् ।

यदर्जुन सारमेय दतः पिशङ्ग यच्छसे ।
वीव भ्राजन्त ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप २
स्तेनं राय सारमेय तस्करं वा पुनःसर ।
स्तोतॄनिन्द्रस्य रायसि किमस्मान् दुच्छुनायसे नि षु स्वप ३
त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकरः ।
स्तोतॄनिन्द्रस्य रायसि किमस्मान् दुच्छुनायसे नि षु स्वप ४
सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः ।
ससन्तु सर्वे ज्ञातयः सस्त्वयमभितो जनः ५
य आस्ते यश्च चरति यश्च पश्यति नो जनः ।
तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा ६ २२७५
सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत् ।
तेना सहस्येना वयं नि जनान्त्स्वापयामसि ७
प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः ।
स्त्रियो याः पुण्यगन्धा-स्ताः सर्वाः स्वापयामसि ८

॥ १०८ ॥ (ऋ० ७।९७।१) त्रिष्टुप् ।

यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदन्ति ।
इन्द्राय यत्र सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च १

॥ १०९ ॥ (ऋ० ७।९८।१-६)

अध्वर्यवोऽरुणं दुग्धमंशुं जुहोतन वृषभाय क्षितीनाम् ।
गौराद् वेदीयाँ अवपानमिन्द्रो विश्वाहेद् याति सुतसोममिच्छन् १

यद् दधिषे प्रदिवि चार्वन्नं दिवेदिवे पीतिमिदस्य वक्षि ।
उत हृदोत मनसा जुषाण उशन्निन्द्र प्रस्थितान् पाहि सोमान् २ ११८०

जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानमुवाच ।
एन्द्र पप्राथोर्वन्तरिक्षं युधा देवेभ्यो वरिवश्चकर्थ ३

यद् योधया महतो मन्यमानान् त्साक्षाम तान् बाहुभिः शाशदानान् ।
यद् वा नृभिर्वृत इन्द्राभियुध्या—स्तं त्वयाजिं सौश्रवसं जयेम ४

प्रेन्द्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार ।
यदेददेवीरसहिष्ट माया अथाभवत् केवलः सोमो अस्य ५

तवेदं विश्वमभितः पशव्यं यत् पश्यसि चक्षसा सूर्यस्य ।
गवामसि गोपतिरेक इंद्र भक्षीमहि ते प्रयतस्य वस्वः ६

॥ ११० ॥ (ऋ० ७।१०४।८, १६, १९-२२) । त्रिष्टुप्; २१ जगती ।

यो मा पाकेन मनसा चरंत—मभिचष्टे अनृतेभिर्वचोभिः ।
आप इव काशिना संगृभीता असन्नस्त्वासत इंद्र वक्ता ८ ११८५

यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह ।
इंद्रस्तं हंतु महता वधेन विश्वस्य जन्तोरधमस्पदीष्ट १६

प्र वर्तय दिवो अश्मानमिन्द्र सोमशितं मघवन्त्सं शिशाधि ।
प्राक्तादपाक्तादधरादुदक्ता—दभि जहि रक्षसः पर्वतेन १९

एत उ त्ये पतयन्ति श्वयातव इंद्रं दिप्सन्ति दिप्सवोऽदाभ्यम् ।
शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजदशनिं यातुमद्भ्यः २०

इंद्रो यातूनामभवत् पराशरो हविर्मथीनामभ्या३विवासताम् ।
अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एति रक्षसः २१

उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम् ।
सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र २२ ११९०

॥ १११ ॥ (ऋ० ८।६८।१-१३)

(२२९१-२३१०) प्रियमेध आङ्गिरसः । गायत्री; अनुष्टुम्मुखः प्रगाथः= (अनुष्टुप्+गायत्र्यौ); १, ४, ७, १० अनुष्टुप् ।

आ त्वा रथं यथोतये सुम्नाय वर्तयामसि । तुविकूर्मिमृतीषहमिन्द्र शविष्ठ सत्पते १
तुविशुष्म तुविक्रतो शचीवो विश्वया मते । आ पप्राथ महित्वना २
यस्य ते महिना महः परि ज्मायन्तमीयतुः । हस्ता वज्रं हिरण्ययम् ३
विश्वानरस्य वस्पतिमनानतस्य शवसः । एवैश्च चर्षणीनामूती हुवे रथानाम् ४
अभिष्टये सदावृधं स्वर्मीळ्हेषु यं नरः । नाना हवन्त ऊतये ५ २२९५
परोमात्रमृचीषममिन्द्रमुग्रं सुराधसम् । ईशानं चिद्वसूनाम् ६
तंतमिद्राधसे मह इन्द्रं चोदामि पीतये । यः पूर्व्यामनुष्टुतिमीशे कृष्टीनां नृतुः ७
न यस्य ते शवसान सख्यमानंश मर्त्यः । नकिः शवांसि ते नशत् ८
त्वोतासस्त्वा युजाऽप्सु सूर्ये महद्धनम् । जयेम पृत्सु वज्रिवः ९
तं त्वा यज्ञेभिरीमहे तं गीर्भिर्गिर्वणस्तम ।
इन्द्र यथा चिदाविथ वाजेषु पुरुमाय्यम् १० २३००
यस्य ते स्वादु सख्यं स्वाद्वी प्रणीतिरद्रिवः । यज्ञो वितन्तसाय्यः ११
उरु णस्तन्वे३ तन उरु क्षयाय नस्कृधि । उरु णो यन्धि जीवसे १२
उरुं नृभ्य उरुं गव उरुं रथाय पन्थाम् । देववीतिं मनामहे १३

॥ ११२ ॥ (ऋ० ८।६९।१-१०, [११ पूर्वार्धः], १३-१८)

अनुष्टुप्, २ उष्णिक्, ४-६ गायत्री, १६ पङ्क्तिः, १७-१८ बृहती ।

प्रप्र वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे । धिया वो मेधसातये पुरंध्या विवासति १
नदं व ओदतीनां नदं योयुवतीनाम् । पतिं वो अघ्न्यानां धेनूनामिषुध्यसि २ २३०५
ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः ।
जन्मन् देवानां विशस्त्रिष्वा रोचने दिवः ३
अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे । सूनुं सत्यस्य सत्पतिम् ४
आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि । यत्राभि संनवामहे ५
इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु । यत् सीमुपह्वरे विदत् ६
उद्यद्ब्रध्नस्य विष्टपं गृहमिन्द्रश्च गन्वहि ।
मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे ७ २३१०
अर्चत प्रार्चत प्रियमेधासो अर्चत । अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत ८

अव॑ स्वराति॒ गर्ग॑रो गो॒धा परि॑ सनिष्वणत् ।
पिङ्गा॒ परि॑ चनिष्कद॒—दिन्द्रा॑य ब्र॒ह्मोद्य॑तम् ९
आ यत् पत॑न्त्ये॒न्यः॑ सु॒दुघा॒ अन॑पस्फुरः । अ॒प॒स्फुरं॑ गृभायत॒ सोम॒मिन्द्रा॑य॒ पात॑वे १०
अपा॒दिन्द्रो॒ अपा॑द॒ग्नि—र्विश्वे॑ दे॒वा अ॑मत्सत । (पूर्वार्धः) ११
यो व्यतीँरफाणयत् सु॒युक्ताँ॒ उप॑ दा॒शुषे॑ । त॒क्वो ने॒ता तदिद्वपु॒—रु॒प॒मा यो अमु॑च्यत १२ २३१५
अती॒दु॒ श॒क्र ओ॑हत॒ इन्द्रो॒ विश्वा॒ अति॒ द्विषः॑ ।
भि॒नत् क॒नीन॑ ओद॒नं प॒च्यमा॑नं प॒रो गि॒रा १४
अ॒र्भ॒को न कु॑मार॒को ऽधि॑ तिष्ठ॒न् नवं॒ रथ॑म् । स प॑क्षन्महि॒षं मृ॒गं पि॒त्रे मा॒त्रे वि॑भु॒क्रतु॑म् १५
आ तू सु॑शिप्र दंपते॒ रथं॑ तिष्ठा हिर॒ण्यय॑म् ।
अध॑ द्यु॒क्षं स॑चेवहि स॒हस्र॑पाद॒म॒रु॒षं स्व॑स्ति॒गाम॑ने॒हस॑म् १६
तं घे॑मि॒त्था न॑म॒स्विन॒ उप॑ स्व॒राज॑मासते ।
अर्थं॑ चि॒दस्य॒ सुधि॑तं॒ यदे॑तव आ॒वर्त॑यन्ति दा॒वने॑ १७
अनु॑ प्र॒त्नस्यौक॑सः प्रि॒यमे॑धास एषाम् ।
पूर्वा॒मनु॒ प्रय॑तिं वृ॒क्तब॑र्हिषो हि॒तप्र॑यस आशत १८ २३२०

॥ २१३ ॥ (ऋ० ८।७०।१-१५)

(२३२१-२३३५) पुरुहन्मा आङ्गिरसः । बृहती; १-६ प्रगाथः= (विषमा बृहती, समा सतोबृहती),
११ शंकुमती, १३ उष्णिक्, १४ अनुष्टुप्, १५ पुरउष्णिक् ।

यो राजा॑ चर्षणी॒नां याता॒ रथे॑भि॒रध्रि॑गुः ।
विश्वा॑सां तरु॒ता पृत॑नानां॒ ज्येष्ठो॒ यो वृ॑त्र॒हा गृ॒णे १
इन्द्रं॒ तं शु॑म्भ पुरुहन्म॒न्नव॑से॒ यस्य॑ द्वि॒ता वि॑ध॒र्तरि॑ ।
हस्ता॑य॒ वज्रः॒ प्रति॑ धायि द॒र्शतो॑ म॒हो दि॒वे न सूर्यः॑ २
नकि॒ष्टं कर्म॑णा नश॒—द्यश्च॒कार॑ स॒दावृ॑धम् ।
इन्द्रं॒ न य॒ज्ञैर्वि॒श्वगू॑र्त॒मृभ्व॑स॒—मधृ॑ष्टं धृ॒ष्ण्वोज॑सम् ३
अषा॑ळ्हमु॒ग्रं पृत॑नासु सास॒हिं यस्मि॑न् म॒हीरु॑रु॒ज्रयः॑ ।
सं धे॒नवो॒ जाय॑माने अनोनवु॒—र्द्याव॒ः क्षामो॑ अनोनवुः ४
यद्द्याव॑ इन्द्र ते श॒तं श॒तं भूमी॑रु॒त स्युः ।
न त्वा॑ वज्रिन्त्स॒हस्रं॒ सूर्या॒ अनु॒ न जा॒तम॑ष्ट॒ रोद॑सी ५ २३२५
आ प॑प्राथ महि॒ना वृष्ण्या॑ वृष॒न् विश्वा॑ शविष्ठ॒ शव॑सा ।
अ॒स्माँ अ॑व मघव॒न् गोम॑ति व्र॒जे वज्रि॑ञ्चि॒त्राभि॑रू॒तिभिः॑ ६

न सीमदेव आप—दिषं दीर्घायो मर्त्यः ।
एतग्वा चिद्य एतशा युयोजते हरी इन्द्रो युयोजते ७
तं वो महो महाय्य—मिन्द्रं दानाय सक्षणिम् ।
यो गाधेषु य आरणेषु हव्यो वाजेष्वस्ति हव्यः ८
उदू षु णो वसो महे मृशस्व शूर राधसे ।
उदू षु मह्यै मघवन् मघत्तय उदिन्द्र श्रवसे महे ९
त्वं न इन्द्र ऋतयु—स्त्वानिदो नि तृम्पसि ।
मध्ये वसिष्व तुविनृम्णोर्वो—र्नि दासं शिश्नथो हथैः १० २३३०
अन्यव्रतममानुष—मयज्वानमदेवयुम् ।
अव स्वः सखा दुधुवीत पर्वतः सुघ्नाय दस्युं पर्वतः ११
त्वं न इन्द्रासां हस्ते शविष्ठ दावने । धानानां न सं गृभायास्मयु—र्द्विः सं गृभायास्मयुः १२
सखायः क्रतुमिच्छत कथा राधाम शरस्य । उपस्तुतिं भोजः सूरियो अह्रयः १३
भूरिभिः समह ऋषिभि—र्बर्हिष्मद्भिः स्तविष्यसे ।
यदित्थमेकमेकमि—च्छर वत्सान् पराददः १४
कर्णगृह्या मघवा शौरदेव्यो वत्सं नस्त्रिभ्य आनयत् । अजां सूरिर्न धातवे १५ २३३५

॥ २१४ ॥ (ऋ० ८।९५।१-९) (२३३६-२३६५) तिरश्चीराङ्गिरसः । अनुष्टुप् ।

आ त्वा गिरो रथीरिवा—ऽस्थुः सुतेषु गिर्वणः ।
अभि त्वा समनूषते—न्द्र वत्सं न मातरः १
आ त्वा शुक्रा अचुच्यवुः सुतास इन्द्र गिर्वणः ।
पिबा त्वं१स्यान्धस इन्द्र विश्वासु ते हितम् २
पिबा सोमं मदाय क—मिन्द्र श्येनाभृतं सुतम् ।
त्वं हि शश्वतीनां पती राजा विशामसि ३
श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ।
सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ४
इन्द्र यस्ते नवीयसीं गिरं मन्द्रामजीजनत् ।
चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम् ५ २३४०
तमु ष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः ।
पुरूण्यस्य पौंस्या सिषासन्तो वनामहे ६

❀

एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।
शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान् ममत्तु ७
इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः ।
शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः ८
इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे ।
शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि ९

॥ २१५ ॥ (ऋ० ८।९६।१-१३, १६-२१)

[द्युतानो वा मारुतः । त्रिष्टुप्, ४ विराट्, ११ पुरस्ताज्ज्योतिः ।]

अस्मा उषास आतिरन्त याम—मिन्द्राय नक्तमूर्म्याः सुवाचः ।
अस्मा आपो मातरः सप्त तस्थु—र्नृभ्यस्तराय सिन्धवः सुपाराः १ १३४५
अतिविद्धा विथुरेणा चिदस्त्रा त्रिः सप्त सानु संहिता गिरीणाम् ।
न तद्देवो न मर्त्यस्तुतुर्या—द्यानि प्रवृद्धो वृषभश्चकार २
इन्द्रस्य वज्र आयसो निमिश्ल इन्द्रस्य बाह्वोर्भूयिष्ठमोजः ।
शीर्षन्निन्द्रस्य क्रतवो निरेक आसन्नेषन्त श्रुत्या उपाके ३
मन्ये त्वा यज्ञियं यज्ञियानां मन्ये त्वा च्यवनमच्युतानाम् ।
मन्ये त्वा सत्वनामिन्द्र केतुं मन्ये त्वा वृषभं चर्षणीनाम् ४
आ यद्वज्रं बाह्वोरिन्द्र धत्से मदच्युतमहये हन्तवा उ ।
प्र पर्वता अनवन्त प्र गावः प्र ब्रह्माणो अभिनक्षन्त इन्द्रम् ५
तमु ष्टवाम य इमा जजान विश्वा जातान्यवराण्यस्मात् ।
इन्द्रेण मित्रं दिधिषेम गीर्भि—रुपो नमोभिर्वृषभं विशेम ६ १३५०
वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः ।
मरुद्भिरिन्द्र सख्यं ते अस्त्व—थेमा विश्वाः पृतना जयासि ७
त्रिः षष्टिस्त्वा मरुतो वावृधाना उस्रा इव राशयो यज्ञियासः ।
उप त्वेमः कृधि नो भागधेयं शुष्मं त एना हविषा विधेम ८
तिग्ममायुधं मरुतामनीकं कस्त इन्द्र प्रति वज्रं दधर्ष ।
अनायुधासो असुरा अदेवा—श्चक्रेण ताँ अप वप ऋजीषिन् ९
मह उग्राय तवसे सुवृक्तिं प्रेरय शिवतमाय पश्वः ।
गिर्वाहसे गिर इंद्राय पूर्वी—र्धेहि तन्वे कुविदङ्ग वेदत् १०

उक्थवाहसे विभ्वे मनीषां द्रुणा न पारमीरया नदीनाम् ।
नि स्पृश धिया तन्वि श्रुतस्य जुष्टतरस्य कुविदङ्ग वेदत् ११ २३५५
तद्विविड्ढि यत् त इंद्रो जुजोषत् स्तुहि सुष्टुतिं नमसा विवास ।
उप भूष जरितर्मा रुवण्यः श्रावया वाचं कुविदङ्ग वेदत् १२
अव द्रप्सो अंशुमतीमतिष्ठ—दियानः कृष्णो दशभिः सहस्रैः ।
आवत् तमिन्द्रः शच्या धमन्त—मप स्नेहितीर्नृमणा अधत्त १३
त्वं ह त्यत् सप्तभ्यो जायमानो ऽशत्रुभ्यो अभवः शत्रुरिन्द्र ।
गूळ्हे द्यावापृथिवी अन्वविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः १६
त्वं ह त्यदप्रतिमानमोजो वज्रेण वज्रिन् धृषितो जघन्थ ।
त्वं शुष्णस्यावातिरो वधत्रै—स्त्वं गा इंद्र शच्येदविन्दः १७
त्वं ह त्यद्वृषभ चर्षणीनां घनो वृत्राणां तविषो बभूथ ।
त्वं सिन्धूँरसृजस्तस्तभानान् त्वमपो अजयो दासपत्नीः १८ २३६०
स सुक्रतू रणिता यः सुतेष्व—नुत्तमन्युर्यो अहेव रेवान् ।
य एक इन्नर्यपांसि कर्ता स वृत्रहा प्रतीदन्यमाहुः १९
स वृत्रहेन्द्रश्चर्षणीधृत् तं सुष्टुत्या हव्यं हुवेम ।
स प्राविता मघवा नोऽधिवक्ता स वाजस्य श्रवस्यस्य दाता २०
स वृत्रहेन्द्र ऋभुक्षाः सद्यो जज्ञानो हव्यो बभूव ।
कृण्वन्नपांसि नर्या पुरूणि सोमो न पीतो हव्यः सखिभ्यः २१ २३६३

॥ २१६ ॥ (ऋ० ८.९८।१-१२)

(२३६४-२३८३) नृमेध आङ्गिरसः। उष्णिक्; ७, १०-११ ककुप्; ९, १२ पुरउष्णिक् ।

इंद्राय साम गायत विप्राय बृहते बृहत् । धर्मकृते विपश्चिते पनस्यवे १
त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचयः । विश्वकर्मा विश्वदेवो महाँ असि २ २३६५
विभ्राजञ्ज्योतिषा स्व१—रगच्छो रोचनं दिवः । देवास्त इंद्र सख्याय येमिरे ३
एन्द्र नो गधि प्रियः सत्राजिदगोह्यः । गिरिर्न विश्वतस्पृथुः पतिर्दिवः ४
अभि हि सत्य सोमपा उभे बभूथ रोदसी । इंद्रासि सुन्वतो वृधः पतिर्दिवः ५
त्वं हि शश्वतीना—मिंद्र दर्ता पुरामसि । हंता दस्योर्मनोर्वृधः पतिर्दिवः ६
अधा हीन्द्र गिर्वण उप त्वा कामान् महः ससृज्महे । उदेव यंत उदभिः ७ २३७०
वार्ण त्वा यव्याभि—र्वर्धन्ति शूर ब्रह्माणि । वावृध्वांसं चिदद्रिवो दिवेदिवे ८

युञ्जन्ति हरी इषिरस्य गाथयो—रौ रथं उरुयुगे । इन्द्रवाहा वचोयुजा ९
त्वं न इन्द्रा भरँ ओजो नृम्णं शतक्रतो विचर्षणे । आ वीरं पृतनाषहम् १०
त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ । अधा ते सुम्नमीमहे ११
त्वां शुष्मिन् पुरुहूत वाजयन्त—मुप ब्रुवे शतक्रतो । स नो रास्व सुवीर्यम् १२ २३७५

॥ २१७ ॥ (ऋ० ८।९९।१-८) प्रगाथः=(विषमा बृहती, समा सतोबृहती) ।

त्वामिदा ह्यो नरो ऽपीप्यन् वज्रिन् भूर्णयः ।
स इन्द्र स्तोमवाहसामिह श्रुध्यु—प स्वसरमा गहि १
मत्स्वा सुशिप्र हरिवस्तदीमहे त्वे आ भूषन्ति वेधसः ।
तव श्रवांस्युपमान्युक्थ्या सुतेष्विन्द्र गिर्वणः २
श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ३
अनर्शरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः ।
सो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ४
त्वमिन्द्र प्रतूर्तिष्व—भि विश्वा असि स्पृधः ।
अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ५ २३८०
अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ६
इत ऊती वो अजरं प्रहेतारमप्रहितम् ।
आशुं जेतारं हेतारं रथीतम—मतूर्तं तुग्र्यावृधम् ७
इष्कर्तारमनिष्कृतं सहस्कृतं शतमूतिं शतक्रतुम् ।
समानमिन्द्रमवसे हवामहे वसवानं वसूजुवम् ८ २३८३

॥ २१८ ॥ (ऋ० ८।८९।१-७)

(२३८४-२३९६) नृमेध-पुरुमेधावाङ्गिरसौ । १-४ प्रगाथः=(विषमा बृहती, समा सतोबृहती), ५-६ अनुष्टुप्, ७ बृहती ।

बृहदिन्द्राय गायत मरुतो वृत्रहंतमम् ।
येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि १
अपाधमदभिशस्तीरशस्तिहा ऽथेन्द्रो द्युम्न्याभवत् ।
देवास्त इन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण २ २३८५

प्र व इंद्राय बृहते　मरुतो ब्रह्मार्चत ।
वृत्रं हनति वृत्रहा शतक्रतु — र्वज्रेण शतपर्वणा　३
अभि प्र भर धृषता धृषन्मनः　श्रवश्चित् ते असद्बृहत् ।
अर्षन्त्वापो जवसा वि मातरो　हनो वृत्रं जया स्वः　४
यज्जायथा अपूर्व्य　मघवन् वृत्रहत्याय ।
तत् पृथिवीमप्रथय — स्तदस्तभ्ना उत द्याम्　५
तत् ते यज्ञो अजायत　तदर्क उत हस्कृतिः ।
तद्विश्वमभिभूरसि　यज्जातं यच्च जन्त्वम्　६
आमासु पक्वमैरय　आ सूर्यं रोहयो दिवि ।
घर्मं न सामन् तपता सुवृक्तिभि — र्जुष्टं गिर्वणसे बृहत्　७　२३९०

॥ २१९ ॥ (ऋ० ८।९०।१-६) प्रगाथः= (विषमा बृहती, समा सतोबृहती) ।

आ नो विश्वासु हव्य　इंद्रः समत्सु भूषतु ।
उप ब्रह्माणि सवनानि वृत्रहा　परमज्या ऋचीषमः　१
त्वं दाता प्रथमो राधसाम — स्यसि सत्य ईशानकृत् ।
तुविद्युम्नस्य युज्या वृणीमहे　पुत्रस्य शवसो महः　२
ब्रह्मा त इंद्र गिर्वणः　क्रियन्ते अनतिद्भुता ।
इमा जुषस्व हर्यश्व योजने — न्द्र या ते अमन्महि　३
त्वं हि सत्यो मघवन्ननानतो　वृत्रा भूरि न्यृञ्जसे ।
स त्वं शविष्ठ वज्रहस्त दाशुषे　ऽर्वाञ्चं रयिमा कृधि　४
त्वमिन्द्र यशा अस्यृ — जीषी शवसस्पते ।
त्वं वृत्राणि हंस्यप्रतीन्येक इद — नुत्ता चर्षणीधृता　५　२३९५
तमु त्वा नूनमसुर प्रचेतसं　राधो भागमिवेमहे ।
महीव कृत्तिः शरणा त इंद्र　प्र ते सुम्ना नो अश्नवन्　६　२३९६

॥ २२० ॥ (८।९२।१-३३)

(२३९७-२४२९) श्रुतकक्षः सुकक्षो वा आङ्गिरसः । गायत्री, १ अनुष्टुप् ।

पान्तमा वो अंधस　इंद्रमभि प्र गायत　। विश्वासाहं शतक्रतुं　मंहिष्ठं चर्षणीनाम्　१
पुरुहूतं पुरुष्टुतं　गाथान्यं सनश्रुतम्　। इंद्र इति ब्रवीतन　२
इंद्र इन्नो महानां　दाता वाजानां नृतुः　। महाँ अभिज्ञ्वा यमत्　३
अपादु शिप्र्यन्धसः　सुदक्षस्य प्रहोषिणः　। इंदोरिन्द्रो यवाशिरः　४　२४००

तम्वभि प्रार्चतेन्द्रं सोमस्य पीतये । तदिद्ध्यस्य वर्धनम् ५

अस्य पीत्वा मदानां देवो देवस्यौजसा । विश्वाभि भुवना भुवत् ६

त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् । आ च्यावयस्यूतये ७

युध्मं सन्तमनर्वाणं सोमपामनपच्युतम् । नरमवार्यक्रतुम् ८

शिक्षा ण इंद्र राय आ पुरु विद्वाँ ऋचीषम । अवा नः पार्ये धने ९ १४०५

अतश्चिदिन्द्र ण उपा ऽऽ याहि शतवाजया । इषा सहस्रवाजया १०

अयाम धीवतो धियो ऽर्वद्भिः शक्र गोदरे । जयेम पृत्सु वज्रिवः ११

वयमु त्वा शतक्रतो गावो न यवसेष्वा । उक्थेषु रणयामसि १२

विश्वा हि मर्त्यत्वना ऽनुकामा शतक्रतो । अगन्म वज्रिन्नाशसः १३

त्वे सु पुत्र शवसो ऽवृत्रन् कामकातयः । न त्वामिन्द्राति रिच्यते १४ १४१०

स नो वृषन्त्सनिष्ठया सं घोरया द्रवित्न्वा । धियाविड्ढि पुरंध्या १५

यस्ते नूनं शतक्रतविन्द्र द्युम्नितमो मदः । तेन नूनं मदे मदेः १६

यस्ते चित्रश्रवस्तमो य इन्द्र वृत्रहन्तमः । य ओजोदातमो मदः १७

विद्मा हि यस्ते अद्रिवस्त्वादत्तः सत्य सोमपाः । विश्वासु दस्म कृष्टिषु १८

इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः । अर्कमर्चन्तु कारवः १९ १४१५

यस्मिन् विश्वा अधि श्रियो रणन्ति सप्त संसदः । इन्द्रं सुते हवामहे २०

त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत । तमिद्वर्धन्तु नो गिरः २१

आ त्वा विशन्त्विन्दवः समुद्रमिव सिंधवः । न त्वामिन्द्राति रिच्यते २२

विव्यक्थ महिना वृषन् भक्षं सोमस्य जागृवे । य इन्द्र जठरेषु ते २३

अरं त इंद्र कुक्षये सोमो भवतु वृत्रहन् । अरं धामभ्य इंदवः २४ १४२०

अरमश्वाय गायति श्रुतकक्षो अरं गवे । अरमिन्द्रस्य धाम्ने २५

अरं हि ष्मा सुतेषु णः सोमेष्विंद्र भूषसि । अरं ते शक्र दावने २६

पराकात्ताच्चिदद्रिवस्त्वां नक्षन्त नो गिरः । अरं गमाम ते वयम् २७

एवा ह्यसि वीरयुरेवा शूर उत स्थिरः । एवा ते राध्यं मनः २८

एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः । अधा चिदिंद्र मे सचा २९ १४२५

मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते । मत्स्वा सुतस्य गोमतः ३०

मा न इंद्राभ्या३दिशः सूरो अक्तुष्वा यमन् । त्वा युजा वनेम तत् ३१

त्वयेदिन्द्र युजा वयं प्रति ब्रुवीमहि स्पृधः । त्वमस्माकं तव स्मसि ३२

त्वामिद्धि त्वायवो ऽनुनोनुवतश्चरान् । सखाय इन्द्र कारवः ३३ १४२९

॥२२१॥ (ऋ०८।९३।१-३३)

(२४३०-२४६२) सुकक्ष आङ्गिरसः । गायत्री ।

उद्घेदभि श्रुतामघं वृषभं नर्यापसम् । अस्तारमेषि सूर्य १ २४३०
नव यो नवतिं पुरो बिभेद बाह्वोजसा । अहिं च वृत्रहावधीत् २
स न इन्द्रः शिवः सखा ऽश्वावद्गोमद्यवमत् । उरुधारेव दोहते ३
यदद्य कच्च वृत्रह—न्नुदगा अभि सूर्य । सर्वं तदिन्द्र ते वशे ४
यद्वा प्रवृद्ध सत्पते न मरा इति मन्यसे । उतो तत् सत्यमित् तव ५
ये सोमासः परावति ये अर्वावति सुन्विरे । सर्वांस्ताँ इन्द्र गच्छसि ६ २४३५
तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे । स वृषा वृषभो भुवत् ७
इन्द्रः स दामने कृत ओजिष्ठः स मदे हितः । द्युम्नी श्लोकी स सोम्यः ८
गिरा वज्रो न संभृतः सबलो अनपच्युतः । ववक्ष ऋष्वो अस्तृतः ९
दुर्गे चिन्नः सुगं कृधि गृणान इन्द्र गिर्वणः । त्वं च मघवन् वशः १०
यस्य ते नू चिदादिशं न मिनन्ति स्वराज्यम् । न देवो नाध्रिगुर्जनः ११ २४४०
अधा ते अप्रतिष्कुतं देवी शुष्मं सपर्यतः । उभे सुशिप्र रोदसी १२
त्वमेतदधारयः कृष्णासु रोहिणीषु च । परुष्णीषु रुशत् पयः १३
वि यदहेरध त्विषो विश्वे देवासो अक्रमुः । विदन्मृगस्य ताँ अमः १४
आदु मे निवरो भुवद् वृत्रहादिष्ट पौंस्यम् । अजातशत्रुरस्तृतः १५
श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम् । आ शुषे राधसे महे १६ २४४५
अया धिया च गव्यया पुरुणामन् पुरुष्टुत । यत् सोमेसोम आभवः १७
बोधिन्मना इदस्तु नो वृत्रहा भूर्यासुतिः । शृणोतु शक्र आशिषम् १८
कया त्वं न ऊत्या ऽभि प्र मन्दसे वृषन् । कया स्तोतृभ्य आ भर १९
कस्य वृषा सुते सचा नियुत्वान् वृषभो रणत् । वृत्रहा सोमपीतये २०
अभी षु णस्त्वं रयिं मन्दसानः सहस्रिणम् । प्रयन्ता बोधि दाशुषे २१ २४५०
पत्नीवन्तः सुता इम उशन्तो यन्ति वीतये । अपां जग्मिर्निचुम्पुणः २२
इष्टा होत्रा असृक्षते—न्द्रं वृधासो अध्वरे । अच्छावभृथमोजसा २३
इह त्या सधमाद्या हरी हिरण्यकेश्या । वोळ्हामभि प्रयो हितम् २४
तुभ्यं सोमाः सुता इमे स्तीर्णं बर्हिर्विभावसो । स्तोतृभ्य इन्द्रमा वह २५
आ ते दक्षं वि रोचना दधद्रत्ना वि दाशुषे । स्तोतृभ्य इन्द्रमर्चत २६ २४५५
आ ते दधामीन्द्रिय—मुक्था विश्वा शतक्रतो । स्तोतृभ्य इन्द्र मृळय २७

भद्रंभद्रं न आ भरे—षमूर्जं शतक्रतो । यदिन्द्र मृळयासि नः २८
स नो विश्वान्या भर सुवितानि शतक्रतो । यदिन्द्र मृळयासि नः २९
त्वामिद् वृत्रहन्तम सुतावन्तो हवामहे । यदिन्द्र मृळयासि नः ३०
उप नो हरिभिः सुतं याहि मदानां पते । उप नो हरिभिः सुतम् ३१ १४६०
द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः । उप नो हरिभिः सुतम् ३२
त्वं हि वृत्रहन्नेषां पाता सोमानामसि । उप नो हरिभिः सुतम् ३३ १४६१

॥ २२२ ॥ (ऋ० १०।८।७-९)

(१४६३-१४६५) त्रिशिरास्त्वाष्ट्रः । त्रिष्टुप् ।

अस्य त्रितः क्रतुना वव्रे अन्त—रिच्छन् धीतिं पितुरेवैः परस्य ।
सचस्यमानः पित्रोरुपस्थे जामि ब्रुवाण आयुधानि वेति ७
स पित्र्याण्यायुधानि विद्वा—निन्द्रेषित आप्त्यो अभ्ययुध्यत् ।
त्रिशीर्षाणं सप्तरश्मिं जघन्वान् त्वाष्ट्रस्य चिन्निः ससृजे त्रितो गाः ८
भूरीदिन्द्र उदिनक्षन्तमोजो ऽवाभिनत् सत्पतिर्मन्यमानम् ।
त्वाष्ट्रस्य चिद् विश्वरूपस्य गोना—माचक्राणस्त्रीणि शीर्षा परा वर्क् ९ १४६५

॥ २२३ ॥ (ऋ० १०।२२।१-१५)

(१४६६-१४९०) ऐन्द्रो विमदः प्राजापत्यो वा, वासुक्रो वसुकृद्वा । पुरस्ताद्बृहती;
५, ७, ९ अनुष्टुभः १५ त्रिष्टुप् ।

कुह श्रुत इन्द्रः कस्मिन्नद्य जने मित्रो न श्रूयते ।
ऋषीणां वा यः क्षये गुहा वा चर्कृषे गिरा १
इह श्रुत इन्द्रो अस्मे अद्य स्तवे वज्र्यृचीषमः ।
मित्रो न यो जनेष्वा यशश्चक्रे असाम्या २
महो यस्पतिः शवसो असाम्या महो नृम्णस्य तूतुजिः ।
भर्ता वज्रस्य धृष्णोः पिता पुत्रमिव प्रियम् ३
युजानो अश्वा वातस्य धुनी देवो देवस्य वज्रिवः ।
स्यन्ता पथा विरुक्मता सृजानः स्तोष्यध्वनः ४
त्वं त्या चिद् वातस्याश्वागा ऋज्रा त्मना वहध्यै ।
ययोर्देवो न मर्त्यो यन्ता नकिर्विदाय्यः ५ १४७०
अध ग्मन्तोशना पृच्छते वां कदर्था न आ गृहम् ।
आ जग्मथुः पराकाद् दिवश्च ग्मश्च मर्त्यम् ६

आ नं इन्द्र पृक्षसे ऽस्माकं ब्रह्मोद्यंतम्।
तत् त्वां याचामहेऽवः शुष्णं यद्धन्नमानुषम् ७
अकर्मा दस्युरभि नो अमन्तु--रन्यव्रंतो अमानुषः।
त्वं तस्यामित्रहन् वधर्दासस्य दम्भय ८
त्वं नं इन्द्र शूर शूरैं--रुत त्वोतांसो बर्हणां।
पुरुत्रा ते वि पूर्तयो नवन्त क्षोणयों यथा ९
त्वं तान् वृत्रहत्यें चोदयो नॄन् कार्पाणे शूर वज्रिवः।
गुहा यदीं कवीनां विशां नक्षत्रशवसाम् १० २४७५
मक्षू ता तं इन्द्र दानाप्नस आक्षाणे शूर वज्रिवः।
यद्ध शुष्णस्य दम्भयों जातं विश्वं सयावंभिः ११
माकुध्र्यंगिन्द्र शूर वस्वीं--रस्मे भूवन्नभिष्टंयः।
वयंवयं त आसां सुम्ने स्याम वज्रिवः १२
अस्मे ता तं इन्द्र सन्तु सत्या ऽहिंसन्तीरुपस्पृशः।
विद्याम यासां भुजो धेनूनां न वंज्रिवः १३
अहस्ता यदपदी वर्धत क्षाः शचींभिर्वेद्यानाम्।
शुष्णं परिं प्रदक्षिणिद् विश्वायवे नि शिश्नथः १४
पिबापिबेदिन्द्र शूर सोमं मा रिषण्यो वसवान वसुः सन्।
उत त्रायस्व गृणतो मघोनों महश्च रायो रेवतस्कृधी नः १५ २४८०

॥ २१४ ॥ (ऋ० १०।२३।१-७) जगती; १, ७ त्रिष्टुप्, ५ अभिसारिणी।

यजामह इन्द्रं वज्रदक्षिणं हरींणां रथ्यं विव्रंतानाम्।
प्र श्मश्रु दोधुंवदूर्ध्वथा भूद् वि सेनांभिर्दयमानो वि राधंसा १
हरी न्वस्य या वने विदे वस्वि--न्द्रो मघैर्मघवां वृत्रहा भुवत्।
ऋभुर्वाजं ऋभुक्षाः पत्यते शवो ऽवं क्ष्णौमि दासस्य नामं चित् २
यदा वज्रं हिरण्यमिदथा रथं हरी यमंस्य वहतो वि सूरिभिः।
आ तिष्ठति मघवा सनंश्रुत इन्द्रो वाजस्य दीर्घश्रवसस्पतिः ३
सो चिन्नु वृष्टिर्यूथ्याऽ स्वा सचाँ इन्द्रः श्मश्रूणि हरिताभि प्रुष्णुते।
अव वेति सुक्षयं सुते मधू--दिद्धूनोति वातो यथा वनम् ४
यो वाचा विवाचो मृध्रवाचः पुरू सहस्राशिवा जघानं।
तत्तदिदस्य पौंस्यं गृणीमसि पितेव यस्तविषीं वावृधे शवः ५ २४८५

स्तोमं त इन्द्र विमदा अजीजन—न्नपूर्व्यं पुरुतमं सुदानवे ।
विद्मा ह्यस्य भोजनमिनस्य य—दा पशुं न गोपाः करामहे ६
माकिर्न एना सख्या वि यौषु—स्तव चेन्द्र विमदस्य च ऋषेः ।
विद्मा हि ते प्रमतिं देव जामिव—दस्मे ते सन्तु सख्या शिवानि ७

॥ २२५ ॥ (ऋ० १०।२४।१-३) आस्तारपङ्क्तिः ।

इन्द्र सोममिमं पिब मधुमन्तं चमू सुतम् ।
अस्मे रयिं नि धारय वि वो मदे सहस्रिणं पुरूवसो विवक्षसे १
त्वां यज्ञेभिरुक्थै—रुप हव्येभिरीमहे ।
शचीपते शचीनां वि वो मदे श्रेष्ठं नो धेहि वार्यं विवक्षसे २
यस्पतिर्वार्याणा—मसि रध्रस्य चोदिता ।
इन्द्र स्तोतॄणामविता वि वो मदे द्विषो नः पाह्यंहसो विवक्षसे ३ १४९०

॥ २२६ ॥ (ऋ० १०।२७।१-२४) (१४९१-१५१९) ऐन्द्रो वसुक्रः । त्रिष्टुप् ।

असत् सु मे जरितः साभिवेगो यत् सुन्वते यजमानाय शिक्षम् ।
अनाशीर्दामहमस्मि प्रहन्ता सत्यध्वृतं वृजिनायन्तमाभुम् १
यदीदहं युधये संनया—न्यदेवयून् तन्वा३ शूशुजानान् ।
अमा ते तुम्रं वृषभं पचानि तीव्रं सुतं पञ्चदशं नि षिञ्चम् २
नाहं तं वेद य इति ब्रवी—त्यदेवयून्त्समरणे जघन्वान् ।
यदावाख्यत् समरणमृघाव—दादिद्ध मे वृषभा प्र ब्रुवन्ति ३
यदज्ञातेषु वृजनेष्वासं विश्वे सतो मघवानो म आसन् ।
जिनामि वेत् क्षेम आ सन्तमाभुं प्र तं क्षिणां पर्वते पादगृह्य ४
न वा उ मां वृजने वारयन्ते न पर्वतासो यदहं मनस्ये ।
मम स्वनात् कृधुकर्णो भयात एवेदनु द्यून् किरणः समेजात् ५ १४९५
दर्शन्न्वत्र शृतपाँ अनिन्द्रान् बाहुक्षदः शरवे पत्यमानान् ।
घृषुं वा ये निनिदुः सखाय—मध्यू न्वेषु पवयो ववृत्युः ६
अभूर्वौक्षीर्व्यु१ आयुरानड् दर्षन्नु पूर्वो अपरो नु दर्षत् ।
द्वे पवस्ते परि तं न भूतो यो अस्य पारे रजसो विवेष ७
गावो यवं प्रयुता अर्यो अक्षन् ता अपश्यं सहगोपाश्चरन्तीः ।
हवा इदर्यो अभितः समायन् कियदासु स्वपतिश्छन्दयाते ८

सं यद्वयं यवसादो जनाना—महं यवाद उर्वज्रे अन्तः ।
अत्रा युक्तोऽवसातारमिच्छा—दथो अयुक्तं युनजद्ववन्वान् ९
अत्रेदु मे मंससे सत्यमुक्तं द्विपाच्च यच्चतुष्पात् संसृजानि ।
स्त्रीभिर्यो अत्र वृषणं पृतन्या—दयुद्धो अस्य वि भजानि वेदः १० १५००
यस्यानक्षा दुहिता जात्वास कस्तां विद्वाँ अभि मन्याते अन्धाम् ।
कतरो मेनिं प्रति तं मुचाते य ईं वहाते य ईं वा वरेयात् ११
कियती योषा मर्यतो वधूयोः परिप्रीता पन्यसा वार्येण ।
भद्रा वधूर्भवति यत् सुपेशाः स्वयं सा मित्रं वनुते जने चित् १२
पत्तो जगार प्रत्यञ्चमत्ति शीर्ष्णा शिरः प्रति दधौ वरूथम् ।
आसीन ऊर्ध्वामुपसि क्षिणाति न्यङ्ङुत्तानामन्वेति भूमिम् १३
बृहन्नच्छायो अपलाशो अर्वा तस्थौ माता विषितो अत्ति गर्भः ।
अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः १४
सप्त वीरासो अधरादुदाय—न्नष्टोत्तरात्तात् समजग्मिरन्ते ।
नव पश्चातात् स्थिविमन्त आयन् दश प्राक् सानु वि तिरन्त्यश्नः १५ १५०५
दशानामेकं कपिलं समानं तं हिन्वन्ति क्रतवे पार्याय ।
गर्भं माता सुधितं वक्षणा—स्ववेनन्तं तुषयन्ती बिभर्ति १६
पीवानं मेषमपचन्त वीरा न्युप्ता अक्षा अनु दीव आसन् ।
द्वा धनुं बृहतीमप्स्वन्तः पवित्रवन्ता चरतः पुनन्ता १७
वि क्रोशनासो विष्वञ्च आयन् पचाति नेमो नहि पक्षदर्धः ।
अयं मे देवः सविता तदाह द्र्वन्न इद्वनवत् सर्पिरन्नः १८
अपश्यं ग्रामं वहमानमारा—दचक्रया स्वधया वर्तमानम् ।
सिषक्त्यर्यः प्र युगा जनानां सद्यः शिश्ना प्रमिनानो नवीयान् १९
एतौ मे गावौ प्रमरस्य युक्तौ मो षु प्र सेधीर्मुहुरिन्ममन्धि ।
आपश्चिदस्य वि नशन्त्यर्थं सूरश्च मर्क उपरो बभूवान् २० १५१०
अयं यो वज्रः पुरुधा विवृत्तो ऽवः सूर्यस्य बृहतः पुरीषात् ।
श्रव इदेना परो अन्यदस्ति तदव्यथी जरिमाणस्तरन्ति २१
वृक्षेवृक्षे नियता मीमयद्गौ—स्ततो वयः प्र पतान् पूरुषादः ।
अथेदं विश्वं भुवनं भयात इन्द्राय सुन्वदृषये च शिक्षत् २२
देवानां माने प्रथमा अतिष्ठन् कृन्तत्रादेषामुपरा उदायन् ।
त्रयस्तपन्ति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषम् २३

सा ते जीवातुरुत तस्य विद्धि मा स्मैतादृगप गूहः समर्ये ।
आविः स्वः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुच्यते २४

॥ २२७ ॥ (ऋ० १०।२९।१-८)।

वने न वा यो न्यधायि चाकञ्छुचिर्वां स्तोमो भुरणावजीगः ।
यस्येदिन्द्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान् १ १५१५
प्र ते अस्या उषसः प्रापरस्या नृतौ स्याम नृतमस्य नृणाम् ।
अनु त्रिशोकः शतमावहन्नॄन् कुत्सेन रथो यो असत् ससवान् २
कस्ते मद इन्द्र रन्त्यो भूद् दुरो गिरो अभ्युग्रो वि धाव ।
कद्वाहो अर्वागुप मा मनीषा आ त्वा शक्यामुपमं राधो अन्नैः ३
कदु द्युम्नमिन्द्र त्वावतो नॄन् कया धिया करसे कन्न आगन् ।
मित्रो न सत्य उरुगाय भृत्या अन्ने समस्य यदसन् मनीषाः ४
प्रेरय सूरो अर्थं न पारं ये अस्य कामं जनिधा इव ग्मन् ।
गिरश्च ये ते तुविजात पूर्वीर्नर इन्द्र प्रतिशिक्षन्त्यन्नैः ५
मात्रे नु ते सुमिते इन्द्र पूर्वी द्यौर्मज्मना पृथिवी काव्येन ।
वराय ते घृतवन्तः सुतासः स्वाद्मन् भवन्तु पीतये मधूनि ६ १५२०
आ मध्वो अस्मा असिचन्नमत्रमिन्द्राय पूर्णं स हि सत्यराधाः ।
स वावृधे वरिमन्ना पृथिव्या अभि क्रत्वा नर्यः पौंस्यैश्च ७
व्यानळिन्द्रः पृतनाः स्वोजा आस्मै यतन्ते सख्याय पूर्वीः ।
आ स्मा रथं न पृतनासु तिष्ठ यं भद्रया सुमत्या चोदयासे ८

॥ २२८ ॥ (१०।२८।१, ३-५, ७, ९, ११)
[१ इन्द्रस्नुषा वसुक्रपत्नी ऋषिका; ३-५, ७, ९, ११ ऐन्द्रो वसुक्र ऋषिः ।]

विश्वो ह्यन्यो अरिराजगाम ममेदह श्वशुरो ना जगाम ।
जक्षीयाद्धाना उत सोमं पपीयात् स्वाशितः पुनरस्तं जगायात् १
अद्रिणा ते मन्दिन इन्द्र तूयान् त्सुन्वन्ति सोमान् पिबसि त्वमेषाम् ।
पचन्ति ते वृषभाँ अत्सि तेषां पृक्षेण यन्मघवन् हूयमानः ३
इदं सु मे जरितरा चिकिद्धि प्रतीपं शापं नद्यो वहन्ति ।
लोपाशः सिंहं प्रत्यञ्चमत्साः क्रोष्टा वराहं निरतक्त कक्षात् ४ १५२५
कथा त एतदहमा चिकेतं गृत्सस्य पाकस्तवसो मनीषाम् ।
त्वं नो विद्वाँ ऋतुथा वि वोचो यमर्धं ते मघवन् क्षेम्या धूः ५

एवा हि मां तवसं जज्ञुरुग्रं कर्मन्कर्मन् वृषणमिन्द्र देवाः ।
वधीं वृत्रं वज्रेण मन्दसानो ऽप व्रजं महिना दाशुषे वम् ७
शशः क्षुरं प्रत्यञ्चं जगारा ऽद्रिं लोगेन व्यभेदमारात् ।
बृहन्तं चिद्दहते रंधयानि वयद्वत्सो वृषभं शूशुवानः ९
तेभ्यो गोधा अयथं कर्षदेत द्ये ब्रह्मणः प्रतिपीयन्त्यन्नैः ।
सिम उक्ष्णोऽवसृष्टाँ अदन्ति स्वयं बलानि तन्वः शृणानाः ११ १५२९

॥ २२९ ॥ (ऋ० १०।३२।१-९)

(२५३०-२५४०) कवष ऐलूषः । जगती, ६-९ त्रिष्टुप् ।

प्र सु ग्मन्ता धियसानस्य सक्षणि वरेभिर्वराँ अभि षु प्रसीदतः ।
अस्माकमिन्द्र उभयं जुजोषति यत् सोम्यस्यान्धसो बुबोधति १ १५३०
वीन्द्र यासि दिव्यानि रोचना वि पार्थिवानि रजसा पुरुष्टुत ।
ये त्वा वहन्ति मुहुरध्वराँ उप ते सु वन्वन्तु वग्वनाँ अराधसः २
तदिन्मे छन्त्सद्वपुषो वपुष्टरं पुत्रो यज्जानं पित्रोरधीयति ।
जाया पतिं वहति वग्नुना सुमत् पुंस इद्भद्रो वहतुः परिष्कृतः ३
तदित् सधस्थमभि चारु दीधय गावो यच्छासन् वहतुं न धेनवः ।
माता यन्मन्तुर्यूथस्य पूर्व्या ऽभि वाणस्य सप्तधातुरिज्जनः ४
प्र वोऽच्छा रिरिचे देवयुष्पद मेको रुद्रेभिर्याति तुर्वणिः ।
जरा वा येष्वमृतेषु दावने परि व ऊमेभ्यः सिञ्चता मधु ५
निधीयमानमपगूळ्हमप्सु प्र मे देवानां व्रतपा उवाच ।
इंद्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगाम् ६ १५३५
अक्षेत्रवित् क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः ।
एतद्वै भद्रमनुशासनस्यो त स्रुतिं विन्दत्यञ्जसीनाम् ७
अद्येदु प्राणीदममन्निमाहा ऽपीवृतो अधयन्मातुरूधः ।
एमेनमाप जरिमा युवान महेळन् वसुः सुमना बभूव ८
एतानि भद्रा कलश क्रियाम कुरुश्रवण ददतो मघानि ।
दान इद्वो मघवानः सो अ स्त्वयं च सोमो हृदि यं बिभर्मि ९

॥ २३० ॥ (ऋ० १०।३३।२-३) प्रगाथः= (२ बृहती, ३ सतोबृहती)

सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ।
नि बाधते अमतिर्नग्नता जसु र्वेर्न वेवीयते मतिः २

मृगो न शिप्रा व्यदन्ति माध्यः स्तोतारं ते शतक्रतो ।
सकृत् सु नो मघवन्निन्द्र मृळया–ऽधा पितेव नो भव ३ १५४०

॥ २३१ ॥ (ऋ० १०।३८।१-५) (१५४१-१५४५) मुष्कवानिन्द्रः । जगती ।

अस्मिन् न इन्द्र पृत्सुतौ यशस्वति शिमीवति क्रन्दसि प्राव सातये ।
यत्र गोषाता धृषितेषु खादिषु विष्वक् पतन्ति दिद्यवो नृषाह्ये १
स नः क्षुमन्तं सदने व्यूर्णुहि गोअर्णसं रयिमिन्द्र श्रवाय्यम् ।
स्याम ते जयतः शक्र मेदिनो यथा वयमुश्मसि तद्वसो कृधि २
यो नो दास आर्यो वा पुरुष्टुता–ऽदेव इन्द्र युधये चिकेतति ।
अस्माभिष्टे सुषहाः सन्तु शत्रव–स्त्वया वयं तान् वनुयाम संगमे ३
यो दभ्रेभिर्हव्यो यश्च भूरिभि–र्यो अभीके वरिवोविन्नृषाह्ये ।
तं विखादे सस्निमद्य श्रुतं नर–मर्वाञ्चमिन्द्रमवसे करामहे ४
स्ववृजं हि त्वामहमिन्द्र शुश्रवा–नानुदं वृषभ रध्रचोदनम् ।
प्र मुञ्चस्व परि कुत्सादिहा गहि किमु त्वावान् मुष्कयोर्बद्ध आसते ५ १५४५

॥ २३२ ॥ (ऋ० १०।४२।१-११)
(१५४६-१५७८) कृष्ण आङ्गिरसः । त्रिष्टुप् ।

अस्तेव सु प्रतरं लायमस्यन् भूषन्निव प्र भरा स्तोममस्मै ।
वाचा विप्रास्तरत वाचमर्यो नि रामय जरितः सोम इन्द्रम् १
दोहेन गामुप शिक्षा सखायं प्र बोधय जरितर्जारमिन्द्रम् ।
कोशं न पूर्णं वसुना न्यृष्ट–मा च्यावय मघदेयाय शूरम् २
किमङ्ग त्वा मघवन् भोजमाहुः शिशीहि मा शिशयं त्वा शृणोमि ।
अप्नस्वती मम धीरस्तु शक्र वसुविदं भगमिन्द्रा भरा नः ३
त्वां जना ममसत्येष्विन्द्र संतस्थाना वि ह्वयन्ते समीके ।
अत्रा युजं कृणुते यो हविष्मान् नासुन्वता सख्यं वष्टि शूरः ४
धनं न स्पन्द्रं बहुलं यो अस्मै तीव्रान्त्सोमाँ आसुनोति प्रयस्वान् ।
तस्मै शत्रून्त्सुतुकान् प्रातरह्नो नि स्वष्ट्रान् युवति हन्ति वृत्रम् ५ १५५०
यस्मिन् वयं दधिमा शंसमिन्द्रे यः शिश्राय मघवा काममस्मे ।
आराच्चित् सन् भयतामस्य शत्रु–र्न्यस्मै द्युम्ना जन्या नमन्ताम् ६
आराच्छत्रुमप बाधस्व दूर–मुग्रो यः शम्बः पुरुहूत तेन ।
अस्मे धेहि यवमद्गोमदिन्द्र कृधी धियं जरित्रे वाजरत्नाम् ७

प्र यमन्तर्वृषसवासो अग्मन् तीव्राः सोमा बहुलान्तास इन्द्रम् ।
नाह दामानं मघवा नि यंसन्नि सुन्वते वहति भूरि वामम् ८
उत प्रहामतिदीव्या जयाति कृतं यच्छ्वघ्नी विचिनोति काले ।
यो देवकामो न धना रुणद्धि समित् तं राया सृजति स्वधावान् ९
गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम १० १५५५
बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ११

॥ १३३ ॥ (ऋ० १०।४३।१-११) जगती, १०-११ त्रिष्टुप् ।

अच्छा म इन्द्रं मतयः स्वर्विदः सध्रीचीर्विश्वा उशतीरनूषत ।
परि ष्वजन्ते जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये १
न घा त्वद्रिगप वेति मे मनस्त्वे इत् कामं पुरुहूत शिश्रय ।
राजेव दस्म नि षदोऽधि बर्हिष्यस्मिन्त्सु सोमेऽवपानमस्तु ते २
विषूवृदिन्द्रो अमतेरुत क्षुधः स इद्रायो मघवा वस्व ईशते ।
तस्येदिमे प्रवणे सप्त सिन्धवो वयो वर्धन्ति वृषभस्य शुष्मिणः ३
वयो न वृक्षं सुपलाशमासदन्त्सोमास इन्द्रं मन्दिनश्चमूषदः ।
प्रैषामनीकं शवसा दविद्युतद्विदत् स्व१र्मनवे ज्योतिरार्यम् ४ १५६०
कृतं न श्वघ्नी वि चिनोति देवने संवर्गं यन्मघवा सूर्यं जयत् ।
न तत् ते अन्यो अनु वीर्यं शकन्न पुराणो मघवन् नोत नूतनः ५
विशंविशं मघवा पर्यशायत जनानां धेना अवचाकशद् वृषा ।
यस्याह शक्रः सवनेषु रण्यति स तीव्रैः सोमैः सहते पृतन्यतः ६
आपो न सिन्धुमभि यत् समक्षरन्त्सोमास इन्द्रं कुल्या इव ह्रदम् ।
वर्धन्ति विप्रा महो अस्य सादने यवं न वृष्टिर्दिव्येन दानुना ७
वृषा न क्रुद्धः पतयद्रजःस्वा यो अर्यपत्नीरकृणोदिमा अपः ।
स सुन्वते मघवा जीरदानवेऽविन्दज्ज्योतिर्मनवे हविष्मते ८
उज्जायतां परशुर्ज्योतिषा सह भूया ऋतस्य सुदुघा पुराणवत् ।
वि रोचतामरुषो भानुना शुचिः स्व१र्ण शुक्रं शुशुचीत सत्पतिः ९ १५६५
गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम १०

बृहस्पतिर्नः परि पातु पश्चा—दुतोत्तरस्मादधरादघायोः ।
इंद्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ११

॥ २३४ ॥ (ऋ० १०।४४।१-११) जगती; १-३, १०-११ त्रिष्टुप् ।

आ यात्विंद्रः स्वपतिर्मदाय यो धर्मणा तूतुजानस्तुविष्मान् ।
प्रत्वक्षाणो अति विश्वा सहांस्य—पारेण महता वृष्ण्येन १
सुष्ठामा रथः सुयमा हरी ते मिम्यक्ष वज्रो नृपते गभस्तौ ।
शीभं राजन्त्सुपथा याह्यर्वाङ् वर्धाम ते पपुषो वृष्ण्यानि २
एन्द्रवाहो नृपतिं वज्रबाहु—मुग्रमुग्रासस्तविषास एनम् ।
प्रत्वक्षसं वृषभं सत्यशुष्म—मेमस्मत्रा सधमादो वहन्तु ३ २५७०
एवा पतिं द्रोणसाचं सचेतस—मूर्जः स्कम्भं धरुण आ वृषायसे ।
ओजः कृष्व सं गृभाय त्वे अप्य—सो यथा केनिपानामिनो वृधे ४
गमन्नस्मे वसून्या हि शंसिषं स्वाशिषं भरमा याहि सोमिनः ।
त्वमीशिषे सास्मिन्ना सत्सि बर्हिष्य—नाधृष्या तव पात्राणि धर्मणा ५
पृथक् प्रायन् प्रथमा देवहूतयो ऽकृण्वत श्रवस्यानि दुष्टरा ।
न ये शेकुर्यज्ञियां नावमारुह—मीर्मैव ते न्यविशन्त केपयः ६
एवैवापागपरे सन्तु दूढ्यो ऽश्वा येषां दुर्युज आयुयुज्रे ।
इत्था ये प्रागुपरे सन्ति दावने पुरूणि यत्र वयुनानि भोजना ७
गिरींरज्रान् रेजमानाँ अधारयद् द्यौः क्रन्ददन्तरिक्षाणि कोपयत् ।
समीचीने धिषणे वि ष्कभायति वृष्णः पीत्वा मद उक्थानि शंसति ८ २५७५
इमं बिभर्मि सुकृतं ते अङ्कुशं येनारुजासि मघवञ्छफारुजः ।
अस्मिन्त्सु ते सवने अस्त्वोक्यं सुत इष्टौ मघवन् बोध्याभगः ९
गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्य—स्माकेन वृजनेना जयेम १०
बृहस्पतिर्नः परि पातु पश्चा—दुतोत्तरस्मादधरादघायोः ।
इंद्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ११ २५७८

॥ २३५ ॥ (ऋ० १०।४८।१-११)
(२५७९-२६०७) वैकुण्ठ इंद्रः । जगती; ७, १०-११ त्रिष्टुप् ।

अहं भुवं वसुनः पूर्व्यस्पति—रहं धनानि सं जयामि शश्वतः ।
मां हवन्ते पितरं न जंतवो ऽहं दाशुषे वि भजामि भोजनम् १

अहमिन्द्रो रोधो वक्षो अथर्वण—स्त्रिताय गा अजनयमहेरधि ।
अहं दस्युभ्यः परि नृम्णमा ददे गोत्रा शिक्षन् दधीचे मातरिश्वने २ २५८०
मह्यं त्वष्टा वज्रमतक्षदायसं मयि देवासोऽवृजन्नपि क्रतुम् ।
ममानीकं सूर्यस्येव दुष्टरं मामार्यन्ति कृतेन कर्त्वेन च ३
अहमेतं गव्ययमश्व्यं पशुं पुरीषिणं सायकेना हिरण्ययम् ।
पुरू सहस्रा नि शिशामि दाशुषे यन्मा सोमास उक्थिनो अमन्दिषुः ४
अहमिन्द्रो न परा जिग्य इद्धनं न मृत्यवेऽव तस्थे कदा चन ।
सोममिन्मा सुन्वन्तो याचता वसु न मे पूरवः सख्ये रिषाथन ५
अहमेताञ्छाश्वसतो द्वाद्वे—न्द्रं ये वज्रं युधयेऽकृण्वत ।
आह्वयमानाँ अव हन्मनाहनं दृळ्हा वदन्ननमस्युर्नमस्विनः ६
अभी३दमेकमेको अस्मि निष्षा—ळभी द्वा किमु त्रयः करन्ति ।
खले न पर्षान् प्रति हन्मि भूरि किं मा निन्दन्ति शत्रवोऽनिन्द्राः ७ २५८५
अहं गुङ्गुभ्यो अतिथिग्वमिष्कर—मिषं न वृत्रतुरं विक्षु धारयम् ।
यत् पर्णयघ्न उत वा करञ्जहे प्राहं महे वृत्रहत्ये अशुश्रवि ८
प्र मे नमी साप्य इषे भुजे भूद् गवामेषे सख्या कृणुत द्विता ।
दिद्युं यदस्य समिथेषु मंहय—मादिदेनं शंस्यमुक्थ्यं करम् ९
प्र नेमस्मिन् ददृशे सोमो अन्त—र्गोपा नेममाविरस्था कृणोति ।
स तिग्मशृङ्गं वृषभं युयुत्सन् द्रुहस्तस्थौ बहुले बद्धो अन्तः १०
आदित्यानां वसूनां रुद्रियाणां देवो देवानां न मिनामि धाम ।
ते मा भद्राय शवसे ततक्षु—रपराजितमस्तृतमषाळ्हम् ११

॥ २३६ ॥ (ऋ० १०।४९।१-११) जगती; २,११ त्रिष्टुप् ।

अहं दां गृणते पूर्व्यं वस्व—हं ब्रह्म कृणवं मह्यं वर्धनम् ।
अहं भुवं यजमानस्य चोदिता ऽयज्वनः साक्षि विश्वस्मिन् भरे १ २५९०
मां धुरिन्द्रं नाम देवता दिवश्च ग्मश्चापां च जन्तवः ।
अहं हरी वृषणा विव्रता रघू अहं वज्रं शवसे धृष्ण्वा ददे २
अहमत्कं कवये शिश्नथं हथै—रहं कुत्समावमाभिरूतिभिः ।
अहं शुष्णस्य श्नथिता वधर्यमं न यो रर आर्यं नाम दस्यवे ३
अहं पितेव वेतसूँरभिष्टये तुग्रं कुत्साय स्मदिभं च रन्धयम् ।
अहं भुवं यजमानस्य राजनि प्र यद्भरे तुजये न प्रियाधृषे ४

अहं रंधयं मृगयं श्रुतर्वणे यन्माजिहीत वयुना चनानुषक् ।
अहं वेशं नम्रमायवेऽकर—महं सव्याय पड्गृभिमरन्धयम् ५
अहं स यो नववास्त्वं बृहद्रथं सं वृत्रेव दासं वृत्रहारुजम् ।
यद्वर्धयन्तं प्रथयन्तमानुषग् दूरे पारे रजसो रोचनाकरम् ६ १५९५
अहं सूर्यस्य परि याम्याशुभिः प्रैतशेभिर्वहमान ओजसा ।
यन्मा सावो मनुष आह निर्णिज ऋधक् कृषे दासं कृत्व्यं हथैः ७
अहं सप्तहा नहुषो नहुष्टरः प्राश्रावयं शवसा तुर्वशं यदुम् ।
अहं न्य१न्यं सहसा सहस्करं नव व्राधतो नवतिं च वक्षयम् ८
अहं सप्त स्रवतो धारयं वृषा द्रवित्न्वः पृथिव्यां सीरा अधि ।
अहमर्णांसि वि तिरामि सुक्रतु—र्युधा विदं मनवे गातुमिष्टये ९
अहं तदासु धारयं यदासु न देवश्चन त्वष्टाधारयद्रुशत् ।
स्पार्हं गवामूधःसु वक्षणास्वा मधोर्मधु श्वात्र्यं सोममाशिरम् १०
एवा देवाँ इन्द्रो विव्ये नॄन् प्र च्यौत्नेन मघवा सत्यराधाः ।
विश्वेत् ता ते हरिवः शचीवो ऽभि तुरासः स्वयशो गृणन्ति ११ १६००

॥ २३७ ॥ (ऋ० १०।५०।१-७) जगती; ३, ४ अभिसारिणी, ५ त्रिष्टुप् ।

प्र वो महे मन्दमानायान्धसो ऽर्चा विश्वानराय विश्वाभुवे ।
इंद्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः १
सो चिन्नु सख्या नर्य इनः स्तुत—श्चर्कृत्य इंद्रो मावते नरे ।
विश्वासु धूर्षु वाजकृत्येषु सत्पते वृत्रे वाप्स्व१भि शूर मंदसे २
के ते नर इंद्र ये त इषे ये ते सुम्नं सधन्य१मियक्षान् ।
के ते वाजायासुर्याय हिन्विरे के अप्सु स्वासूर्वरासु पौंस्ये ३
भुवस्त्वमिंद्र ब्रह्मणा महान् भुवो विश्वेषु सवनेषु यज्ञियः ।
भुवो नॄंश्च्यौत्नो विश्वस्मिन् भरे ज्येष्ठश्च मन्त्रो विश्वचर्षणे ४
अवा नु कं ज्यायान् यज्ञवनसो महीं त ओमात्रां कृष्टयो विदुः ।
असो नु कमजरो वर्धाश्च विश्वेदेता सवना तूतुमा कृषे ५ १६०५
एता विश्वा सवना तूतुमा कृषे स्वयं सूनो सहसो यानि दधिषे ।
वराय ते पात्रं धर्मणे तना यज्ञो मन्त्रो ब्रह्मोद्यतं वचः ६
ये ते विप्र ब्रह्मकृतः सुते सचा वसूनां च वसुनश्च दावने ।
प्र ते सुम्नस्य मनसा पथा भुवन् मदे सुतस्य सोम्यस्यान्धसः ७ १६०७

॥ २३८ ॥ (ऋ० १०।५४।१-६)

(२६०८-२६२१) बृहदुक्थो वामदेव्यः । त्रिष्टुप् ।

तां सु ते कीर्तिं मघवन् महित्वा यत् त्वा भीते रोदसी अह्वयेताम् ।
प्रावो देवाँ आतिरो दासमोजः प्रजायै त्वस्यै यदशिक्ष इन्द्र १
यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु ।
मायेत् सा ते यानि युद्धान्याहु र्नाद्य शत्रुं ननु पुरा विवित्से २
क उ नु ते महिमनः समस्या ऽस्मत् पूर्व ऋषयोऽन्तमापुः ।
यन्मातरं च पितरं च साक मजनयथास्तन्वः स्वायाः ३ २६१०
चत्वारि ते असुर्याणि नामा ऽदाभ्यानि महिषस्य सन्ति ।
त्वमङ्ग तानि विश्वानि वित्से येभिः कर्माणि मघवञ्चकर्थ ४
त्वं विश्वा दधिषे केवलानि यान्याविर्या च गुहा वसूनि ।
काममिन्मे मघवन् मा वि तारी स्त्वमाज्ञाता त्वमिन्द्रासि दाता ५
यो अदधाज्ज्योतिषि ज्योतिरन्त र्यो असृजन्मधुना सं मधूनि ।
अध प्रियं शूषमिन्द्राय मन्म ब्रह्मकृतो बृहदुक्थादवाचि ६

॥ २३९ ॥ (ऋ० १०।५५।१-८)

दूरे तन्नाम गुह्यं पराचै र्यत् त्वा भीते अह्वयेतां वयोधै ।
उदस्तभ्नाः पृथिवीं द्यामभीके भ्रातुः पुत्रान् मघवन् तित्विषाणः १
महत् तन्नाम गुह्यं पुरुस्पृग् येन भूतं जनयो येन भव्यम् ।
प्रत्नं जातं ज्योतिर्यदस्य प्रियं प्रियाः समविशन्त पञ्च २ २६१५
आ रोदसी अपृणादोत मध्यं पञ्च देवाँ ऋतुशः सप्तसप्त ।
चतुस्त्रिंशता पुरुधा वि चष्टे सरूपेण ज्योतिषा विव्रतेन ३
यदुष औच्छः प्रथमा विभाना मजनयो येन पुष्टस्य पुष्टम् ।
यत् ते जामित्वमवरं परस्या महन्महत्या असुरत्वमेकम् ४
विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वा ऽद्या ममार स ह्यः समान ५
शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीळः ।
यच्चिकेत सत्यमित् तन्न मोघं वसु स्पार्हमुत जेतोत दाता ६
ऐभिर्ददे वृष्ण्या पौंस्यानि येभिरौक्षद् वृत्रहत्याय वज्री ।
ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजायन्त देवाः ७ २६२०

युजा कर्माणि जनयन् विश्वौजा अशस्तिहा विश्वमनास्तुराषाट् ।
पीत्वी सोमस्य दिव आ वृधानः शूरो निर्युधाधमद् दस्यून् ८ २६११

॥ २४० ॥ (ऋ० १०।६०।५) (२६१२) बन्धुः श्रुतबन्धुर्विप्रबन्धुर्गौपायनाः गायत्री ।

इन्द्र क्षत्रासमातिषु रथप्रोष्ठेषु धारय । दिवीव सूर्यं दृशे ५ २६१२

॥ २४१ ॥ (ऋ० १०।७३।१-११)

(२६२३--२६३९) गौरिवीतिः शाक्त्यः । त्रिष्टुप् ।

जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः ।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा १
द्रुहो निषत्ता पृशनी चिदेवैः पुरू शंसेन वावृधुष्ट इन्द्रम् ।
अभीवृतेव ता महापदेन ध्वान्तात् प्रपित्वादुदरन्त गर्भाः २
ऋष्वा ते पादा प्र यज्जिगा-स्यवर्धन् वाजा उत ये चिदत्र ।
त्वमिन्द्र सालावृकान्त्सहस्र-मासन् दधिषे अश्विना ववृत्याः ३ २६१५
समना तूर्णिरुप यासि यज्ञ-मा नासत्या सख्याय वक्षि ।
वसाव्यामिन्द्र धारयः सहस्रा ऽश्विना शूर ददतुर्मघानि ४
मन्दमान ऋतादधि प्रजायै सखिभिरिन्द्र इषिरेभिरर्थम् ।
आभिर्हि माया उप दस्युमागा-न्मिहः प्र तम्रा अवपत् तमांसि ५
सनामाना चिद् ध्वसयो न्यस्मा अवाहन्निन्द्र उषसो यथानः ।
ऋष्वैरगच्छः सखिभिर्निकामैः साकं प्रतिष्ठा हृद्या जघन्थ ६
त्वं जघन्थ नमुचिं मखस्युं दासं कृण्वान ऋषये विमायम् ।
त्वं चकर्थ मनवे स्योनान् पथो देवत्राञ्जसेव यानान् ७
त्वमेतानि पप्रिषे वि नामे-शान इन्द्र दधिषे गभस्तौ ।
अनु त्वा देवाः शवसा मद-न्त्युपरिबुध्नान् वनिनश्चकर्थ ८ २६३०
चक्रं यदस्याप्स्वा निषत्त-मुतो तदस्मै मध्विच्चच्छद्यात् ।
पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ९
अश्वादियायेति यद्वद-न्त्योजसो जातमुत मन्य एनम् ।
मन्योरियाय हर्म्येषु तस्थौ यतः प्रजज्ञ इन्द्रो अस्य वेद १०
वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तमूर्णुहि पूर्धि चक्षु-र्मुमुग्ध्य१स्मान् निधयेव बद्धान् ११

॥ २४२ ॥ (ऋ० १०।७४।१-६)

वसूनां वा चर्कृष इयक्षन् धिया वा यज्ञैर्वा रोदस्योः ।
अर्वन्तो वा ये रयिमन्तः सातौ वनुं वा ये सुश्रुणं सुश्रुतो धुः १
हव एषामसुरो नक्षत द्यां श्रवस्यता मनसा निंसत क्षाम् ।
चक्षाणा यत्र सुवितार्य देवा द्यौर्न वारेभिः कृणवन्त स्वैः २ २६३५
इयमेषाममृतानां गीः सर्वताता ये कृपणन्त रत्नम् ।
धियं च यज्ञं च साधन्त—स्ते नो धान्तु वसव्य॑मसामि ३
आ तत् त इन्द्रायवः पनन्ता—ऽभि य ऊर्वं गोमन्तं तितृत्सान् ।
सकृत्स्वं॑ ये पुरुपुत्रां महीं सहस्रधारां बृहतीं दुदुक्षन् ४
शचीव इन्द्रमवसे कृणुध्व—मनानतं दमयन्तं पृतन्यून् ।
ऋभुक्षणं मघवानं सुवृक्तिं भर्ता यो वज्रं नर्यं पुरुक्षुः ५
यद्वावान पुरुतमं पुराषा—ळा वृत्रहेन्द्रो नामान्यप्राः ।
अचेति प्रासहस्पतिस्तुविष्मान् यदीमुश्मसि कर्तवे करत् तत् ६ २६३९

॥ २४३ ॥ (ऋ० १०।८६।१-२३)

(२६४०-२६६२) इन्द्रः; ७, १३, २३ ऐन्द्रो वृषाकपिः २-६, ९-१०, १५-१८ इन्द्राणी। पङ्क्तिः ।

वि हि सोतोरसृक्षत नेन्द्रं देवममंसत ।
यत्रामदद् वृषाकपि—रर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः १ २६४०
परा हीन्द्र धावसि वृषाकपेरति व्यथिः ।
नो अह प्र विन्द—स्यन्यत्र सोमपीतये विश्वस्मादिन्द्र उत्तरः २
किमयं त्वां वृषाकपि—श्चकार हरितो मृगः ।
यस्मा इरस्यसीदु न्व१र्यो वा पुष्टिमद्वसु विश्वस्मादिन्द्र उत्तरः ३
यमिमं त्वं वृषाकपिं प्रियमिन्द्राभिरक्षसि ।
श्वा न्वस्य जम्भिष—दपि कर्णे वराहयु—र्विश्वस्मादिन्द्र उत्तरः ४
प्रिया तष्टानि मे कपि—र्व्यक्ता व्यदूदुषत् ।
शिरो न्वस्य राविषं न सुगं दुष्कृते भुवं विश्वस्मादिन्द्र उत्तरः ५
न मत् स्त्री सुभसत्तरा न सुयाशुतरा भुवत् ।
न मत् प्रतिच्यवीयसी न सक्थ्युद्यमीयसी विश्वस्मादिन्द्र उत्तरः ६ २६४५
उवे अम्ब सुलाभिके यथेवाङ्ग भविष्यति ।
भसन्मे अम्ब सक्थि मे शिरो मे वीव हृष्यति विश्वस्मादिन्द्र उत्तरः ७

किं सुबाहो स्वङ्गुरे पृथुष्टो पृथुजाघने ।
किं शूरपत्नि नस्त्व—मभ्यमीषि वृषाकपिं विश्वस्मादिन्द्र उत्तरः ८
अवीरामिव मामयं शरारुरभि मन्यते ।
उताहमस्मि वीरिणी—न्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र उत्तरः ९
संहोत्रं स्म पुरा नारी समनं वाव गच्छति ।
वेधा ऋतस्य वीरिणी—न्द्रपत्नी महीयते विश्वस्मादिन्द्र उत्तरः १०
इंद्राणीमासु नारिषु सुभगामहमश्रवम् ।
नह्यस्या अपरं चन जरसा मरते पति—र्विश्वस्मादिन्द्र उत्तरः ११ १६५०
नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते ।
यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः १२
वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे ।
घसत् त इंद्र उक्षणः प्रियं काचित्करं हवि—र्विश्वस्मादिन्द्र उत्तरः १३
उक्ष्णो हि मे पञ्चदश साकं पचंति विंशतिम् ।
उताहमद्मि पीव इ—दुभा कुक्षी पृणन्ति मे विश्वस्मादिन्द्र उत्तरः १४
वृषभो न तिग्मशृङ्गो ऽन्तर्यूथेषु रोरुवत् ।
मंथस्त इंद्र शं हृदे यं ते सुनोति भावयु—र्विश्वस्मादिन्द्र उत्तरः १५
न सेशे यस्य रम्बते ऽन्तरा सक्थ्या३ कपृत् ।
सेदीशे यस्य रोमशं निषेदुषो विजृम्भते विश्वस्मादिन्द्र उत्तरः १६ १६५५
न सेशे यस्य रोमशं निषेदुषो विजृम्भते ।
सेदीशे यस्य रम्बते ऽन्तरा सक्थ्या३ कपृद् विश्वस्मादिन्द्र उत्तरः १७
अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत् ।
असिं सूनां नवं चरु—मादेधस्यान आचितं विश्वस्मादिन्द्र उत्तरः १८
अयमेमि विचाकशद् विचिन्वन् दासमार्यम् ।
पिबामि पाकसुत्वनो ऽभि धीरमचाकशं विश्वस्मादिन्द्र उत्तरः १९
धन्व च यत् कृन्तत्रं च कति स्वित् ता वि योजना ।
नेदीयसो वृषाकपे ऽस्तमेहि गृहाँ उप विश्वस्मादिन्द्र उत्तरः २०
पुनरेहि वृषाकपे सुविता कल्पयावहै ।
य एष स्वप्ननंशनो ऽस्तमेषि पथा पुन—र्विश्वस्मादिन्द्र उत्तरः २१ १६६०

यदुदञ्चो वृषाकपे गृहमिन्द्राजगन्तन।
क१ स्य पुल्वघो मृगः कमगञ्जनयोपनो विश्वस्मादिन्द्र उत्तरः २२
पर्शुर्ह नाम मानवी साकं ससूव विंशतिम्।
भद्रं भल त्यस्या अभूद् यस्या उदरमामयद् विश्वस्मादिन्द्र उत्तरः २३ २६६२

॥ २४४ ॥ (२६६३-२६७९) (ऋ० १०।८९।१-४, ६-१८) रेणुर्वैश्वामित्रः। त्रिष्टुप्।

इन्द्रं स्तवा नृतमं यस्य मह्ना विबबाधे रोचना वि ज्मो अन्तान्।
आ यः पप्रौ चर्षणीधृद्वरोभिः प्र सिन्धुभ्यो रिरिचानो महित्वा १
स सूर्यः पर्युरू वरांस्येन्द्रो ववृत्याद्रथ्येव चक्रा।
अतिष्ठन्तमपस्यं१ न सर्गं कृष्णा तमांसि त्विष्या जघान २
समानमस्मा अनपावृदर्च क्ष्मया दिवो असमं ब्रह्म नव्यम्।
वि यः पृष्ठेव जनिमान्यर्य इन्द्रश्चिकाय न सखायमीषे ३ २६६५
इन्द्राय गिरो अनिशितसर्गा अपः प्रेरयं सगरस्य बुध्नात्।
यो अक्षेणेव चक्रिया शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ४
न यस्य द्यावापृथिवी न धन्व नान्तरिक्षं नाद्रयः सोमो अक्षाः।
यदस्य मन्युरधिनीयमानः शृणाति वीळु रुजति स्थिराणि ६
जघान वृत्रं स्वधितिर्वनेव रुरोज पुरो अरदन्न सिन्धून्।
बिभेद गिरिं नवमिन्न कुम्भमा गा इन्द्रो अकृणुत स्वयुग्भिः ७
त्वं ह त्यदृणया इन्द्र धीरो ऽसिर्न पर्व वृजिना शृणासि।
प्र ये मित्रस्य वरुणस्य धाम युजं न जना मिनन्ति मित्रम् ८
प्र ये मित्रं प्रार्यमणं दुरेवाः प्र संगिरः प्र वरुणं मिनन्ति।
न्य१मित्रेषु वधमिन्द्र तुम्रं वृषन् वृषाणमरुषं शिशीहि ९ २६७०
इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत् पर्वतानाम्।
इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः १०
प्राक्तुभ्य इन्द्रः प्र वृधो अहभ्यः प्रान्तरिक्षात् प्र समुद्रस्य धासेः।
प्र वातस्य प्रथसः प्र ज्मो अन्तात् प्र सिन्धुभ्यो रिरिचे प्र क्षितिभ्यः ११
प्र शोशुचत्या उषसो न केतुरसिन्वा ते वर्ततामिन्द्र हेतिः।
अश्मेव विध्य दिव आ सृजानस्तपिष्ठेन हेषसा द्रोघमित्रान् १२
अन्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्वतासः।
अन्विन्द्रं रोदसी वावशाने अन्वापो अजिहत जायमानम् १३

कर्हि स्वित् सा त इन्द्र चेत्यास—दघस्य यद् भिनदो रक्ष एषत् ।
मित्रक्रुवो यच्छसने न गावः पृथिव्या आपृगमुया शयन्ते १४ २६७५
शत्रूयन्तो अभि ये नस्ततस्रे महि व्राधन्त ओगणास इंद्र ।
अन्धेनामित्रास्तमसा सचन्तां सुज्योतिषो अक्तवस्ताँ अभि ष्युः १५
पुरूणि हि त्वा सवना जनानां ब्रह्माणि मंदन् गृणतामृषीणाम् ।
इमामाघोषन्नवसा सहूतिं तिरो विश्वाँ अर्चतो याह्यर्वाङ् १६
एवा ते वयमिन्द्र भुञ्जतीनां विद्याम सुमतीनां नवानाम् ।
विद्याम वस्तोरवसा गृणन्तो विश्वामित्रा उत त इंद्र नूनम् १७
शुनं हुवेम मघवानमिन्द्र—मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् १८ २६७९

॥२४५॥ (ऋ० १०।९९।१-१२) (२६८०-२६९१) वम्रो वैखानसः ।

कं नश्चित्रमिषण्यसि चिकित्वान् पृथुग्मानं वाश्रं वावृधध्यै ।
कत् तस्य दातु शवसो व्युष्टौ तक्षद्वज्रं वृत्रतुरमपिन्वत् १ २६८०
स हि द्युता विद्युता वेति साम पृथुं योनिमसुरत्वा ससाद ।
स सनीळेभिः प्रसहानो अस्य भ्रातुर्न ऋते सप्तथस्य मायाः २
स वाजं यातापदुष्पदा यन् त्स्वर्षाता परि षदत् सनिष्यन् ।
अनर्वा यच्छतदुरस्य वेदो घ्नञ्छिश्नदेवाँ अभि वर्पसा भूत् ३
स यह्व्यो३ऽवनीर्गोष्वर्वा ऽऽजुहोति प्रधन्यासु सस्रिः ।
अपादो यत्र युज्यासोऽरथा द्रोण्यश्वास ईरते घृतं वाः ४
स रुद्रेभिरशस्तवार ऋभ्वा हित्वी गयमारेअवद्य आगात् ।
वम्रस्य मन्ये मिथुना विवव्री अन्नमभीत्यारोदयन्मुषायन् ५
स इद् दासं तुवीरवं पतिर्दन् षळक्षं त्रिशीर्षाणं दमन्यत् ।
अस्य त्रितो न्वोजसा वृधानो विपा वराहमयोअग्रया हन् ६ २६८५
स द्रुह्वणे मनुष ऊर्ध्वसान आ साविषदर्शसानाय शरुम् ।
स नृतमो नहुषोऽस्मत् सुजातः पुरोऽभिनदर्हन् दस्युहत्ये ७
सो अभ्रियो न यवस उदन्यन् क्षयाय गातुं विदन्नो अस्मे ।
उप यत् सीदुदिन्दुं शरीरैः श्येनोऽयोपाष्टिर्हन्ति दस्यून् ८
स व्राधतः शवसानेभिरस्य कुत्साय शुष्णं कृपणे परादात् ।
अयं कविमनयच्छस्यमान—मत्कं यो अस्य सनितोत नृणाम् ९

अयं दशस्यन् नर्येभिरस्य   दस्मो देवेभिर्वरुणो न मायी ।
अयं कनीन ऋतुपा अवे—द्यमिमीतारुं यश्चतुष्पात् १०
अस्य स्तोमेभिरौशिज ऋजिश्वा   व्रजं दरयद् वृषभेण पिप्रोः ।
सुत्वा यद् यजतो दीदयद्गीः   पुर इयानो अभि वर्पसा भूत् ११ २६९०
एवा महो असुर वक्षथाय   वम्रकः पड्भिरुप सर्पदिन्द्रम् ।
स इयानः करति स्वस्तिमस्मा   इषमूर्जं सुक्षितिं विश्वमाभाः १२ २६९१

॥ २४६ ॥ (ऋ० १०।१०३।१-३,५-११,१३)

(२६९२-२७०२) ऐन्द्रोऽप्रतिरथः । [१३ मरुतो वा] । त्रिष्टुप्, १२ अनुष्टुप् ।

आशुः शिशानो वृषभो न भीमो   घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः   शतं सेना अजयत् साकमिन्द्रः १
संक्रन्दनेनानिमिषेण जिष्णुना   युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत् सहध्वं   युधो नर इषुहस्तेन वृष्णा २
स इषुहस्तैः स निषङ्गिभिर्वशी   संस्रष्टा स युध इन्द्रो गणेन ।
संसृष्टजित् सोमपा बाहुशर्ध्यु१—ग्रधन्वा प्रतिहिताभिरस्ता ३
बलविज्ञायः स्थविरः प्रवीरः   सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा   जैत्रमिन्द्र रथमा तिष्ठ गोवित् ५ २६९५
गोत्रभिदं गोविदं वज्रबाहुं   जयन्तमज्म प्रमृणन्तमोजसा ।
इमं संजाता अनु वीरयध्व—मिन्द्रं सखायो अनु सं रभध्वम् ६
अभि गोत्राणि सहसा गाहमानो   ऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाळयुध्यो३   ऽस्माकं सेना अवतु प्र युत्सु ७
इन्द्र आसां नेता बृहस्पति—र्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां   जयन्तीनां मरुतो यन्त्वग्रम् ८
इन्द्रस्य वृष्णो वरुणस्य राज्ञ   आदित्यानां मरुतां शर्ध उग्रम् ।
महामनसां भुवनच्यवानां   घोषो देवानां जयतामुदस्थात् ९
उद्धर्षय मघवन्नायुधा—न्युत् सत्वनां मामकानां मनांसि ।
उद्वृत्रहन् वाजिनां वाजिना—न्युद्रथानां जयतां यन्तु घोषाः १० २७००
अस्माकमिन्द्रः समृतेषु ध्वजे—ष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भव—न्त्वस्माँ उ देवा अवता हवेषु ११

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।
उग्रा वः सन्तु बाहवो ऽनाधृष्या यथासथ १३ २७०२

॥ २४७ ॥ (ऋ० १०।१०४।१-११)

(२७०३-२७१३) अष्टको वैश्वामित्रः । त्रिष्टुप् ।

असावि सोमः पुरुहूत तुभ्यं हरिभ्यां यज्ञमुप याहि तूयम् ।
तुभ्यं गिरो विप्रवीरा इयाना दधन्विर इन्द्र पिबा सुतस्य १
अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरं पृणस्व ।
मिमिक्षुर्यमद्रय इंद्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः २
प्रोग्रां पीतिं वृष्ण इयर्मि सत्यां प्रयै सुतस्य हर्यश्व तुभ्यम् ।
इंद्र धेनाभिरिह मादयस्व धीभिर्विश्वाभिः शच्या गृणानः ३ २७०५
ऊती शचीवस्तव वीर्येण वयो दधाना उशिज ऋतज्ञाः ।
प्रजावदिन्द्र मनुषो दुरोणे तस्थुर्गृणंतः सधमाद्यासः ४
प्रणीतिभिष्टे हर्यश्व सुष्टोः सुषुम्नस्य पुरुरुचो जनासः ।
मंहिष्ठामूतिं वितिरे दधानाः स्तोतार इंद्र तव सूनृताभिः ५
उप ब्रह्माणि हरिवो हरिभ्यां सोमस्य याहि पीतये सुतस्य ।
इंद्रं त्वा यज्ञः क्षममाणमानड् दाश्वाँ अस्यध्वरस्य प्रकेतः ६
सहस्रवाजमभिमातिषाहं सुतेरणं मघवानं सुवृक्तिम् ।
उप भूषन्ति गिरो अप्रतीत—मिन्द्रं नमस्या जरितुः पनन्त ७
सप्तापो देवीः सुरणा अमृक्ता याभिः सिन्धुमतर इन्द्र पूर्भित् ।
नवतिं स्रोत्या नव च स्रवन्ती—र्देवेभ्यो गातुं मनुषे च विन्दः ८ २७१०
अपो महीरभिशस्तेरमुञ्चो ऽजागरास्वधि देव एकः ।
इंद्र यास्त्वं वृत्रतूर्ये चकर्थ ताभिर्विश्वायुस्तन्वं पुपुष्याः ९
वीरेण्यः क्रतुरिन्द्रः सुशस्ति—रुतापि धेना पुरुहूतमीट्टे ।
आर्दयद् वृत्रमकृणोदु लोकं ससाहे शक्रः पृतना अभिष्टिः १०
शुनं हुवेम मघवानमिन्द्र—मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ११ २७१३

॥ २४८ ॥ (ऋ० १०।१०५।१-११)

(२७१४-२७२४) कौत्सो दुर्मित्रः सुमित्रो वा । उष्णिक्; १ गायत्री वा; २, ७ पिपीलिकमध्या; ११ त्रिष्टुप् ।

कदा वसो स्तोत्रं हर्यत आव श्मशा रुधद्वाः । दीर्घं सुतं वाताप्याय १

हरी यस्य सुयुजा विव्रता वे—रर्वन्तानु शेपा । उभा रजी न केशिना पतिर्दन् २ २७१५
अप योरिन्द्रः पापज आ मर्तो न शश्रमाणो बिभीवान् । शुभे यद्युयुजे तविषीवान् ३
सचायोरिन्द्रश्चर्कृष आँ उपानसः सपर्यन् । नदयोर्विव्रतयोः शूर इन्द्रः ४
अधि यस्तस्थौ केशवन्ता व्यचस्वन्ता न पुष्ट्यै । वनोति शिप्राभ्यां शिप्रिणीवान् ५
प्रास्तौदृष्वौजा ऋष्वेभि—स्ततक्ष शूरः शवसा । ऋभुर्न क्रतुभिर्मातरिश्वा ६
वज्रं यश्चक्रे सुहनाय दस्यवे हिरीमशो हिरीमान् । अरुतहनुरद्भुतं न रजः ७ २७२०
अव नो वृजिना शिशी—ह्यृचा वनेमानृचः । नाब्रह्मा यज्ञ ऋधग्जोषति त्वे ८
ऊर्ध्वा यत् ते त्रेतिनी भूद् यज्ञस्य धूर्षु सद्मन् । सजूर्नावं स्वयशसं सचायोः ९
श्रिये ते पृश्निरुपसेचनी भू—च्छ्रिये दर्विररेपाः । यया स्वे पात्रे सिञ्चस उत् १०
शतं वा यदसुर्य प्रति त्वा सुमित्र इत्थास्तौद् दुर्मित्र इत्थास्तौत् ।
आवो यद्दस्युहत्ये कुत्सपुत्रं प्रावो यद्दस्युहत्ये कुत्सवत्सम् ११ २७२४

॥ २४९ ॥ (ऋ० १०।१११।१-१०)

(२७२५-२७३४) वैरूपोऽष्टादंष्ट्रः । त्रिष्टुप् ।

मनीषिणः प्र भरध्वं मनीषां यथायथा मतयः सन्ति नृणाम् ।
इन्द्रं सत्यैरेरयामा कृतेभिः स हि वीरो गिर्वणस्युर्विदानः १ २७२५
ऋतस्य हि सदसो धीतिरद्यौत् सं गार्ष्टेयो वृषभो गोभिरानट् ।
उदतिष्ठत् तविषेणा रवेण महान्ति चित् सं विव्याचा रजांसि २
इन्द्रः किल श्रुत्या अस्य वेद स हि जिष्णुः पथिकृत् सूर्याय ।
आन्मेनां कृण्वन्नच्युतो भुवद्गोः पतिर्दिवः सनजा अप्रतीतः ३
इन्द्रो मह्ना महतो अर्णवस्य व्रतामिनादङ्गिरोभिर्गृणानः ।
पुरूणि चिन्नि तताना रजांसि दाधार यो धरुणं सत्यताता ४
इन्द्रो दिवः प्रतिमानं पृथिव्या विश्वा वेद सवना हन्ति शुष्णम् ।
महीं चिद् द्यामातनोत् सूर्येण चास्कम्भ चित् कम्भनेन स्कभीयान् ५
वज्रेण हि वृत्रहा वृत्रमस्त—रदेवस्य शूशुवानस्य मायाः ।
वि धृष्णो अत्र धृषता जघन्था—ऽथाभवो मघवन् बाह्वोजाः ६ २७३०
सचन्त यदुषसः सूर्येण चित्रामस्य केतवो रामविन्दन् ।
आ यन्नक्षत्रं ददृशे दिवो न पुनर्यतो नकिरद्धा नु वेद ७
दूरं किल प्रथमा जग्मुरासा—मिन्द्रस्य याः प्रसवे सस्रुरापः ।
क्व स्विदग्रं क्व बुध्न आसा—मापो मध्यं क्व वो नूनमन्तः ८

सृजः सिन्धूँरहिना जग्रसानाँ आदिदेताः प्र विविज्रे जवेन ।
मुमुक्षमाणा उत या मुमुच्रे ऽधेदेता न रमन्ते नितिक्ताः ९
सध्रीचीः सिन्धुमुशतीरिवायन् त्सनाज्जार आरितः पूर्भिदासाम् ।
अस्तमा ते पार्थिवा वसू-न्यस्मे जग्मुः सूनृता इन्द्र पूर्वीः १० १७३४

॥ १५० ॥ (ऋ० १०।१११।१-१०) (१७३५-१७४४) वैरूपो नभःप्रभेदनः ।

इन्द्र पिब प्रतिकामं सुतस्य प्रातःसावस्तव हि पूर्वपीतिः ।
हर्षस्व हन्तवे शूर शत्रू-नुक्थेभिष्टे वीर्या३ प्र ब्रवाम १ १७३५
यस्ते रथो मनसो जवीया-नेन्द्र तेन सोमपेयाय याहि ।
तूयमा ते हरयः प्र द्रवन्तु येभिर्यासि वृषभिर्मन्दमानः २
हरित्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस्तन्वं स्पर्शयस्व ।
अस्माभिरिन्द्र सखिभिर्हुवानः सध्रीचीनो मादयस्वा निषद्य ३
यस्य त्यत् ते महिमानं मदे-ष्विमे मही रोदसी नाविविक्ताम् ।
तदोक आ हरिभिरिन्द्र युक्तैः प्रियेभिर्याहि प्रियमन्नमच्छ ४
यस्य शश्वत् पपिवाँ इन्द्र शत्रू-ननानुकृत्या रण्या चकर्थ ।
स ते पुरंधिं तविषीमियर्ति स ते मदाय सुत इन्द्र सोमः ५
इदं ते पात्रं सनवित्तमिन्द्र पिबा सोममेना शतक्रतो ।
पूर्ण आहावो मदिरस्य मध्वो यं विश्व इदभिहर्यन्ति देवाः ६ १७४०
वि हि त्वामिन्द्र पुरुधा जनासो हितप्रयसो वृषभ ह्वयन्ते ।
अस्माकं ते मधुमत्तमानी-मा भुवन्त्सवना तेषु हर्य ७
प्र त इन्द्र पूर्व्याणि प्र नूनं वीर्या वोचं प्रथमा कृतानि ।
सतीनमन्युरश्रथायो अद्रिं सुवेदनामकृणोर्ब्रह्मणे गाम् ८
नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् ।
न ऋते त्वत् क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ९
अभिख्या नो मघवन् नाधमानान् त्सखे बोधि वसुपते सखीनाम् ।
रणं कृधि रणकृत् सत्यशुष्मा ऽभक्ते चिदा भजा राये अस्मान् १० १७४४

॥ १५१ ॥ (ऋ० १०।११३।१-१०) (१७४५-१७५४) वैरूपः शतप्रभेदनः । जगती, १० त्रिष्टुप् ।

तमस्य द्यावापृथिवी सचेतसा विश्वेभिर्देवैरनु शुष्ममावताम् ।
यदैत् कृण्वानो महिमानमिन्द्रियं पीत्वी सोमस्य क्रतुमाँ अवर्धत १ १७४५

तमस्य विष्णुर्महिमानमोजसा ऽशुं दधन्वान् मधुनो वि रप्शते ।
देवेभिरिन्द्रो मघवा सयावभि र्वृत्रं जघन्वाँ अभवद् वरेण्यः २
वृत्रेण यदहिना बिभ्रदायुधा समस्थिथा युधये शंसमाविदे ।
विश्वे ते अत्र मरुतः सह त्मना ऽवर्धन्नुग्र महिमानमिन्द्रियम् ३
जज्ञान एव व्यबाधत स्पृधः प्रापश्यद् वीरो अभि पौंस्यं रणम् ।
अवृश्चदद्रिमव सस्यदः सृज दस्तभ्नान्नाकं स्वपस्यया पृथुम् ४
आदिन्द्रः सत्रा तविषीरपत्यत वरीयो द्यावापृथिवी अबाधत ।
अवाभरद्धृषितो वज्रमायसं शेवं मित्राय वरुणाय दाशुषे ५
इन्द्रस्यात्र तविषीभ्यो विरप्शिन ऋघायतो अरंहयन्त मन्यवे ।
वृत्रं यदुग्रो व्यवृश्चदोजसा ऽपो बिभ्रतं तमसा परीवृतम ६ १७५०
या वीर्याणि प्रथमानि कर्त्वा महित्वेभिर्यतमानौ समीयतुः ।
ध्वान्तं तमोऽव दध्वसे हत इन्द्रो मह्ना पूर्वहूतावपत्यत ७
विश्वे देवासो अध वृष्ण्यानि ते ऽवर्धयन्त्सोमवत्या वचस्यया ।
रद्धं वृत्रमहिमिन्द्रस्य हन्मना ऽग्निर्न जम्भैस्तृष्वन्नमावयत् ८
भूरि दक्षेभिर्वचनेभिर्ऋक्वभिः सख्येभिः सख्यानि प्र वोचत ।
इन्द्रो धुनिं च चुमुरिं च दम्भय ञ्छ्रद्धामनस्या शृणुते दभीतये ९
त्वं पुरूण्या भरा स्वश्व्या येभिर्मंसै निवचनानि शंसन् ।
सुगेभिर्विश्वा दुरिता तरेम विदो षु ण उर्विया गाधमद्य १० १७५४

॥ १५१ ॥ (ऋ० १०।११६।१-९)

(१७५५-१७६३) स्थौरोऽग्नियुतः स्थौरोऽग्नियूपो वा । त्रिष्टुप् ।

पिबा सोमं महत इन्द्रियाय पिबा वृत्राय हन्तवे शविष्ठ ।
पिब राये शवसे हूयमानः पिब मध्वस्तृपदिन्द्रा वृषस्व १ १७५५
अस्य पिब क्षुमतः प्रस्थितस्ये न्द्र सोमस्य वरमा सुतस्य ।
स्वस्तिदा मनसा मादयस्वा ऽर्वाचीनो रेवते सौभगाय २
ममत्तु त्वा दिव्यः सोम इन्द्र ममत्तु यः सूयते पार्थिवेषु ।
ममत्तु येन वरिवश्चकर्थ ममत्तु येन निरिणासि शत्रून् ३
आ द्विबर्हा अमिनो यात्विन्द्रो वृषा हरिभ्यां परिषिक्तमन्धः ।
गव्या सुतस्य प्रभृतस्य मध्वः सत्रा खेदामरुशहा वृषस्व ४

नि तिग्मानि भ्राशयन् भ्राश्या॒न्यव॑ स्थि॒रा त॑नुहि यातु॒जूना॑म् ।
उ॒ग्राय॑ ते॒ सहो॒ बलं॑ ददामि प्र॒तीत्या॒ शत्रू॑न् विग॒देषु॑ वृश्च ५
व्य१॒॑र्य इन्द्र तनुहि॒ श्रवां॑स्यो॒ज॑: स्थि॒रेव॒ धन्व॑नो॒ऽभिमा॑तीः ।
अ॒स्म॒द्र्य॑ग्वावृ॒धानः॒ सहो॑भि॒रनि॑भृष्टस्त॒न्वं॑ वावृधस्व ६ १७६०
इ॒दं ह॒विर्म॑घव॒न् तुभ्यं॑ रा॒तं प्रति॑ सम्रा॒ळहृ॑णानो गृभाय ।
तुभ्यं॑ सु॒तो म॑घव॒न् तुभ्यं॑ प॒क्वो॒३॒॑ऽद्धीन्द्र पिब॑ च॒ प्रस्थि॑तस्य ७
अ॒द्धीद्धि॑न्द्र॒ प्रस्थि॑ते॒मा ह॒वींषि॒ चनो॑ दधिष्व प॒चतोत सोम॑म् ।
प्रय॑स्वन्तः॒ प्रति॑ हर्यामसि त्वा स॒त्याः स॑न्तु॒ यज॑मानस्य॒ कामा॑: ८
प्रेन्द्रा॒ग्निभ्यां॑ सुव॒चस्या॑मिय॒र्मि सिंधा॑विव॒ प्रेर॑यं॒ नाव॑म॒र्कैः ।
अया॑ इव॒ परि॑ चरन्ति दे॒वा ये अ॒स्मभ्यं॑ धन॒दा उ॒द्भिद॑श्च ९ १७६३

॥ २५३ ॥ (ऋ० १०।१२०।१-९)

(२७६४-२७७२) आथर्वणो बृहद्दिवः।

तदिदा॑स॒ भुव॑नेषु॒ ज्येष्ठं॒ यतो॑ ज॒ज्ञ उ॒ग्रस्त्वे॒षनृ॑म्णः ।
स॒द्यो ज॑ज्ञा॒नो नि रि॑णाति॒ शत्रू॒ननु॒ यं विश्वे॒ मद॒न्त्यूमा॑: १
वा॒वृ॒धा॒नः शव॑सा॒ भूर्यो॑जा॒: शत्रु॑र्दा॒साय॑ भि॒यसं॑ दधाति ।
अव्य॑नच्च॒ व्य॒नच्च॒ सस्नि॒ सं ते॑ नवन्त॒ प्रभृ॑ता॒ मदे॑षु २ १७६५
त्वे क्रतु॒मपि॑ वृञ्जन्ति॒ विश्वे॒ द्विर्यदे॒ते त्रिर्भव॒न्त्यूमा॑: ।
स्वा॒दोः स्वादी॑यः स्वा॒दुना॑ सृजा॒ सम॒दः सु मधु॒ मधु॑ना॒भि यो॑धीः ३
इति॑ चि॒द्धि त्वा॒ धना॒ जय॑न्तं॒ मदे॑मदे अनु॒मद॑न्ति॒ विप्रा॑: ।
ओजी॑यो धृष्णो स्थि॒रमा त॑नुष्व॒ मा त्वा॑ दभन् यातु॒धाना॑ दु॒रेवा॑: ४
त्वया॑ व॒यं शा॑शद्महे॒ रणे॑षु प्र॒पश्य॑न्तो यु॒धेन्या॑नि॒ भूरि॑ ।
चो॒दया॑मि त॒ आयु॑धा॒ वचो॑भि॒: सं ते॑ शिशामि॒ ब्रह्म॑णा॒ वयां॑सि ५
स्तु॒षेय्यं॑ पुरु॒वर्प॑स॒मृभ्व॑मि॒नत॑ममा॒प्त्यमा॒प्त्याना॑म् ।
आ द॑र्षते॒ शव॑सा स॒प्त दा॒नून् प्र सा॑क्षते प्र॒तिमाना॑नि॒ भूरि॑ ६
नि तद्द॑धि॒षेऽव॑रं॒ परं॑ च॒ यस्मि॒न्नावि॒थाव॑सा दु॒रोणे॑ ।
आ मा॒तरा॑ स्थापयसे जिग॒त्नू अत॑ इनोषि॒ कर्व॑रा पु॒रूणि॑ ७ १७७०
इ॒मा ब्रह्म॑ बृ॒हद्दि॑वो विव॒क्तीन्द्रा॑य शू॒षम॑ग्रि॒यः स्व॒र्षाः ।
म॒हो गो॒त्रस्य॑ क्षयति स्व॒रा॒जो दुर॑श्च॒ विश्वा॑ अवृ॒णोदप॒ स्वाः ८

एवा महान् बृहद्दिवो अथर्वा ऽवोचत् स्वां तन्व१मिन्द्रमेव ।
स्वसारो मातरिभ्वरीररिप्रा हिन्वन्ति च शवसा वर्धयन्ति च ९ १७७२

॥ २५४ ॥ (ऋ० १०।१३१।१-३,६-७) (१७७३-१७७७) सुकीर्तिः काक्षीवतः ।

अप प्राच इन्द्र विश्वाँ अमित्रा—नपापाचो अभिभूते नुदस्व ।
अपोदीचो अप शूराधराच उरौ यथा तव शर्मन् मदेम १
कुविदङ्ग यवमन्तो यवं चिद् यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः २
नहि स्थूर्यृतुथा यातमस्ति नोत श्रवो विविदे संगमेषु ।
गव्यन्त इंद्रं सख्याय विप्रा अश्वायंतो वृषणं वाजयन्तः ३ १७७५
इंद्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ६
तस्य वयं सुमतौ यज्ञियस्या—ऽपि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ इंद्रो अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु ७ १७७७

॥ २५५ ॥ (१०।१३३।१-७)

(१७७८-१७८४) सुदाः पैजवनः । शक्वरी, ४-६ महापङ्क्तिः, ७ त्रिष्टुप् ।

प्रो ष्वस्मै पुरोरथ—मिन्द्राय शूषमर्चत ।
अभीके चिदु लोककृत् संगे समत्सु वृत्रहा ऽस्माकं बोधि चोदिता
नभन्तामन्यकेषां ज्याका अधि धन्वसु १
त्वं सिंधूँरवासृजो ऽधराचो अहन्नहिम् ।
अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि ष्वजामहे
नभंतामन्यकेषां ज्याका अधि धन्वसु २
वि षु विश्वा अरातयो ऽर्यो नशंत नो धियः ।
अस्तासि शत्रवे वधं यो न इंद्र जिघांसति या ते रातिर्ददिर्वसु
नभंतामन्यकेषां ज्याका अधि धन्वसु ३ १७८०
यो न इंद्राभितो जनो वृकायुरादिदेशति ।
अधस्पदं तमीं कृधि विबाधो असि सासहि—र्नभंतामन्यकेषां ज्याका अधि धन्वसु ४
यो न इंद्राभिदासति सनाभिर्यश्च निष्ट्यः ।
अव तस्य बलं तिर महीव द्यौरध त्मना नभंतामन्यकेषां ज्याका अधि धन्वसु ५

वयमिन्द्र त्वायवः सखित्वमा रभामहे ।
ऋतस्य नः पथा नयाऽति विश्वानि दुरिता नभंतामन्यकेषां ज्याका अधि धन्वसु ६
अस्मभ्यं सु त्वमिन्द्र तां शिक्ष या दोहते प्रति वरं जरित्रे ।
अच्छिद्रोध्नी पीपयद् यथा नः सहस्रधारा पयसा मही गौः ७ २७८४

॥ २५६ ॥ (ऋ० १०।१३४।१-७)

(२७८५-२७९१) १-६ (पूर्वार्धस्य) मान्धाता यौवनाश्वः, ६ (उत्तरार्धस्य)-७ गोधा ऋषिका । महापङ्क्तिः, ७ पंक्तिः ।

उभे यदिन्द्र रोदसी आपप्राथोषा इव ।
महान्तं त्वा महीनां सम्राजं चर्षणीनां देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् १ २७८५
अव स्म दुर्हणायतो मर्तस्य तनुहि स्थिरम् ।
अधस्पदं तमीं कृधि यो अस्माँ आदिदेशति देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् २
अव त्या बृहतीरिषो विश्वश्चन्द्रा अमित्रहन् ।
शचीभिः शक्र धूनुहीन्द्र विश्वाभिरूतिभिर्देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् ३
अव यत् त्वं शतक्रतविन्द्र विश्वानि धूनुषे ।
रयिं न सुन्वते सचा सहस्रिणीभिरूतिभिर्देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् ४
अव स्वेदा इवाभितो विष्वक् पतन्तु दिद्यवः ।
दूर्वाया इव तन्तवो व्यस्मदेतु दुर्मतिर्देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् ५
दीर्घं ह्यङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः ।
पूर्वेण मघवन् पदाऽजो वयां यथा यमो देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् ६ २७९०
नकिर्देवा मिनीमसि नकिरा योपयामसि मन्त्रश्रुत्यं चरामसि ।
पक्षेभिरपिकक्षेभिरत्राभि सं रभामहे ७ २७९१

॥ २५७ ॥ (ऋ० १०।१३८।१-६) (२७९२-२७९७) अङ्ग औरवः । जगती ।

तव त्य इंद्र सख्येषु वह्नय ऋतं मन्वाना व्यदर्दिरुर्वलम् ।
यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय मन्मन्नह्यश्च दंसयः १
अवासृजः प्रस्वः श्वञ्चयो गिरीनुदाज उस्रा अपिबो मधु प्रियम् ।
अवर्धयो वनिनो अस्य दंससा शुशोच सूर्य ऋतजातया गिरा २
वि सूर्यो मध्ये अमुचद् रथं दिवो विद् दासाय प्रतिमानमार्यः ।
दृळ्हानि पिप्रोरसुरस्य मायिन इंद्रो व्यास्यच्चकृवाँ ऋजिश्वना ३

अनाधृष्टानि धृषितो व्यास्य निधीँरदेवाँ अमृणदयास्यः ।
मासेव सूर्यो वसु पुर्यमा ददे गृणानः शत्रूँरशृणाद्विरुक्मता ४ २७९५
अयुद्धसेनो विभ्वा विभिंदता दाशद् वृत्रहा तुज्यानि तेजते ।
इंद्रस्य वज्रादबिभेदभिश्नथः प्राक्रामच्छुन्ध्यूरजहादुषा अनः ५
एता त्या ते श्रुत्यानि केवला यदेक एकमकृणोरयज्ञम् ।
मासां विधानमदधा अधि द्यवि त्वया विभिन्नं भरति प्रधिं पिता ६ २७९७

॥ २५८ ॥ (ऋ० १०।१४४।१-६)

(२७९८-२८०३) तार्क्ष्यः सुपर्णः, यामायन ऊर्ध्वकृशनो वा।
गायत्री, १ बृहती, ५ सतोबृहती, ६ विष्टारपंक्तिः।

अयं हि ते अमर्त्य इंदुरत्यो न पत्यते । दक्षो विश्वायुर्वेधसे १
अयमस्मासु काव्य ऋभुर्वज्रो दास्वते ।
अयं बिभर्त्यूर्ध्वकृशनं मदमृभुर्न कृत्व्यं मदम् २
घृषुः श्येनाय कृत्वन आसु स्वासु वंसगः । अव दीधेदहीशुवः ३ २८००
यं सुपर्णः परावतः श्येनस्य पुत्र आभरत् । शतचक्रं योऽह्यो वर्तनिः ४
यं ते श्येनश्चारुमवृकं पदाभरदरुणं मानमन्धसः ।
एना वयो वि तार्यायुर्जीवस एना जागार बंधुता ५
एवा तदिन्द्र इंदुना देवेषु चिद्धारयाते महि त्यजः ।
क्रत्वा वयो वि तार्यायुः सुक्रतो क्रत्वायमस्मदा सुतः ६ २८०३

॥ २५९ ॥ (ऋ० १०।१४७।१-५)

(२८०४-२८०८) सुवेदाः शैरीषिः । जगती, ५ त्रिष्टुप् ।

श्रत् ते दधामि प्रथमाय मन्यवे ऽहन्यद् वृत्रं नर्यं विवेरपः ।
उभे यत् त्वा भवतो रोदसी अनु रेजते शुष्मात् पृथिवी चिदद्रिवः १
त्वं मायाभिरनवद्य मायिनं श्रवस्यता मनसा वृत्रमर्दयः ।
त्वामिन्नरो वृणते गविष्टिषु त्वां विश्वासु हव्यास्विष्टिषु २ २८०५
ऐषु चाकन्धि पुरुहूत सूरिषु वृधासो ये मघवन्नानशुर्मघम् ।
अर्चन्ति तोके तनये परिष्टिषु मेधसाता वाजिनमह्रये धने ३
स इन्नु रायः सुभृतस्य चाकनन्मदं यो अस्य रंह्यं चिकेतति ।
त्वावृधो मघवन् दाश्वध्वरो मक्षू स वाजं भरते धना नृभिः ४
त्वं शर्धाय महिना गृणान उरु कृधि मघवञ्छग्धि रायः ।
त्वं नो मित्रो वरुणो न मायी पित्वो न दस्म दयसे विभक्ता ५ २८०८

॥ २६० ॥ (ऋ० १०।१४८।१-५) (२८०९-१८१३) पृथुर्वैन्यः । त्रिष्टुप् ।

सुष्वाणास इंद्र स्तुमसि त्वा ससवांसश्च तुविनृम्ण वाजम् ।
आ नो भर सुवितं यस्य चाकन् त्मना तना सनुयाम त्वोताः १
ऋष्वस्त्वमिन्द्र शूर जातो दासीर्विशः सूर्येण सह्याः ।
गुहा हितं गुह्यं गूळ्हमप्सु बिभृमसि प्रस्रवणे न सोमम् २ १८१०
अर्यो वा गिरो अभ्यर्च विद्वा नृषीणां विप्रः सुमतिं चकानः ।
ते स्याम ये रणयन्त सोमै रेनोत तुभ्यं रथोळ्ह भक्षैः ३
इमा ब्रह्मेन्द्र तुभ्यं शंसि दा नृभ्यो नृणां शूर शवः ।
तेभिर्भव सक्रतुर्येषु चाकन्नुत त्रायस्व गृणत उत स्तीन् ४
श्रुधी हवमिन्द्र शूर पृथ्या उत स्तवसे वेन्यस्यार्कैः ।
आ यस्ते योनिं घृतवन्तमस्वा रूर्मिर्न निम्नैर्द्रवयन्त वक्वाः ५ १८१३

॥ २६१ ॥ (ऋ० १०।१५२।१-५) (१८१४-१८१८) शासो भारद्वाजः । अनुष्टुप् ।

शास इत्था महाँ अस्य मित्रखादो अद्भुतः ।
न यस्य हन्यते सखा न जीयते कदा चन १
स्वस्तिदा विशस्पति र्वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः सोमपा अभयंकरः २ १८१५
वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज ।
वि मन्युमिन्द्र वृत्रह न्नमित्रस्याभिदासतः ३
वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
यो अस्माँ अभिदास त्यधरं गमया तमः ४
अपेन्द्र द्विषतो मनो ऽप जिज्यासतो वधम् ।
वि मन्योः शर्म यच्छ वरीयो यवया वधम् ५ १८१८

॥ २६२ ॥ (ऋ० १०।१५३।१-५) (२८१९-२८२३) देवजामय इन्द्रमातरः । गायत्री ।

ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते । भेजानासः सुवीर्यम् १
त्वमिन्द्र बलादधि सहसो जात ओजसः । त्वं वृषन् वृषेदसि २ १८२०
त्वमिन्द्रासि वृत्रहा व्य१न्तरिक्षमातिरः । उद् द्यामस्तभ्ना ओजसा ३
त्वमिन्द्र सजोषस मर्कं बिभर्षि बाह्वोः । वज्रं शिशान ओजसा ४
त्वमिन्द्राभिभूरसि विश्वा जातान्योजसा । स विश्वा भुव आभवः ५ १८२३

॥ २६३ ॥ (१०।१६०।१-५) (२८१४-२८१८) पूरणो वैश्वामित्रः । त्रिष्टुप् ।

तीव्रस्याभिवयसो अस्य पाहि सर्वरथा वि हरी इह मुञ्च ।
इन्द्र मा त्वा यजमानासो अन्ये नि रीरमन् तुभ्यमिमे सुतासः १
तुभ्यं सुतास्तुभ्यमु सोत्वास स्त्वां गिरः श्वात्र्या आ ह्वयन्ति ।
इन्द्रेदमद्य सवनं जुषाणो विश्वस्य विद्वाँ इह पाहि सोमम् २ २८१५
य उशता मनसा सोममस्मै सर्वहृदा देवकामः सुनोति ।
न गा इन्द्रस्तस्य परा ददाति प्रशस्तमिच्चारुमस्मै कृणोति ३
अनुस्पष्टो भवत्येषो अस्य यो अस्मै रेवान् न सुनोति सोमम् ।
निररत्नौ मघवा तं दधाति ब्रह्मद्विषो हन्त्यनानुदिष्टः ४
अश्वायन्तो गव्यन्तो वाजयन्तो हवामहे त्वोपगन्तवा उ ।
आभूषन्तस्ते सुमतौ नवायां वयमिन्द्र त्वा शुनं हुवेम ५ २८१८

॥ २६४ ॥ (ऋ० १०।१६७।१-२, ४) (२८१९-२८३१) विश्वामित्र-जमदग्नी । जगती ।

तुभ्येदमिन्द्र परि षिच्यते मधु त्वं सुतस्य कलशस्य राजसि ।
त्वं रयिं पुरुवीरामु नस्कृधि त्वं तपः परितप्याजयः स्वः १
स्वर्जितं महि मन्दानमन्धसो हवामहे परि शक्रं सुताँ उप ।
इमं नो यज्ञमिह बोध्या गहि स्पृधो जयन्तं मघवानमीमहे २ २८३०
प्रसूतो भक्षमकरं चरावपि स्तोमं चेमं प्रथमः सूरिरुन्मृजे ।
सुते सातेन यद्यागमं वां प्रति विश्वामित्रजमदग्नी दमे ४ २८३१

॥ २६५ ॥ (ऋ० १०।१७१।१-४) (२८३२-२८३५) इटो भार्गवः । गायत्री ।

त्वं त्यमिटतो रथ मिन्द्र प्रावः सुतावतः । अशृणोः सोमिनो हवम् १
त्वं मखस्य दोधतः शिरोऽव त्वचो भरः । अगच्छः सोमिनो गृहम् २
त्वं त्यमिंद्र मर्त्य मास्त्रबुध्नाय वेन्यम् । मुहुः श्रथ्ना मनस्यवे ३
त्वं त्यमिंद्र सूर्यं पश्चा सन्तं पुरस्कृधि । देवानां चित् तिरो वशम् ४ २८३५

॥ २६६ ॥ (ऋ० १०।१७९।१-३)

(२८३६-२८३८) क्रमेण शिबिरौशीनरः, काशिराजः प्रतर्दनः, रौहिदश्वो वसुमनाः । त्रिष्टुप्, १ अनुष्टुप् ।

उत् तिष्ठताव पश्यते न्द्रस्य भागमृत्वियम् ।
यदि श्रातो जुहोतन यद्यश्रातो ममत्तन १
श्रातं हविरो ष्विन्द्र प्र याहि जगाम सूरो अध्वनो विमध्यम् ।
परि त्वासते निधिभिः सखायः कुलपा न व्राजपतिं चरन्तम् २

श्रातं मन्य ऊधनि श्रातमग्नौ सुश्रातं मन्ये तदृतं नवीयः ।
माध्यंदिनस्य सवनस्य वृध्नः पिबेन्द्र वज्रिन् पुरुकृज्जुषाणः ३ १८३८

॥ २६७ ॥ (ऋ० १०।१८०।१-३) (१८३९-१८४१) जय ऐन्द्रः । त्रिष्टुप् ।

प्र ससाहिषे पुरुहूत शत्रू-ञ्ज्येष्ठस्ते शुष्म इह रातिरस्तु ।
इंद्रा भर दक्षिणेना वसूनि पतिः सिन्धूनामसि रेवतीनाम् १
मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः ।
सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून् ताळ्हि वि मृधो नुदस्व २ १८४०
इंद्र क्षत्रमभि वाममोजो ऽजायथा वृषभ चर्षणीनाम् ।
अपानुदो जनममित्रयन्त-मुरुं देवेभ्यो अकृणोरु लोकम् ३ १८४१

॥ २६८ ॥ (ऋ० १०।४७।१-८) (१८४२-१८४९) सप्तगुरांगिरसः । [वैकुण्ठ इंद्रः] ।

जगृभ्मा ते दक्षिणमिंद्र हस्तं वसूयवो वसुपते वसूनाम् ।
विद्मा हि त्वा गोपतिं शूर गोना-मस्मभ्यं चित्रं वृषणं रयिं दाः १
स्वायुधं स्ववसं सुनीथं चतुःसमुद्रं धरुणं रयीणाम् ।
चर्कृत्यं शंस्यं भूरिवार-मस्मभ्यं चित्रं वृषणं रयिं दाः २
सुब्रह्माणं देववन्तं बृहन्त-मुरुं गभीरं पृथुबुध्नमिन्द्र ।
श्रुतऋषिमुग्रमभिमातिषाह-मस्मभ्यं चित्रं वृषणं रयिं दाः ३
सनद्वाजं विप्रवीरं तरुत्रं धनस्पृतं शूशुवांसं सुदक्षम् ।
दस्युहनं पूर्भिदमिन्द्र सत्य-मस्मभ्यं चित्रं वृषणं रयिं दाः ४ १८४५
अश्वावंतं रथिनं वीरवन्तं सहस्रिणं शतिनं वाजमिन्द्र ।
भद्रव्रातं विप्रवीरं स्वर्षा-मस्मभ्यं चित्रं वृषणं रयिं दाः ५
प्र सप्तगुमृतधीतिं सुमेधां बृहस्पतिं मतिरच्छा जिगाति ।
य आङ्गिरसो नमसोपसद्यो ऽस्मभ्यं चित्रं वृषणं रयिं दाः ६
वनीवानो मम दूतास इंद्रं स्तोमाश्चरन्ति सुमतीरियानाः ।
हृदिस्पृशो मनसा वच्यमाना अस्मभ्यं चित्रं वृषणं रयिं दाः ७
यत् त्वा यामि दद्धि तन्न इंद्र बृहन्तं क्षयमसमं जनानाम् ।
अभि तद् द्यावापृथिवी गृणीता-मस्मभ्यं चित्रं वृषणं रयिं दाः ८ १८४९

॥ २६९ ॥ (ऋ० १०।११९।१-१३)
(१८५०-१८६२) ऐन्द्रो लवः । [आत्मा (इन्द्रः)] । गायत्री ।

इति वा इति मे मनो गामश्वं सनुयामिति । कुवित् सोमस्यापामिति १ १८५०

प्र वाता इव दोधत उन्मा पीता अयंसत । कुवित् सोमस्यापामिति २
उन्मा पीता अयंसत रथमश्वा इवाशवः । कुवित् सोमस्यापामिति ३
उप मा मतिरस्थित वाश्रा पुत्रमिव प्रियम् । कुवित् सोमस्यापामिति ४
अहं तष्टेव वन्धुरं पर्यचामि हृदा मतिम् । कुवित् सोमस्यापामिति ५
नहि मे अक्षिपच्चना ऽच्छान्त्सुः पञ्च कृष्टयः । कुवित् सोमस्यापामिति ६ २८५९
नहि मे रोदसी उभे अन्यं पक्षं चन प्रति । कुवित् सोमस्यापामिति ७
अभि द्यां महिना भुव मभी३मां पृथिवीं महीम् । कुवित् सोमस्यापामिति ८
हन्ताहं पृथिवीमिमां नि दधानीह वेह वा । कुवित् सोमस्यापामिति ९
ओषमित् पृथिवीमहं जङ्घनानीह वेह वा । कुवित् सोमस्यापामिति १०
दिवि मे अन्यः पक्षो३ ऽधो अन्यमचीकृषम् । कुवित् सोमस्यापामिति ११ २८६०
अहमस्मि महामहो ऽभिनभ्यमुदीषितः । कुवित् सोमस्यापामिति १२
गृहो याम्यरंकृतो देवेभ्यो हव्यवाहनः । कुवित् सोमस्यापामिति १३ २८६१

॥ २७० ॥ (अथर्व० २।५।१-४)

(२८६२-२८६६) भृगुराथर्वणः। १ उपरिष्टान्निचृद्बृहती, २ उपरिष्टाद् विराड्बृहती, ३ विराट्पथ्या बृहती, ४ जगती पुरोविराट्।

इंद्र जुषस्व प्र वहा याहि शूर हरिभ्याम्।
पिबा सुतस्य मतेरिह मधोश्चकानश्चारुर्मदाय १
इंद्र जठरं नव्यो न पृणस्व मधोर्दिवो न।
अस्य सुतस्य स्व१र्णोप त्वा मदाः सुवाचो अगुः २
इंद्रस्तुराषाण्मित्रो वृत्रं यो जघान यतीर्न।
बिभेद वलं भृगुर्न ससहे शत्रून्मदे सोमस्य ३ २८६५
आ त्वा विशन्तु सुतास इंद्र पृणस्व कुक्षी विड्ढि शक्र धियेह्या नः।
श्रुधी हवं गिरो मे जुषस्वेन्द्र स्वयुग्भिर्मत्स्वेह महे रणाय ४ + २८६६

॥ २७१ ॥ (अथर्व० ४।२४।१-७)

(२८६७-२८७३) मृगारः। त्रिष्टुप्, १ शाक्वरीगर्भा पुरःशक्वरी।

इंद्रस्य मन्महे शश्वदिदस्य मन्महे वृत्रघ्न स्तोमा उप मेम आगुः।
यो दाशुषः सुकृतो हवमेति स नो मुञ्चत्वंहसः १
य उग्रीणामुग्रबाहुर्ययु र्यो दानवानां बलमारुरोज।
येन जिताः सिंधवो येन गावः स नो मुञ्चत्वंहसः २

+ अथर्व० २।५।५-७; ऋ० १।३२।१-३; तै०सं० [इन्द्रः] ७१५-७१७; [२८६२-६६] अश्व० श्रौ०सू०पूर्व० ६।३

यश्चर्षणिप्रो वृषभः स्वर्विद् यस्मै ग्रावाणः प्रवदन्ति नृम्णम् ।
यस्याध्वरः सप्तहोता मदिष्ठः स नो मुञ्चत्वंहसः ३
यस्य वशास ऋषभास उक्षणो यस्मै मीयन्ते स्वरवः स्वर्विदे ।
यस्मै शुक्रः पवते ब्रह्मशुम्भितः स नो मुञ्चत्वंहसः ४ १८७०
यस्य जुष्टिं सोमिनः कामयन्ते यं हवन्त इषुमन्तं गविष्टौ ।
यस्मिन्नर्कः शिश्रिये यस्मिन्नोजः स नो मुञ्चत्वंहसः ५
यः प्रथमः कर्मकृत्याय जज्ञे यस्य वीर्यं प्रथमस्यानुबुद्धम् ।
येनोद्यतो वज्रोऽभ्यायताहिं स नो मुञ्चत्वंहसः ६
यः संग्रामान्नयति सं युधे वशी यः पुष्टानि संसृजति द्वयानि ।
स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वंहसः ७ १८७३

॥ २७२ ॥ (अथर्व० ५।२३।१-१३) (१८७४-१८८६) कण्वः। अनुष्टुप्, १३ विराट्।

ओते मे द्यावापृथिवी ओता देवी सरस्वती । ओतौ म इंद्रश्चाग्निश्च क्रिमिं जम्भयतामिति १
अस्येंद्र कुमारस्य क्रिमीन्धनपते जहि । हता विश्वा अरातय उग्रेण वचसा मम २ १८७५
यो अक्ष्यौ परिसर्पति यो नासे परिसर्पति । दतां यो मध्यं गच्छति तं क्रिमिं जम्भयामसि ३
सरूपौ द्वौ विरूपौ द्वौ कृष्णौ द्वौ रोहितौ द्वौ । बभ्रुश्च बभ्रुकर्णश्च गृध्रः कोकश्च ते हताः ४
ये क्रिमयः शितिकक्षा ये कृष्णाः शितिबाहवः । ये के च विश्वरूपास्तान्क्रिमीन्जम्भयामसि ५
उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा । दृष्टांश्च घ्नन्नदृष्टांश्च सर्वांश्च प्रमृणन्क्रिमीन् + ६
येवाषासः कष्कषास एजत्काः शिपवित्नुकाः । दृष्टश्च हन्यतां क्रिमिरुतादृष्टश्च हन्यताम् ७ १८८०
हतो येवाषः क्रिमीणां हतो नदनिमोत । सर्वान्नि मष्मषाकरं दृषदा खल्वाँ इव ८
त्रिशीर्षाणं त्रिककुदं क्रिमिं सारङ्गमर्जुनम् । शृणाम्यस्य पृष्टीरपि वृश्चामि यच्छिरः ९
अत्रिवद्वः क्रिमयो हन्मि कण्ववज्जमदग्निवत् । अगस्त्यस्य ब्रह्मणा सं पिनष्म्यहं क्रिमीन् १०
हतो राजा क्रिमीणामुतैषां स्थपतिर्हतः । हतो हतमाता क्रिमिर्हतभ्राता हतस्वसा ११
हतासो अस्य वेशसो हतासः परिवेशसः। अथो ये क्षुल्लका इव सर्वे ते क्रिमयो हताः १२ १८८५
सर्वेषां च क्रिमीणां सर्वासां च क्रिमीणाम्। भिनद्म्यश्मना शिरो दहाम्यग्निना मुखम् १३ १८८६

॥ २७३ ॥ (अथर्व० ६।३३।१-३) (१८८७-१८८९) जाटिकायनः। गायत्री, १ अनुष्टुप्।

यस्येदमा रजो युजस्तुजे जना वनं स्वः । इन्द्रस्य रन्त्यं बृहत् १
नाधृष आ दधृषते धृषाणो धृषितः शवः। पुरा यथा व्यथिः श्रव इन्द्रस्य नाधृषे शवः २
स नो ददातु तां रयिमुरुं पिशङ्गसंदृशम् । इन्द्रः पतिस्तुविष्टमो जनेष्वा ३ १८८९

+ ऋ० १।१९१।८

॥ २७४ ॥ (अथर्व० ६।६६।१-३) (२८९०-२८९५) अथर्वा । अनुष्टुप्, १ त्रिष्टुप् ।

निर्हस्तः शत्रुरभिदासन्नस्तु ये सेनाभिर्युधमायन्त्यस्मान् ।
समर्पयेन्द्र महता वधेन द्रात्वेषामघहारो विविद्धः १ २८९०
आतन्वाना आयच्छन्तो ऽस्यन्तो ये च धावथ ।
निर्हस्ताः शत्रवः स्थने न्द्रो वोऽद्य पराशरीत् २
निर्हस्ताः सन्तु शत्रवो ऽङ्गैषां म्लापयामसि ।
अथैषामिन्द्र वेदांसि शतशो वि भजामहै ३

॥ २७५ ॥ (अथर्व० ६।६७।१-३) अनुष्टुप् ।

परि वर्त्मानि सर्वत इन्द्रः पूषा च सस्रतुः । मुह्यन्त्वद्यामूः सेना अमित्राणां परस्तराम् १
मूढा अमित्राश्चरता शीर्षाण इवाहयः । तेषां वो अग्निमूढाना मिन्द्रो हन्तु वरंवरम् २
ऐषु नह्य वृषाजिनं हरिणस्या भियं कृधि । पराङमित्र एषत्वर्वाची गौरुपेषतु ३ २८९५

॥ २७६ ॥ (अथर्व० ६।७५।१-३) (२८९६-२८९८) कबन्धः । अनुष्टुप्, ३ षट्पदा जगती ।

निरमुं नुद ओकसः सपत्नो यः पृतन्यति । नैर्बाध्येन हविषे न्द्र एनं पराशरीत् १
परमां तं परावत मिन्द्रो नुदतु वृत्रहा । यतो न पुनरायति शश्वतीभ्यः समाभ्यः २
एतु तिस्रः परावत एतु पञ्च जनाँ अति ।
एतु तिस्रोऽति रोचना यतो न पुनरायति शश्वतीभ्यः समाभ्यो यावत्सूर्यो असद्दिवि ३ २८९८

॥ २७७ ॥ (अथर्व० ६।८२।१-३) (२८९९-२९०१) भगः । अनुष्टुप् ।

आगच्छत आगतस्य नाम गृह्णाम्यायतः । इन्द्रस्य वृत्रघ्नो वन्वे वासवस्य शतक्रतोः १
येन सूर्यां सावित्री मश्विनोहतुः पथा । तेन मामब्रवीद्भगो जायामा वहतादिति २ २९००
यस्तेऽङ्कुशो वसुदानो बृहन्निन्द्र हिरण्ययः । तेना जनीयते जायां मह्यं धेहि शचीपते ३ २९०१

॥ २७८ ॥ (अथर्व० ६।९८।१-३) (२९०२-२९०४) अथर्वा । त्रिष्टुप्, २ बृहतीगर्भास्तारपङ्क्तिः ।

इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयातै ।
चर्कृत्य ईड्यो वन्द्यश्चो पसद्यो नमस्यो भवेह १
त्वमिन्द्राधिराजः श्रवस्यु स्त्वं भूरभिभूतिर्जनानाम् ।
त्वं दैवीर्विश इमा वि राजा ऽऽयुष्मत्क्षत्रमजरं ते अस्तु २
प्राच्या दिशस्त्वमिन्द्रासि राजो तोदीच्या दिशो वृत्रहञ्छत्रुहोऽसि ।
यत्र यन्ति स्रोत्यास्तज्जितं ते दक्षिणतो वृषभ एषि हव्यः ३ २९०४

॥ २७९ ॥ (अथर्व० ७।३१।१) (२९०५) भृग्वङ्गिराः । भुरिक् त्रिष्टुप् ।

इन्द्रोतिभिर्बहुलाभिर्नो अद्य यावच्छ्रेष्ठाभिर्मघवञ्छूर जिन्व ।
यो नो द्वेष्ट्यधरः सस्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु १ २९०५

॥ १८० ॥ (अथर्व० ७।५०।१--३,५,८--९)

(२९०६--२९११) अङ्गिराः (कितववधकामः)। अनुष्टुप्; ३ त्रिष्टुप्।

यथा वृक्षमशनि—र्विश्वाहा हन्त्यप्रति । एवाहमद्य कितवा—नक्षैर्बध्यासमप्रति १
तुराणामतुराणां विशामवर्जुषीणाम्। समैतु विश्वतो भगो अन्तर्हस्तं कृतं मम २
ईडे अग्निं स्वावसुं नमोभि—रिह प्रसक्तो वि चयत्कृतं नः ।
रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणं मरुतां स्तोममृध्याम् ३ +
अजैषं त्वा संलिखित—मजैषमुत संरुधम् । अविं वृको यथा मथ—देवा मथ्नामि ते कृतम् ५
कृतं मे दक्षिणे हस्ते जयो मे सव्य आहितः ।
गोजिद्भूयासमश्वजि—द्धनंजयो हिरण्यजित् ८ २९१०
अक्षाः फलवतीं द्युवं दत्त गां क्षीरिणीमिव ।
सं मा कृतस्य धारया धनुः स्नाव्नेव नह्यत ९ २९११

॥ १८१ ॥ (अथर्व० ७।५५।१) (२९१२) भृगुः । विराट् परोष्णिक् ।

ये ते पन्थानोऽव दिवो येभिर्विश्वमैरयः । तेभिः सुम्नया धेहि नो वसो १ २९१२

॥ १८२ ॥ (अथर्व० ७।९३।१) (२९१३) भृग्वङ्गिराः । गायत्री ।

इन्द्रेण मन्युना वय—मभि ष्याम पृतन्यतः । घ्नन्तो वृत्राण्यप्रति १ २९१३

॥ १८३ ॥ (अथर्व० १९।१३।१) (२९१४) अप्रतिरथः । त्रिष्टुप् ।

इन्द्रस्य बाहू स्थविरौ वृषाणौ चित्रा इमा वृषभौ पारयिष्णू ।
तौ योक्षे प्रथमो योग आगते याभ्यां जितमसुराणां स्व१र्यत् १ × २९१४

॥ १८४ ॥ (अथर्व० १९।१५।२-३) (२९१५--२९१६) अथर्वा। त्रिष्टुप्, ३ पथ्यापङ्क्तिः ।

इन्द्रं वयमनूराधं हवामहे ऽनु राध्यास्म द्विपदा चतुष्पदा ।
मा नः सेना अररुषीरुप गु—र्विषूचीरिन्द्र द्रुहो वि नाशय २ ⊛ २९१५
इन्द्रस्त्रातोत वृत्रहा परस्फानो वरेण्यः ।
स रक्षिता चरमतः स मध्यतः स पश्चात्स पुरस्तान्नो अस्तु ३ २९१६

॥ १८५ ॥ (अथर्व० २०।२।३) (२९१७) गृत्समदो मेधातिथिर्वा । आर्च्युष्णिक् ।

इन्द्रो ब्रह्मा ब्राह्मणात्सुष्टुभः स्वर्कादृतुना सोमं पिबतु ३ २९१७

\+ अथर्व० ७।५०।४, ६-७; ऋ० १।१०२।४; १०।४२।९-१०; १०।४३-४४।१०; दै० [इन्द्रः] ८३०, २५५४-५५, २५६६, २५७७।

× अथर्व० १९।१३।२-७,९-११; ऋ०१०।१०३।१-३,५-११,१३; दै०[इन्द्रः] २६९१-२७०१।

⊛ अथर्व० १९।१५।१,४; ऋ० ८।६१।१३; ६।४७।८; दै० [इन्द्रः] ५६०,११०६ ।

॥ २८६ ॥ (वा० य० १।४)

सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः ।
इन्द्रस्य त्वा भागꣳ सोमेनातनच्मि विष्णो हव्यꣳ रक्ष　४　२९१८

॥ २८७ ॥ (वा० य० ३।४९-५०)

पूर्णा दर्वि परा पत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणावहा ऽइषमूर्जꣳ शतक्रतो　४९ +
देहि मे ददामि ते नि मे धेहि नि ते दधे ।
निहारं च हरासि मे निहारं निहराणि ते स्वाहा　५०　२९२०

॥ २८८ ॥ (वा० य० ५।२८,३०)

ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् ।
घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया　२८ ×
इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवोऽसि । ऐन्द्रमसि वैश्वदेवमसि　३०　२९२२

॥ २८९ ॥ (वा० य० ७।४,१४-१५,२५)

उपयामगृहीतोऽस्यन्तर्यच्छ मघवन् पाहि सोमम् । उरुष्य राय ऽ एषो यजस्व　४
अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम ।
सा प्रथमा सँस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो ऽ अग्निः　१४
स प्रथमो बृहस्पतिश्चिकित्वाँस्तस्मा ऽ इन्द्राय सुतमाजुहोत स्वाहा ।
तृम्पन्तु होत्रा मध्वो याः स्विष्टा याः सुप्रीताः सुहुता यत्स्वाहायाडग्नीत्　१५　२९२५
ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामि ।
अथा न ऽ इन्द्र इद्विशो ऽसपत्नाः समनसस्करत्　२५ ❀ २९२६

॥ २९० ॥ (वा० य० ८।३२,३६)

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः　३२ ::
यस्मान्न जातः परो ऽ अन्यो ऽ अस्ति य ऽ आविवेश भुवनानि विश्वा ।
प्रजापतिः प्रजया सꣳरराणस्त्रीणि ज्योतीꣳषि सचते स षोडशी　३६　२९२८

\+ वा० य० ३।५१-५२; ऋ० १।८२।२-३; अथर्व० ३।७।१०; १८।४।६१; दै० सं० [इन्द्रः] ९२६-२७ ।

× वा० य० ५।२९; ऋ० १।१०।१२; दै० सं० [इन्द्रः] ६९ ।

❀ वा० य० ७।२५; ऋ० १०।१७३।६; अथर्व० ७।९४।१ ।

:: वा० य० ८।३३-३५; ऋ० १।१०।३; १।८४।२-३; साम०१०२९-३०,१३४६; दै०सं० [इन्द्रः] ६०,९३८-३९ ।

❀

॥ २९१ ॥ (वा० य० १२।६६)

निवेशनः संगमनो वसूनां विश्वा रूपाभिचष्टे शचीभिः ।
देव ऽ इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ६६ [] १९२९

॥ २९२ ॥ (वा० य० १३।१४)

अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या ऽ अयम् । अपाᳪ रेताᳪसि जिन्वति १४ + १९३०

॥ २९३ ॥ (वा० १७।२३,३६,४४-४५,५१,६३)

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे ऽ अद्या हुवेम ।
स नो विश्वानि हवनानि जोषद् विश्वशम्भूरवसे साधुकर्मा २३ ×
बृहस्पते परि दीया रथेन रक्षोहामित्राँ२ ऽअपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ३६ ∗
अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ४४
अवसृष्टा परापत शरव्ये ब्रह्मसᳪशिते । गच्छामित्रान्प्रपद्यस्व मामीषां कञ्चनोच्छिषः ४५
इन्द्रेमं प्रतरां नय सजातानामसद्वशी । समेनं वर्चसा सृज देवानां भागदाऽअसत् ५१ १९३५
वाजस्य मा प्रसव उद्ग्राभेणोदग्रभीत् । अधा सपत्नानिन्द्रो मे निग्राभेणाधराँ२ अकः ६३ १९३६

॥ २९४ ॥ (वा० य० १९।३२,८०-९५)

सुरावन्तं बर्हिषदᳪ सुवीरं यज्ञᳪ हिन्वन्ति महिषा नमोभिः ।
दधानाः सोमं दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः ३२ ::
सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति ।
अश्विना यज्ञᳪ सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् ८०
तदस्य रूपममृतᳪ शचीभिस्तिस्रो दधुर्देवताः सᳪरराणाः ।
लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य माᳪसमभवन्न लाजाः ८१
तदश्विना भिषजा रुद्रवर्तनी सरस्वती वयति पेशो ऽ अन्तरम् ।
अस्थि मज्जानं मासरैः कारोतरेण दधतो गवां त्वचि ८२ १९४०

[] ऋ० १०।१३९।३; अथर्व० १०।८।४२
+ ऋ० ८।४४।१६; साम० २७,१५३२; दै० सं० [अग्निः] १३५८ ।
× ऋ० १०।८१।७
∗ वा० य० १७।३३-४५,५१,६३; ऋ० १०।१०३।१-१२; ६।७५।१६; साम० १८४९-१८६१,१८६३; अथर्व० ३।२।५, १९।१३।८; ६।५।२; ६।३७।३; ८।५।२; १९।१३।२-११; दै० सं० [इन्द्रः] २६९२-२७०१ ।
:: वा० य० १९।७१; ऋ० ८।१४।१३; साम० २११; अथर्व० २०।२९।३; दै० सं० [इन्द्रः] ३६६ ।

सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः ।
रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ८३
पयसा शुक्रममृतं जनित्रꣳ सुरया मूत्राज्जनयन्त रेतः ।
अपामतिं दुर्मतिं बाधमाना ऊवध्यं वातꣳ सब्वं तदारात् ८४
इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान ।
यकृत् क्लोमानं वरुणो भिषज्यन् मतस्ने वायव्यैर्न मिनाति पित्तम् ८५
आन्त्राणि स्थालीर्मधु पिन्वमाना गुदाः पात्राणि सुदुघा न धेनुः ।
श्येनस्य पत्रं न प्लीहा शचीभि-रासन्दी नाभिरुदरं न माता ८६
कुम्भो वनिष्ठुर्जनिता शचीभि-र्यस्मिन्नग्रे योन्यां गर्भो ऽ अन्तः ।
प्लाशिर्व्यक्तः शतधार ऽ उत्सो दुहे न कुम्भी स्वधां पितृभ्यः ८७ २९४५
मुखꣳ सदस्य शिर ऽ इत् सतेन जिह्वा पवित्रमश्विनासन्त्सरस्वती ।
चप्यं न पायुर्भिषगस्य वालो वस्तिर्न शेपो हरसा तरस्वी ८८
अश्विभ्यां चक्षुरमृतं ग्रहाभ्यां छागेन तेजो हविषा शृतेन ।
पक्ष्माणि गोधूमैः कुवलैरुतानि पेशो न शुक्रमसितं वसाते ८९
अविर्न मेषो नसि वीर्याय प्राणस्य पन्था ऽ अमृतो ग्रहाभ्याम् ।
सरस्वत्युपवाकैर्व्यानं नस्यानि बर्हिर्बदरैर्जजान ९०
इन्द्रस्य रूपमृषभो बलाय कर्णाभ्याꣳ श्रोत्रममृतं ग्रहाभ्याम् ।
यवा न बर्हिर्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघं मुखात् ९१
आत्मन्नुपस्थे न वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोम ।
केशा न शीर्षन्यशसे श्रियै शिखा सिꣳहस्य लोम त्विषिरिन्द्रियाणि ९२ २९५०
अङ्गान्यात्मन् भिषजा तदश्विना-त्मानमङ्गैः समधात् सरस्वती ।
इन्द्रस्य रूपꣳ शतमानमायु-श्चन्द्रेण ज्योतिरमृतं दधानाः ९३
सरस्वती योन्यां गर्भमन्त-रश्विभ्यां पत्नी सुकृतं बिभर्ति ।
अपाꣳ रसेन वरुणो न साम्ने-न्द्रꣳ श्रियै जनयन्नप्सु राजा ९४
तेजः पशूनाꣳ हविरिन्द्रियावत् परिस्रुता पयसा सारघं मधु ।
अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुताभ्याममृतः सोम ऽ इन्दुः ९५ २९५३

॥२९५॥ (वा० य० २०।३१, ७१-७७, ८०, ९०)

अध्वर्यो ऽ अद्रिभिः सुतꣳ सोमं पवित्र ऽ आ नय । पुनाहीन्द्राय पातवे ३१ +

+ वा० य० २०।३१; ऋ० ३।५१।१, ८।९१।२, सा० २१०, दै० सं० [इन्द्रः] १४४६

सविता वरुणो दधद् यजमानाय दाशुषे । आदत्त नमुचेर्वसु सुत्रामा बलमिन्द्रियम् ७१ १९५५
वरुणः क्षत्रमिन्द्रियं भगेन सविता श्रियम् । सुत्रामा यशसा बलं दधाना यज्ञमाशत ७२
अश्विना गोभिरिन्द्रिय मश्वेभिर्वीर्युं बलम् । हविषेन्द्रꣳ सरस्वती यजमानमवर्धयन् ७३
ता नासत्या सुपेशसा हिरण्यवर्तनी नरा । सरस्वती हविष्मती न्द्र कर्मसु नोऽवत ७४
ता भिषजा सुकर्मणा सा सुदुघा सरस्वती । स वृत्रहा शतक्रतु रिन्द्राय दधुरिन्द्रियम् ७५
युवꣳ सुराममश्विना नमुचावासुरे सचा । विपिपानाः सरस्वती न्द्रं कर्मस्वावत ७६ * १९६०
पुत्रमिव पितरावश्विनो भेन्द्रावथुः काव्यैर्दꣳ सनाभिः ।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ७७
अश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम् । वाचेन्द्रो बलेने न्द्राय दधुरिन्द्रियम् ८०
अश्विना पिबतां मधु सरस्वत्या सजोषसा ।
इन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सोम्यं मधु ९० ! १९६३

॥ २९६ ॥ (वा० य० २६।४-५, १०)

इंद्र गोमन्निहा याहि पिबा सोमꣳ शतक्रतो । विद्यद्भिर्ग्रावभिः सुतम् ४
इंद्रा याहि वृत्रहन् पिबा सोमꣳ शतक्रतो । गोमद्भिर्ग्रावभिः सुतम् ५ १९६५
महाँ२ ऽ इंद्रो वज्रहस्तः षोडशी शर्म यच्छतु । हन्तु पाप्मानं यो ऽस्मान् द्वेष्टि १० § १९६६

॥ २९७ ॥ (वा० य० २९।५७)

आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरो ऽस्माकमिन्द्र रथिनो जयन्तु ५७ ‡ १९६७

॥ २९८ ॥ (वा० य० ३३।२७, ७८-७९, ९०)

कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं त ऽ इत्था ।
सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते ऽ अस्मे २७ $
ब्रह्माणि मे मतयः शꣳ सुतासः शुष्म ऽ इयर्ति प्रभृतो मे ऽ अद्रिः ।
आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो ऽ अच्छ ७८

* वा० य० २०।७६-७७; ऋ० १०।१३१।४-५; अथर्व० २०।१२५।४-५ ।

! वा० य० २०।८७-८९; ऋ० १।३।४-६; साम० ११४६-४८; अथर्व० २०।८४।१-३; दै० सं० [इन्द्रः] १-३ ।

§ वा० य० २६।११।२३; ऋ० ८।८८।१; ३।३५।६; साम० २३६, ६८५; अथर्व० २०।९।१, ४९।४; दै० सं० [इन्द्रः] ८९४, १३१७ ।

‡ वा० य० २९।५७; ऋ० ६।४७।३१; अथर्व० ६।१२५।६ ।

$ वा० य० ३३।१८।२९; ऋ० १।९।१, १०९।१; १६५।३-४, ९, ३।३४।३; ३८,४; ७।२३।४,६६।४; ८।४५।१; ८।७२।१२-१३; १०।५९।१; ७४।४, साम० ११७, १८०, १३३९, १३५१, १४८०, १६०९; अथर्व० ४।८।३; ७।२३।४, २०।११।३; ७२।७, दै०सं० [इन्द्रः] २१८३; १३४८,२६०१,४४४,४८,१३०३,८१८,२६३७, दै०सं० [अग्निः] १४३५-३६

अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ२ ऽ अस्ति देवता विदानः।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ७९ २९७०
चन्द्रमा ऽ अप्स्वन्तरा सुपर्णो धावते दिवि।
रयिं पिशङ्गं बहुलं पुरुस्पृहं हरिरेति कनिक्रदत् ९० २९७१

॥ २९९ ॥ (वा० य० ३५।१८)

परीमे गामनेषत पर्यग्निमहृषत। देवेष्वक्रत श्रवः क ऽ इमाँ२ ऽ आ दधर्षति १८ × २९७२

॥ ३०० ॥ (वा० य० ३६।८)

इन्द्रो विश्वस्य राजति। शं नो ऽ अस्तु द्विपदे शं चतुष्पदे ८ × २९७३

॥ ३०१ ॥ (वा० य० ३८।२६)

यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे।
तावन्तमिन्द्र ते ग्रहं मूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम् २६ * २९७४

॥ ३०२ ॥ (साम० १९०)

क इमं नाहुषीष्वा इन्द्रं सोमस्य तर्पयात्। स नो वसून्या भरात् १९० २९७५

॥ ३०३ ॥ (साम० १९६)

सदा व इन्द्रश्चर्कृषदा उपो नु स सपर्यन्। न देवो वृतः शूर इन्द्रः १९६ २९७६

॥ ३०४ ॥ (साम० २०९, २१२)

अरं त इन्द्र श्रवसे गमेम शूर त्वावतः। अरं शक्र परेमणि २०९ २९७७
इमे त इन्द्र सोमाः सुतासो ये च सोत्वाः। तेषां मत्स्व प्रभूवसो २१२ २९७८

॥ ३०५ ॥ (साम० २२६, २३१)

इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः। हरिवान्त्सुतानां सखा २२६
एन्द्र पृक्षु कासु चिन्नृम्णं तनूषु धेहि नः। सत्राजिदुग्र पौंस्यम् २३१ २९८०

॥ ३०६ ॥ (साम० २९४, २९८)

इम इन्द्र मदाय ते सोमाश्चिकित्र उक्थिनः।
मधोः पपान उप नो गिरः शृणु रास्व स्तोत्राय गिर्वणः २९४

॥ वा० य० ३३।५९, ६३-६७, ९५-९६; ऋ० ३।३११६; ४७।४; ४।३२।१; ८।८९।२-३; ९९।५-६; साम० १८१, २५७, ३११, १६३७-३८; दै० सं० [इन्द्रः] १२६५, १४१७, १६४५, २३८०-८१, २३८५-८६, २६१३।

× वा० य० ३५।१८; ऋ० १०।१५५।५; अथर्व० ६।२८।२।

× वा० य० ३६।४-७; ऋ० ४।३१।१-३; ८।९३।१९; साम० १६९, ६८२-८४; १५८६; अथर्व० २०।१२४।१-३; दै० सं० [इन्द्रः] १६३०-३२, २४४८।

* वा० य० ३८।२६; अथर्व० ४।६।२

यदिन्द्र शासो अव्रतं च्यावया सदसस्परि ।
अस्माकमंशुं मघवन् पुरुस्पृहं वसव्ये अधि बर्हय २९८ १९८१

॥ ३०७ ॥ (साम० ३२७)

मेडिं न त्वा वज्रिणं भृष्टिमन्तं पुरुधस्मानं वृषभं स्थिरप्स्नुम् ।
करोष्यर्यस्तरुषीर्दुवस्यु—रिन्द्र द्युक्षं वृत्रहणं गृणीषे ३२७ १९८३

॥ ३०८ ॥ (साम० ३३६,३३७)

यो नो वनुष्यन्नभिदाति मर्त उगणा वा मन्यमानस्तुरो वा।
क्षिधी युधा शवसा वा तमिन्द्रा—भी ष्याम वृषमणस्त्वोताः ३३६
यं वृत्रेषु क्षितिय स्पर्धमाना यं युक्तेषु तुरयन्तो हवन्ते ।
यं शूरसातौ यमपामुपज्म—न्यं विप्रासो वाजयन्ते स इन्द्रः ३३७ १९८५

॥ ३०९ ॥ (साम० ४३८,१७६८,४४४-४४६,११९३-९५)

एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे ४३८
उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ४४४
अर्चन्त्यर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ४४५
प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ४४६ १९८९

॥ ३१० ॥ (साम० ४४९, ४५३, ४५६, १७७०)

भगो न चित्रो अग्नि—र्महोनां दधाति रत्नम् ४४९ १९९०
वि स्रुतयो यथा पथा इन्द्र त्वद्यन्तु रातयः ४५३
इन्द्रो विश्वस्य राजति ४५६ १९९१

॥ ३११ ॥ (साम० ५८८)

यस्येदमा रजोयुज—स्तुजे जने वनं स्वः । इन्द्रस्य रन्त्यं बृहत् ५८८ १९९३

॥ ३१२ ॥ (साम० ६२३-६२५)

हरी त इन्द्र श्मश्रू—ण्युतो ते हरितौ हरी ।
तं त्वा स्तुवन्ति कवयः पुरुषासो वनर्गवः ६२३

यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत ।
सत्यस्य ब्रह्मणो वर्च स्तेन मा संसृजामसि ६२४
सहस्तन्न इन्द्र दद्ध्योज ईशे ह्यस्य महतो विरप्शिन् ।
क्रतुं न नृम्णं स्थविरं च वाजं वृत्रेषु शत्रून्त्सहना कृधी नः ६२५ २९९६

॥ ३१३ ॥ (साम० ९५२-९५४)

इन्द्र जुषस्व प्र वहा याहि शूर हरिह ।
पिबा सुतस्य मतिर्न मधोश्चकानश्चारुर्मदाय ९५२ २९९७
इन्द्र जठरं नव्यं न पृणस्व मधोर्दिवो न ।
अस्य सुतस्य स्वा३र्णोप त्वा मदाः सुवाचो अगुः ९५३
इन्द्रस्तुराषाण्मित्रो न जघान वृत्रं यतिर्न ।
बिभेद वलं भृगुर्न ससाहे शत्रून्मदे सोमस्य ९५४ २९९९

॥ ३१४ ॥ (साम० १८६९)

इन्द्रस्य बाहू स्थविरौ युवाना वनाधृष्यौ सुप्रतीकावसह्यौ ।
तौ युञ्जीत प्रथमौ योग आगते याभ्यां जितमसुराणां सहो महत् १८६९ ३०००

॥ ३१५ ॥ (साम० १८७१)

अन्धा अमित्रा भवता शीर्षाणोऽहय इव ।
तेषां वो अग्निनुन्नाना मिन्द्रो हन्तु वरंवरम् १८७१ ३००१

इन्द्रसहचारी-देवगणः ।

(१) इन्द्राग्नी ।

॥ ३१६ ॥ (ऋ० १।२१।१-६)

(३००२-३००७) मेधातिथिः काण्वः । गायत्री ।

इहेन्द्राग्नी उप ह्वये तयोरित् स्तोममुश्मसि । ता सोमं सोमपातमा १
ता यज्ञेषु प्र शंसते न्द्राग्नी शुम्भता नरः । ता गायत्रेषु गायत २
ता मित्रस्य प्रशस्तय इन्द्राग्नी ता हवामहे । सोमपा सोमपीतये ३
उग्रा सन्ता हवामह उपेदं सवनं सुतम् । इन्द्राग्नी एह गच्छताम् ४ ३००५
ता महान्ता सदस्पती इन्द्राग्नी रक्ष उब्जतम् । अप्रजाः सन्त्वत्रिणः ५
तेन सत्येन जागृत मधि प्रचेतुने पदे । इन्द्राग्नी शर्म यच्छतम् ६ ३००७

॥ ३१६ ॥ (ऋ० १।१०८।१-१३)

(३००८-३०२८) कुत्स आंगिरसः । त्रिष्टुप् ।

य इन्द्राग्नी चित्रतमो रथो वा—मभि विश्वानि भुवनानि चष्टे ।
तेना यातं सरथं तस्थिवांसा—था सोमस्य पिबतं सुतस्य १
यावदिदं भुवनं विश्वम—स्त्युरुव्यचा वरिमता गभीरम् ।
तावाँ अयं पातवे सोमो अ—स्त्वरमिन्द्राग्नी मनसे युवभ्याम् २
चक्राथे हि सध्र्य१ङ्नाम भद्रं सध्रीचीना वृत्रहणा उत स्थः ।
ताविन्द्राग्नी सध्र्यञ्चा निषद्या वृष्णः सोमस्य वृषणा वृषेथाम् ३ ३०१०
समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा ।
तीव्रैः सोमैः परिषिक्तेभिरर्वा—गेन्द्राग्नी सौमनसाय यातम् ४
यानीन्द्राग्नी चक्रथुर्वीर्याणि यानि रूपाण्युत वृष्ण्यानि ।
या वां प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य ५
यदब्रवं प्रथमं वां वृणानो३ ऽयं सोमो असुरैर्नो विहव्यः ।
तां सत्यां श्रद्धामभ्या हि यात—मथा सोमस्य पिबतं सुतस्य ६
यदिन्द्राग्नी मदथः स्वे दुरोणे यद् ब्रह्मणि राजनि वा यजत्रा ।
अतः परि वृषणावा हि यात—मथा सोमस्य पिबतं सुतस्य ७
यदिन्द्राग्नी यदुषु तुर्वशेषु यद् द्रुह्युष्वनुषु पूरुषु स्थः ।
अतः परि वृषणावा हि यात—मथा सोमस्य पिबतं सुतस्य ८ ३०१५
यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः
अतः परि वृषणावा हि यात—मथा सोमस्य पिबतं सुतस्य ९
यदिन्द्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः ।
अतः परि वृषणावा हि यात—मथा सोमस्य पिबतं सुतस्य १०
यदिन्द्राग्नी दिवि ष्ठो यत् पृथिव्यां यत् पर्वतेष्वोषधीष्वप्सु ।
अतः परि वृषणावा हि यात—मथा सोमस्य पिबतं सुतस्य ११
यदिन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे ।
अतः परि वृषणावा हि यात—मथा सोमस्य पिबतं सुतस्य १२
एवेन्द्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि ।
तन्नो मित्रो वरुणो मामहन्ता—मदितिः सिंधुः पृथिवी उत द्यौः १३ ३०२०

॥ ३१८ ॥ (ऋ० १।१०९।१-८)

वि ह्यख्यं मनसा वस्य इच्छ—न्निन्द्राग्नी ज्ञास उत वा सजातान् ।
नान्या युवत् प्रमतिरस्ति मह्यं स वां धियं वाजयन्तीमतक्षम् १
अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात् ।
अथा सोमस्य प्रयती युवभ्या—मिन्द्राग्नी स्तोमं जनयामि नव्यम् २
मा च्छेद्म रश्मीँरिति नाधमानाः पितृणां शक्तीरनुयच्छमानाः ।
इन्द्राग्निभ्यां कं वृषणो मदन्ति ता ह्यद्री धिषणाया उपस्थे ३
युवाभ्यां देवी धिषणा मदाये—न्द्राग्नी सोममुशती सुनोति ।
तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना पृङ्क्तमप्सु ४
युवामिन्द्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये ।
तावासद्या बर्हिषि यज्ञे अस्मिन् प्र चर्षणी मादयेथां सुतस्य ५ ३०२५
प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च ।
प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या ६
आ भरतं शिक्षतं वज्रबाहू अस्माँ इन्द्राग्नी अवतं शचीभिः ।
इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन् ७
पुरंदरा शिक्षतं वज्रहस्ता—स्माँ इन्द्राग्नी अवतं भरेषु ।
तन्नो मित्रो वरुणो मामहन्ता—मदितिः सिन्धुः पृथिवी उत द्यौः ८ ३०२८

॥ ३१९ ॥ (ऋ० १।१३९।९) (३०२९) परुच्छेपो दैवोदासिः । अत्यष्टिः ।

दध्यङ् ह मे जनुषं पूर्वो अङ्गिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदु—स्ते मे पूर्वे मनुर्विदुः ।
तेषां देवेष्वायति—रस्माकं तेषु नाभयः। तेषां पदेन मह्या नमे गिरे—न्द्राग्नी आ नमे गिरा ९ ३०२९

॥ ३२० ॥ (ऋ० ३।१२।१-९) (३०३०-३०३८) गाथिनो विश्वामित्रः । गायत्री ।

इन्द्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता १ ३०३०
इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः । अया पातमिमं सुतम् २
इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे । ता सोमस्येह तृम्पताम् ३
तोशा वृत्रहणा हुवे सजित्वानापराजिता । इन्द्राग्नी वाजसातमा ४
प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः । इन्द्राग्नी इष आ वृणे ५
इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् । साकमेकेन कर्मणा ६ ३०३५
इन्द्राग्नी अपसस्पर्यु—प प्र यन्ति धीतयः । ऋतस्य पथ्या३ अनु ७
इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च । युवोरप्तूर्यं हितम् ८

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः । तद् वां चेति प्र वीर्यम् ९ ३०३८

॥ ३२१ ॥ (ऋ० ५।२७।६)

(३०३९) त्रैवृष्णस्त्र्यरुणः, पौरुकुत्सस्त्रसदस्युः, भारतोऽश्वमेधश्च राजानः (अत्रिर्भौम इति केचित्)। अनुष्टुप्।

इन्द्राग्नी शतदाव्न्य—श्वमेधे सुवीर्यम् । क्षत्रं धारयतं बृहद् दिवि सूर्यमिवाजरम् ६ ३०३९

॥ ३२२ ॥ (ऋ० ५।८६।१-६) (३०४०-३०४५) भौमोऽत्रिः । अनुष्टुप्, ६ विराट्पूर्वा ।

इन्द्राग्नी यमवथ उभा वाजेषु मर्त्यम् । दृळ्हा चित् स प्र भेदति द्युम्ना वाणीरिव त्रितः १ ३०४०

या पृतनासु दुष्टरा या वाजेषु श्रवाय्या । या पञ्च चर्षणीरभी—न्द्राग्नी ता हवामहे २

तयोरिदमवच्छव—स्तिग्मा दिद्युन्मघोनोः । प्रति द्रुणा गभस्त्यो—र्गवां वृत्रघ्न एषते ३

ता वामेषे रथाना—मिन्द्राग्नी हवामहे । पती तुरस्य राधसो विद्वांसा गिर्वणस्तमा ४

ता वृधन्तावनु द्यून् मर्ताय देवावदभा । अर्हन्ता चित् पुरो दधे—ऽशेव देवावर्वते ५

एवेन्द्राग्निभ्यामहावि हव्यं शूष्यं घृतं न पूतमद्रिभिः ।

ता सूरिषु श्रवो बृहद् रयिं गृणत्सु दिधृत—मिषं गृणत्सु दिधृतम् ६ ३०४५

॥ ३२३ ॥ (ऋ० ६।५९।१-१०) (३०४६-३०७०) बार्हस्पत्यो भरद्वाजः । बृहती, ७-१० अनुष्टुप् ।

प्र नु वोचा सुतेषु वां वीर्या३ यानि चक्रथुः ।

हतासो वां पितरो देवशत्रव इन्द्राग्नी जीवथो युवम् १

बळित्था महिमा वा—मिन्द्राग्नी पनिष्ठ आ ।

समानो वां जनिता भ्रातरा युवं यमाविहेहमातरा २

ओकिवांसा सुते सचाँ अश्वा सप्ती इवादने ।

इन्द्रा न्व१ग्नी अवसेह वज्रिणा वयं देवा हवामहे ३

य इन्द्राग्नी सुतेषु वां स्तवत् तेष्वृतावृधा ।

जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन ४

इन्द्राग्नी को अस्य वां देवौ मर्तश्चिकेतति ।

विषूचो अश्वान् युयुजान ईयत एकः समान आ रथे ५ ३०५०

इन्द्राग्नी अपादियं पूर्वागात् पद्वतीभ्यः । हित्वी शिरो जिह्वया वावदच्चरत् त्रिंशत् पदा न्यक्रमीत् ६

इन्द्राग्नी आ हि तन्वते नरो धन्वानि बाह्वोः । मा नो अस्मिन् महाधने परा वर्क्तं गविष्टिषु ७

इन्द्राग्नी तपन्ति मा—ऽघा अर्यो अरातयः । अप द्वेषांस्या कृतं युयुतं सूर्यादधि ८

इन्द्राग्नी युवोरपि वसु दिव्यानि पार्थिवा । आ न इह प्र यच्छतं रयिं विश्वायुपोषसम् ९

इन्द्राग्नी उक्थवाहसा स्तोमेभिर्हवनश्रुता । विश्वाभिर्गीर्भिरा गत—मस्य सोमस्य पीतये १० ३०५५

॥ ३२४ ॥ (ऋ० ६।६०।१-१५) गायत्री; १-३, १३ त्रिष्टुप्, १४ बृहती, १५ अनुष्टुप् ।

श्नथद् वृत्रमुत सनोति वाज—मिन्द्रा यो अग्नी सहुरी सपर्यात् ।
इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता १
ता योधिष्टमभि गा इन्द्र नून—मपः स्वरुषसो अग्न ऊळ्हाः ।
दिशः स्वरुषस इन्द्र चित्रा अपो गा अग्ने युवसे नियुत्वान् २
आ वृत्रहणा वृत्रहभिः शुष्मै—रिन्द्र यातं नमोभिरग्ने अर्वाक् ।
युवं राधोभिरकवेभिरिन्द्रा—ऽग्ने अस्मे भवतमुत्तमेभिः ३
ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम् । इन्द्राग्नी न मर्धतः ४
उग्रा विघनिना मृध इन्द्राग्नी हवामहे । ता नो मृळात ईदृशे ५ ३०६०
हतो वृत्राण्यार्या हतो दासानि सत्पती । हतो विश्वा अप द्विषः ६
इन्द्राग्नी युवामिमे३ ऽभि स्तोमा अनूषत । पिबतं शंभुवा सुतम् ७
या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा । इन्द्राग्नी ताभिरा गतम् ८
ताभिरा गच्छतं नरो—पेदं सवनं सुतम् । इन्द्राग्नी सोमपीतये ९
तमीळिष्व यो अर्चिषा वना विश्वा परिष्वजत् । कृष्णा कृणोति जिह्वया १० ३०६५
य इन्द्र आविवासति सुम्नमिन्द्रस्य मर्त्यः । द्युम्नाय सुतरा अपः ११
ता नो वाजवतीरिष आशून् पिपृतमर्वतः । इन्द्रमग्निं च वोळ्हवे १२
उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दातारा्विषां रयीणा—मुभा वाजस्य सातये हुवे वाम् १३
आ नो गव्येभिरश्व्यै—र्वसव्यै३रुप गच्छतम् ।
सखायौ देवौ सख्याय शंभुवे—न्द्राग्नी ता हवामहे १४
इन्द्राग्नी शृणुतं हवं यजमानस्य सुन्वतः । वीतं हव्यान्या गतं पिबतं सोम्यं मधु १५ ३०७०

॥ ३२५ ॥ (ऋ० ७।९३।१-८) (३०७१-३०९०) मैत्रावरुणिर्वसिष्ठः । त्रिष्टुप् ।

शुचिं नु स्तोमं नवजातमद्ये—न्द्राग्नी वृत्रहणा जुषेथाम् ।
उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा १
ता सानसी शवसाना हि भूतं साकंवृधा शवसा शूशुवांसा ।
क्षयन्तौ रायो यवसस्य भूरेः पृङ्क्तं वाजस्य स्थविरस्य घृष्वेः २
उपो ह यद् विदथं वाजिनो गु—र्धीभिर्विप्राः प्रमतिमिच्छमानाः ।
अर्वन्तो न काष्ठां नक्षमाणा इन्द्राग्नी जोहुवतो नरस्ते ३

गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजम् ।
इन्द्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः ४
सं यन्मही मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते ।
अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन ५ ३०७५
इमामु षु सोमसुतिमुप न एन्द्राग्नी सौमनसाय यातम् ।
नू चिद्धि परिमम्नाथे अस्मा—ना वां शश्वद्भिर्ववृतीय वाजैः ६
सो अंग्न एना नमसा समिद्धो ऽच्छा मित्रं वरुणमिन्द्रं वोचेः ।
यत् सीमागश्चकृमा तत् सु मृळ तदर्यमादितिः शिश्रथन्तु ७
एता अंग्न आशुषाणास इष्टी—र्युवोः सचाभ्यश्याम वाजान् ।
मेन्द्रो नो विष्णुर्मरुतः परि ख्यन् यूयं पात स्वस्तिभिः सदा नः ८

॥ ३२६ ॥ (ऋ० ७।९४।१-१२) गायत्री, १२ अनुष्टुप् ।

इयं वामस्य मन्मन इंद्राग्नी पूर्व्यस्तुतिः । अभ्राद् वृष्टिरिवाजनि १
शृणुतं जरितुर्हव—मिंद्राग्नी वनतं गिरः । ईशाना पिप्यतं धियः २ ३०८०
मा पापत्वाय नो नरे—न्द्राग्नी माभिशस्तये । मा नो रीरधतं निदे ३
इन्द्रे अग्ना नमो बृहत् सुवृक्तिमेरयामहे । धिया धेना अवस्यवः ४
ता हि शश्वन्त ईळत इत्था विप्रास ऊतये । सबाधो वाजसातये ५
ता वां गीर्भिर्विपन्यवः प्रयस्वंतो हवामहे । मेधसाता सनिष्यवः ६
इंद्राग्नी अवसा गत—मस्मभ्यं चर्षणीसहा । मा नो दुःशंस ईशत ७ ३०८५
मा कस्य नो अररुषो धूर्तिः प्रणङ्मर्त्यस्य । इन्द्राग्नी शर्म यच्छतम् ८
गोमद्धिरण्यवद् वसु यद् वामश्वावदीमहे । इंद्राग्नी तद् वनेमहि ९
यत् सोम आ सुते नर इंद्राग्नी अजोहवुः । सप्तीवन्ता सपर्यवः १०
उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा । आङ्गूषैराविवासतः ११
ताविद् दुःशंसं मर्त्यं दुर्विद्वांसं रक्षस्विनम् । आभोगं हन्मना हत—मुदधिं हन्मना हतम् १२ ३०९०

॥ ३२७ ॥ (ऋ० ८।३८।१-१०) (३०९१-३१००) श्यावाश्व आत्रेयः । गायत्री ।

यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु । इंद्राग्नी तस्य बोधतम् १
तोशासा रथयावाना वृत्रहणापराजिता । इंद्राग्नी तस्य बोधतम् २
इदं वां मदिरं मध्व—धुक्षन्नद्रिभिर्नरः । इंद्राग्नी तस्य बोधतम् ३
जुषेथां यज्ञमिष्टये सुतं सोमं सधस्तुती । इंद्राग्नी आ गतं नरा ४
इमा जुषेथां सवना येभिर्हव्यान्यूहथुः । इंद्राग्नी आ गतं नरा ५ ३०९५

इमां गायत्रवर्तनिं जुषेथां सुष्टुतिं मम । इंद्राग्नी आ गतं नरा ६
प्रातर्यावभिरा गतं देवेभिर्जेन्यावसू । इंद्राग्नी सोमपीतये ७
श्यावाश्वस्य सुन्वतो ऽत्रीणां शृणुतं हवम् । इंद्राग्नी सोमपीतये ८
एवा वामह्व ऊतये यथाहुवन्त मेधिराः । इंद्राग्नी सोमपीतये ९
आहं सरस्वतीवतो रिन्द्राग्न्योरवो वृणे । याभ्यां गायत्रमृच्यते १० ३१००

॥ ३२८ ॥ (ऋ० ८।४०।१-१२)

(३१०१-३११२) नाभाकः काण्वः । महापंक्तिः, १ शक्वरी, १२ त्रिष्टुप्।

इंद्राग्नी युवं सु नः सहन्ता दासथो रयिम् ।
येन दृळ्हा समत्स्वा वीळु चित् साहिषीमह्य ग्निर्वनेव वात इ न्नभन्तामन्यके समे १
नहि वां ववयामहे ऽथेन्द्रमिद् यजामहे शविष्ठं नृणां नरम् ।
स नः कदा चिदर्वता गमदा वाजसातये गमदा मेधसातये नभन्तामन्यके समे २
ता हि मध्यं भराणा मिंद्राग्नी अधिक्षितः ।
ता उ कवित्वना कवी पृच्छ्यमाना सखीयते सं धीतमश्नुतं नरा नभन्तामन्यके समे ३
अभ्यर्च नभाकव दिन्द्राग्नी यजसा गिरा ।
ययोर्विश्वमिदं जग दियं द्यौः पृथिवी मह्यु१ पस्थे बिभृतो वसु नभन्तामन्यके समे ४
प्र ब्रह्माणि नभाकव दिन्द्राग्निभ्यामिरज्यत ।
या सप्तबुध्नमर्णवं जिह्मबारमपोर्णुत इंद्र ईशान ओजसा नभन्तामन्यके समे ५ ३१०५
अपि वृश्च पुराणवद् व्रततेरिव गुष्पित मोजो दासस्य दम्भय ।
वयं तदस्य संभृतं वस्विंद्रेण वि भजेमहि नभन्तामन्यके समे ६
यदिन्द्राग्नी जना इमे विह्वयन्ते तना गिरा ।
अस्माकेभिर्नृभिर्वयं सासह्याम पृतन्यतो वनुयाम वनुष्यतो नभन्तामन्यके समे ७
या नु श्वेताववो दिव उच्चरात उप द्युभिः ।
इन्द्राग्न्योरनु व्रत मुहाना यंति सिंधवो यान्त्सीं बंधादमुञ्चतां नभन्तामन्यके समे ८
पूर्वीष्ट इंद्रोपमातयः पूर्वीरुत प्रशस्तयः सूनो हिन्वस्य हरिवः ।
वस्वो वीरस्यापृचो या नु साधन्त नो धियो नभन्तामन्यके समे ९
तं शिशीता सुवृक्तिभि स्त्वेषं सत्वानमृग्मियम् ।
उतो नु चिद् य ओजसा शुष्णस्याण्डानि भेदति जेषत् स्वर्वतीरपो नभंतामन्यके समे १० ३११०
तं शिशीता स्वध्वरं सत्यं सत्वानमृत्वियम् ।
उतो नु चिद् य ओहत आण्डा शुष्णस्य भेद त्यजैः स्वर्वतीरपो नभंतामन्यके समे ११

एवेन्द्राग्निभ्यां पितृवन्नवीयो मंधातृवदङ्गिरस्वदवाचि ।
त्रिधातुना शर्मणा पातमस्मान् वयं स्याम पतयो रयीणाम् १२ ३११२

॥ ३२९ ॥ (ऋ० १०।१६१।१-५)

(३११३-३११७) प्राजापत्यो यक्ष्मनाशनः, राजयक्ष्मघ्नं वा । त्रिष्टुप्, ५ अनुष्टुप् ।

मुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् ।
ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् १
यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव ।
तमा हरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय २
सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम् ।
शतं यथेमं शरदो नयातीन्द्रो विश्वस्य दुरितस्य पारम् ३ ३११५
शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान् ।
शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ४
आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव । सर्वाङ्ग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ५ ३११७

॥ ३३० ॥ (वा० य० १४।११)

इंद्राग्नी अव्यथमानामिष्टकां दृंहतं युवम् । पृष्ठेन द्यावापृथिवी अंतरिक्षं च विबाधसे ११ +३११८

॥ ३३१ ॥ (वा० य० १७।६४)

उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् । अधा सपत्नानिंद्राग्नी मे विषूचीनान्व्यस्यताम् ६४ ×३११९

॥ ३३२ ॥ (अथर्व० ७।९७।१-८)

(३१२०-३१२७) अथर्वा । त्रिष्टुप्, ५ त्रिपदार्षी भुरिग्गायत्री, ६ त्रिपदा प्राजापत्या बृहती,
७ त्रिपदा साम्नी भुरिग्जगती, ८ उपरिष्टाद्बृहती ।

यदद्य त्वा प्रयति यज्ञे अस्मिन् होतश्चिकित्वन्नवृणीमहीह ।
ध्रुवमयो ध्रुवमुता शविष्ठ प्रविद्वान् यज्ञमुप याहि सोमम् १ ३१२०
समिंद्र नो मनसा नेष गोभिः सं सूरिभिर्हरिवन्त्सं स्वस्त्या ।
सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमतौ यज्ञियानाम् २
यानावह उशतो देव देवांस्तान् प्रेरय स्वे अग्ने सधस्थे ।
जक्षिवांसः पपिवांसो मधून्यस्मै धत्त वसवो वसूनि ३

\+ वा० य० ३।१३; ७।३१; ऋ० ६।६०।१३; ३।१२।१; सा० ६६९; दै० सं० [इन्द्रः] ३०३३, ३०७१ ।

× वा० य० ३३।६१,७६,९३; ऋ० ६।५९।६; ६।६०।५; ७।९४।११; सा० ८५४,९८१; दै० सं० [इन्द्रः] ३०५४, ३०६३, ३०९१ ।

सुगा वो देवाः सदना अकर्म य आजग्म सवने मा जुषाणाः ।
वहमाना भरमाणाः स्वा वसूनि वसुं घर्मं दिवमा रोहतानु ४
यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ । स्वां योनिं गच्छ स्वाहा ५
एष ते यज्ञो यज्ञपते सहसूक्तवाकः । सुवीर्यः स्वाहा ६ ३१२५
वषड्ढुतेभ्यो वषडहुतेभ्यः । देवा गातुविदो गातुं वित्त्वा गातुमित ७
मनसस्पत इमं नो दिवि देवेषु यज्ञम् ।
स्वाहा दिवि स्वाहा पृथिव्यां स्वाहान्तरिक्षे स्वाहा वाते धां स्वाहा ८ ३१२७

॥३३३॥ (अथर्व० ६।१०४।१-३) (३१२८-३१३०) प्रशोचनः । इ सोम इन्द्रश्च । अनुष्टुप् ।

आदानेन संदानेना॒ऽमित्राना द्यामसि । अपाना ये चैषां प्राणा असुनासून्त्समच्छिदन् १
इदमादानमकरं तपसेन्द्रेण संशितम् । अमित्रा येऽत्र नः सन्ति तानग्न आ द्या त्वम् २
ऐनान्द्यतामिन्द्राग्नी सोमो राजा च मेदिनौ ।
इन्द्रो मरुत्वानादान॒ममित्रेभ्यः कृणोतु नः ३ ३१३०

॥३३४॥ (अथर्व० ७।११०।१-३) (३१३१-३१३३) भृगुः । १ गायत्री, २ त्रिष्टुप्, ३ अनुष्टुप् ।

अग्न इन्द्रश्च दाशुषे हतो वृत्राण्यप्रति । उभा हि वृत्रहन्तमा १
याभ्यामजयन्त्स्व१रग्र एव यावातस्थतुर्भुवनानि विश्वा ।
प्रचर्षणी वृषणा वज्रबाहू अग्निमिन्द्रं वृत्रहणा हुवेऽहम् २
उप त्वा देवो अग्रभी॒च्चमसेन बृहस्पतिः ।
इन्द्र गीर्भिर्न आ विश यजमानाय सुन्वते ३ ३१३३

(२) इन्द्रावरुणौ ।

॥ ३३५ ॥ (ऋ० १।१७।१-९) ।

(३१३४-३१४२) मेधातिथिः काण्वः । गायत्री, ४-५ पादनिचृत् (५ हसीयसी वा) गायत्री ।

इन्द्रावरुणयोरहं सम्राजोरव आ वृणे । ता नो मृळात ईदृशे १
गन्तारा हि स्थोऽवसे हवं विप्रस्य मावतः । धर्तारा चर्षणीनाम् २ ३१३५
अनुकामं तर्पयेथा॒मिन्द्रावरुण राय आ । ता वां नेदिष्ठमीमहे ३
युवाकु हि शचीनां युवाकु सुमतीनाम् । भूयाम वाजदाव्नाम् ४
इन्द्रः सहस्रदाव्नां वरुणः शंस्यानाम् । क्रतुर्भवत्युक्थ्यः ५
तयोरिदवसा वयं सनेम नि च धीमहि । स्यादुत प्ररेचनम् ६
इन्द्रावरुण वामहं हुवे चित्राय राधसे । अस्मान्त्सु जिग्युषस्कृतम् ७ ३१४०

इन्द्रावरुण नू नु वां सिषासन्तीषु धीष्वा । अस्मभ्यं शर्म यच्छतम् ८
प्र वामश्नोतु सुष्टुति—रिन्द्रावरुण यां हुवे । यामृधाथे सधस्तुतिम् ९ ३१४२

॥ ३३६ ॥ (ऋ० ३।६२।१-३)

(३१४३-३१४५) गाथिनो विश्वामित्रः । १-३ त्रिष्टुप् ।

इमा उ वां भृमयो मन्यमाना युवावते न तुज्या अभूवन् ।
क्व१त्यदिन्द्रावरुणा यशो वां येन स्मा सिनं भरथः सखिभ्यः १
अयमु वां पुरुतमो रयीय—ञ्छश्वत्तममवसे जोहवीति ।
सजोषाविन्द्रावरुणा मरुद्भि—र्दिवा पृथिव्या शृणुतं हवं मे २
अस्मे तदिन्द्रावरुणा वसु ष्या—दस्मे रयिर्मरुतः सर्ववीरः ।
अस्मान् वरूत्रीः शरणैरव—न्त्वस्मान् होत्रा भारती दक्षिणाभिः ३ ३१४५

॥ ३३७ ॥ (ऋ० ४।४१।१-११)

(३१४६-३१५६) वामदेवो गौतमः । त्रिष्टुप् ।

इन्द्रा को वां वरुणा सुम्नमाप स्तोमो हविष्माँ अमृतो न होता ।
यो वां हृदि क्रतुमाँ अस्मदुक्तः पस्पर्शदिन्द्रावरुणा नमस्वान् १
इन्द्रा ह यो वरुणा चक्र आपी देवौ मर्तः सख्याय प्रयस्वान् ।
स हन्ति वृत्रा समिथेषु शत्रू—नवोभिर्वा महद्भिः स प्र शृण्वे २
इन्द्रा ह रत्नं वरुणा धेष्ठे—त्था नृभ्यः शशमानेभ्यस्ता ।
यदी सखाया सख्याय सोमैः सुतेभिः सुप्रयसा मादयैते ३
इन्द्रा युवं वरुणा दिद्युमस्मि—न्नोजिष्ठमुग्रा नि वधिष्टं वज्रम् ।
यो नो दुरेवो वृकतिर्दभीति—स्तस्मिन् मिमाथामभिभूत्योजः ४
इन्द्रा युवं वरुणा भूतमस्या धियः प्रेतारा वृषभेव धेनोः ।
सा नो दुहीयद् यवसेव गत्वी सहस्रधारा पयसा मही गौः ५ ३१५०
तोके हिते तनय उर्वरासु सूरो दृशीके वृषणश्च पौंस्ये ।
इन्द्रा नो अत्र वरुणा स्याता—मवोभिर्दस्मा परितक्म्यायाम् ६
युवामिद्ध्यवसे पूर्व्याय परि प्रभूती गविषः स्वापी ।
वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शंभू ७
ता वां धियोऽवसे वाजयन्ती—राजिं न जग्मुर्युवयूः सुदानू ।
श्रिये न गाव उप सोममस्थु—रिन्द्रं गिरो वरुणं मे मनीषाः ८
इमा इन्द्रं वरुणं मे मनीषा अग्मन्नुप द्रविणमिच्छमानाः ।
उपेमस्थुर्जोष्टार इव वस्वो रघ्वीरिव श्रवसो भिक्षमाणाः ९

अश्व्यस्य त्मना रथ्यस्य पुष्टे र्नित्यस्य रायः पतयः स्याम ।
ता चक्राणा ऊतिभिर्नव्यसीभि रस्मत्रा रायो नियुतः सचन्ताम् १० ३१५५
आ नो बृहन्ता बृहतीभिरूती इन्द्र यातं वरुण वाजसातौ ।
यद् दिद्यवः पृतनासु प्रक्रीळान् तस्य वां स्याम सनितार आजेः ११ ३१५६

॥ ३३८ ॥ (ऋ० ४।४२।७-१०)

(३१५७-३१६०) त्रसदस्युः पौरुकुत्स्यः । त्रिष्टुप् ।

विदुष्टे विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः ।
त्वं वृत्राणि शृण्विषे जघन्वान् त्वं वृताँ अरिणा इन्द्र सिन्धून् ७
अस्माकमत्र पितरस्त आसन् त्सप्त ऋषयो दौर्गहे बध्यमाने ।
त आयजन्त त्रसदस्युमस्या इन्द्रं न वृत्रतुरमर्धदेवम् ८
पुरुकुत्सानी हि वामदाश द्धव्येभिरिन्द्रावरुणा नमोभिः ।
अथा राजानं त्रसदस्युमस्या वृत्रहणं ददथुरर्धदेवम् ९
राया वयं ससवांसो मदेम हव्येन देवा यवसेन गावः ।
तां धेनुमिन्द्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीम् १० ३१६०

॥३३९॥ (ऋ० ६।६८।१-११) (३५६१-३१७१) बार्हस्पत्यो भरद्वाजः । त्रिष्टुप्, ९-१० जगती ।

श्रुष्टी वां यज्ञ उद्यतः सजोषा मनुष्वद् वृक्तबर्हिषो यजध्यै ।
आ य इन्द्रावरुणाविषे अद्य महे सुम्नाय मह आववर्तत् १
ता हि श्रेष्ठा देवताता तुजा शूराणां शविष्ठा ता हि भूतम् ।
मघोनां मंहिष्ठा तुविशुष्म ऋतेन वृत्रतुरा सर्वसेना २
ता गृणीहि नमस्येभिः शूषैः सुम्नेभिरिन्द्रावरुणा चकाना ।
वज्रेणान्यः शवसा हन्ति वृत्रं सिषक्त्यन्यो वृजनेषु विप्रः ३
ग्नाश्च यन्नरश्च वावृधन्त विश्वे देवासो नरां स्वगूर्ताः ।
प्रैभ्य इन्द्रावरुणा महित्वा द्यौश्च पृथिवि भूतमुर्वी ४
स इत् सुदानुः स्ववाँ ऋतावे न्द्रा यो वां वरुण दाशति त्मन् ।
इषा स द्विषस्तरेद् दास्वान् वंसद् रयिं रयिवतश्च जनान् ५ ३१६५
यं युवं दाश्वध्वराय देवा रयिं धत्थो वसुमन्तं पुरुक्षुम् ।
अस्मे स इन्द्रावरुणावपि ष्यात् प्र यो भनक्ति वनुषामशस्तीः ६
उत नः सुत्रात्रो देवगोपाः सूरिभ्य इन्द्रावरुणा रयिः ष्यात् ।
येषां शुष्मः पृतनासु साह्वान् प्र सद्यो द्युम्ना तिरते ततुरिः ७

नू न इन्द्रावरुणा गृणाना पृङ्क्तं रयिं सौश्रवसाय देवा ।
इत्था गृणन्तो महिनस्य शर्धोऽपो न नावा दुरिता तरेम ८
प्र सम्राजे बृहते मन्म नु प्रियमर्च देवाय वरुणाय सप्रथः ।
अयं य उर्वी महिना महिव्रतः क्रत्वा विभात्यजरो न शोचिषा ९
इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रता ।
युवो रथो अध्वरं देववीतये प्रति स्वसरमुप याति पीतये १० ३१७०
इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् ।
इदं वामन्धः परिषिक्तमस्मे आसद्यास्मिन् बर्हिषि मादयेथाम् ११ ३१७१

॥३४०॥ (ऋ० ७।८२।१-१०) (३१७२--३२०१) मैत्रावरुणिर्वसिष्ठः । जगती ।

इन्द्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम् ।
दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः १
सम्राळन्यः स्वराळन्य उच्यते वां महान्ताविन्द्रावरुणा महावसू ।
विश्वे देवासः परमे व्योमनि सं वामोजो वृषणा सं बलं दधुः २
अन्वपां खान्यतृन्तमोजसा सूर्यमैरयतं दिवि प्रभुम् ।
इन्द्रावरुणा मदे अस्य मायिनोऽपिन्वतमपितः पिन्वतं धियः ३
युवामिद् युत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः ।
ईशाना वस्व उभयस्य कारव इन्द्रावरुणा सुहवा हवामहे ४ ३१७५
इन्द्रावरुणा यदिमानि चक्रथुर्विश्वा जातानि भुवनस्य मज्मना ।
क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते ५
महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत् स्वम् ।
अजामिमन्यः श्नथयन्तमातिरद् दभ्रेभिरन्यः प्र वृणोति भूयसः ६
न तमंहो न दुरितानि मर्त्यमिन्द्रावरुणा न तपः कुतश्चन ।
यस्य देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते परिह्वृतिः ७
अर्वाङ्नरा दैव्येनावसा गतं शृणुतं हवं यदि मे जुजोषथः ।
युवोर्हि सख्यमुत वा यदाप्यं मार्डीकमिन्द्रावरुणा नि यच्छतम् ८
अस्माकमिन्द्रावरुणा भरेभरे पुरोयोधा भवतं कृष्ट्योजसा ।
यद् वां हवन्त उभये अध स्पृधि नरस्तोकस्य तनयस्य सातिषु ९ ३१८०
अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे १०

॥३४१॥ (ऋ० ७।८३।१-१०)

युवां नरा पश्यमानास आप्यं प्राचा गव्यन्तः पृथुपर्शवो ययुः ।
दासा च वृत्रा हतमार्याणि च सुदासमिन्द्रावरुणावसावतम् १
यत्रा नरः समयन्ते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियम् ।
यत्रा भयन्ते भुवना स्वर्दृश स्तत्रा न इन्द्रावरुणाधि वोचतम् २
सं भूम्या अन्ता ध्वसिरा अदृक्षते न्द्रावरुणा दिवि घोष आरुहत् ।
अस्थुर्जनानामुप मामरातयो ऽर्वागवसा हवनश्रुता गतम् ३
इन्द्रावरुणा वधनाभिरप्रति भेदं वन्वन्ता प्र सुदासमावतम् ।
ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत् पुरोहितिः ४ ३१८५
इन्द्रावरुणावभ्या तपन्ति माघान्यर्यो वनुषामरातयः ।
युवं हि वस्व उभयस्य राजथो ऽध स्मा नोऽवतं पार्ये दिवि ५
युवां हवन्त उभयास आजिष्वि न्द्रं च वस्वो वरुणं च सातये ।
यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः सह ६
दश राजानः समिता अयज्यवः सुदासमिन्द्रावरुणा न युयुधुः ।
सत्या नृणामद्मसदामुपस्तुति र्देवा एषामभवन् देवहूतिषु ७
दाशराज्ञे परियत्ताय विश्वतः सुदास इन्द्रावरुणावशिक्षतम् ।
श्वित्यञ्चो यत्र नमसा कपर्दिनो धिया धीवन्तो असपन्त तृत्सवः ८
वृत्राण्यन्यः समिथेषु जिघ्नते व्रतान्यन्यो अभि रक्षते सदा ।
हवामहे वां वृषणा सुवृक्तिभि रस्मे इन्द्रावरुणा शर्म यच्छतम् ९ ३१९०
अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे १०

॥ ३४२ ॥ (ऋ० ७।८४।१-५) त्रिष्टुप् ।

आ वां राजानावध्वरे ववृत्यां हव्येभिरिन्द्रावरुणा नमोभिः ।
प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जिगाति १
युवो राष्ट्रं बृहदिन्वति द्यौ र्यौ सेतृभिररज्जुभिः सिनीथः ।
परि नो हेळो वरुणस्य वृज्या उरुं न इन्द्रः कृणवदु लोकम् २
कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता ।
उपो रयिर्देवजूतो न एतु प्र णः स्पार्हाभिरूतिभिस्तिरेतम् ३
अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तं पुरुक्षुम् ।
प्र य आदित्यो अनृता मिना त्यमिता शूरो दयते वसूनि ४ ३१९५

इयमिन्द्रं वरुणमष्ट मे गीः प्रावत् तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ५

॥ ३४३ ॥ (ऋ० ७।८५।१-५)

पुनीषे वामरक्षसं मनीषां सोममिन्द्राय वरुणाय जुह्वत् ।
घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यतामभीके १
स्पर्धन्ते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतन्ति ।
युवं ताँ इन्द्रावरुणावमित्रान् हतं पराचः शर्वा विषूचः २
आपश्चिद्धि स्वयशसः सदःसु देवीरिन्द्रं वरुणं देवता धुः ।
कृष्टीरन्यो धारयति प्रविक्ता वृत्राण्यन्यो अप्रतीनि हन्ति ३
स सुक्रतुर्ऋतचिदस्तु होता य आदित्य शवसा वां नमस्वान् ।
आववर्तदवसे वां हविष्मा—नसदित् स सुविताय प्रयस्वान् ४ ३२००
इयमिन्द्रं वरुणमष्ट मे गीः प्रावत् तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ५ ३२०१

॥ ३४४ ॥ (ऋ० ८।५९।१-७)

(३२०२-३२०८) सुपर्णः काण्वः । जगती ।

इमानि वां भागधेयानि सिस्रत इन्द्रावरुणा प्र महे सुतेषु वाम् ।
यज्ञेयज्ञे ह सवना भुरण्यथो यत् सुन्वते यजमानाय शिक्षथः १
निष्षिध्वरीरोषधीराप आस्ता—मिन्द्रावरुणा महिमानमाशत ।
या सिस्रतू रजसः पारे अध्वनो ययोः शत्रुर्नकिरादेव ओहते २
सत्यं तदिन्द्रावरुणा कृशस्य वां मध्व ऊर्मिं दुहते सप्त वाणीः ।
ताभिर्दाश्वांसमवतं शुभस्पती यो वामदब्धो अभि पाति चित्तिभिः ३
घृतप्रुषः सौम्या जीरदानवः सप्त स्वसारः सदन ऋतस्य ।
या ह वामिन्द्रावरुणा घृतश्चुत—स्ताभिर्धत्तं यजमानाय शिक्षतम् ४ ३२०५
अवोचाम महते सौभगाय सत्यं त्वेषाभ्यां महिमानमिन्द्रियम् ।
अस्मान् त्स्विन्द्रावरुणा घृतश्चुत—स्त्रिभिः साप्तेभिरवतं शुभस्पती ५
इन्द्रावरुणा यदृषिभ्यो मनीषां वाचो मतिं श्रुतमदत्तमग्रे ।
यानि स्थानान्यसृजन्त धीरा यज्ञं तन्वानास्तपसाभ्यपश्यम् ६
इन्द्रावरुणा सौमनसमदृप्तं रायस्पोषं यजमानेषु धत्तम् ।
प्रजां पुष्टिं भूतिमस्मासु धत्तं दीर्घायुत्वाय प्र तिरतं न आयुः ७ ३२०८

॥३४५॥ (वा० य० ८।३७) त्रिष्टुप् यजुरन्ता ।

इन्द्रश्च सम्राड् वरुणश्च राजा तौ ते भक्षं चक्रतुरग्रऽएतम् ।
तयोरहमनु भक्षं भक्षयामि वाग्देवी जुषाणा सोमस्य तृप्यतु सह प्राणेन स्वाहा ॥३७॥ ३२०९

(३) इन्द्र-वायू ।

॥३४६॥ (ऋ० १।२।४-६) (३२१०-३२१२) मधुच्छन्दा वैश्वामित्रः । गायत्री ।

इन्द्रवायू इमे सुता उप प्रयोभिरा गतम् ।
इन्दवो वामुशन्ति हि ४ ३२१०
वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू ।
तावा यातमुप द्रवत् ५
वायविन्द्रश्च सुन्वत आ यातमुप निष्कृतम् ।
मक्ष्वि१त्था धिया नरा ६ ३२१२

॥३४७॥ (ऋ० १।२३।२-३) (३२१३-३२१४) मेधातिथिः काण्वः । गायत्री ।

उभा देवा दिविस्पृशे-न्द्रवायू हवामहे ।
अस्य सोमस्य पीतये २ ३२१३
इन्द्रवायू मनोजुवा विप्रा हवन्त ऊतये ।
सहस्राक्षा धियस्पती ३ ३२१४

॥३४८॥ (ऋ०१।१३५।४-८) (३२१५-३२१९) परुच्छेपो दैवोदासिः । अत्यष्टिः, ७-८ अष्टिः ।

आ वां रथो नियुत्वान् वक्षदवसे ऽभि प्रयांसि सुधितानि वीतये वायो हव्यानि वीतये ।
पिबतं मध्वो अन्धसः पूर्वपेयं हि वां हितम् ।
वायवा चन्द्रेण राधसा गत-मिन्द्रश्च राधसा गतम् ४ ३२१५
आ वां धियो ववृत्युरध्वराँ उप-ममिन्दुं मर्मृजन्त वाजिन-माशुमत्यं न वाजिनम् ।
तेषां पिबतमस्मयू आ नो गन्तमिहोत्या ।
इन्द्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवम् ५
इमे वां सोमा अप्स्वा सुता इहा-ध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ।
एते वामभ्यसृक्षत तिरः पवित्रमाशवः ।
युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्यया ६
अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिन्द्रश्च गच्छतम् ।
वि सूनृता ददृशे रीयते घृत-मा पूर्णया नियुता याथो अध्वर-मिन्द्रश्च याथो अध्वरम् ७

अत्राह तद् वहेथे मध्व आहुतिं यमश्वत्थमुपतिष्ठन्त जायवो ऽस्मे ते सन्तु जायवः ।
साकं गावः सुवते पच्यते यवो न ते वाय उप दस्यन्ति धेनवो नाप दस्यन्ति धेनवः ८ ३२१९

॥ ३४९ ॥ (ऋ० १।४१।३)

(३२२०) गृत्समदः शौनकः । गायत्री ।

शुक्रस्याद्य गवाशिर इन्द्रवायू नियुत्वतः । आ यातं पिबतं नरा ३ ३२२०

॥ ३५० ॥ (ऋ० ४।४६।२-७)

(३२२१-३२२९) वामदेवो गौतमः । गायत्री ।

शतेना नो अभिष्टिभि–र्नियुत्वाँ इन्द्रसारथिः । वायो सुतस्य तृम्पतम् २
आ वां सहस्रं हरय इन्द्रवायू अभि प्रयः । वहन्तु सोमपीतये ३
रथं हिरण्यवन्धुर–मिन्द्रवायू स्वध्वरम् । आ हि स्थाथो दिविस्पृशम् ४
रथेन पृथुपाजसा दाश्वांसमुप गच्छतम् । इन्द्रवायू इहा गतम् ५
इन्द्रवायू अयं सुत–स्तं देवेभिः सजोषसा । पिबतं दाशुषो गृहे ६ ३२२५
इह प्रयाणमस्तु वा–मिन्द्रवायू विमोचनम् । इह वां सोमपीतये ७

॥ ३५१ ॥ (ऋ० ४।४७।२-४) अनुष्टुप् ।

इन्द्रश्च वायवेषां सोमानां पीतिमर्हथः ।
युवां हि यन्तीन्दवो निम्नमापो न सध्र्यक् २
वायविन्द्रश्च शुष्मिणा सरथं शवसस्पती ।
नियुत्वन्ता न ऊतय आ यातं सोमपीतये ३
या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा ।
अस्मे ता यज्ञवाहसे–न्द्रवायू नि यच्छतम् ४ ३२२९

॥ ३५२ ॥ (ऋ० ५।५१।४, ६-७)

(३२३०-३२३२) स्वस्त्यात्रेयः । गायत्री (६, ७) उष्णिक् ।

अयं सोमश्चमू सुतो ऽमत्रे परि षिच्यते । प्रिय इन्द्राय वायवे ४ ३२३०
इन्द्रश्च वायवेषां सुतानां पीतिमर्हथः । ताञ्जुषेथामरेपसावभि प्रयः ६
सुता इन्द्राय वायवे सोमासो दध्याशिरः । निम्नं न यन्ति सिन्धवोऽभि प्रयः ७ ३२३२

॥३५३॥ (ऋ० ७।९०।५-७) (३२३३-३२४१) मैत्रावरुणिर्वसिष्ठः । त्रिष्टुप् ।

ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहन्ति ।
इन्द्रवायू वीरवाहं रथं वा–मीशानयोरभि पृक्षः सचन्ते ५ ३२३३
ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः ।
इन्द्रवायू सूरयो विश्वमायु–रर्वद्भिर्वीरैः पृतनासु सह्युः ६

अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ७ ३२३५

॥ ३५४ ॥ (ऋ० ७।९१।२, ४-७)

उशन्ता दूता न दभाय गोपा मासश्च पाथः शरदश्च पूर्वीः ।
इन्द्रवायू सुष्टुतिर्वामियाना मार्डीकमीट्टे सुवितं च नव्यम् २
यावत् तरस्तन्वो३ यावदोजो यावन्नरश्चक्षसा दीध्यानाः ।
शुचिं सोमं शुचिपा पातमस्मे इन्द्रवायू सदतं बर्हिरेदम् ४
नियुवाना नियुतः स्पार्हवीरा इन्द्रवायू सरथं यातमर्वाक् ।
इदं हि वां प्रभृतं मध्वो अग्र–मध प्रीणाना वि मुमुक्तमस्मे ५
या वां शतं नियुतो याः सहस्र–मिन्द्रवायू विश्ववाराः सचन्ते ।
आभिर्यातं सुविदत्राभिरर्वाक् पातं नरा प्रतिभृतस्य मध्वः ६
अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ७ ३२४०

॥ ३५५ ॥ (ऋ० ७।९२।२,४)

प्र सोता जीरो अध्वरेष्वस्थात् सोममिन्द्राय वायवे पिबध्यै ।
प्र यद् वां मध्वो अग्रियं भर–न्त्यध्वर्यवो देवयन्तः शचीभिः २
ये वायव इन्द्रमादनास आदेवासो नितोशनासो अर्यः ।
घ्नन्तो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान् ४ ३२४२

॥ ३५६ ॥ (वा० य० ३३।८६)

इन्द्रवायू सुसन्दृशा सुहवेह हवामहे ।
यथा नः सर्वऽइज्जनोऽनमीवः सङ्गमे सुमनाऽअसत् ॥ ८६ ॥ × ३२४३

॥ ३५७ ॥ (अथर्व० ३।२०।६) वसिष्ठः । पथ्यापङ्क्तिः ।

इन्द्रवायू उभाविह सुहवेह हवामहे ।
यथा नः सर्व इज्जनः संगत्यां सुमना असद्दानकामश्च नो भुवत् ६ ३२४४

(४) इन्द्र--मरुतश्च ।

॥ ३५८ ॥ (ऋ० १।६।५,७) (३२४५-३२४६) मधुच्छन्दा वैश्वामित्रः । गायत्री ।

वीळु चिदारुजत्नुभि–र्गुहा चिदिन्द्र वह्निभिः । अविन्द उस्रिया अनु ५ ३२४५
इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा । मन्दू समानवर्चसा ७ ३२४६

× [वा० य० ७।८; ३३, ५६, ८६, ऋ० १।२।४; १०।१४१।४; अथर्व० ३।२०।६;] दै० सं० [इंद्रः] ३२१५ ।
दै० [इन्द्रः] २७

(५) मरुत्वानिन्द्रः ।

॥ ३५९ ॥ (ऋ० १।२३।७-९) (३२४७-३२४९) मेधातिथिः काण्वः । गायत्री ।

मरुत्वन्तं हवामह इन्द्रमा सोमपीतये । सजूर्गणेन तृम्पतु ७
इन्द्रज्येष्ठा मरुद्गणा देवासः पूर्षरातयः । विश्वे मम श्रुता हवम् ८
हत वृत्रं सुदानव इन्द्रेण सहसा युजा । मा नो दुःशंस ईशत ९ ३२४९

॥ ३६० ॥ (ऋ० १।१६५।१-१५)

(३२५०-३२६४) इंद्रः; ३, ५, ७, ९ मरुतः; १३-१५ अगस्त्यो मैत्रावरुणिः । त्रिष्टुप् ।

कया शुभा सवयसः सनीळाः समान्या मरुतः सं मिमिक्षुः ।
कया मती कुत एतास एते ऽर्चन्ति शुष्मं वृषणो वसूया १ ३२५०
कस्य ब्रह्माणि जुजुषुर्युवानः को अध्वरे मरुत आ ववर्त ।
श्येनाँ इव ध्रजतो अन्तरिक्षे केन महा मनसा रीरमाम २
कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं त इत्था ।
सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत् ते अस्मे ३
ब्रह्माणि मे मतयः शं सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः ।
आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ४
अतो वयमन्तमेभिर्युजानाः स्वक्षत्रेभिस्तन्वः शुम्भमानाः ।
महोभिरेताँ उप युज्महे न्विन्द्र स्वधामनु हि नो बभूथ ५
क्व स्या वो मरुतः स्वधासीद् यन्मामेकं समधत्ताहिहत्ये ।
अहं ह्यु१ग्रस्तविषस्तुविष्मान् विश्वस्य शत्रोरनमं वधस्नैः ६ ३२५५
भूरि चकर्थ युज्येभिरस्मे समानेभिर्वृषभ पौंस्येभिः ।
भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा मरुतो यद् वशाम ७
वधीं वृत्रं मरुत इन्द्रियेण स्वेन भामेन तविषो बभूवान् ।
अहमेता मनवे विश्वश्चन्द्राः सुगा अपश्चकर वज्रबाहुः ८
अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ अस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ९
एकस्य चिन्मे विभ्व१स्त्वोजो या नु दधृष्वान् कृणवै मनीषा ।
अहं ह्यु१ग्रो मरुतो विदानो यानि च्यवमिन्द्र इदीश एषाम् १०
अमन्दन्मा मरुतः स्तोमो अत्र यन्मे नरः श्रुत्यं ब्रह्म चक्र ।
इन्द्राय वृष्णे सुमखाय मह्यं सख्ये सखायस्तन्वे तनूभिः ११ ३२६०

एवेदेते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः ।
संचक्ष्या मरुतश्चन्द्रवर्णा अच्छान्त मे छदयाथा च नूनम् १२
को न्वत्र मरुतो मामहे वः प्र यातन सखीँरच्छा सखायः ।
मन्मानि चित्रा अपिवातयन्त एषां भूत नवेदा म ऋतानाम् १३
आ यद् दुवस्याद् दुवसे न कारु- रस्माञ्चक्रे मान्यस्य मेधा ।
ओ षु वर्त्त मरुतो विप्रमच्छे- मा ब्रह्माणि जरिता वो अर्चत् १४
एष वः स्तोमो मरुत इयं गी- र्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् १५ ३२६४

॥ ३६१ ॥ (ऋ० १।१७१।३-६) (३२६५-३२६८) अगस्त्यो मैत्रावरुणिः । त्रिष्टुप् ।

स्तुतासो नो मरुतो मृळयन्तू- त स्तुतो मघवा शंभविष्ठः ।
ऊर्ध्वा नः सन्तु कोम्या वना- न्यहानि विश्वा मरुतो जिगीषा ३ ३२६५
अस्मादहं तविषादीषमाण इन्द्राद् भिया मरुतो रेजमानः ।
युष्मभ्यं हव्या निशितान्यासन् तान्यारे चकृमा मृळता नः ४
येन मानासश्चितयन्त उस्रा व्युष्टिषु शवसा शश्वतीनाम् ।
स नो मरुद्भिर्वृषभ श्रवो धा उग्र उग्रेभिः स्थविरः सहोदाः ५
त्वं पाहीन्द्र सहीयसो नॄन् भवा मरुद्भिरवयातहेळाः ।
सुप्रकेतेभिः सासहिर्दधानो विद्यामेषं वृजनं जीरदानुम् ६ ३२६८

(६) इन्द्रामरुतौ ।

॥ ३६२ ॥ (ऋ० ८।९६।१४)

(३२६९) तिरश्चीराङ्गिरसो, द्युतानो वा मारुतः । त्रिष्टुप् ।

द्रप्समपश्यं विषुणे चरन्त- मुपह्वरे नद्यो अंशुमत्याः ।
नभो न कृष्णमवतस्थिवांस- मिष्यामि वो वृषणो युध्यताजौ १४ ३२६९

(७) इन्द्रासोमौ ।

॥ ३६३ ॥ (ऋ० २।३०।६) (३२७०) गृत्समदः शौनकः । त्रिष्टुप् ।

प्र हि क्रतुं वृहथो यं वनुथो रध्रस्य स्थो यजमानस्य चोदौ ।
इन्द्रासोमा युवमस्माँ अविष्ट- मस्मिन् भयस्थे कृणुतमु लोकम् ६ ३२७०

॥ ३६४ ॥ (ऋ० ६।७२।१-५) (३२७१-३२७५) बार्हस्पत्यो भरद्वाजः । त्रिष्टुप् ।

इन्द्रासोमा महि तद् वां महित्वं युवं महानि प्रथमानि चक्रथुः ।
युवं सूर्यं विविदथुर्युवं स्व१- र्विश्वा तमांस्यहतं निदश्च १

इन्द्रासोमा वासयथ उषास—मुत् सूर्यं नयथो ज्योतिषा सह ।
उप द्यां स्कम्भथुः स्कम्भनेना—ऽप्रथतं पृथिवीं मातरं वि २
इन्द्रासोमावहिमपः परिष्ठां हथो वृत्रमनु वां द्यौरमन्यत ।
प्राणांस्यैरयतं नदीना—मा समुद्राणि पप्रथुः पुरूणि ३
इन्द्रासोमा पक्वमामास्वन्त—र्नि गवामिद् दधथुर्वक्षणासु ।
जगृभथुरनपिनद्धमासु रुशच्चित्रासु जगतीष्वन्तः ४
इन्द्रासोमा युवमङ्ग तरुत्र—मपत्यसाचं श्रुत्यं रराथे ।
युवं शुष्मं नर्यं चर्षणिभ्यः सं विव्यथुः पृतनाषाहमुग्रा ५ ३२७५

॥ ३६५ ॥ (ऋ० १०।८९।५) (३२७६) रेणुर्वैश्वामित्रः । त्रिष्टुप् ।

आपान्तमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी ।
सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः ५ ३२७६

॥ ३६६ ॥ (ऋ० १०।१२४।९) (३२७७) अग्निः (सोमेन्द्रौ) । त्रिष्टुप् ।

बीभत्सूनां सयुजं हंसमाहु—रपां दिव्यानां सख्ये चरन्तम् ।
अनुष्टुभमनु चर्चूर्यमाण—मिन्द्रं नि चिक्युः कवयो मनीषा ९ ३२७७

॥ ३६७ ॥ (अथर्व० ८।४।१-२५)

(३२७८-३३०२) चातनः । जगती, ८-१४, १६-१७, १९, २२, २४ त्रिष्टुप्, २०, २३ भुरिक्, २५ अनुष्टुप् ।

इन्द्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः ।
परा शृणीतमचितो न्योषतं हतं नुदेथां नि शिशीतमत्त्रिणः १
इन्द्रासोमा समघशंसमभ्यघं तपुर्ययस्तु चरुरग्निमाँ इव ।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने २
इन्द्रासोमा दुष्कृतो वव्रे अन्त—रनारम्भणे तमसि प्र विध्यतम् ।
यतो नैषां पुनरेकश्चनोदयत् तद्वामस्तु सहसे मन्युमच्छवः ३ ३२८०
इन्द्रासोमा वर्तयतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणम् ।
उत्तक्षतं स्वर्यं पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ४
इन्द्रासोमा वर्तयतं दिवस्पर्य—ग्नितप्तेभिर्युवमश्महन्मभिः ।
तपुर्वधेभिरजरेभिरत्त्रिणो नि पर्शाने विध्यतं यन्तु निस्वरम् ५
इन्द्रासोमा परि वां भूतु विश्वत इयं मतिः कक्ष्याश्वेव वाजिना ।
यां वां होत्रां परिहिनोमि मेधये—मा ब्रह्माणि नृपती इव जिन्वतम् ६

प्रति स्मरेथां तुजयद्भिरेवैर्हतं द्रुहो रक्षसो भङ्गुरावतः ।
इन्द्रासोमा दुष्कृते मा सुगं भूद्यो मा कदा चिदभिदासति द्रुहुः ७
यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः ।
आप इव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता ८ ३२८५

ये पाकशंसं विहरन्त एवैर्ये वा भद्रं दूषयन्ति स्वधाभिः ।
अहये वा तान्प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे ९
यो नो रसं दिप्सति पित्वो अग्ने अश्वानां गवां यस्तनूनाम् ।
रिपु स्तेन स्तेयकृद्दभ्रमेतु नि ष हीयतां तन्वा३ तना च १०
परः सो अस्तु तन्वा३ तना च तिस्रः पृथिवीरधो अस्तु विश्वाः ।
प्रति शुष्यतु यशो अस्य देवा यो मा दिवा दिप्सति यश्च नक्तम् ११
सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते ।
तयोर्यत्सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासत् १२
न वा उ सोमो वृजिनं हिनोति न क्षत्रियं मिथुया धारयन्तम् ।
हन्ति रक्षो हन्त्यासद्वदन्तमुभाविन्द्रस्य प्रसितौ शयाते १३ ३२९०

यदि वाहमनृतदेवो अस्मि मोघं वा देवाँ अप्यूहे अग्ने ।
किमस्मभ्यं जातवेदो हृणीषे द्रोघवाचस्ते निर्ऋथं सचन्ताम् १४
अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य ।
अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह १५
यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह ।
इन्द्रस्तं हन्तु महता वधेन विश्वस्य जन्तोरधमस्पदीष्ट १६
प्र या जिगाति खर्गलेव नक्तमप द्रुहुस्तन्वं१ गूहमाना ।
वव्रमनन्तमव सा पदीष्ट ग्रावाणो घ्नन्तु रक्षस उपब्दैः १७
वि तिष्ठध्वं मरुतो विक्ष्वी३च्छत गृभायत रक्षसः सं पिनष्टन ।
वयो ये भूत्वा पतयन्ति नक्तभिर्ये वा रिपो दधिरे देवे अध्वरे १८ ३२९५
प्र वर्तय दिवोऽश्मानमिन्द्र सोमशितं मघवन्त्सं शिशाधि ।
प्राक्तो अपाक्तो अधरादुदक्तो३ऽभि जहि रक्षसः पर्वतेन १९
एत उ त्ये पतयन्ति श्वयातव इन्द्रं दिप्सन्ति दिप्सवोऽदाभ्यम् ।
शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजदशनिं यातुमद्भ्यः २०

इन्द्रो यातूनामभवत्पराशरो हविर्मथीनामभ्या३विवासताम् ।
अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एतु रक्षसः ॥ २१
उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम् ।
सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र ॥ २२
मा नो रक्षो अभि नड्यातुमाव- दपोच्छन्तु मिथुना ये किमीदिनः ।
पृथिवी नः पार्थिवात्पात्वंहसो ऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥ २३ ३३००
इन्द्र जहि पुमांसं यातुधान- मुत स्त्रियं मायया शाशदानाम् ।
विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम् ॥ २४
प्रति चक्ष्व वि चक्ष्वेन्द्र- श्च सोम जागृतम् ।
रक्षोभ्यो वधमस्यत- मशनिं यातुमद्भ्यः ॥ २५ × ३३०२

(८) इन्द्राविष्णू ।

॥ ३६८ ॥ (ऋ० १।१५५।१-३)
(३३०३-३३०५) दीर्घतमा औचथ्यः । जगती ।

प्र वः पान्तमन्धसो धियायते महे शूराय विष्णवे चार्चत ।
या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना ॥ १
त्वेषमित्था समरणं शिमीवतो- रिन्द्राविष्णू सुतपा वामुरुष्यति ।
या मर्त्याय प्रतिधीयमानमित् कृशानोरस्तुरसनामुरुष्यथः ॥ २
ता ईं वर्धन्ति मह्यस्य पौंस्यं नि मातरा नयति रेतसे भुजे ।
दधाति पुत्रोऽवरं परं पितु- र्नाम तृतीयमधि रोचने दिवः ॥ ३ ३३०५

॥ ३६९ ॥ (ऋ० ६।६९।१-८) (३३०६-३३१३) बार्हस्पत्यो भरद्वाजः । त्रिष्टुप् ।

सं वां कर्मणा समिषा हिनोमी- न्द्राविष्णू अपसस्पारे अस्य ।
जुषेथां यज्ञं द्रविणं च धत्त- मरिष्टैर्नः पथिभिः पारयन्ता ॥ १
या विश्वासां जनितारा मतीना- मिन्द्राविष्णू कलशा सोमधाना ।
प्र वां गिरः शस्यमाना अवन्तु प्र स्तोमासो गीयमानासो अर्कैः ॥ २
इन्द्राविष्णू मदपती मदाना- मा सोमं यातं द्रविणो दधाना ।
सं वामञ्जन्त्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः ॥ ३
आ वामश्वासो अभिमातिषाह इन्द्राविष्णू सधमादो वहन्तु ।
जुषेथां विश्वा हवना मतीना- मुप ब्रह्माणि शृणुतं गिरो मे ॥ ४

× ऋ० ७।१०४।१-२५

इन्द्राविष्णू तत् पनयाय्यं वां सोमस्य मद उरु चक्रमाथे ।
अकृणुतमन्तरिक्षं वरीयो ऽप्रथतं जीवसे नो रजांसि ५ ३३१०
इन्द्राविष्णू हविषा वावृधाना ऽग्राद्वाना नमसा रातहव्या ।
घृतासुती द्रविणं धत्तमस्मे समुद्रः स्थः कलशः सोमधानः ६
इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम् ।
आ वामन्धांसि मदिराण्यग्मन्नुप ब्रह्माणि शृणुतं हवं मे ७
उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः ।
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ८ ३३१३

॥ ३७० ॥ (ऋ० ७।९९।४-६) (३३१४-३३१६) मैत्रावरुणिर्वसिष्ठः त्रिष्टुप् ।

उरुं यज्ञाय चक्रथुरु लोकं जनयन्ता सूर्यमुषासमग्निम् ।
दासस्य चिद् वृषशिप्रस्य माया जघ्नथुर्नरा पृतनाज्येषु ४
इन्द्राविष्णू दृंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम्
शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान् ५
इयं मनीषा बृहती बृहन्तो ऽरुक्रमा तवसा वर्धयन्ती ।
ररे वां स्तोमं विदथेषु विष्णो पिन्वतमिषो वृजनेष्विन्द्र ६ ३३१६

(९) इन्द्राबृहस्पती ।

॥ ३७१ ॥ (ऋ० ४।४९।१-६) (३३१७-३३२४) वामदेवो गौतमः । गायत्री ।

इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती । उक्थं मदश्च शस्यते १
अयं वां परि षिच्यते सोम इन्द्राबृहस्पती । चारुर्मदाय पीतये २
आ न इन्द्राबृहस्पती गृहमिन्द्रश्च गच्छतम् । सोमपा सोमपीतये ३
अस्मे इन्द्राबृहस्पती रयिं धत्तं शतग्विनम् । अश्वावन्तं सहस्रिणम् ४ ३३२०
इन्द्राबृहस्पती वयं सुते गीर्भिर्हवामहे । अस्य सोमस्य पीतये ५
सोममिन्द्राबृहस्पती पिबतं दाशुषो गृहे । मादयेथां तदोकसा ६

॥ ३७२ ॥ (४।५०।१०-११) त्रिष्टुप्, १० जगती ।

इन्द्रश्च सोमं पिबतं बृहस्पते ऽस्मिन् यज्ञे मन्दसाना वृषण्वसू ।
आ वां विशन्त्विन्दवः स्वाभुवो ऽस्मे रयिं सर्ववीरं नि यच्छतम् १०
बृहस्पत इन्द्र वर्धतं नः सचा सा वां सुमतिर्भूत्वस्मे ।
अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः ११ ३३२४

॥ ३७३ ॥ (ऋ० ७।९७-९८।१०, ७) (३३२५) मैत्रावरुणिर्वसिष्ठः । त्रिष्टुप् ।

बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद् यूयं पात स्वस्तिभिः सदा नः ७ ३३२५

॥ ३७४ ॥ (ऋ० ८।९६।१५)
(३३२६) तिरश्चीराङ्गिरसो, द्युतानो वा मारुतः । त्रिष्टुप् ।

अध द्रप्सो अंशुमत्या उपस्थे ऽधारयत् तन्वं तित्विषाणः ।
विशो अदेवीरभ्या३चरन्ती बृहस्पतिना युजेन्द्रः ससाहे १५ ३३२६

(१०) देव–भूमि–बृहस्पतीन्द्राः ।

॥ ३७५ ॥ (ऋ० ६।४७।२०) (३३२७) गर्गो भारद्वाजः । त्रिष्टुप् ।

अगव्यूति क्षेत्रमागन्म देवा उर्वी सती भूमिरंहूरणाभूत् ।
बृहस्पते प्र चिकित्सा गविष्टा वित्था सते जरित्र इन्द्र पन्थाम् २० ३३२७

॥ ३७६ ॥ (अथर्व- ७।५१।१) (३३२८) अङ्गिराः । त्रिष्टुप् ।

बृहस्पतिर्नः परि पातु पश्चा दुतोत्तरस्मादधरादघायोः ।
इंद्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरीयः कृणोतु १ ३३२८

॥ ३७७ ॥ (अथर्व० २०।१३।१) (३३२९) जगती ।

इंद्रश्च सोमं पिबतं बृहस्पते ऽस्मिन्यज्ञे मन्दसाना वृषण्वसू ।
आ वां विशन्त्विन्दवः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतम् १ ३३२९

(११) इन्द्रापूषणौ ।

॥ ३७८ ॥ (ऋ० ६।५७।१-६) (३३३०-३३३५) बार्हस्पत्यो भरद्वाजः । गायत्री ।

इंद्रा नु पूषणा वयं सख्याय स्वस्तये । हुवेम वाजसातये १ ३३३०
सोममन्य उपासदत् पातवे चम्वोः सुतम् । करम्भमन्य इच्छति २
अजा अन्यस्य वह्नयो हरी अन्यस्य संभृता । ताभ्यां वृत्राणि जिघ्नते ३
यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः । तत्र पूषाभवत् सचा ४
तां पूष्णः सुमतिं वयं वृक्षस्य प्र वयामिव । इंद्रस्य चा रभामहे ५
उत पूषणं युवामहे ऽभीशूँरिव सारथिः । मह्या इंद्रं स्वस्तये ६ ३३३५

॥३७९॥ (अथर्व० ६।३।१) (३३३६) अथर्वा । पथ्या बृहती ।

पात नं इंद्रापूषणा ऽदितिः पान्तु मरुतः । अपां नपात्सिंधवः सप्त पातन पातु नो विष्णुरुत द्यौः १ ३३३६

(१२) ऋणंचयेन्द्रौ ।

॥३८०॥ (ऋ० ५।३०।१२-१५) (३३३७-३३४०) बभ्रुरात्रेयः । त्रिष्टुप् ।

भद्रमिदं रुशमा अग्ने अक्रन् गवां चत्वारि ददतः सहस्रा ।
ऋणंचयस्य प्रयता मघानि प्रत्यग्रभीष्म नृतमस्य नृणाम् १२
सुपेशसं माव सृजन्त्यस्तं गवां सहस्रै रुशमासो अग्ने ।
तीव्रा इंद्रममन्दुः सुतासो ऽक्तोर्व्युष्टौ परितक्म्यायाः १३
औच्छत् सा रात्री परितक्म्या याँ ऋणंचये राजनि रुशमानाम् ।
अत्यो न वाजी रघुरज्यमानो बभ्रुश्चत्वार्यसनत् सहस्रा १४
चतुः सहस्रं गव्यस्य पश्वः प्रत्यग्रभीष्म रुशमेष्वग्ने ।
घर्मश्चित् तप्तः प्रवृजे य आसी—दयस्मयस्तम्वादाम विप्राः १५ ३३४०

(१३) इन्द्र ऋभवश्च ।

॥३८१॥ (ऋ० ३।६०।५-७) (३३४१-३३४३) विश्वामित्रो गाथिनः । जगती ।

इंद्र ऋभुभिर्वाजवद्भिः समुक्षितं सुतं सोममा वृषस्वा गभस्त्योः ।
धियेषितो मघवन् दाशुषो गृहे सौधन्वनेभिः सह मत्स्वा नृभिः ५
इंद्र ऋभुमान् वाजवान् मत्स्वेह नो ऽस्मिन् त्सवने शच्या पुरुष्टुत ।
इमानि तुभ्यं स्वसराणि येमिरे व्रता देवानां मनुषश्च धर्मभिः ६
इंद्र ऋभुभिर्वाजिभिर्वाजयन्निह स्तोमं जरितुरुप याहि यज्ञियम् ।
शतं केतेभिरिषिरेभिरायवे सहस्रणीथो अध्वरस्य होमनि ७ ३३४३

॥३८२॥ (ऋ० ८।९३।३४) (३३४४) सुकक्ष आङ्गिरसः । गायत्री ।

इंद्र इषे ददातु न ऋभुक्षणमृभुं रयिम् । वाजी ददातु वाजिनम् ३४ ३३४४

(१४) इन्द्रोषसौ ।

॥३८३॥ (ऋ० ४।३०।९-११) (३३४५-३३४७) वामदेवो गौतमः । गायत्री ।

दिवश्चिद् घा दुहितरं महान् महीयमानाम् । उषासमिन्द्र सं पिणक् ९ ३३४५
अपोषा अनसः सरत् संपिष्टादह बिभ्युषी । नि यत् सीं शिश्नथद् वृषा १०
एतदस्या अनः शये सुसंपिष्टं विपाश्या । ससार सीं परावतः ११ ३३४७

(१५) इन्द्राश्वौ ।

॥३८४॥ (ऋ० ४।३२।२३-२४) (३३४८-३३४९) वामदेवो गौतमः । गायत्री ।

कनीनकेव विद्रधे नवे द्रुपदे अर्भके । बभ्रू यामेषु शोभेते २३
अरं म उस्रयाम्णे ऽरमनुस्रयाम्णे । बभ्रू यामेष्वस्रिधा २४ ३३४९

(१६) इन्द्रस्त्वष्टा।

॥३८५॥ (ऋ० २।३२।२-३) (३३५०-३३५१) गृत्समदः शौनकः। जगती।

मा नो गुह्या रिप आयोरहन् दभन् मा न आभ्यो रीरधो दुच्छुनाभ्यः।
मा नो वि यौः सख्या विद्धि तस्य नः सुम्नायता मनसा तत् त्वेमहे २ ३३५०
अहेळता मनसा श्रुष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतम्।
पद्याभिराशुं वचसा च वाजिनं त्वां हिनोमि पुरुहूत विश्वहा ३ ३३५१

(१७) इन्द्रो गावश्च।

॥३८६॥ (ऋ० ६।२८।२,८) (३३५२-३३५३) भरद्वाजो बार्हस्पत्यः। जगती, ८ अनुष्टुप्।

इन्द्रो यज्वने पृणते च शिक्ष—त्युपेद् ददाति न स्वं मुषायति।
भूयोभूयो रयिमिदस्य वर्धय—न्नभिन्ने खिल्ये नि दधाति देवयुम् २
उपेदमुपपर्चन—मासु गोषूप पृच्यताम्। उप ऋषभस्य रेत—स्युपेन्द्र तव वीर्ये ८ ३३५३

(१८) इन्द्राकुत्सौ।

॥३८७॥ (ऋ० ५।३१।९) (३३५४) अवस्युरात्रेयः। त्रिष्टुप्।

इन्द्राकुत्सा वहमाना रथेना—ऽऽ वामत्या अपि कर्णे वहन्तु।
निः षीमद्भ्यो धमथो निः षधस्था—न्मघोनो हृदो वरथस्तमांसि ९ ३३५४

(१९) इन्द्रद्यावापृथिव्यः।

॥३८८॥ (ऋ० १०।५९।१०) (३३५५) बन्धुःश्रुतबन्धुर्विप्रबन्धुर्गौपायनाः। त्रिष्टुप् (पंक्त्युत्तरा)।

समिन्द्रेरय गामनड्वाहं य आवहदुशीनराण्या अनः।
भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् १० ३३५५

(२०) इन्द्रापर्वतौ।

॥३८९॥ (ऋ० ३।५३।१) (३३५६) गाथिनो विश्वामित्रः। त्रिष्टुप्।

इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः।
वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिळया मदन्ता १ ३३५६

(२१) इन्द्रः, सोमो, ब्रह्मणस्पतिर्दक्षिणा च।

॥३९०॥ (ऋ० १।१८।४-५) (३३५७-३३५८) मेधातिथिः काण्वः। गायत्री।

स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः। सोमो हिनोति मर्त्यम् ४
त्वं तं ब्रह्मणस्पते सोम इन्द्रश्च मर्त्यम्। दक्षिणा पात्वंहसः ५ ३३५८

(२२) इन्द्राब्रह्मणस्पती ।

॥३९१॥ (ऋ० २।२४।१२) (३३५९) गृत्समदः शौनकः । त्रिष्टुप् ।

विश्वं सत्यं मघवाना युवोरिदा॒पश्चन प्र मिनन्ति व्रतं वाम् ।
अच्छेन्द्राब्रह्मणस्पती हविर्नो ऽन्नं युजेव वाजिना जिगातम् १२ ३३५९

॥३९२॥ (ऋ० ७।९७।३,९) (३३६०-३३६१) मैत्रावरुणिर्वसिष्ठः । त्रिष्टुप् ।

तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे ।
इन्द्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा ३ ३३६०
इयं वां ब्रह्मणस्पते सुवृक्ति॒र्ब्रह्मेन्द्राय वज्रिणे अकारि ।
अविष्टं धियो जिगृतं पुरंधी॒र्जजस्तमर्यो वनुषामरातीः ९ ३३६१

(२३) दुन्दुभीन्द्रौ ।

॥३९३॥ (ऋ० ६।४७।३१) (३३६२) गर्गो भारद्वाजः । त्रिष्टुप् ।

आमूरज प्रत्यावर्तयेमाः केतुमद् दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरो ऽस्माकमिन्द्र रथिनो जयन्तु ३१ ३३६२

(२४) इन्द्रसूर्यादयः ।

॥३९४॥ (अथर्व० १९।७०।१) (३३६३) ब्रह्मा । गायत्री ।

इन्द्र जीव सूर्य जीव देवा जीवा जीव्यासमहम् । सर्वमायुर्जीव्यासम् १ ३३६३

इन्द्रदेवता-पुनरुक्त-मन्त्रभागाः।

ऋग्वेदस्य प्रथमं मण्डलम्।

[३] १।३।६ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।
सुते दधिष्व नश्चनः ।
(२७०८) १०।१०४।६ (अष्टको वैश्वामित्रः । इन्द्रः)
उप ब्रह्माणि हरिवो हरिभ्यां सोमस्य याहि पीतये सुतस्य ।

[४] १।४।१ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
सुदुघामिव गोदुहे ।
जुहूमसि... ।
(५१८) ८।५२ (वालखिल्यं ४)।४ (आयुः काण्वः । इन्द्रः)
सुदुघामिव गोदुहे जुहूमसि ।

[६] १।४।३ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
विद्याम सुमतीनाम् ।
(२६७८) १०।८९।१७ (रेणुर्वैश्वामित्रः । इन्द्रः)
विद्याम सुमतीनां नवानाम् ।

[७] १।४।४ परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम्... सखिभ्य आ वरम् ।
९।४५।२ (अयास्य आङ्गिरसः । पवमानः सोमः)
देवान्त्सखिभ्य आ वरम् ।

[९] १।४।६ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
स्यामेदिन्द्रस्य शर्मणि ।
८।४७।५ (त्रितः आप्त्यः । आदित्याः)

[११] १।४।८ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
प्रावो वाजेषु वाजिनम् ।
(१०८९) १।१७६।५ (अगस्त्यो मैत्रावरुणिः । इन्द्रः)

[१३] १।४।१० (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
यो रायो३वनिर्महान्त्सुपारः सुन्वतः सखा ।
तस्मा इन्द्राय गायत ।
(१९१) ८।३२।१३ (मेधातिथिः काण्वः । इन्द्रः)
यो रायो३वनिर्महान्त्सुपारः सुन्वतः सखा ।
तमिन्द्रमभि गायत ।
(१७) १।५।४ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
तस्मा इन्द्राय गायत ।

[१४] १।५।१ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
इन्द्रमभि प्र गायत ।
(२३९७) ८।९२।१ (श्रुतकक्षः सुकक्षो वा आङ्गिरसः । इन्द्रः)

[१५] १।५।२ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
पुरूतमं पुरूणामीशानं वार्याणाम् ।
इन्द्रं सोमे सचा सुते ।
(२०८८) ६।४५।२९ (शंयुर्बार्हस्पत्यः । इन्द्रः)
पुरूतमं पुरूणां ।
१।२४।३ (शुनःशेपः आजीगर्तिः कृत्रिमो देवरातो वैश्वामित्रो वा । सविता)
ईशानं वार्याणाम् ।
(अग्निः १४२१) ८।७१।१३ (सुदीति-पुरुमीळ्हावाङ्गिरसौ, तयोर्वान्यतरः । अग्निः)
ईशे यो वार्याणाम् ।
१०।९।५ (त्रिशिरास्त्वाष्ट्रः सिन्धुद्वीप आम्बरीषो वा। आपः)
ईशाना वार्याणां ।
(४७१) ८।४५।२९ (त्रिशोकः काण्वः । इन्द्रः)
इन्द्रं सोमे सचा सुते ।

[१७] १।५।४ (१३) १।४।१०

[१८] १।५।५ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
सुता इमे शुचयो यन्ति वीतये
सोमासो दध्याशिरः ।
(२४५१) ८।२३।२२ (सुकक्ष आङ्गिरसः । इन्द्रः)
सुता इम उशन्तो यन्ति वीतये ।
१।१३७।२ (परुच्छेपो दैवोदासिः । मित्रावरुणौ)
सोमासो दध्याशिरः ।
५।५१।७ (स्वस्त्यात्रेयः । विश्वेदेवाः)
सोमासो दध्याशिरः ।
(२२३८) ७।३२।४ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
९।२२।३(असितःकाश्यपो देवलो वा । पवमानःसोमः)
९।६३।१५ (निध्रुविः काश्यपः । पवमानः सोमः)
९।१०१।१२ (मनुः सांवरणः। पवमानः सोमः)

[२१] १।५।८ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो ।
त्वां वर्धन्तु नो गिरः ।
(अग्निः १३६१) ८।४४।१९ (विरूप आङ्गिरसः । अग्निः)
त्वामग्ने मनीषिणस्त्वां हिन्वन्ति चित्तिभिः ।
त्वां वर्धन्तु नो गिरः ।

[२३] १।५।१० (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
ईशानो यवया वधम् ।
(२८१८) १०।१५२।५ (शासो भारद्वाजः । इन्द्रः)
वरीयो यवया वधम् ।
[३०] १।७।३ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
आ सूर्यं रोहयद्दिवि ।
... ... ऐरयत् ।
(१३९०) ८।८९।७ (नृमेध-पुरुमेधावाङ्गिरसौ । इन्द्रः)
ऐरय आ सूर्यं रोहयो दिवि ।
९।१०७।७ (सप्तर्षयः । पवमानः सोमः)
आ सूर्यं रोहयो दिवि ।
(अग्निः १७०६) १०।१५६।४ (केतुराग्नेयः। अग्निः)
आ सूर्यं रोहयो दिवि ।
[३१] १।७।४ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
उग्र उग्राभिरूतिभिः ।
(१००४) १।१२९।५ (परुच्छेपो दैवोदासिः । इन्द्रः)
उग्राभिरुग्रोतिभिः ।
[३५] १।७।८ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
ईशानो अप्रतिष्कुतः ।
(९४३) १।८४।७ (गोतमो राहूगणः । इन्द्रः)
ईशानो अप्रतिष्कुतः ।
[३६] १।७।९ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
य एवाश्चर्षणीनां ।
(१०८६) १।१७६।२ (अगस्त्यो मैत्रावरुणः । इन्द्रः)
[३७] १।७।१० (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
... हवामहे जनेभ्यः ।
अस्माकमस्तु केवलः ।
(अग्निः १९१५) १।१३।१० (मेधातिथिः काण्वः । त्वष्टा)
... ह्वये ।
अस्माकमस्तु केवलः ।
[४१] १।८।४ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
सासह्याम पृतन्यतः ।
(३१०७) ८।४०।७ (नाभाकः काण्व. । इन्द्राग्नी)
सासह्याम पृतन्यतो ।
९।६१।२९ (अमहीयुराङ्गिरसः । पवमानः सोमः)
[४२] १।८।५ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
द्यौर्न प्रथिना शवः ।
(५४४) ८।५६। (वालखिल्यं ८)।१ (पृषध्रः काण्वः । इन्द्रः)
[४४] १।८।७ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
समुद्र इव पिन्वते ।

(२९२) ८।१२।५ (पर्वतः काण्वः । इन्द्रः)
[५०] १।९।३ स्तोमेभिर्विश्वचर्षणे ।
(अग्निः ८६५) ५।१४।६ (सुतंभर आत्रेयः । अग्निः)
स्तोमेभिर्विश्वचर्षणिम् ।
[५३] १।९।६ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
राये रभस्वतः ।
तुविद्युम्न यशस्वतः ।
(अग्निः ५९९) ३।१६।६ (उत्कीलः कात्यः । अग्निः)
सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता ।
[५५] १।९।८ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
अस्मे धेहि श्रवो बृहद् ।
(अग्निः ८७) १।४४।२ (प्रस्कण्वः काण्वः । अग्निः,अश्विनौ,उषा)
(६०९) ८।६५।९ (प्रगाथः काण्वः । इन्द्रः)
[५७] १।९।१० (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
इन्द्राय शूषमर्चति ।
१०।९६।२ (बरुराङ्गिरसः सर्वहरिर्वा ऐन्द्रः । हरिः)
इन्द्राय शूषं हरिवन्तमर्चत ।
(२७७८) १०।१३३।१ (सुदाः पैजवनः । इन्द्रः)
[६१] १।१०।४ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ।
१०।१४१।६ (अग्निस्तापसः । विश्वेदेवाः)
ब्रह्म यज्ञं च वर्धय ।
[६२] १।१०।५ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
उक्थमिन्द्राय शंस्यं ।
(१७६४) ५।३९।५ (अत्रिर्भौमः । इन्द्रः)
[६४] १।१०।७ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
इन्द्र त्वादातमिद्यशः ।
कृणुष्व राधो अद्रिवः ।
(१३६९) ३।४०।६ (विश्वामित्रो गाथिनः । इन्द्रः)
इन्द्र त्वादातमिद्यशः ।
(५८९) ८।६४।१ (प्रगाथः काण्वः । इन्द्रः)
कृणुष्व ... ... ।
[६५] १।१०।८ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
ऋघायमाणमिन्वतः ।
जेषः स्वर्वतीरपः ।
(१०८५) १।१७६।१ (अगस्त्यो मैत्रावरुणः । इन्द्रः)
ऋघायमाण इन्वसि ।
(३११०) ८।४०।१० (नाभाकः काण्वः । इन्द्राग्नी)
तं शिशीता सुवृक्तिभिस्त्वेषं सत्वानमृग्मियम् ।

उतो नु चिद्य ओजसा शुष्णस्याण्डानि भेदति
जेषत्स्वर्वतीरपो नभन्तामन्यके समे ॥

(३१११) ८।४०।११ (नाभाकः काण्वः । इन्द्राग्नी)

तं शिशीता स्वध्वरं सत्यं सत्वानमृत्वियम् ।
उतो नु चिद्य ओहत आण्डा शुष्णस्य भेदत्यजैः
स्वर्वतीरपो नभन्तामन्यके समे ॥

[६७] १।१०।१० (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)

वृषन्तमस्य हूमह ऊतिं ।

(१७३८) ५।३५।३ (प्रभूवसुराङ्गिरसः । इन्द्रः)

वृषन्तमस्य हूमहे ।

[७०] १।११।१ (जेता माधुच्छन्दसः । इन्द्रः)

रथीतमं रथीनां ।

(४४९) ८।४५।७ (त्रिशोकः काण्वः । इन्द्रः)

रथीतमो रथीनाम् ।

[७१] १।११।२ (जेता माधुच्छन्दसः । इन्द्रः)

जेतारमपराजितम् ।

(अग्निः ९१६) ५।२५।६ (वसूयव आत्रेयाः । अग्निः)

१।११।८ (जेता माधुच्छन्दसः । इन्द्रः)

इन्द्रमीशानमोजसाभि स्तोमा अनूषत ।

(६२८) ८।७६।१ (कुरुसुतिः काण्वः । इन्द्रः)

इन्द्रमीशानमोजसा ।

(३०६२) ६।६०।७ (भरद्वाजो बार्हस्पत्यः । इन्द्राग्नी)

गृणामिमे ऽभि स्तोमा अनूषत ।

१।१५।१ (मेधातिथिः काण्वः । इन्द्रः [ऋतुदेवता])

त्वा विशन्त्विन्दवः ।

(२४१८) ८।९२।२२ (श्रुतकक्षः सुकक्षो वा
आङ्गिरसः । इन्द्रः)

आ त्वा ... ।

[८०] १।१६।३ (मेधातिथिः काण्वः । इन्द्रः)

इन्द्रं प्रातर्हवामह इन्द्रं प्रयत्यध्वरे ।
इन्द्रं सोमस्य पीतये ।

(१६०) ८।३।५ (मेधातिथिः काण्वः । इन्द्रः)

इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ।

(१३८५) ३।४२।४ (विश्वामित्रो गाथिनः । इन्द्रः)

इन्द्रं सोमस्य पीतये स्तोमैरिह हवामहे ।

(४०८) ८।१७।१५ (इरिम्बिठिः काण्वः । इन्द्रः)

इन्द्रं सोमस्य पीतये ।

(२४०१) ८।९२।५ (श्रुतकक्षः सुकक्षो वा आङ्गिरसः । इन्द्रः)

इन्द्रं सोमस्य पीतये ।

(९८६) ८।९७।११ (रेभः काश्यपः । इन्द्रः)

इन्द्रं सोमस्य पीतये ।

९।१२।२ (असितः काश्यपो देवलो वा । पवमानः सोमः)

इन्द्रं सोमस्य पीतये ।

[८१] १।१६।४ (मेधातिथिः काण्वः । इन्द्रः)

उप नः सुतमा गहि हरिभिरिन्द्र ।

(१३८२) ३।४२।१ (विश्वामित्रो गाथिनः । इन्द्रः)

उप नः सुतमा गहि सोममिन्द्र गवाशिरम् ।
हरिभ्यां...... ।

५।७१।३ (बाहुवृक्त आत्रेयः । मित्रावरुणौ)

उप नः सुतमा गतं ।

[८२] १।१६।५ (मेधातिथिः काण्वः । इन्द्रः)

आ गह्युपेदं सवनं सुतम् ।

(३००५). १।२१।४ (मेधातिथिः काण्वः । इन्द्राग्नी)

उपेदं सवनं सुतम् ।
इन्द्राग्नी एह गच्छताम् ।

(३०६४) ६।६०।९ (भरद्वाजो बार्हस्पत्यः । इन्द्राग्नी)

आ गच्छतं नरोपेदं सवनं सुतम् ।
इन्द्राग्नी...... ।

[८३] १।१६।६ इमे सोमास इन्दवः ।

९।४६।३ (अयास्य आङ्गिरसः । पवमानः सोमः)

एते सोमास इन्दवः ।

[८५] १।१६।८ (मेधातिथिः काण्वः । इन्द्रः)

वृत्रहा सोमपीतये ।

(२४४९) ८।९३।२० (सुकक्ष आङ्गिरसः । इन्द्रः)

[८६] १।१६।९ (मेधातिथिः काण्वः । इन्द्रः)

सेमं नः काममा पृण ।

(५९४) ८।६४।६ (प्रगाथः काण्वः । इन्द्रः)

अस्माकं काममा पृण ।

[६८८-६९१] १।२८।१-४ शुनःशेप आजीगर्तिः स कृत्रिमो
विश्वामित्रो देवरातः । इन्द्रः)

उलूखलसुतानामवेद्विन्द्र जल्गुलः ।

[६९२] १।२९।१ (शुनःशेप आजीगर्तिः । इन्द्रः)

अनाशस्ताइव स्मसि ।
आ तू न इन्द्र शंसय ।

२।४१।१६ (गृत्समदः शौनकः । सरस्वती)

अप्रशस्ताइव स्मसि प्रशस्तिम् ।

[६९३] १।२९।२ (शुनःशेप आजीगर्तिः । इन्द्रः)

शिप्रिन् वाजानां पते ।
आ तू न इन्द्र शंसय ।

(२०६९) ६।४५।१० (शंयुर्बार्हस्पत्यः। इन्द्रः)
इन्द्र वाजानां पते।
[७०५] १।३०।७ (शुनःशेप आजीगर्तिः। इन्द्रः)
सखाय इन्द्रमूतये।
(४१७) ८।२१।९ (सोभरिः काण्वः। इन्द्रः)
[७०६] १।३०।८ (शुनःशेप आजीगर्तिः। इन्द्रः)
सहस्रिणीभिरूतिभिः।
(२७८८) १०।१३४।४ (पूर्वार्धः) मान्धाता यौवनाश्वः। इन्द्रः)
[७०७] १।३०।९ (शुनःशेप आजीगर्तिः। इन्द्रः)
अनु प्रत्नस्यौकसो। यं ते पूर्वं ...... ॥
(२३२०) ८।६९।१८ (प्रियमेध आङ्गिरसः। इन्द्रः)
अनु प्रत्नस्यौकसः। पूर्वा......।
[७०८] १।३०।१० (शुनःशेप आजीगर्तिः। इन्द्रः)
सखे वसो जरितृभ्यः।
(१४३९) ३।५१।६ (विश्वामित्रो गाथिनः। इन्द्रः)
सखे वसो जरितृभ्यो वयो धाः।
(अग्निः १४१७) ८।७१।९ (सुदीति-पुरुमीळ्हावाङ्गिरसौ तयोर्वान्यतरः। अग्निः)
[७१५] १।३२।१ (हिरण्यस्तूप आङ्गिरसः। इन्द्रः)
इन्द्रस्य नु वीर्याणि प्र वोचं।
(१२१९) २।२१।३ (गृत्समदः शौनकः। इन्द्रः)
इन्द्रस्य वोचं प्र कृतानि वीर्या।
[७१७] १।३२।३ (हिरण्यस्तूप आङ्गिरसः। इन्द्रः)
त्रिकद्रुकेष्वपिबत्सुतस्य।
अहन्नेनं प्रथमजामहीनाम्।
(११६२) २।१५।१ (गृत्समदः शौनकः। इन्द्रः)
त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिन्द्रो जघान।
[७१८] १।३२।४ आत्सूर्यं जनयन्द्यामुषासं।
(१९७२) ६।३०।५ साकं सूर्यं— ।
[७१९] १।३२।५ अहिः शयत उपपृक्पृथिव्याः।
(२६७५) १०।८९।१४ पृथिव्या आपृगमुया शयन्ते।
[७२६] १।३२।१२ (हिरण्यस्तूप आङ्गिरसः। इन्द्रः)
अवासृजः सर्तवे सप्त सिन्धून्।
(११३३) २।१२।१२ (गृत्समदः शौनकः। इन्द्रः)
अवासृजत् सर्तवे— ।
[७२९] १।३२।१५ अराान्न नेमिः परि ता बभूव।
(अग्निः ३१३) १।१४१।९ (दीर्घतमा औचथ्यः। अग्निः)
अराान्न नेमिः परिभूरजायथाः।
[७३४] १।३३।५ प्र यद्दिवो हरिवः स्थातरुग्र।
(१९९५) ६।४१।३ एतं पिब हरिवः स्थातरुग्र।

[७४१] १।३३।१२ (हिरण्यस्तूप आङ्गिरसः। इन्द्रः)
यावत्तरो मघवन् यावदोजो।
(३३३७) ७।९१।४ (वसिष्ठो मैत्रावरुणिः। इन्द्रवायू)
यावत्तरस्तन्वो३ यावदोजो।
[७४३] १।३३।१४ (हिरण्यस्तूप आङ्गिरसः। इन्द्रः)
आवः कुत्समिन्द्र यस्मिञ्चाकन् प्रावो युध्यन्तं वृषभं दशद्युम्।
(१०७३) १।१७४।५ (अगस्त्यो मैत्रावरुणिः। इन्द्रः)
वह कुत्समिन्द्र यस्मिञ्चाकन्।
(१९५०) ६।२६।४ (भरद्वाजो बार्हस्पत्यः। इन्द्रः)
आवो युध्यन्तं वृषभं दशद्युम्।
[७४७] १।५१।३ (सव्य आङ्गिरसः। इन्द्रः)
त्वं गोत्रमङ्गिरोभ्योऽवृणोरपोत्।
९।८६।२३ (पृश्नयोऽजाः। पवमानः सोमः)
सोम गोत्रमङ्गिरोभ्योऽवृणोरप।
[७५०] १।५१।६ अरन्धयोऽतिथिग्वाय शम्बरम्।
(१०१७) १।१३०।७ अतिथिग्वाय शम्बरम्।
[७५२] १।५१।८ शाकी भव यजमानस्य चोदिता।
(२५९०) १०।४९।१ (वैकुण्ठ इन्द्रः। इन्द्रः)
अहं भुवं यजमानस्य चोदिता।
[७५७] १।५१।१३ (सव्य आङ्गिरसः। इन्द्रः)
— सुन्वते।
विश्वेत्ता ते सवनेषु प्रवाच्या।
(९९६) ८।१००।६ (नेमो भार्गवः। इन्द्रः)
विश्वेत्ता ते सवनेषु प्रवाच्या ... ... सुन्वते।
१०।३९।४ (घोषा काक्षीवती। अश्विनौ)
विश्वेत्ता वां सवनेषु प्रवाच्या।
[७६०] १।५२।१ एन्द्रं ववृत्यामवसे सुवृक्तिभिः।
१।१६८।१ (अगस्त्यो मैत्रावरुणिः। मरुतः)
मंह ववृत्यामवसे— ।
[७६१] १।५२।२ इन्द्रो यद्वृत्रमवधीन्नदीवृतम्।
(३१३)८।१२।२६ यदा वृत्रं नदीवृतं शवसा वज्रिन्नवधीः।
[७६४,७७३] १।५२।५,१४ अभि (१४ सोम) स्ववृष्टिं मदे अस्य युध्यतो।
[७७४] १।५२।१५ (सव्य आङ्गिरसः। इन्द्रः)
विश्वे देवासो अमदन्ननु त्वा।
(८४५) १।१०३।७ (कुत्स आङ्गिरसः। इन्द्रः)
[७८५] १।५३।११ (सव्य आङ्गिरसः। इन्द्रः)
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः।

(अग्निः १६७३) १०।११५।८ (उपस्तुतो वार्ष्टिहव्यः। अग्निः)
[७८८] १।५४।३ स्वक्षत्रं यस्य धृषतो धृषन्मनः ।
(१७३९) ५।३५।४ स्वक्षत्रं ते धृषन्मनः ।
[७८९] १।५४।४ (सव्य आङ्गिरसः । इन्द्रः)
त्वं दिवो बृहतः सानु कोपयो ऽव त्मना धृषता
शम्बरं भिनत् ।
(२१३८) ७।१८।२० (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
आव त्मना बृहतः शम्बरं भेत् ।
[७९६] १।५४।११ (सव्य आङ्गिरसः । इन्द्रः)
रक्षा च नो मघोनः पाहि सूरीन् राये ।
१०।६१।२२ (नाभानेदिष्ठो मानवः । विश्वेदेवाः)
— सूरीन् ।
[७९८] १।५५।२ (सव्य आङ्गिरसः । इन्द्रः)
इन्द्रः सोमस्य पीतये वृषायते ।
(२९१) ८।१२।१२ (पर्वतः काण्वः । इन्द्रः)
इन्द्रः सोमस्य पीतये ।
[८०६] १।५६।२ (सव्य आङ्गिरसः । इन्द्रः)
समुद्रं न संचरणे सनिष्यवः ।
४।५५।६ (वामदेवो गौतमः । विश्वेदेवाः)
[८०८] १।५६।४ इन्द्रं सिषक्त्युषसं न सूर्यः ।
९।८४।२ (प्रजापतिर्वाच्यः । पवमानः सोमः)
इन्दुः सिषक्त्युषसं न सूर्यः ।
[८०९] १।५६।५ (सव्य आङ्गिरसः । इन्द्रः)
अहन् वृत्रं निरपामौब्जो अर्णवम् ।
१।८५।९ (गोतमो राहूगणः । मरुतः)
अहन् वृत्रं निरपामौब्जदर्णवम् ।
[८६०] १।६१।५ अस्मा इदु सप्तिमिव श्रवस्या ।
९।९६।१६ (प्रतर्दनो दैवोदासिः । पवमानः सोमः)
अभि वाजं सप्तिरिव श्रवस्या ।
[८७१] १।६२।२ (नोधा गौतमः । इन्द्रः)
येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो
गा अविन्दन् ।
९।९७।३९ (पराशरः शाक्त्यः । पवमानः सोमः)
येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि
गा अद्रिमुष्णन् ।
[८७४] १।६२।३ (नोधा गौतमः । इन्द्रः)
बृहस्पतिर्भिनदद्रिं विदद्गाः ।
१०।६८।११ (अयास्य आङ्गिरसः । बृहस्पतिः)
[८८३] १।६२।१२ (नोधा गौतमः । इन्द्रः)
शिक्षा शचीवस्तव नः शचीभिः ।
(१३०) ८।२।१५ (मेधातिथिः काण्वः
प्रियमेधश्चाङ्गिरसः । इन्द्रः)
शिक्षा शचीवः शचीभिः ।
[८९१] १।६३।७ (नोधा गौतमः । इन्द्रः)
अंहो राजन् वरिवः पूरवे कः ।
(१५५३) ४।२१।१० (वामदेवो गौतमः । इन्द्रः)
सम्राडहन्ता वृत्रं वरिवः पूरवे कः ।
[९००-९१६] १।८०।१-१६ अर्चन्ननु स्वराज्यम् ।
[९०५] १।८०।६ (गोतमो राहूगणः । इन्द्रः)
जिघ्नते वज्रेण शतपर्वणा ।
(२४८) ८।६।६ (वत्सः काण्वः । इन्द्रः)
वज्रेण शतपर्वणा । शिरो बिभेद ... ...॥
(६२१) ८।७६।२ (कुरुसुतिः काण्वः । इन्द्रः)
आभिनच्छिरः ।
वज्रेण शतपर्वणा ।
(१३८६) ८।८९।३ (नृमेध-पुरुमेधावाङ्गिरसौ । इन्द्रः)
वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ।
[९०७] १।८०।८ महत्त इन्द्र वीर्यं ।
(५३९) ८।५५। (वाल० ७) १ भूरीदिन्द्रस्य वीर्यम् ।
[९०८] १।८०।९ (गोतमो राहूगणः । इन्द्रः)
इन्द्राय ब्रह्मोद्यतम् ।
(१३१२) ८।६९।९ (प्रियमेध आङ्गिरसः । इन्द्रः)
[९०९] १।८०।१० महत्तदस्य पौंस्यं ।
(५८०) ८।६३।३ (प्रगाथः काण्वः । इन्द्रः)
स्तुषे तदस्य पौंस्यम् ।
["] १।८०।१० (गोतमो राहूगणः । इन्द्रः)
वृत्रं जघन्वाँ असृजद् ।
(१५१५) ४।१८।७ (वामदेवो गौतमः अदितिः
ऋषिका । इन्द्रः, वामदेवः)
... असृजद्धि सिन्धून् ।
(१५२९) ४।१९।८ (वामदेवो गौतमः । इन्द्रः)
[९१०] १।८१।५ आ पप्रौ पार्थिवं रजो ।
६।६१।११ (भरद्वाजो बार्हस्पत्यः । सरस्वती)
आपप्रुषी पार्थिवान्युरु रजो अन्तरिक्षम् ।
["] १।८१।५ (गोतमो राहूगणः । इन्द्रः)
न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यते ।
(२२५७) ७।३२।२३ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो
न जनिष्यते ।

[९१०] १।८१।५ अति विश्वं ववक्षिथ ।
(८३५) १।१०२।८ अतीदं विश्वं भुवनं ववाक्षिथ ।
[९१३] १।८१।८ अथा नोऽविता भव ।
१।९१।९ (गोतमो राहूगणः । सोमः)
ताभिर्नोऽविता भव ।
[९१४] १।८१।९ (गोतमो राहूगणः । इन्द्रः)
विश्वं पुष्यन्ति वार्यम् ।
अदाशुषां तेषां नो वेद आ भर ।
(अग्निः ८०६) ५।६।६ (वसुश्रुत आत्रेयः । अग्निः)
विश्वं —
(२७७९) १०।१३३।२ (सुदाः पैजवनः । इन्द्रः)
विश्वं पुष्यसि वार्यं ।
(४५७) ८।४५।१५ (त्रिशोकः काण्वः । इन्द्रः)
अदाशुरिः ... ।
तस्य नो वेद आ भर ।
[९१५-२९] १।८२।१-५ योजा न्विन्द्र ते हरी ।
[९१६] १।८२।२ (गोतमो राहूगणः । इन्द्रः)
विप्रा नविष्ठया मती ।
८।२५।२४ (विश्वमना वैयश्वः । मित्रावरुणौ)
[९१७] १।८२।३ (गोतमो राहूगणः । इन्द्रः)
सुसंदृशं त्वा वयं ।
१०।१५८।५ (चक्षुः सौर्यः । सूर्यः)
[९३१] १।८३।१ अश्वावति प्रथमो गोषु गच्छति ।
२।२५।४ (गृत्समदः शौनकः । ब्रह्मणस्पतिः)
स सत्वभिः प्रथमो गोषु गच्छति ।
[९३८] १।८४।२ ऋषीणां च स्तुतीरुप ।
(३९७) ८।१७।४ (इरिम्बिठिः काण्वः । इन्द्रः)
अस्माकं सुष्टुतीरुप ।
[९३९] १।८४।३ (गोतमो राहूगणः । इन्द्रः)
अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ।
(१३३५) ३।३७।२ (विश्वामित्रो गाथिनः । इन्द्रः)
अर्वाचीनं सु ते मन ।
इन्द्र कृण्वन्तु ... ।
[९४०] १।८४।४ (गोतमो राहूगणः । इन्द्रः)
इममिन्द्र सुतं पिब ।
(२७८) ८।६।३६ (वत्सः काण्वः । इन्द्रः)
[९४३] १।८४।७ (गोतमो राहूगणः । इन्द्रः)
वसु मर्ताय दाशुषे ।
९।९८।४ (अम्बरीषो वार्षागिरः ऋजिश्वा भारद्वाजश्च ।
पवमानः सोमः)

[९४३] १।८४।७ ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ।
(३५) १।७।८ (मधुच्छन्दा वैश्वामित्रः । इन्द्रः)
ईशानो अप्रतिष्कुतः ।
[९४५] १।८४।९ (गोतमो राहूगणः । इन्द्रः)
सुतावाँ आविवासति ।
(९७९) ८।९७।४ (रेभः काश्यपः । इन्द्रः)
सुतावाँ आ विवासति ।
[९४६ ९४८] १।८४।१०-१२ वस्वीरनु स्वराज्यम् ।
[९४७] १।८४।११ (गोतमो राहूगणः । इन्द्रः)
ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।
(२३०६) ८।६९।३ (प्रियमेध आङ्गिरसः । इन्द्रः)
ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः ।
[९४९] १।८४।१३ जघान नवतीर्नव ।
९।६१।१ (अमहीयुराङ्गिरसः । पवमानः सोमः)
अवाहन्नवतीर्नव ।
[९५०] १।८४।१४ (गोतमो राहूगणः । इन्द्रः)
पर्वतेष्वपश्रितम् ।
५।६१।१९ (श्यावाश्व आत्रेयः । रथवीतिर्दार्भ्यः)
[९५१] १।८४।१९ न त्वदन्यो मघवन्नस्ति मर्डिता ।
(६२५) ८।६६।१३ (कलिः प्रागाथः । इन्द्रः)
नहि त्वदन्यः पुरुहूत कश्चन मघवन्नस्ति मर्डिता ।
[९५७-९७१] १।१००।१-१५ (वार्षागिराः ऋज्राश्वाऽम्बरीष-
सहदेव-भयमान-सुराधसः । इन्द्रः)
मरुत्वान्नो भवत्विन्द्र ऊती ।
[९६७] १।१००।११ (ऋज्राश्वाऽम्बरीष० । इन्द्रः)
अपां तोकस्य तनयस्य जेषे ।
(२०५३) ६।४४।१८ (शंयुर्बार्हस्पत्यः । इन्द्रः)
[९६८] १।१००।१२ (ऋज्राश्वाऽम्बरीष० । इन्द्रः)
सहस्रचेताः शतनीथ ऋभ्वा ।
(अग्निः १६३१) १०।६९।७ (सुमित्रो वाध्र्यश्वः । अग्निः)
सहस्रस्तरीः शतनीथ ऋभ्वा ।
[९७१] १।१००।१५ आपश्चन शवसो अन्तमापुः ।
१।१६७।९ (अगस्त्यो मैत्रावरुणिः । मरुतः)
आराच्चिच्छवसो अन्तमापुः ।
[९७५] १।१००।१९ (ऋज्राश्वाऽम्बरीष० । इन्द्रः)
(८३८) १।१०२।११ (कुत्स आङ्गिरसः । इन्द्रः)
विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः
सनुयाम वाजम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः
पृथिवी उत द्यौः ॥

[८२३] १।१०१।१-७ मरुत्वन्तं सख्याय हवामहे ।
[८२४-२५] १।१०१।८-९ त्वाया हविश्चकृमा सत्यराध: ।
(९ ब्रह्मवाहः)
[८३१] १।१०२।४ (कुत्स आङ्गिरसः । इन्द्रः)
अस्मभ्यमिन्द्र वरिवः सुगं कृधि प्र शत्रूणां
मघवन् वृष्ण्या रुज ।
(२०१३) ६।४४।१८ (शंयुर्बार्हस्पत्यः । इन्द्रः)
मघवन्निन्द्र पृत्स्वस्मभ्यं महि वरिवः सुगं कः।
[८३५] १।१०२।८ अतीदं विश्वं भुवनं ववक्षिथ ।
(९२०) १।८१।५ (गोतमो राहूगणः । इन्द्रः)
अति विश्वं ववक्षिथ ।
["] १।१०२।८ (कुत्स आङ्गिरस । इन्द्रः)
अशत्रुरिन्द्र जनुषा सनादसि ।
(४२१) ८।२१।१३ (सोभरिः काण्वः । इन्द्रः)
अनापिरिन्द्र -- ।
(१७७९) १०।१३३।२ (सुदाः पैजवनः । इन्द्रः)
अशत्रुरिन्द्र जज्ञिषे ।
[८३८] १।१०२।११ = (९७५) १।१००।१०.
[८४०] १।१०३।२ (कुत्स आङ्गिरसः । इन्द्रः)
स धारयत् पृथिवीं पप्रथच्च ।
(११६३) २।१५।२ (गृत्समदः शौनकः । इन्द्रः)
[८४५] १।१०३।७=(७७४) १।५२।१५
[८४७] १।१०४।१ (कुत्स आङ्गिरसः । इन्द्रः)
योनिष्ट इन्द्र निषदे अकारि तमा ।
(२१८६) ७।२४।१ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
इन्द्र सदने अकारि तमा ।
[८५४] १।१०४।८ (कुत्स आङ्गिरसः । इन्द्रः)
मा नो वधीरिन्द्र मा परा दा मा ।
७।४६।४ (वसिष्ठो मैत्रावरुणिः । रुद्रः)
मा नो वधी रुद्र मा परा दा मा।
[८५५] १।१०४।९ उरुव्यचा जठर आ वृषस्व ।
१०।९६।१३ (बरुराङ्गिरसः, सर्वहरिर्वा ऐन्द्रः । हरिः)
सत्रा वृषञ्जठर आ वृषस्व
[१००१] १।१२९।२ पृक्षमत्यं न वाजिनम् ।
(३११६) १।१३५।५ (परुच्छेपो दैवोदासिः। इन्द्रवायू)
आशुमत्यं-- ।
[१००२] १।१२९।३ (परुच्छेपो दैवोदासिः । इंद्रः)
मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय
सप्रथः ।

१।१३६।६ (परुच्छेपो दैवोदासिः । मित्रावरुणौ)
मित्राय वोचं वरुणाय मीळ्हुषे सुमृळीकाय मीळ्हुषे ।
[१००४] १।१२९।५ उग्राभिरुग्रोतिभिः। पश्य-(३१)१।७।४
[१००८] १।१२९।९ (परुच्छेपो दैवोदासिः । इंद्रः)
त्वं न इन्द्र राया परीणसा ।
अभिष्टिभिः सदा पाह्यभिष्टिभिः ।
(१६४१) ४।३१।१२ (वामदेवो गौतमः । इंद्रः)
एन्द्र राया परीणसा ।
(९८१) ८।९७।६ (रेभः काश्यपः । इंद्रः)
१०।९३।११ (तान्वः पार्थ्यः । विश्वेदेवाः)
अभिष्टये सदा पाह्यभिष्टये ।
[१०११] १।१३०।१ (परुच्छेपो दैवोदासिः । इन्द्रः)
मंहिष्ठं वाजसातये ।
८।४।१८ (देवातिथिः काण्वः । पूषा)
अस्माकं — भव मंहिष्ठो वाजसातये ।
(८९९) ८।८८।६ (नोधा गौतमः। इन्द्रः)
[१०१६] १।१३०।६ (परुच्छेपो दैवोदासिः । इन्द्रः)
– वाचं — रथं न धीरः स्वपा अतक्षिषुः ।
(अग्निः ७७७) ५।२।११ (कुमार आत्रेयः, वृषो वा जानः उभौ वा, २ वृशो जानः । अग्निः)
– स्तोमं — रथं न धीरः स्वपा अतक्षम् ।
(१६८१) ५।२९।१५ (गौरिवीतिः शाक्त्यः । इन्द्रः)
ब्रह्म ... ।
रथं न धीरः स्वपा अतक्षम् ।
[१०१७] १।१३०।७ अतिथिग्वाय शम्बरं ।
पश्य-- (७१०) १।५१।६
[१०१८] १।१३०।८ (परुच्छेपो दैवोदासिः । इन्द्रः)
न्यर्शसानमोषति ।
(२९६) ८।१२।९ (पर्वतः काण्वः । इंद्रः)
[१०१९] १।१३०।९ (परुच्छेपो दैवोदासिः । इंद्रः)
उशना यत् परावतो ।
८।७।२६ (पुनर्वत्सः काण्वः । मरुतः)
[१०२१] १।१३१।१ = (३०९) ८।१२।२२
देवासो दधिरे पुरः ।
(अग्निः ८७१) ५।१६।१ (पुरुरात्रेयः । अग्निः)
मर्तासो दधिरे पुरः ।
(३१२) ८।१२।२५ देवास्त्वा दधिरे पुरः ।
[१०२४] १।१३१।४ पुरो यदिंद्र शारदीरवातिरः ।
(१०७०) १।१७४।२= (१८९३) ६।२०।१०
सप्त यत्पुरः शर्म शारदीर्दर्त् ।

[१०२८] १।१३२।१ (परुच्छेपो दैवोदासिः । इंद्रः)
इंद्रत्वोताः सासह्याम पृतन्यतो वनुयाम वनुष्यतः ।
(३१०७) ८।४०।७ (नाभाकः काण्वः । इन्द्राग्नी)
सासह्याम— ।
[१०३१] १।१३२।४ यदङ्गिरोभ्योऽवृणोरप व्रजम् ।
(७४७) १।५१।३ त्वं गोत्रमङ्गिरोभ्योऽवृणोरप ।
[१०३२] १।१३२।५ (परुच्छेपो दैवोदासिः । इंद्रः)
धीतयो देवाँ अच्छा न धीतयः ।
१।१३९।१ (परुच्छेपो दैवोदासिः । विश्वेदेवाः)
[१०४०] १।१३३।७ (परुच्छेपो दैवोदासिः । इन्द्रः)
सहस्रा वाजयवृतः ।
(१९७) ८।३२।१८ (मेधातिथिः काण्वः । इन्द्रः)
[१०४१] १।१३९।६ (परुच्छेपो दैवोदासिः । इंद्रः)
सुमृळीको न आ गहि ।
१।९१।११ (गोतमो राहूगणः । सोमः)
सुमृळीको न आ विश ।
[१०४२] १।१६७।१ सहस्रिण उप नो यन्तु वाजाः ।
(२२०२) ७।२६।५ —नो माहि वाजान् ।
[१०४७] १।१६९।५ ते षु णो मरुतो मृळयन्तु ।
(३२६५) १।१७१।३ (अगस्त्यो मैत्रावरुणः । मरुत्वानिंद्रः)
स्तुतासो नो मरुतो मृळयन्तु ।
[१०५५] १।१७०।५ (अगस्त्यो मैत्रावरुणः । इंद्रः)
त्वमीशिषे वसुपते वसूनां ।
(अग्निः १४१६) ८।७१।८ (सुदीति-पुरुमीळ्हावाङ्गिरसौ, तयोर्वान्यतरः । अग्निः)
त्वमीशिषे वसूनाम् ।
[१०७०] १।१७४।२ (अगस्त्यो मैत्रावरुणः । इंद्रः)
मृध्रवाचः सप्त यत्पुरः शर्म शारदीर्दर्त् ।
(१८९३) ६।२०।१० (भरद्वाजो बार्हस्पत्यः । इन्द्रः)
सप्त यत्पुरः शर्म शारदीर्दर्धन् दासीः पुरुकुत्साय ।
[१०७३] १।१७४।५ = (७४३) १।३३।१४
["] १।१७४।५ (अगस्त्यो मैत्रावरुणः । इन्द्रः)
प्र सूरश्चक्रं वृहतादभीके ।
(१४७८) ४।१६।१२ (वामदेवो गौतमः । इन्द्रः)
[१०७६] १।१७४।८ (अगस्त्यो मैत्रावरुणः । इन्द्रः)
ननमो वधरदेवस्य पीयोः ।
(१२०५) २।११।७ (गृत्समदः शौनकः । इंद्रः)
[१०७७] १।१७४।९ (अगस्त्यो मैत्रावरुणः । इंद्रः)
(१८९५) ६।२०।१२ (भरद्वाजो बार्हस्पत्यः । इंद्रः)
त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवंतीः ।
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥
[१०८०] १।१७५।२ वृषा मदो वरेण्यः ।
(१८२४) ८।४६।८ यस्ते मदो वरेण्यः ।
[१०८१] १।१७५।३ (अगस्त्यो मैत्रावरुणः । इन्द्रः)
सहावान् दस्युमव्रतम् ।
९।४१।२ (मेध्यातिथिः काण्वः । पवमानः सोमः)
साह्वांसो दस्युमव्रतम् ।
[१०८३] १।१७५।५ शुष्मिन्तमो हि ते मदो द्युमिन्तम उत क्रतुः
(अग्निः २८०) १।१२७।९ (परुच्छेपो दैवोदासिः । अग्निः)
[१०८४] १।१७५।६ =
(१०९०) १।१७६।६ (अगस्त्यो मैत्रावरुणः । इन्द्रः)
यथा पूर्वेभ्यो जरितृभ्य इन्द्र मयइवापो न तृष्यते बभूथ । तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ॥
[१०८५] १।१७६।१ (अगस्त्यो मैत्रावरुणः । इन्द्रः ।)
इन्द्रमिन्दो वृषा विश ।
९।२।१ (मेधातिथिः काण्वः । पवमानः सोमः)
["] १।१७६।१ ऋघायमाण इन्वसि ।
(६५) १।१०।८ —मिन्वतः ।
[१०८६] १।१७६।२ = (३६) १।७।९
["] १।१७६।२ (अगस्त्यो मैत्रावरुणः । इन्द्रः)
यवं न चर्षकृद् वृषा ।
१।२३।१५ (मेधातिथिः काण्वः । पूषा)
[१०८७] १।१७६।३ (अगस्त्यो मैत्रावरुणः । इन्द्रः)
यस्य विश्वानि हस्तयोः ।
(२०६७) ६।४५।८ (शंयुर्बार्हस्पत्यः । इन्द्रः)
[१०८९] १।१७६।५ = (११) १।४।८
[१०९०] १।१७६।६ = (१०८४) १।१७५।६
[१०९१] १।१७७।१ (अगस्त्यो मैत्रावरुणः । इन्द्रः)
राजा कृष्टीनां पुरुहूत इन्द्रः ।
(१४९१) ४।१७।५ (वामदेवो गौतमः । इन्द्रः)
["] १।१७७।१ युक्त्वा हरी वृषणा याह्यर्वाङ् ।
(१७६८) ५।४०।४ युक्त्वा हरिभ्यामुप यासदर्वाङ् ।
[१०९३] १।१७७।३ (अगस्त्यो मैत्रावरुणः । इन्द्रः)
सुतः सोमः परिषिक्ता मधूनि ।
(२१८७) ७।२४।२ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
[१०९५] १।१७७।५ (अगस्त्यो मैत्रावरुणः । इन्द्रः)
विद्याम वस्तोरुषसा गृणन्तो ।

(१९४६) ६।२५।९ (भरद्वाजो बार्हस्पत्यः। इन्द्रः)
एवा... ... इंद्र।
विद्याम ... ...।

(२६७८) १०।८९।१७ (रेणुर्वैश्वामित्रः। इन्द्रः)
एवा ... ... इन्द्र।
विद्याम ... ...।

ऋग्वेदस्य द्वितीयं मण्डलम्।

[११०२] २।११।२ (गृत्समदः शौनकः। इंद्रः)
सृजो महीरिन्द्र... **परिष्ठिता अहिना शूर पूर्वीः।**
(२२६३) ७।२१।३ (वसिष्ठो मैत्रावरुणिः। इन्द्रः)
स्रवितवा अपस्कः **परिष्ठिता अहिना शूर पूर्वीः।**
[११०४-५] २।११।४-५ (गृत्समदः शौनकः। इन्द्रः)
दासीर्विशः सूर्येण सह्याः ॥४॥
गुहा हितं गुह्यं गूळ्हमप्सु ॥५॥
(१३६०) ३।३९।६ (विश्वामित्रो गाथिनः। इंद्रः)
गुहा हितं—।
(२८१०) १०।१४८।२ (पृथुर्वैन्यः। इंद्रः)
दासी—।
गुहा—।
[१११२] २।११।११ (गृत्समदः शौनकः। इन्द्रः)
पिबापिबेदिन्द्र शूर सोमं।
(२४८०) १०।२२।१५ (विमद ऐन्द्रः प्राजापत्यो वा वसुकृद्वा वासुक्रः। इन्द्रः)
["] २।११।११ **मन्दन्तु त्वा मन्दिनः** सुतासः।
१।१३४।२ (परुच्छेपो दैवोदासिः। वायुः)
मन्दन्तु त्वा मन्दिनो वायविन्दवो।
[११२२]२।११।२१ (११७१)२।१५।१०=(११८०)२।१६।९
(११८९) २।१७।९ = (११९८) २।१८।९
(१२०६) २।१९।९ (१२१६) २।२०।९
(गृत्समदः शौनकः। इन्द्रः)
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः॥
[११२४] २।१२।३ यो हत्वाहि**मरिणात् सप्त सिन्धून्।**
(१५९९) ४।२८।१ १०।६७।१२ (अयास्य आंगिरसः। बृहस्पतिः)
अहन्नहिम ...।
[११३३] २।१२।१२ यः सप्तरश्मि**र्वृषभस्तुविष्मान्।**
(अग्निः १७६०) ४।५।३ (वामदेवो गौतमः। वैश्वानरोऽग्निः)
सहस्ररेता **वृषभस्तुविष्मान्।**
["] २।१२।१२ = (७२६) १।३२।१५

[११३५] २।१२।१४ (गृत्समदः शौनकः। इन्द्रः)
पचन्तं यः शंसन्तं यः शशमानमूती।
(१२१०) २।२०।३ (गृत्समदः शौनकः। इन्द्रः)
यः शंसन्तं यः शशमानमूती पचन्तं।
[११३६] २।१२।१५ (गृत्समदः शौनकः। इन्द्रः)
वयं त इन्द्र विश्वह प्रियासः।
८।४८।१४ (प्रगाथो घौरः काण्वः। सोमः)
वयं सोमस्य विश्वह प्रियासः।
["] २।१२।१५ **सुवीरासो विदथमा वदेम।**
१।११७।२५ (कक्षीवान् औशिजो दैर्घतमसः। अश्विनौ)
[११३८-४०] २।१३।२-४ **यस्ताकृणोः प्रथमं सास्युक्थ्यः।**
[११४५] २।१३।९ (गृत्समदः शौनकः। इन्द्रः)
एकस्य श्रुष्टौ यद्ध चोदमाविथ।
(१६७) ८।३।१२ (मेध्यातिथिः काण्वः। इन्द्रः)
शर्धा नो **अस्य यद्ध** पौर**माविथ।**
[११४९] २।१३।१३ =
(११६१) २।१४।१२ (गृत्समदः शौनकः। इन्द्रः)
अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम्। इन्द्र यच्चित्रं श्रवस्या अनु द्यून् बृहद्वदेम विदथे सुवीराः॥
[११५०] २।१४।१ (गृत्समदः शौनकः। इन्द्रः)
अध्वर्यवो भरतेन्द्राय सोमम्।
१०।३०।१५ (कवष ऐलूषः। आपः अपांनपात् वा)
अध्वर्यवः सुनुतेन्द्राय **सोमम्।**
[११५१] २।१४।२ (गृत्समदः शौनकः। इन्द्रः)
अध्वर्यवो —।
तस्मा एतं भरत तद्वशायँ।
२।३७।१ (गृत्समदः शौनकः। द्रविणोदा ऋतवश्च)
—अध्वर्यवः—।
तस्मा एतं भरत तद्वशो ददिः।
[११५९] २।१४।१० (गृत्समदः शौनकः। इन्द्रः)
सोमेभिरीं पृणता भोजमिन्द्रम्।
—दित्सन्तम्॥
(१९२६) ६।२३।९ (भरद्वाजो बार्हस्पत्यः। इन्द्रः)
सोमे—। — सुष्विम्॥

[११६१] २।१४।११ = (११४९) २।१३।१३
[११६२] २।१५।१ = (७१७) १।३२।३
[११६३] २।१५।२ = (८४०) १।१०३।१
[११६३–७०] २।१५।२–९ सोमस्य ता मद इन्द्रश्चकार।
[११७१] २।१५।१० = (११११) २।११।२१
[११८०] २।१६।९ = (११११) २।११।२१
[११८४] २।१७।४ (गृत्समदः शौनकः । इन्द्रः)
अधा यो विश्वा भुवनाभि मज्मना ।
… … रोदसी … ।
९।११०।९ (त्र्यरुणत्रैवृष्णः त्रसदस्युः पौरुकुत्स्यः । पवमानः सोमः)
अध … रोदसी इमा च विश्वा भुवनाभि मज्मना।
[११८६] २।१७।६ = (११११) २।११।२१
[११९१] २।१८।३ (गृत्समदः शौनकः । इन्द्रः)
हरी … ।
मो … बहवो … नि रीरमन् यजमानासो अन्ये ।
(१३१६) ३।३५।५ (विश्वामित्रो गाथिनः । इन्द्रः)
मा … हरी … नि रीरमन् यजमानासो अन्ये ।
… अश्विनो … ।
[११९६] २।१८।७ (गृत्समदः शौनकः । इन्द्रः)
ब्रह्मा … हरी … ।
अस्मिन्छूर सवने मादयस्व ।
(२१८४) ७।२३।५ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
अस्मिन् … ।
(२२१४) ७।२९।२ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
ब्रह्मकृतिं … … हरिभिः … ।
अस्मिन्नू षु सवने मादयस्वोप ब्रह्माणि।
[११९८] २।१८।९ = (११११) २।११।२१
[१२०५] २।१९।७ = (११७६) २।१७।८
[१२०७] २।१९।९ = (११११) २।११।२१
[१२१०] २।२०।३ = (११३५) २।१२।१४
[१२१२] २।२०।५ (गृत्समदः शौनकः । इन्द्रः)
अश्नस्य चिच्छिश्नथत् पूर्व्याणि ।
(अग्निः ९७३) ६।४।३ (भरद्वाजो बार्हस्पत्यः । अग्निः)
[१२१६] २।२०।९ = (११११) २।११।२१
[१२१८] २।२१।२ (गृत्समदः शौनकः । इन्द्रः)
अषाळहाय सहमानाय वेधसे ।
७।४६।१ (वसिष्ठो मैत्रावरुणिः । रुद्रः)
अषाळहाय— ।
[१२१९] २।२१।३ = (७१५) १।३२।१
[१२२३–२५] २।२२।१–३ सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ।
[१२२६] २।२२।४ दिवि प्रवाच्यं कृतम् ।
१।१०५।१६ (त्रितः आप्त्यः,कुत्स आङ्गिरसो वा । विश्वेदेवाः)
दिवि प्रवाच्यं कृतः ।

ऋग्वेदस्य तृतीयं मण्डलम् ।

[१२३९] ३।३०।२ स्थिराय वृष्णे सवना कृतेमा ।
(अग्निः ४६६) ३।१।२० (विश्वामित्रो गाथिनः । अग्निः)
महान्ति वृष्णे सवना कृतेमा ।
[१२५०] ३।३०।१७ (विश्वामित्रो गाथिनः । इन्द्रः)
इन्द्रस्य कर्म सुकृता पुरूणि ।
(१२८९) ३।३२।८ = (१३०६) ३।३४।६
[१२५४] ३।३०।१७ (विश्वामित्रो गाथिनः । इन्द्रः)
ब्रह्मद्विषे तपुषिं हेतिमस्य ।
६।५२।३ (ऋजिश्वा भारद्वाजः । विश्वेदेवाः)
[१२५७] ३।३०।२० = (१४३२) ३।५०।४
(विश्वामित्रो गाथिनः । इन्द्रः)
इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च। स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ।
[१२५८] ३।३०।२१ (विश्वामित्रो गाथिनः । इन्द्रः)
अस्मभ्यं सु मघवन् बोधि गोदाः ।
(१२७३) ३।३१।१४ (कुशिक ऐषीरथिः विश्वामित्रो गाथिनो वा । इन्द्रः)
अस्माकं सु मघवन् बोधि गोपाः ।
(१५६४) ४।२२।१० (वामदेवो गौतमः । इन्द्रः)
अस्माकं सु मघवन् बोधि गोदाः ।
[१२५९] ३।३०।२२ = (१२८१) ३।३१।२२ = (१२९८)
३।३२।१७ = (१३११) ३।३४।११ = (१३२२)
३।३५।११ = (१३३३) ३।३६।११ = (१३५४)
३।३८।१० = (१३६३) ३।३९।९ = (१३९८)
३।४३।८ = (१४२३) ३।४८।५ = (१४१८)
३।४९।५ = (१४३३) ३।५०।५ = (२६७९)
१०।८९।१८

=(२७१३)१०।१०४।११ (विश्वामित्रोः गाथिनः । इन्द्रः)
शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥

[१२६७] ३।३१।८ (कुशिक ऐषीरथिः विश्वामित्रो गाथिनो वा । इन्द्रः)
प्रतिमानं... विश्वावेद जनिमा **हन्ति शुष्णम्।**
(२७२९) १०।१११।५ (अष्टादंष्ट्रो वैरूपः। इन्द्रः)
प्रतिमानं ... विश्वावेद सवना **हन्ति शुष्णम्।**

[१२६८] ३।३१।९= (अग्निः २०३) १।७२।९
(पराशरः शाक्त्यः । अग्निः)

[१२७३] ३।३१।१४ = (१२५८) ३।३०।२१
[१२७५] ३।३१।१६ = (अग्निः ४५१) ३।१।५
(विश्वामित्रो गाथिनः । अग्निः)

[१२७६] ३।३१।१७ (कुशिक ऐषीरथिः विश्वामित्रो गाथिनो वा । इन्द्रः)
अनु कृष्णे वसुधिती जिहाते ।
४।४८।३ (वामदेवो गौतमः । वायुः)
... ... **वसुधिती** येमाते ।

[१२७७] ३।३१।१८= (अग्निः ४६५) ३।१।१९
(विश्वामित्रो गाथिनः । अग्निः)

[१२८०] ३।३१।२१ (कुशिक ऐषीरथिः विश्वामित्रो गाथिनो वा । इन्द्रः)
... गोपतिः ... ।
... **दुरश्च विश्वा अवृणोदप स्वाः ।**
(२७७१) १०।१२०।८ (बृहद्दिव आथर्वणः । इन्द्रः)
गोत्रस्य ... **दुरश्च** ... ।

[१२८१] ३।३१।२२ = (१२५९) ३।३०।२२
[१२८५] ३।३२।४ **अमर्मणो** मन्यमानस्य **मर्म ।**
(१७०९) ५।३२।५ **अमर्मणो** विदीदस्य **मर्म ।**

[१२८८] ३।३२।७ (विश्वामित्रो गाथिनः । इन्द्रः)
इन्द्रं बृहन्तमृष्वमजरं युवानम् ।
(१८७२) ६।१९।२ (भरद्वाजो बार्हस्पत्यः । इन्द्रः)
इन्द्रं... बृहन्त ... ।
६।४९।१० (ऋजिश्वा भारद्वाजः । विश्वेदेवाः)
बृहन्तमृष्वमजरं सुषुम्नम् — ।

[१२८९] ३।३२।८ = (१२५०) ३।३०।१३
["] ३।३२।८ दाधार **यः पृथिवीं द्यामुतेमाम् ।**
(१३०८) ३।३४।८ ससान यः ... ।

[१२९२] ३।३२।११ (विश्वामित्रो गाथिनः । इन्द्रः)
अहन्नहिं परिशयानमर्णः ।
(१५२३) ४।१९।२ (वामदेवो गौतमः । इन्द्रः)
अवासृजन्त ... ।
अहन्नहिं ... ।
(१९७१) ६।३०।४ (भरद्वाजो बार्हस्पत्यः । इन्द्रः)
अहन्नहिं परिशयानमर्णोऽवासृजो ।

[१२९८] ३।३२।१७ = (१२५९) ३।३०।२२
[१३०२] ३।३४।२= (अग्निः १७१९) १।५९।५
(नोधा गौतमः । अग्निर्वैश्वानरः)

[१३०५] ३।३४।५= (अग्निः १९५) १।७२।१
(पराशर शाक्त्यः । अग्निः)

[१३०६] ३।३४।६ = (१२५०) ३।३०।१३
[१३०७] ३।३४।७ = (अग्निः १७२१) १।५९।५
[१३०८] ३।३४।८ = (अग्निः २५१) १।७९।८
(गोतमो राहूगणः । अग्निः)

["] ३।३४।८ = (१२८९) ३।३२।८
[१३११] ३।३४।११ = (१२५९) ३।३०।२२
[१३१२] ३।३५।१ (विश्वामित्रो गाथिनः । इन्द्रः)
याहि वायुर्न नियुतो नो अच्छ ।
... **इन्द्र** ...... ।
(२१८३) ७।२३।४ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
... ... **इन्द्र ।**
याहि ... ... ।

[१३१५] ३।३५।४ = (अग्निः ५७३) ३।२९।१६
(विश्वामित्रो गाथिनः । अग्निः)

[१३१६] ३।३५।५ = (११९२) २।१८।३
[१३१७] ३।३५।६ (विश्वामित्रो गाथिनः । इन्द्रः)
अस्मिन् यज्ञे बर्हिष्या निषद्या ।
१०।१४।५ (यमो वैवस्वतः । यमः)
... ... **निषद्य ।**

[१३२२] ३।३५।११ = (१२५९) ३।३०।२२
[१३२४] ३।३६।२ (विश्वामित्रो गाथिनः । इन्द्रः)
इन्द्र पिब वृषधूतस्य वृष्णः ।
(१३९७) ३।४३।७ (विश्वामित्रो गाथिनः । इन्द्रः)

[१३२९] ३।३६।७ (विश्वामित्रो गाथिनः । इन्द्रः)
समुद्रेण सिन्धवो यादमाना इन्द्राय सोमं सुषुतं भरन्तः ।
(१८७५) ६।१९।५ (भरद्वाजो बार्हस्पत्यः । इन्द्रः)
समुद्रे न **सिन्धवो यादमानाः ।**

१०।३०।१३ (कवष ऐलूषः । आपः अपांनपात् वा)
इन्द्राय सोमं सुषुतं भरन्तीः ।
[१३३३] ३।३६।११ = (१२५९) ३।३०।२२
[१३३५] ३।३७।२ = (९३९) १।८४।३
[१३३८] ३।३७।५ (विश्वामित्रो गाथिनः । इन्द्रः)
इन्द्रं वृत्राय हन्तवे ।
(३०९) ८।१२।२२ (पर्वतः काण्वः । इन्द्रः)
९।६१।२२ (अमहीयुराङ्गिरसः । पवमानः सोमः)
[१३४१] ३।३७।८ ... पाहि ...। इन्द्र सोमं शतक्रतो ।
(६३४) ८।७६।७ इन्द्र ... पिबा सोमं ... ।
[१३४४] ३।३७।११ (विश्वामित्रो गाथिनः । इन्द्रः)
अर्वावतो न आ गह्यथो शक्र परावतः ।
इन्द्रेह तत आ गहि ।
(१३७१) ३।४०।८ (विश्वामित्रो गाथिनः । इन्द्रः)
अर्वावतो न आ गहि परावतश्च वृत्रहन् ।
(१३७२) ३।४०।९
परावतमर्वावतम् ।
इन्द्रेह तत आ गहि ।
[१३५२] ३।३८।८ हिरण्ययीममतिं यामशिश्रेत् ।
७।३८।१ (वसिष्ठो मैत्रावरुणिः । सविता)
[१३५४] ३।३८।१० = (१२५९) ३।३०।२२
[१३६०] ३।३९।६ = (११०५) २।११।५
[१३६३] ३।३९।९ = (१२५९) ३।३०।२२
[१३६७] ३।४०।४ (विश्वामित्रो गाथिनः । इन्द्रः)
इन्द्र सोमाः सुता इमे ।
(१३८६) ३।४२।५ इन्द्र सोमाः सुता इमे ।
[१३६९] ३।४०।६ = (६४) १।१०।७
[१३७१] ३।४०।८ = (१३४४) ३।३७।११
[१३७२] ३।४०।९ = (१३४४) ३।३७।११
[१३७४] ३।४१।२ = (अग्निः १९१०) १।१३।५
[१३७८] ३।४१।६ (विश्वामित्रो गाथिनः । इन्द्रः) =
(२०८६) ६।४५।२७ (शंयुर्बार्हस्पत्यः । इन्द्रः)
स मन्दस्वा ह्यन्धसो राधसे तन्वा महे ।
न स्तोतारं निदे करः ।
[१३७९] ३।४१।७ (विश्वामित्रो गाथिनः । इन्द्रः)
वयमिन्द्र त्वायवो ... । ... वसो ।
(११६६) ७।३१।४ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
वयमिन्द्र त्वायवो ... । ... वसो ।
(१७८३) १०।१३३।६ (सुदाः पैजवनः । इन्द्रः)
वयमिन्द्र त्वायवः ... ।

[१३८१] ३।४१।९ (विश्वामित्रो गाथिनः । इन्द्रः)
वहतामिन्द्र केशिना ।
(३९५) ८।१७।२ (इरिम्बिठिः काण्वः । इन्द्रः)
[१३८२] ३।४२।१ = (८१) १।१६।४
[१३८५] ३।४२।४ = (८०) १।१६।३
[१३८६] ३।४२।५ = (१३६७) ३।४०।४
[१३८७] ३।४२।६ (विश्वामित्रो गाथिनः । इन्द्रः)
विद्मा हि त्वा धनंजयं ।
अधा ते सुम्नमीमहे ।
(४५५) ८।४५।१३ (त्रिशोकः काण्वः । इन्द्रः)
विद्मा ... ।
(अग्निः १३८८) ८।७५।१६ (विरूप आङ्गिरसः । अग्निः)
विद्मा हि... ... ।
अधा ते सुम्नमीमहे ... ।
(२२७४) ८।९८।११ (नृमेध आङ्गिरसः । इन्द्रः)
[१३८९] ३।४२।८ (विश्वामित्रो गाथिनः । इन्द्रः)
सोमं चोदामि पीतये ।
(२१९७) ८।६८।७ (प्रियमेध आङ्गिरसः । इन्द्रः)
इन्द्रं चोदामि पीतये ।
[१३९३] ३।४३।३ इन्द्र देव हरिभिर्याहि तूयम् ।
(२११४) ७।२९।२ अर्वाँचीनो हरिभिः— ।
[१३९६] ३।४३।६ (विश्वामित्रो गाथिनः । इन्द्रः)
आ त्वा बृहन्तो हरयो युजाना......वहन्तु ।
(२०५४) ६।४४।१९ (शंयुर्बार्हस्पत्यः । इन्द्रः)
आ त्वा हरयो वृषणो युजाना ।
...वहन्तु ।
[१३९७] ३।४३।७ = (१३२४) ३।३६।२
[१३९८] ३।४३।८ = (१२५९) ३।३०।२२
[१३९९] ३।४४।१ (विश्वामित्रो गाथिनः । इन्द्रः)
जुषाण इन्द्र हरिभिर्न आ गहि ।
८।१३।१३ (नारदः काण्वः । इन्द्रः)
... इन्द्र सप्तिभिर्न... ।
[१४०२] ३।४४।४ = १।४९।४ (प्रस्कण्वः काण्वः । उषा)
[१४१०] ३।४६।२ (विश्वामित्रो गाथिनः । इन्द्रः)
एको विश्वस्य भुवनस्य राजा ... जनान् ।
(२०३४) ६।३६।४ (नरो भारद्वाजः । इन्द्रः)
जनानामेको— ।
[१४१५] ३।४७।२ (विश्वामित्रो गाथिनः । इन्द्रः)
सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा
शूर विद्वान् ।

(१४५२) ३।५२।७ अप्रमाद्भि सगणो मरुद्भिः... ।
[१४१६] ३।४७।३ (विश्वामित्रो गाथिनः । इन्द्रः)
पाहि सोममिन्द्र देवेभिः सखिभिः सुतं नः ।
(१४४१) ३।५१।८ पाहि सोमं मरुद्भिरिन्द्र सखिभिः
सुतं नः ।
[१४१८]३।४७।५ (विश्वामित्रो गाथिनः । इन्द्रः)=
(१८८१) ६।१९।११ (भरद्वाजो बार्हस्पत्यः । इन्द्रः)
मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥
[१४२२] ३।४८।४ (विश्वामित्रो गाथिनः । इन्द्रः)
यथावशं तन्वं चक्र एषः ।
७।१०१।३ (वसिष्ठो मैत्रावरुणिः [वृष्टिकामः],
कुमार आग्नेयो वा । पर्जन्यः)
[१४२३] ३।४८।५ = (१२५९) ३।३०।२२
[१४२८] ३।४९।५ = (१२५९) ३।३०।२२
[१४३०] ३।५०।२ (विश्वामित्रो गाथिनः । इन्द्रः)
हरयः सुशिप्र पिबा त्वऽस्य सुषुतस्य चारोः ।
(२२१३) ७।२९।१ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
... हरिवः ... ।
पिबा... ।
[१४३२] ३।५०।४ = (१२५७) ३।३०।२०
[१४३३] ३।५०।५ = (१२५९) ३।३०।२२
[१४३८] ३।५१।५ (विश्वामित्रो गाथिनः । इन्द्रः)
पूर्वीरस्य निष्षिधो मर्त्येषु ।
(२०४६) ६।४४।११ (शंयुर्बार्हस्पत्यः । इन्द्रः)
पूर्वीष्ट इन्द्र निष्षिधो जनेषु ।
[१४३९] ३।५१।६ = (७०८) १।३०।१०
[१४४१] ३।५१।८ = (१४१६) ३।४७।३
[१४४३] ३।५१।१० (विश्वामित्रो गाथिनः । इन्द्रः)
... सुतं ... ।
पिबा त्वऽस्य गिर्वणः ।
(११२) ८।१।२६ (मेधातिथि-मेध्यातिथी काण्वौ । इन्द्रः)
पिबा त्वऽस्य गिर्वणः सुतस्य ।
[१४४६] ३।५२।१ (विश्वामित्रो गाथिनः । इन्द्रः)

धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ।
(१७८४) ८।९१।२ (अपाला आत्रेयी । इन्द्रः)
[१४४८] ३।५२।३ (विश्वामित्रो गाथिनः । इन्द्रः)
(१६६०) ४।३२।१६ (वामदेवो गौतमः । इन्द्रः)
जोषयासे गिरश्च नः । वधूयुरिव योषणाम् ।
३।६२।८ (विश्वामित्रो गाथिनः । पूषा)
जुषस्व गिरं । वधूयुरिव योषणाम् ।
[१४५२] ३।५२।७ = (१४१५) ३।४७।२
[१४५५] ३।५३।३ (विश्वामित्रो गाथिनः । इन्द्रः)
एदं बर्हिर्यजमानस्य सीद ।
(१९२४) ६।२३।७ (भरद्वाजो बार्हस्पत्यः । इन्द्रः)
[१४५७-५८] ३।५३।५-६ यत्रा रथस्य बृहतो निधानं ।
[१४५९] ३।५३।७ (विश्वामित्रो गाथिनः । इन्द्रः)
... अंगिरसो ... दिवस्पुत्रासो असुरस्य वीराः ।
ददतो मघानि सहस्रसावे प्र तिरन्त आयुः ।
१०।६७।२ (अयास्य आंगिरसः । बृहस्पतिः)
दिवस्पुत्रासो असुरस्य वीराः ।
... अंगिरसो ...
७।१०३।१० (वसिष्ठो मैत्रावरुणिः । मण्डूकाः। पर्जन्यस्तुति-
... संहृष्टाः)
ददतः शतानि सहस्रसावे प्र तिरन्त आयुः ।
[१४६४] ३।५३।१२ (विश्वामित्रो गाथिनः । इन्द्रः)
य इमे रोदसी उभे ।
(२५९) ८।६।१७ (वत्सः काण्वः । इन्द्रः)
... रोदसी मही ।
९।१८।५ (असितः काश्यपो देवलो वा । पवमानः सोमः)
... रोदसी मही ।
[१४६५] ३।५३।१३ (विश्वामित्रो गाथिनः । इन्द्रः)
ब्रह्मेन्द्राय वज्रिणे ।
(१७९०) ८।२४।१ (विश्वमना वैयश्वः । इन्द्रः)
["] ३।५३।१३ (विश्वामित्रो गाथिनः । इन्द्रः)
करदिन्नः सुराधसः ।
१।२३।६ (मेधातिथिः काण्वः । मित्रावरुणौ)
करतां नः सुराधसः ।

ऋग्वेदस्य चतुर्थं मण्डलम् ।

[१४७१] ४।१६।५ (वामदेवो गौतमः । इन्द्रः)
उभे आ पप्रौ रोदसी महित्वा ।
३।५४।१५ (प्रजापतिर्वैश्वामित्रः, प्रजापतिर्वाच्यो वा ।
विश्वेदेवाः)

[१४७२] ४।१६।६ विश्वानि शक्रो नर्याणि विद्वान् ।
(२१६४) ७।२१।४ अपांसि विश्वा... ।
["] ४।१६।६ = (अग्निः ६४१) ४।१।१५
(वामदेवो गौतमः । अग्निः)

[१४७८] ४।१६।१२ = (१०७३) १।१७४।५
[१४८६] ४।१६।२० ब्रह्माकर्म भृगवो न रथम् ।
१०।३९।१४ (घोषा काक्षीवती । अश्विनौ)
अतक्षाम भृगवो ... ।
[१४८७] ४।१६।२१ = (१५०८) ४।१७।२१
(वामदेवो गौतमः । इन्द्रः) =
(१५३२) ४।१९।११ = (१५४३) ४।२०।११ =
(१५५४) ४।२१।११ = (१५६५) ४।२२।११ =
(१५७६) ४।२३।११ = (१५८७) ४।२४।११
नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ।
४।५६।४ (वामदेवो गौतमः । द्यावापृथिवी)
नू ... ... ।
धिया स्याम रथ्यः सदासाः ।
[१४८८] ४।१७।१ (वामदेवो गौतमः । इन्द्रः)
सृजः सिन्धूँरहिना जग्रसानान् ।
(१७३३) १०।१११।९ (अष्टादंष्ट्रो वैरूपः । इन्द्रः)
[१४९०] ४।१७।३ (वामदेवो गौतमः । इन्द्रः)
वधीद् वृत्रं वज्रेण मन्दसानः ।
(२५२७) १०।२८।७ (वसुक्र ऋषिः । इन्द्रः)
वधीं वृत्रं वज्रेण मन्दसानः ।
[१४९२] ४।१७।५ = (१०९१) १।१७७।१
[१४९४] ४।१७।७ त्वं प्रति प्रवत आशयानमहिं वज्रेण
मघवन् वि वृश्चः ।
(१५२४) ४।१९।३ त्वम् प्रति प्रवत आशयानमहिं
वज्रेण वि रिणा अपर्वन् ।
[१५०१] ४।१७।१४ त्वचो बुध्ने रजसो अस्य योनौ ।
(अग्निः ६३७) ४।१।११ (वामदेवो गौतमः । अग्निः)
महो बुध्ने रजसो अस्य योनौ ।
[१५०३] ४।१७।१६ (वामदेवो गौतमः । इन्द्रः)
गव्यन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः ।
(२७७५) १०।१३१।३ (सुकीर्तिः काक्षीवतः । इन्द्रः)
[१५०८] ४।१७।२१ = (१४८७) ४।१६।२१
[१५११] ४।१८।४ नही न्वस्य प्रतिमानमस्ति ।
(१८६७) ६।१८।१२ नास्य शत्रुर्न प्रतिमानमस्ति ।
[१५१३] ४।१८।५ आ रोदसी अपृणाजायमानः ।
(अग्निः ४८१) ३।६।२ (विश्वामित्रो गाथिनः । अग्निः)
आ रोदसी अपृणा जायमानः ।
[१५१५] ४।१८।७ = (९०९) १।८०।१०
[१५१९] ४।१८।११ (वामदेवो गौतमः । इन्द्रः)
दै० [इन्द्रः] ३०
वृत्रमिन्द्रो... हनिष्यन्त्सखे विष्णो वितरं वि क्रमस्व ।
(९९९) ८।१००।१२ (नेमो भार्गवः । इन्द्रः)
सखे विष्णो वितरं वि क्रमस्व ।
हनाव... वृत्रं... ।
[१५२३] ४।१९।२ = (११९२) ३।३२।११
[१५२४] ४।१९।३ = (१४९४) ४।१७।७
[१५२६] ४।१९।५ (वामदेवो गौतमः । इन्द्रः)
त्वं वृतां अरिणा इन्द्र सिन्धून् ।
(३२५७) ४।४२।७ (त्रसदस्युः पौरुकुत्स्यः । इन्द्रावरुणौ)
[१५२९] ४।१९।८ = (९०९) १।८०।१०
[१५३२] ४।१९।११ = (१४८७) ४।१६।२१
[१५३५] ४।२०।३ (वामदेवो गौतमः । इन्द्रः)
पुरो दधत् सनिष्यसि क्रतुं नः ।
(१७०२) ५।३१।११ (अवस्युरात्रेयः । इन्द्रः)
[१५३८] ४।२०।६ उदेव कोशं वसुना न्यृष्टम् ।
(२५४७) १०।४२।२ कोशं न पूर्ण वसुना ... ।
[१५४३] ४।२०।११ = (१४८७) ४।१६।२१
[१५५३] ४।२१।१० = (८९१) १।६३।७
["] ४।२१।१० (वामदेवो गौतमः । इन्द्रः)
भक्षीय तेऽवसो दैव्यस्य ।
५।५७।७ (श्यावाश्व आत्रेयः । मरुतः)
भक्षीय वोऽवसो दैव्यस्य ।
[१५५४] ४।२१।११ = (१५४३) ४।२०।११
[१५५७] ४।२२।३ (वामदेवो गौतमः । इन्द्रः)
महो वाजेभिर्महद्भिश्च शुष्मैः ।
(२०१४) ६।३२।४ (सुहोत्रो भारद्वाजः । इन्द्रः)
[१५५९] ४।२२।५ = (७५७) १।५१।१३
[१५६३] ४।२२।९ (वामदेवो गौतमः । इन्द्रः)
जहि वधर्वनुषो मर्त्यस्य ।
(२१९४) ७।२५।३ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
[१५६४] ४।२२।१० = (११५८) ३।३०।२१
[१५६५] ४।२२।११ = (१४८७) ४।१६।२१
[१५६८] ४।२३।४ = (२२६२) १।१६५।१३
[१५७६] ४।२३।११ = (१४८७) ४।१६।२१
[१५७९] ४।२४।३ रिरिक्वांसस्तन्वः कृण्वत त्राम् ।
(अग्निः १९९) १।७२।५ (पराशर शाक्त्यः । अग्निः)
... कृण्वत स्वाः ।
["] ४।२४।३ (वामदेवो गौतमः । इन्द्रः)
वि ह्वयन्ते समीके ।
उभयासो ......नरस्तोकस्य तनयस्य सातौ ।

(३१८०) ७।८२।९ (वसिष्ठो मैत्रावरुणिः। इन्द्रावरुणौ)
हवन्त उभये...स्पृधि नरस्तोकस्य तनयस्य सातिषु ।
[१५८७] ४।२४।११ = (१४८७) ४।१६।२१
[१५९१] ४।२५।४ (वामदेवो गौतमः । इन्द्रः)
ज्योक्पश्यात् सूर्यमुच्चरन्तम् ।
य इन्द्राय सुनवामेत्याह ।
६।५२।५ (ऋजिश्वा भारद्वाजः । विश्वेदेवाः)
पश्येम नु सूर्यमुच्चरन्तम् ।
(३३०१) ७।१०४।२४ (वसिष्ठो मैत्रावरुणिः ।
(रक्षोहणौ) इन्द्रासोमौ)
मा ते दृशन्त्सूर्यमुच्चरन्तम् ।
१०।५९।४ (बन्धुः श्रुतबन्धुर्विप्रबन्धुर्गौपायनाः ।
निर्ऋतिः सोमश्च)
पश्येम नु सूर्यमुच्चरन्तम् ।
१०।५९।६ (बन्धुः श्रुतबन्धुर्विप्रबन्धुर्गौपायनाः ।
असुनीतिः)
ज्योक्पश्येम सूर्यमुच्चरन्तम् ।
(१७१०) ५।३७।१ (अत्रिर्भौमः । इन्द्रः)
य इन्द्राय सुनवामेत्याह ।
[१५९२] ४।२५।५ उरस्मा अदितिः शर्म यंसत् ।
१।१०७।२ (कुत्स आङ्गिरसः । विश्वेदेवाः)
आदित्यैर्नो अदितिः शर्म यंसत् ।
[१५९७] ४।२६।२ मम देवासो अनु केतमायन् ।
(अग्निः १५९६) १०।६।७ (त्रित आप्त्यः । अग्निः)
तं ते देवासो ... ।
[१६०४] ४।२९।१ (वामदेवो गौतमः । इन्द्रः)
तिरश्चिदर्यः सवना पुरूणि ।
(६२४) ८।६६।१२ (कलिः प्रागाथः । इन्द्रः)
तिरश्चिदर्यः सवना वसो गहि ।
[१६२५] ४।३०।२० (वामदेवो गौतमः । इन्द्रः)
शतमश्मन ... पुराम् ... ।
दिवोदासाय दाशुषे ।
(अग्निः १०४६) ६।१६।५ (भरद्वाजो बार्हस्पत्यः । अग्निः)
दिवोदासाय सुन्वते ।
...... दाशुषे ।
(२००९) ६।३१।४ (सुहोत्रो भारद्वाजः । इन्द्रः)
शतानि......पुरो...... ।
दिवोदासाय सुन्वते सुतके ।
[१६२६] ४।३०।२१ (वामदेवो गौतमः । इन्द्रः)
अस्वापयद्दभीतये...... हर्षः ।

(२१४३) ७।१९।४ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
अस्वापयो दभीतये सुहन्तु ।
[१६२८] ४।३०।२३ करिष्या इन्द्र पौंस्यम् ।
(१७५)८।३।२०=(१८२)८।३२।३ कृषे तदिन्द्र पौंस्यम् ।
[१६३३] ४।३१।४ अभी न आ ववृत्स्व ।
१०।८३।६ (मन्युस्तापसः । मन्युः)
मन्यो वज्रिन्नभि मामा ववृत्स्व ।
[१६४०] ४।३१।११ (वामदेवो गौतमः । इन्द्रः)
सख्याय स्वस्तये ।
(३३३०) ६।५७।१ (भरद्वाजो बार्हस्पत्यः। इन्द्रापूषणौ)
[१६४१] ४।३१।१२ = (१००८) १।११९।९
[१६४५] ४।३२।१ महान् महीभिरूतिभिः ।
(अग्निः ४६५) ३।१।१९ (विश्वामित्रो गाथिनः । अग्निः)
[१६५२] ४।३२।८ (वामदेवो गौतमः । इन्द्रः)
न त्वा वरन्ते अन्यथा यद्दित्ससि स्तुतो मघम् ।
स्तोतृभ्य इन्द्र गिर्वणः ।
(३५७) ८।१४।४ (गोषूक्त्यश्वसूक्तिनौ काण्वायनौ। इन्द्रः)
न ते वर्तास्ति ।
यद्दित्ससि स्तुतो मघम् ।
(१८६) ८।३२।७ (मेधातिथिः काण्वः । इन्द्रः)
स्तोतार इन्द्र गिर्वणः ।
[१६५३] ४।३२।९ अभि त्वा गोतमा गिरा ।
(अग्निः २३९) १।७८।१ (गोतमो राहूगणः। अग्निः)
[१६५५] ४।३२।११ (वामदेवो गौतमः । इन्द्रः)
... वेधसो ... ।
सुतेष्विन्द्र गिर्वणः ।
(२३७७) ८।९९।२ (नृमेध आङ्गिरसः । इन्द्रः)
... वेधसः ... ।
सुतेष्विन्द्र गिर्वणः ।
[१६५६] ४।३२।१२ (वामदेवो गौतमः । इन्द्रः).
एषु धा वीरवद्यशः ।
५।७९।६ (सत्यश्रवा आत्रेयः । उषाः)
[१६५७] ४।३२।१३ (वामदेवो गौतमः । इन्द्रः)
(६०७) ८।६५।७ (प्रगाथः काण्वः । इन्द्रः)
यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम् ।
तं त्वा वयं हवामहे ।
(अग्निः १३३२) ८।४३।२३ (विरूप आङ्गिरसः । अग्निः)
तं त्वा वयं हवामहे ।
[१६६०] ४।३२।१६ = (१४४८) ३।५२।३

ऋग्वेदस्य पञ्चमं मण्डलम् ।

[१६६७] ५।२९।१ त्री रोचना दिव्या धारयन्त ।
२।२७।९ (कूर्मो गार्त्समदो, गृत्समदो वा । आदित्यः)
[१६६९] ५।२९।३ अहन्नहिं पपिवाँ इन्द्रो अस्य ।
(१६९२) ५।३०।११ पुरंदरः पपिवाँ इन्द्रो अस्य ।
[१६७५] ५।२९।१० (गौरिवीतिः शाक्त्यः । इन्द्रः)
नि दुर्योण आवृणङ् मृध्रवाचः ।
(१७११) ५।३२।८ (गातुरात्रेयः । इन्द्रः)
—मृध्रवाचम् ।
[१६७८] ५ २९।१२ दशग्वासो अभ्यर्चन्त्यर्कैः ।
६।५०।१५ (ऋजिश्वा भारद्वाजः । विश्वेदेवाः
भरद्वाजा अभ्यर्चन्त्यर्कैः ।
[१६७९] ५।२९।१३ वीर्या मघवन्या चकर्थ ।
(१६९८) ५।३१।६ प्र नूतना मघवन्या चकर्थ ।
[१६८९] ५।३०।८ (बभ्रुरात्रेयः । इन्द्रः)
शिरो दासस्य नमुचेर्मथायन् ।
(१८८९) ६।२०।६ (भरद्वाजो बार्हस्पत्यः । इन्द्रः)
[१६९२] ५।३०।११ = (१६६९) ५।२९।३
[३३३८] ५।३०।१३ (बभ्रुरात्रेयः । ऋणंचयेन्द्रौ)
अक्तोर्व्युष्टौ परितक्म्यायाः ।
(१९३६) ६।२४।९ (भरद्वाजो बार्हस्पत्यः । इन्द्रः)
— परितक्म्यायाम् ।
[१६९५] ५।३१।३ = (अग्निः ६३९) ४।१।१३
(वामदेवो गौतमः । अग्निः)
[१६९६] ५।३१।४ अवर्धयन्नहये हन्तवा उ ।
(२३४९) ८।९६।५ मदच्युतमहये हन्तवा उ ।
[१६९८] ५।३१।६ (अवस्युरात्रेयः । इन्द्रः)
प्र ते पूर्वाणि करणानि वोचं प्र नूतना मघवन्या चकर्थ ।
(२२८३) ७।९८।५ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
प्रेन्द्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार ।
[१७०२] ५ ३१।११ = १।१२१।१३ (कक्षीवान् औशिजो
दैर्घतमसः । विश्वेदेवा इन्द्रो वा)
["] ५।३१।११ = (१५३५) ४।२०।३
[१७०९] ५।३२।५ = (१२८५) ३।३२।४
[१७११] ५।३२।७ (गातुरात्रेयः । इन्द्रः)
इन्द्रो...महते...वधः ...। विश्वस्य जन्तोरधमं चकार ।
(२२८६) ७।१०४।१६ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
इन्द्रः......महता वधेन विश्वस्य जन्तोरधमस्पदीष्ट ।

[१७१२] ५।३२।८ = (१६७५) ५।२९।१०
[१७२१] ५।३३।५ (संवरणः प्राजापत्यः । इन्द्रः)
वयं ते त इन्द्र ये च नरः ।
(२२२१) ७।२०।४ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
— ये च देव ।
[१७३३] ५।३४।७ वि दाशुषे भजति सूनरं वसु ।
१।४०।४ (कण्वो घौरः । ब्रह्मणस्पतिः)
[१७३६] ५।३५।१ (प्रभूवसुराङ्गिरसः । इन्द्रः)
यस्ते साधिष्ठोऽवस...।
अस्मभ्यं चर्षणीसहम् ।
(२४३१) ८।५३(वाल०)।७ (मेध्यः काण्वः । इन्द्रः)
यस्ते साधिष्ठोऽवसे ।
(३०८५) ७।९४।७ (वसिष्ठो मैत्रावरुणिः । इन्द्राग्नी)
अस्मभ्यं चर्षणीसहा ।
[१७३७] ५।३५।२ (प्रभूवसुराङ्गिरसः । इन्द्रः)
यदिन्द्र ... ... ।
यद्वा पञ्च क्षितीनाम् ... ... आ भर ।
(२०९६) ६।४६।७ (शंयुर्बार्हस्पत्यः । इन्द्रः)
यदिन्द्र ... ... ।
यद्वा पञ्च क्षितीनां द्युम्नमा भर ।
[१७३८] ५ ३५।३ = (६७) १।१०।१०
[१७३९] ५ ३५।४ = (७८८) १।५४।३
[१७४०] ५।३५।५ त्वं तमिन्द्र मर्त्यम् ।
(२८३४) १०।१७१।३ त्वं त्यमिन्द्र मर्त्यम् ।
[१७४१] ५।३५।६ (प्रभूवसुराङ्गिरसः । इन्द्रः)
त्वामिद् वृत्रहन्तम जनासो वृक्तबर्हिषः ।
... ... हवन्ते वाजसातये ।
(२७९) ८।६।३७ (वत्सः काण्वः । इन्द्रः)
त्वामिद् ... ... ।
हवन्ते ... ... ।
(४२८) ८।३४।४ (नीपातिथिः काण्वः । इन्द्रः)
हवन्ते ... ... ।
(३३३०) ६।५७।१ (भरद्वाजो बार्हस्पत्यः । इन्द्रापूषणौ)
हुवेम वाजसातये ।
८।९।१३ (शशकर्णः काण्वः । अश्विनौ)
हुवेय वाजसातये ।
["] ५।३५।६=३।५९।९ (विश्वामित्रो गाथिनः । मित्रः)

[१७४०] ५।३५।७ (प्रभूवसुराङ्गिरसः । इन्द्रः)
पुरोयावानमाजिषु ।
वाजयन्तम् ... ।
(अग्निः १४६१) ८।८४।८ (उशना काव्यः । अग्निः)
पुरो ... ... ।
... ...वाजिनम् ।
[१७५०] ५।३७।१= (१५९१) ४।२५।४
[१७५४] ५।३७।५ (अत्रिर्भौमः । इन्द्रः)
प्रियः सूर्ये प्रियो अग्ना भवाति ।
(अग्निः १५९८) १०।४५।१० (वत्सप्रिर्भालन्दनः। अग्निः)
प्रियः सूर्ये प्रियो अग्ना भवाति ।
[१७५७] ५।३८।३=१।२५।२० (शुनःशेप आजीगर्तिः । वरुणः)
[१७६०] ५।३९।३ आ वाजं दर्षि सातये ।
९।६८।७ (वत्सप्रिर्भालन्दनः । पवमानः सोमः)
नृभिर्यतो वाजमा दर्षि ... ।
[१७६३] ५।३९।४ मंहिष्ठं वो मघोनां ।
८।१।३० (आसङ्गः प्लायोगिः । आसङ्गः)
मंहिष्ठासो मघोनाम् ।
[१७६४] ५।३९।४=(६२) १।१०।५
[”] ५।३९।५=(अग्निः ९०२) ५।२२।४
(विश्वसामा आत्रेय । अग्निः)
[१७६५] ५।४०।१ (अत्रिर्भौमः । इन्द्रः)
आ याहि ... ... सोमं सोमपते पिब ।
(४११) ८।२१।३ (सोभरिः काण्वः । इन्द्रः)
आ याहीम ... ... ।
सोमं सोमपते पिब ।
[”] ५।४०।१-३ वृषन्निन्द्र वृषभिर्वृत्रहन्तम ।
[१७६६-६७] ५।४०।२-३ (अत्रिर्भौमः । इन्द्रः)
वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः ॥३॥
वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः ॥४॥
(३५२-५३) ८।१३।३२-३३ (नारदः काण्वः । इन्द्रः)
वृषा ग्रावा ... ... ॥३२॥
वृषा त्वा ... ... ॥३३॥
[१७६८] ५।४०।४= (१०९१) १।१६७।१

ऋग्वेदस्य षष्ठं मण्डलम् ।

[१८५७] ६।१८।२ (भरद्वाजो बार्हस्पत्यः । इन्द्रः)
स युध्मः सत्वा खजकृत्समद्वा ।
(२२५३) ७।२०।३ (वसिष्ठो मैत्रावरुणिः । इन्द्रः)
युध्मो अनर्वा खजकृत्समद्वा ।
[१८६७] ६।१८।१२ = (१५१२) ४।१८।४
[१८७१] ६।१९।१ (भरद्वाजो बार्हस्पत्यः । इन्द्रः)
उरुः पृथुः सुकृतः कर्तृभिर्भूत् ।
७।६२।१ (वसिष्ठो मैत्रावरुणिः । सूर्यः)
क्रत्वा कृतः सुकृतः कर्तृभिर्भूत् ।
[१८७२] ६।१९।२ = (१२८८) ३।३२।७
[१८७३] ६।१९।३ = ३।५४।२२ (प्रजापतिर्वैश्वामित्रः,
प्रजापतिर्वाच्यो वा । विश्वेदेवाः)
स वायुमिन्द्रमश्विना साकं मदेन गच्छति । रणा यो अस्य धर्मभिः ७
आ मित्रावरुणा भगं मध्वः पवन्त ऊर्मयः । विदाना अस्य शक्मभिः ८
अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये । श्रवो वसूनि सं जितम् ९

॥७॥ (ऋ. ९।८।१-९)

एते सोमा अभि प्रिय—मिन्द्रस्य काममक्षरन् । वर्धन्तो अस्य वीर्यम् १
पुनानासश्चमूषदो गच्छन्तो वायुमश्विना । ते नो धान्तु सुवीर्यम् २ ६०
इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय । ऋतस्य योनिमासदम् ३
मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः । अनु विप्रा अमादिषुः ४
देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः । सं गोभिर्वासयामसि ५ ६३

पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः । परि गव्यान्यव्यत ६
मघोन आ पवस्व नो जहि विश्वा अप द्विषः । इन्दो सखायमा विश ७ ६५
वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि । सहो नः सोम पृत्सु धाः ८
नृचक्षसं त्वा वय मिन्द्रपीतं स्वर्विदम् । भक्षीमहि प्रजामिषम् ९

॥ ८ ॥ (ऋ. ९ । ९ । १—९)

परि प्रिया दिवः कवि र्वयांसि नप्त्योर्हितः । सुवानो याति कविक्रतुः १
प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे । वीत्यर्ष चनिष्ठया २
स सूनुर्मातरा शुचि र्जातो जाते अरोचयत् । महान् मही ऋतावृधा ३ ७०
स सप्त धीतिभिर्हितो नद्यो अजिन्वदद्रुहः । या एकमक्षि वावृधुः ४
ता अभि सन्तमस्तृतं महे युवानमा दधुः । इन्दुमिन्द्र तव व्रते ५
अभि वह्निरमर्त्यः सप्त पश्यति वावहिः । क्रिविर्देवीरतर्पयत् ६
अवा कल्पेषु नः पुम स्तमांसि सोम योध्या । तानि पुनान जङ्घनः ७
नू नव्यसे नवीयसे सूक्ताय साधया पथः । प्रत्नवद् रोचया रुचः ८ ७५
पवमान महि श्रवो गामश्वं रासि वीरवत् । सना मेधां सना स्वः ९

॥ ९ ॥ (ऋ. ९ । १० । १—९]

प्र स्वानासो रथा इवा ऽर्वन्तो न श्रवस्यवः । सोमासो राये अक्रमुः १
हिन्वानासो रथा इव दधन्विरे गभस्त्योः । भरासः कारिणामिव २
राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते । यज्ञो न सप्त धातृभिः ३
परि सुवानास इन्दवो मदाय बर्हणा गिरा । सुता अर्षन्ति धारया ४ ८०
आपानासो विवस्वतो जनन्त उषसो भगम् । सूरा अण्वं वि तन्वते ५
अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः । वृष्णो हरस आयवः ६
समीचीनास आसते होतारः सप्तजामयः । पदमेकस्य पिप्रतः ७
नाभा नाभिं न आ ददे चक्षुश्चित् सूर्ये सचा । कवेरपत्यमा दुहे ८
अभि प्रिया दिवस्पद मध्वर्युभिर्गुहा हितम् । सूरः पश्यति चक्षसा ९ ८५

॥ १० ॥ (ऋ. ९ । ११ । १—९)

उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँ इयक्षते १
अभि ते मधुना पयो ऽथर्वाणो अशिश्रयुः । देवं देवाय देवयु २
स नः पवस्व शं गवे शं जनाय शमर्वते । शं राजन्नोषधीभ्यः ३ ८८

बभ्रवे नु स्वतवसे ऽरुणाय दिविस्पृशे । सोमाय गाथमर्चत ४
हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन । मधावा धावता मधु ५ ९०
नमसेदुप सीदत दध्नेदभि श्रीणीतन । इन्दुमिन्द्रे दधातन ६
अमित्रहा विचर्षणिः पवस्व सोम शं गवे । देवेभ्यो अनुकामकृत् ७
इन्द्राय सोम पातवे मदाय परि षिच्यसे । मनश्चिन्मनसस्पतिः ८
पवमान सुवीर्यं रयिं सोम रिरीहि नः । इन्दविन्द्रेण नो युजा ९

॥ ११ ॥ (ऋ. ९ । १२ । १-९)

सोमा असृग्रमिन्दवः सुता ऋतस्य सादने । इन्द्राय मधुमत्तमाः १ ९५
अभि विप्रा अनूषत गावो वत्सं न मातरः । इन्द्रं सोमस्य पीतये २
मदच्युत् क्षेति सादने सिन्धोरूर्मा विपश्चित् । सोमो गौरी अधि श्रितः ३
दिवो नाभा विचक्षणो ऽव्यो वारे महीयते । सोमो यः सुक्रतुः कविः ४
यः सोमः कलशेष्वाँ अन्तः पवित्र आहितः । तमिन्दुः परि षस्वजे ५
प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि । जिन्वन् कोशं मधुश्चुतम् ६ १००
नित्यस्तोत्रो वनस्पति र्धीनामन्तः सबर्दुघः । हिन्वानो मानुषा युगा ७
अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति । विप्रस्य धारया कविः ८
आ पवमान धारय रयिं सहस्रवर्चसम् । अस्मे इन्दो स्वाभुवम् ९

॥ १२ ॥ (ऋ. ९ । १३ । १-९)

सोमः पुनानो अर्षति सहस्रधारो अत्यविः । वायोरिन्द्रस्य निष्कृतम् १
पवमानमवस्यवो विप्रमभि प्र गायत । सुष्वाणं देववीतये २ १०५
पवन्ते वाजसातये सोमाः सहस्रपाजसः । गृणाना देववीतये ३
उत नो वाजसातये पवस्व बृहतीरिषः । द्युमदिन्दो सुवीर्यम् ४
ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम् । सुवाना देवास इन्दवः ५
अत्या हियाना न हेतृभि रसृग्रं वाजसातये । वि वारमव्यमाशवः ६
वाश्रा अर्षन्तीन्दवो ऽभि वत्सं न धेनवः । दधन्विरे गभस्त्योः ७ ११०
जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत् । विश्वा अप द्विषो जहि ८
अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः । योनावृतस्य सीदत ९

॥ १३ ॥ (ऋ. ९ । १४ । १-८)

परि प्रासिष्यदत् कविः सिन्धोरूर्मावधि श्रितः । कारं बिभ्रत् पुरुस्पृहम् १
गिरा यदी सबन्धवः पञ्च व्राता अपस्यवः । परिष्कृण्वन्ति धर्णसिम् २ ११४

आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत । यदी गोभिर्वसायते ३ ११५
निरिणानो वि धावति जहच्छर्याणि तान्वा । अत्रा सं जिघ्नते युजा ४
नप्तीभिर्यो विवस्वतः शुभ्रो न मामृजे युवा । गाः कृण्वानो न निर्णिजम् ५
अति श्रिती तिरश्चता गव्या जिगात्यण्व्या । वग्नुमियर्ति यं विदे ६
अभि क्षिपः समग्मत मर्जयन्तीरिषस्पतिम् । पृष्ठा गृभ्णत वाजिनः ७
परि दिव्यानि मर्मृशद् विश्वानि सोम पार्थिवा । वसूनि याह्यस्मयुः ८ १२०

॥ १४ ॥ (ऋ. ९ । १५ । १-८)

एष धिया यात्यण्व्या शूरो रथेभिराशुभिः । गच्छन्निन्द्रस्य निष्कृतम् १
एष पुरू धियायते बृहते देवतातये । यत्रामृतास आसते २
एष हितो वि नीयते ऽन्तः शुभ्रावता पथा । यदी तुञ्जन्ति भूर्णयः ३
एष शृङ्गाणि दोधुव—च्छिशीते यूथ्यो३ वृषा । नृम्णा दधान ओजसा ४
एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः । पतिः सिन्धूनां भवन् ५ १२५
एष वसूनि पिब्दना परुषा ययिवाँ अति । अव शादेषु गच्छति ६
एतं मृजन्ति मर्ज्य—मुप द्रोणेष्वायवः । प्रचक्राणं महीरिषः ७
एतमु त्यं दश क्षिपो मृजन्ति सप्त धीतयः । स्वायुधं मदिन्तमम् ८

॥ १५ ॥ (ऋ. ९ । १६ । १-८)

प्र ते सोतार ओण्यो३ रसं मदाय घृष्वये । सर्गो न तक्त्येतशः १
क्रत्वा दक्षस्य रथ्य—मपो वसानमन्धसा । गोषामण्वेषु सश्चिम २ १३०
अनप्तमप्सु दुष्टरं सोमं पवित्र आ सृज । पुनीहीन्द्राय पातवे ३
प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति । क्रत्वा सधस्थमासदत् ४
प्र त्वा नमोभिरिन्दव इन्द्र सोमा असृक्षत । महे भराय कारिणः ५
पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः । शूरो न गोषु तिष्ठति ६
दिवो न सानु पिप्युषी धारा सुतस्य वेधसः । वृथा पवित्रे अर्षति ७ १३५
त्वं सोम विपश्चितं तना पुनान आयुषु । अव्यो वारं वि धावसि ८

॥ १६ ॥ (ऋ. ९ । १७ । १-८)

प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः । सोमा असृग्रमाशवः १
अभि सुवानास इन्दवो वृष्टयः पृथिवीमिव । इन्द्रं सोमासो अक्षरन् २ १३८

अत्यूर्मिर्मत्सरो मदः सोमः पवित्रे अर्षति । विघ्नन् रक्षांसि देवयुः ३
आ कलशेषु धावति पवित्रे परि षिच्यते । उक्थैर्यज्ञेषु वर्धते ४ १४०
अति त्री सोम रोचना रोहन् न भ्राजसे दिवम् । इष्णन्त्सूर्यं न चोदयः ५
अभि विप्रा अनूषत मूर्धन् यज्ञस्य कारवः । दधानाश्चक्षसि प्रियम् ६
तमु त्वा वाजिनं नरो धीभिर्विप्रा अवस्यवः । मृजन्ति देवतातये ७
मधोर्धारामनु क्षर तीव्रः सधस्थमासदः । चारुर्ऋताय पीतये ८

॥ १७ ॥ (ऋ. ९ । २८ । २-७)

परि सुवानो गिरिष्ठाः पवित्रे सोमो अक्षाः । मदेषु सर्वधा असि १ १४५
त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः । मदेषु सर्वधा असि २
तव विश्वे सजोषसो देवासः पीतिमाशत । मदेषु सर्वधा असि ३
आ यो विश्वानि वार्या वसूनि हस्तयोर्दधे । मदेषु सर्वधा असि ४
य इमे रोदसी मही सं मातरेव दोहते । मदेषु सर्वधा असि ५
परि यो रोदसी उभे सद्यो वाजेभिरर्षति । मदेषु सर्वधा असि ६ १५०
स शुष्मी कलशेष्वा पुनानो अचिक्रदत् । मदेषु सर्वधा असि ७

॥ १८ ॥ (ऋ. ९ । १८ । १-७)

यत् सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु । तन्नः पुनान आ भर १
युवं हि स्थः स्वर्पती इन्द्रश्च सोम गोपती । ईशाना पिप्यतं धियः २
वृषा पुनान आयुषु स्तनयन्नधि बर्हिषि । हरिः सन् योनिमासदत् ३
अवावशन्त धीतयो वृषभस्याधि रेतसि । सूनोर्वत्सस्य मातरः ४ १५५
कुविद् वृषण्यन्तीभ्यः पुनानो गर्भमादधत् । याः शुक्रं दुहते पयः ५
उप शिक्षापतस्थुषो भियसमा धेहि शत्रुषु । पवमान विदा रयिम् ६
नि शत्रोः सोम वृष्ण्यं नि शुष्मं नि वयस्तिर । दूरे वा सतो अन्ति वा ७

॥ १९ ॥ (ऋ. ९ । २० । १-७)

प्र कविर्देववीतयेऽव्यो वारेभिरर्षति । साह्वान् विश्वा अभि स्पृधः १
स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति । पवमानः सहस्रिणम् २ १६०
परि विश्वानि चेतसा मृशसे पवसे मती । स नः सोम श्रवो विदः ३
अभ्यर्ष बृहद् यशो मघवद्भ्यो ध्रुवं रयिम् । इषं स्तोतृभ्य आ भर ४ १६२

त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ । पुनानो वह्ने अद्भुत ५
स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः । सोमश्चमूषु सीदति ६
क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि । दधत् स्तोत्रे सुवीर्यम् ७ १६५

॥ २० ॥ (ऋ. ९ । २१ । १-७)

एते धावन्तीन्दवः सोमा इन्द्राय घृष्वयः । मत्सरासः स्वर्विदः १
प्रवृण्वन्तो अभियुजः सुष्वये वरिवोविदः । स्वयं स्तोत्रे वयस्कृतः २
वृथा क्रीळन्त इन्दवः सधस्थमभ्येकमित् । सिन्धोरूर्मा व्यक्षरन् ३
एते विश्वानि वार्या पवमानास आशत । हिता न सप्तयो रथे ४
आस्मिन् पिशङ्गमिन्दवो दधाता वेनमादिशे । यो अस्मभ्यमरावा ५ १७०
ऋभुर्न रथ्यं नवं दधाता केतमादिशे । शुक्राः पवध्वमर्णसा ६
एत उ त्ये अवीवशन् काष्ठां वाजिनो अक्रत । सतः प्रासाविषुर्मतिम् ७

॥ २१ ॥ (ऋ. ९ । २२ । १-७)

एते सोमास आशवो रथा इव प्र वाजिनः । सर्गाः सृष्टा अहेषत १
एते वाता इवोरवः पर्जन्यस्येव वृष्टयः । अग्नेरिव भ्रमा वृथा २
एते पूता विपश्चितः सोमासो दध्याशिरः । विपा व्यानशुर्धियः ३ १७५
एते मृष्टा अमर्त्याः ससृवांसो न शश्रमुः । इयक्षन्तः पथो रजः ४
एते पृष्ठानि रोदसो—र्विप्रयन्तो व्यानशुः । उतेदमुत्तमं रजः ५
तन्तुं तन्वानमुत्तम—मनु प्रवत आशत । उतेदमुत्तमाय्यम् ६
त्वं सोम पणिभ्य आ वसु गव्यानि धारयः । ततं तन्तुमचिक्रदः ७

॥ २२ ॥ (ऋ. ९ । २३ । १-७)

सोमा असृग्रमाशवो मधोर्मदस्य धारया । अभि विश्वानि काव्या १ १८०
अनु प्रत्नास आयवः पदं नवीयो अक्रमुः । रुचे जनन्त सूर्यम् २
आ पवमान नो भरा—ऽर्यो अदाशुषो गयम् । कृधि प्रजावतीरिषः ३
अभि सोमास आयवः पवन्ते मद्यं मदम् । अभि कोशं मधुश्चुतम् ४
सोमो अर्षति धर्णसि—र्दधान इन्द्रियं रसम् । सुवीरो अभिशस्तिपाः ५
इन्द्राय सोम पवसे देवेभ्यः सधमाद्यः । इन्दो वाजं सिषाससि ६ १८५
अस्य पीत्वा मदाना—मिन्द्रो वृत्राण्यप्रति । जघान जघनच्च नु ७ १८६

॥ २३ ॥ (ऋ. ९ । २४ । १—७)

प्र सोमासो अधन्विषुः पवमानास इन्दवः । श्रीणाना अप्सु मृञ्जत १
अभि गावो अधन्विषुरापो न प्रवता यतीः । पुनाना इन्द्रमाशत २
प्र पवमान धन्वसि सोमेन्द्राय पातवे । नृभिर्यतो वि नीयसे ३
त्वं सोम नृमादनः पवस्व चर्षणीसहे । सस्निर्यो अनुमाद्यः ४ १९०
इन्दो यदद्रिभिः सुतः पवित्रं परिधावसि । अरमिन्द्रस्य धाम्ने ५
पवस्व वृत्रहन्तमोक्थेभिरनुमाद्यः । शुचिः पावको अद्भुतः ६
शुचिः पावक उच्यते सोमः सुतस्य मध्वः । देवावीरघशंसहा ७ १९३

॥ २४ ॥ (ऋ. ९ । २५ । १—६) (१९४—१९९) दृळ्हच्युत आगस्त्यः ।

पवस्व दक्षसाधनो देवेभ्यः पीतये हरे । मरुद्भ्यो वायवे मदः १
पवमान धिया हितो३ऽभि योनिं कनिक्रदत् । धर्मणा वायुमा विश २ १९५
सं देवैः शोभते वृषा कविर्योनावधि प्रियः । वृत्रहा देववीतमः ३
विश्वा रूपाण्याविशन् पुनानो याति हर्यतः । यत्रामृतास आसते ४
अरुषो जनयन् गिरः सोमः पवत आयुषक् । इन्द्रं गच्छन् कविक्रतुः ५
आ पवस्व मदिन्तम पवित्रं धारया कवे । अर्कस्य योनिमासदम् ६ १९९

॥ २५ ॥ (ऋ. ९ । २६ । १-६) (२००-२०५) इध्मवाहो दार्ढच्युतः ।

तममृक्षन्त वाजिनमुपस्थे अदितेरधि । विप्रासो अण्व्या धिया १ २००
तं गावो अभ्यनूषत सहस्रधारमक्षितम् । इन्दुं धर्तारमा दिवः २
तं वेधां मेधयाह्यन् पवमानमधि द्यवि । धर्णसिं भूरिधायसम् ३
तमह्यन् भुरिजोर्धिया संवसानं विवस्वतः । पतिं वाचो अदाभ्यम् ४
तं सानावधि जामयो हरिं हिन्वन्त्यद्रिभिः । हर्यतं भूरिचक्षसम् ५
तं त्वा हिन्वन्ति वेधसः पवमान गिरावृधम् । इन्दविन्द्राय मत्सरम् ६ २०५

॥ २६ ॥ (ऋ. ९ । २७ । १-६) (२०६—२११) नृमेध आङ्गिरसः ।

एष कविरभिष्टुतः पवित्रे अधि तोशते । पुनानो घ्नन्नप स्रिधः १
एष इन्द्राय वायवे स्वर्जित् परि षिच्यते । पवित्रे दक्षसाधनः २
एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः । सोमो वनेषु विश्ववित् ३
एष गव्युरचिक्रदत् पवमानो हिरण्ययुः । इन्दुः सत्राजिदस्तृतः ४ २०९

एष सूर्येण हासते पवमानो अधि द्यवि । पवित्रे मत्सरो मदः ५ २१०
एष शुष्म्यसिष्यद दन्तरिक्षे वृषा हरिः । पुनान इन्दुरिन्द्रमा ६ २११

॥ २७ ॥ (ऋ. ९ । २८ । १—६) (२१२—२१७) प्रियमेध आङ्गिरसः ।

एष वाजी हितो नृभि र्विश्वविन्मनसस्पतिः । अव्यो वारं वि धावति १
एष पवित्रे अक्षरत् सोमो देवेभ्यः सुतः । विश्वा धामान्याविशन् २
एष देवः शुभायते ऽधि योनावमर्त्यः । वृत्रहा देववीतमः ३
एष वृषा कनिक्रदद् दशभिर्जामिभिर्यतः । अभि द्रोणानि धावति ४ २१५
एष सूर्यमरोचयत् पवमानो विचर्षणिः । विश्वा धामानि विश्ववित् ५
एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति । देवावीरघशंसहा ६ २१७

॥ २८ ॥ (ऋ. ९ । २९ । १-६) (२१८—२२३) नृमेध आङ्गिरसः ।

प्रास्य धारा अक्षरन् वृष्णः सुतस्यौजसा । देवाँ अनु प्रभूषतः १
सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा । ज्योतिर्जज्ञानमुक्थ्यम् २
सुषहा सोम तानि ते पुनानाय प्रभूवसो । वर्धा समुद्रमुक्थ्यम् ३ २२०
विश्वा वसूनि संजयन् पवस्व सोम धारया । इनु द्वेषांसि सध्र्यक् ४
रक्षा सु नो अररुषः स्वनात् समस्य कस्य चित् । निदो यत्र मुमुच्महे ५
एन्दो पार्थिवं रयिं दिव्यं पवस्व धारया । द्युमन्तं शुष्ममा भर ६ २२३

॥ २९ ॥ (ऋ. ९ । ३० । १—६) (२२४—२२९) बिन्दुराङ्गिरसः ।

प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन् । पुनानो वाचमिष्यति १
इन्दुर्हियानः सोतृभि र्मृज्यमानः कनिक्रदत् । इयर्ति वग्नुमिन्द्रियम् २ २२५
आ नः शुष्मं नृषाह्यं वीरवन्तं पुरुस्पृहम् । पवस्व सोम धारया ३
प्र सोमो अति धारया पवमानो असिष्यदत् । अभि द्रोणान्यासदम् ४
अप्सु त्वा मधुमत्तमं हरिं हिन्वन्त्यद्रिभिः । इन्दविन्द्राय पीतये ५
सुनोता मधुमत्तमं सोममिन्द्राय वज्रिणे । चारुं शर्धाय मत्सरम् ६ २२९

॥ ३० ॥ (ऋ. ९ । ३१ । १—६) (२३०—२३५) गोतमो राहूगणः ।

प्र सोमासः स्वाध्यः पवमानासो अक्रमुः । रयिं कृण्वन्ति चेतनम् १ २३०
दिवस्पृथिव्या अधि भवेन्दो द्युम्नवर्धनः । भवा वाजानां पतिः २
तुभ्यं वाता अभिप्रिय स्तुभ्यमर्षन्ति सिन्धवः । सोम वर्धन्ति ते महः ३ २३१

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे ४
तुभ्यं गावो घृतं पयो बभ्रो दुदुह्रे अक्षितम् । वर्षिष्ठे अधि सानवि ५
स्वायुधस्य ते सुतो भुवनस्य पते वयम् । इन्दो सखित्वमुश्मसि ६ २३५

॥ ३१ ॥ (ऋ. ९ । ३१।१-६) (२३६—२४१) इयावाश्व आत्रेयः।

प्र सोमासो मदच्युतः श्रवसे नो मघोनः । सुता विदथे अक्रमुः १
आदीं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये २
आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिम् । अत्यो न गोभिरज्यते ३
उभे सोमावचाकशन् मृगो न तक्तो अर्षसि । सीदन्नृतस्य योनिमा ४
अभि गावो अनूषत योषा जारमिव प्रियम् । अगन्नाजिं यथा हितम् ५ २४०
अस्मे धेहि द्युमद् यशो मघवद्भ्यश्च मह्यं च । सनिं मेधामुत श्रवः ६ २४१

॥ ३२ ॥ (ऋ. ९ । ३३ । १-६) (२४२ – २४७) त्रित आप्त्यः।

प्र सोमासो विपश्चितो ऽपां न यन्त्यूर्मयः । वनानि महिषा इव १
अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया । वाजं गोमन्तमक्षरन् २
सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः । सोमा अर्षन्ति विष्णवे ३
तिस्रो वाच उदीरते गावो मिमन्ति धेनवः । हरिरेति कनिक्रदत् ४ २४५
अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः । मर्मृज्यन्ते दिवः शिशुम् ५
रायः समुद्रांश्चतुरो ऽस्मभ्यं सोम विश्वतः । आ पवस्व सहस्रिणः ६

॥ ३३ ॥ (ऋ. ९ । ३४ । १—६)

प्र सुवानो धारया तने न्दुर्हिन्वानो अर्षति । रुजद् दृळ्हा व्योजसा १
सुत इन्द्राय वायवे वरुणाय मरुद्भ्यः । सोमो अर्षति विष्णवे २
वृषाणं वृषभिर्यतं सुन्वन्ति सोममद्रिभिः । दुहन्ति शक्मना पयः ३ २५०
भुवत् त्रितस्य मर्ज्यो भुवदिन्द्राय मत्सरः । सं रूपैरज्यते हरिः ४
अभीमृतस्य विष्टपं दुहते पृश्निमातरः । चारु प्रियतमं हविः ५
समेनमह्रुता इमा गिरो अर्षन्ति सस्रुतः । धेनूर्वाश्रो अवीवशत् ६ २५३

॥ ३४ ॥ (ऋ. ९ । ३५ । १—६) (२५४—२५९) प्रभूवसुराङ्गिरसः।

आ नः पवस्व धारया पवमान रयिं पृथुम् । यया ज्योतिर्विदासि नः १
इन्दो समुद्रमीङ्खय पवस्व विश्वमेजय । रायो धर्ता न ओजसा २ २५५

त्वया॑ वी॒रेण॑ वीरवो॒ ऽभि ष्या॑म पृतन्य॒तः । क्षरा॑ णो अ॒भि वार्य॑म् ३
प्र वाज॒मिन्दु॑रिष्यति॒ सिषा॑सन् वाज॒सा ऋषि॑ः । व्र॒ता वि॒दान आयु॑धा ४
तं गी॒र्भिर्वा॑चमीङ्ख॒यं पु॑ना॒नं वा॑सयामसि । सोम॒ं जन॑स्य॒ गोप॑तिम् ५
विश्वो॒ यस्य॑ व्र॒ते जनो॑ दा॒धार॒ धर्म॑ण॒स्पते॑ः । पु॒ना॒नस्य॑ प्र॒भूव॑सोः ६

॥ ३५ ॥ (ऋ. ९ । ३६ । १—६)

अस॑र्जि॒ रथ्यो॑ यथा प॒वित्रे॑ च॒म्वो॑ः सु॒तः । कार्ष्म॑न् वा॒जी न्य॑क्रमीत् १ २६०
स वह्नि॑ः सोम॒ जागृ॑वि॒ः पव॑स्व देव॒वीरति॑ । अ॒भि कोश॑ं मधु॒श्चुत॑म् २
स नो॒ ज्योतीं॑षि पूर्व्य॒ पव॑मान॒ वि रो॑चय । क्रत्वे॒ दक्षा॑य नो हिनु ३
शु॒म्भमा॑न ऋता॒युभि॑र्मृ॒ज्यमा॑नो॒ गभ॑स्त्योः । पव॑ते॒ वारे॑ अ॒व्यये॑ ४
स विश्वा॑ दा॒शुषे॒ वसु॒ सोमो॑ दि॒व्यानि॒ पार्थि॑वा । पव॑ता॒मान्तरि॑क्ष्या ५
आ दि॒वस्पृ॒ष्ठम॑श्व॒युर्ग॑व्य॒युः सो॑म रोहसि । वी॒र॒युः श॑वसस्पते ६ २६५

॥ ३६ ॥ (ऋ. ९ । ३७ । १—६) (२६६—२७७) रहूगण आङ्गिरसः ।

स सु॒तः पी॒तये॒ वृषा॒ सोम॑ः प॒वित्रे॑ अर्षति । वि॒घ्नन् रक्षां॑सि देव॒युः १
स प॒वित्रे॑ विचक्ष॒णो॑ हरि॑रर्षति धर्ण॒सिः । अ॒भि योनि॒ं कनि॑क्रदत् २
स वा॒जी रो॑च॒ना दि॒वः पव॑मानो॒ वि धा॑वति । र॒क्षो॒हा वार॑म॒व्यय॑म् ३
स त्रि॒तस्याधि॒ सान॑वि॒ पव॑मानो अरोचयत् । जा॒मिभि॒ः सूर्य॑ं स॒ह ४
स वृ॑त्र॒हा वृषा॑ सु॒तो व॑रिवो॒विद॑दा॑भ्यः । सोमो॒ वाज॑मिवासरत् ५ २७०
स दे॒वः क॒विने॑षि॒तो॒३॒॑ ऽभि द्रोणा॑नि धावति । इन्दु॒रिन्द्रा॑य मं॒हना॑ ६

॥ ३७ ॥ (ऋ. ९ । ३८ । १—६)

ए॒ष उ॒ स्य वृषा॒ रथो॒ ऽव्यो॒ वारे॑भिरर्षति । गच्छ॒न् वाज॑ं सह॒स्रिण॑म् १
ए॒तं त्रि॒तस्य॒ योष॑णो॒ हरि॑ं हिन्व॒न्त्यद्रि॑भिः । इन्दु॒मिन्द्रा॑य पी॒तये॑ २
ए॒तं त्यं ह॒रितो॒ दश॑ मर्मृ॒ज्यन्ते॑ अप॒स्युव॑ः । याभि॒र्मदा॑य॒ शुम्भ॑ते ३
ए॒ष स्य मानु॑षी॒ष्वा श्ये॒नो न वि॒क्षु सी॑दति । गच्छ॑ञ्जा॒रो न यो॒षित॑म् ४ २७५
ए॒ष स्य मद्यो॒ रसो॒ ऽव॑ चष्टे दि॒वः शिशु॑ः । य इन्दु॒र्वार॒मावि॑शत् ५
ए॒ष स्य पी॒तये॑ सु॒तो हरि॑रर्षति धर्ण॒सिः । क्रन्द॒न् योनि॑म॒भि प्रि॒यम् ६ २७७

॥ ३८ ॥ (ऋ. ९ । ३९ । १—६) (२७८—२८९) बृहन्मतिराङ्गिरसः ।

आ॒शुर॑र्ष बृहन्मते॒ परि॑ प्रि॒येण॒ धाम्ना॑ । यत्र॑ दे॒वा इति॒ ब्रव॑न् १
प॒रि॒ष्कृ॒ण्वन्ननि॑ष्कृत॒ं जना॑य या॒तय॒न्निष॑ः । वृ॒ष्टिं दि॒वः परि॑ स्रव २ २७९

सुत एति पवित्र आ त्विषिं दधान ओजसा । विचक्षाणो विरोचयन् ३ १८०
अयं स यो दिवस्परि रघुयामा पवित्र आ । सिन्धोरूर्मा व्यक्षरत् ४
आविवासन् परावतो अथो अर्वावतः सुतः । इन्द्राय सिच्यते मधु ५
समीचीना अनूषत हरिं हिन्वन्त्यद्रिभिः । योनावृतस्य सीदत ६

॥ ३९ ॥ (ऋ. ९ । ४० । १—६)

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः । शुम्भन्ति विप्रं धीतिभिः १
आ योनिमरुणो रुहद् गमदिन्द्रं वृषा सुतः । ध्रुवे सदसि सीदति २ १८५
नू नो रयिं महामिन्दो ऽस्मभ्यं सोम विश्वतः । आ पवस्व सहस्रिणम् ३
विश्वा सोम पवमान द्युम्नानीन्दवा भर । विदाः सहस्रिणीरिषः ४
स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यम् । जरितुर्वर्धया गिरः ५
पुनान इन्दवा भर सोम द्विबर्हसं रयिम् । वृषन्निन्दो न उक्थ्यम् ६ १८९

॥ ४० ॥ (ऋ. ९ । ४१ । १—६) (१९०—२०७) मेध्यातिथिः काण्वः ।

प्र ये गावो न भूर्णय स्त्वेषा अयासो अक्रमुः । घ्नन्तः कृष्णामप त्वचम् १ १९०
सुवितस्य मनामहे ऽति सेतुं दुराव्यम् । साह्वांसो दस्युमव्रतम् २
शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः । चरन्ति विद्युतो दिवि ३
आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् । अश्वावद् वाजवत् सुतः ४
स पवस्व विचर्षण आ मही रोदसी पृण । उषाः सूर्यो न रश्मिभिः ५
परि णः शर्मयन्त्या धारया सोम विश्वतः । सरा रसेव विष्टपम् ६ १९५

॥ ४१ ॥ (ऋ. ९ । ४२ । १—६)

जनयन् रोचना दिवो जनयन्नप्सु सूर्यम् । वसानो गा अपो हरिः १
एष प्रत्नेन मन्मना देवो देवेभ्यस्परि । धारया पवते सुतः २
वावृधानाय तूर्वये पवन्ते वाजसातये । सोमाः सहस्रपाजसः ३
दुहानः प्रत्नमित् पयः पवित्रे परि षिच्यते । क्रन्दन् देवाँ अजीजनत् ४
अभि विश्वानि वार्या ऽभि देवाँ ऋतावृधः । सोमः पुनानो अर्षति ५ २००
गोमन्नः सोम वीरव दश्वावद् वाजवत् सुतः । पवस्व बृहतीरिषः ६

॥ ४२ ॥ (ऋ. ९ । ४३ । १—६)

यो अत्य इव मृज्यते गोभिर्मदाय हर्यतः । तं गीर्भिर्वासयामसि १
तं नो विश्वा अवस्युवो गिरः शुम्भन्ति पूर्वथा । इन्दुमिन्द्राय पीतये २ २०३

पुनानो याति हर्यतः सोमो गीर्भिः परिष्कृतः । विप्रस्य मेध्यातिथेः ३
पवमान विदा रयि-मस्मभ्यं सोम सुश्रियम् । इन्दो सहस्रवर्चसम् ४ ३०५
इन्दुरत्यो न वाजसृत् कनिक्रन्ति पवित्र आ । यदक्षारति देवयुः ५
पवस्व वाजसातये विप्रस्य गृणतो वृधे । सोम रास्व सुवीर्यम् ६ ३०७

॥ ४३ ॥ (ऋ. ९ । ४४ । १—६) (३०८-३१५) अयास्य आङ्गिरसः ।

प्र ण इन्दो महे तन ऊर्मिं न बिभ्रदर्षसि । अभि देवाँ अयास्यः १
मती जुष्टो धिया हितः सोमो हिन्वे परावति । विप्रस्य धारया कविः २
अयं देवेषु जागृविः सुत एति पवित्र आ । सोमो याति विचर्षणिः ३ ३१०
स नः पवस्व वाजयु-श्चक्राणश्चारुमध्वरम् । बर्हिष्माँ आ विवासति ४
स नो भगाय वायवे विप्रवीरः सदावृधः । सोमो देवेष्वा यमत् ५
स नो अद्य वसुत्तये क्रतुविद् गातुवित्तमः । वाजं जेषि श्रवो बृहत् ६

॥ ४४ ॥ (ऋ. ९ । ४५ । १—६)

स पवस्व मदाय कं नृचक्षा देववीतये । इन्दविन्द्राय पीतये १
स नो अर्षाभि दूत्यं त्वमिन्द्राय तोशसे । देवान्त्सखिभ्य आ वरम् २ ३१५
उत त्वामरुणं वयं गोभिरञ्ज्मो मदाय कम् । वि नो राये दुरो वृधि ३
अत्यू पवित्रमक्रमीद् वाजी धुरं न यामनि । इन्दुर्देवेषु पत्यते ४
समी सखायो अस्वरन् वने क्रीळन्तमत्यविम् । इन्दुं नावा अनूषत ५
तया पवस्व धारया यया पीतो विचक्षसे । इन्दो स्तोत्रे सुवीर्यम् ६

॥ ४५ ॥ (ऋ. ९ । ४६ । १—६)

असृग्रन् देववीतये ऽत्यासः कृत्व्या इव । क्षरन्तः पर्वतावृधः १ ३२०
परिष्कृतास इन्दवो योषेव पित्र्यावती । वायुं सोमा असृक्षत २
एते सोमास इन्दवः प्रयस्वन्तश्चमू सुताः । इन्द्रं वर्धन्ति कर्मभिः ३
आ धावता सुहस्त्यः शुक्रा गृभ्णीत मन्थिना । गोभिः श्रीणीत मत्सरम् ४
स पवस्व धनंजय प्रयन्ता राधसो महः । अस्मभ्यं सोम गातुवित् ५
एतं मृजन्ति मर्ज्यं पवमानं दश क्षिपः । इन्द्राय मत्सरं मदम् ६ ३२५

॥ ४६ ॥ (ऋ. ९ । ४७ । १—५) (३२६—३४०) कविर्भार्गवः ।

अया सोमः सुकृत्यया महश्चिदभ्यवर्धत । मन्दान उद् वृषायते १
कृतानीदस्य कर्त्वा चेतन्ते दस्युतर्हणा । ऋणा च धृष्णुश्चयते २ ३२७

आत् सोम इन्द्रियो रसो वज्रः सहस्रसा भुवत् । उक्थं यदस्य जायते ३
स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति । यदी मर्मृज्यते धियः ४
सिषासतू रयीणां वाजेष्वर्वतामिव । भरेषु जिग्युषामसि ५ ३३०

॥ ४७ ॥ (ऋ. ९ । ४८ । १-५)

तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः । चारुं सुकृत्ययेमहे १
संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम् । शतं पुरो रुरुक्षणिम् २
अतस्त्वा रयिमभि राजानं सुक्रतो दिवः । सुपर्णो अव्यथिर्भरत् ३
विश्वस्मा इत् स्वर्दृशे साधारणं रजस्तुरम् । गोपामृतस्य विर्भरत् ४
अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे । अभिष्टिकृद् विचर्षणिः ५ ३३५

॥ ४८ ॥ (ऋ. ९ । ४९ । १-५)

पवस्व वृष्टिमा सु नो ऽपामूर्मिं दिवस्परि । अयक्ष्मा बृहतीरिषः १
तया पवस्व धारया यया गाव इहागमन् । जन्यास उप नो गृहम् २
घृतं पवस्व धारया यज्ञेषु देववीतमः । अस्मभ्यं वृष्टिमा पव ३
स न ऊर्जे व्य१व्ययं पवित्रं धाव धारया । देवासः शृणवन् हि कम् ४
पवमानो असिष्यदद् रक्षांस्यपजङ्घनत् । प्रत्नवद् रोचयन् रुचः ५ ३४०

॥ ४९ ॥ (ऋ. ९ । ५० । १-५) (३४१-३५५) उचथ्य आङ्गिरसः ।

उत् ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः । वाणस्य चोदया पविम् १
प्रसवे त उदीरते तिस्रो वाचो मखस्युवः । यदव्य एषि सानवि २
अव्यो वारे परि प्रियं हरिं हिन्वन्त्यद्रिभिः । पवमानं मधुश्चुतम् ३
आ पवस्व मदिन्तम पवित्रं धारया कवे । अर्कस्य योनिमासदम् ४
स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः । इन्दविन्द्राय पीतये ५ ३४५

॥ ५० ॥ (ऋ. ९ । ५१ । १-५)

अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ सृज । पुनीहीन्द्राय पातवे १
दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे । सुनोता मधुमत्तमम् २
तव त्य इन्दो अन्धसो देवा मधोर्व्यश्नते । पवमानस्य मरुतः ३
त्वं हि सोम वर्धयन्त्सुतो मदाय भूर्णये । वृषन्त्स्तोतारमूतये ४
अभ्यर्ष विचक्षण पवित्रं धारया सुतः । अभि वाजमुत श्रवः ५ ३५०

॥ ५१ ॥ (ऋ. ९ । ५२ । १—५)

परि द्युक्षः सनद्रयि—र्भरद्वाजं नो अन्धसा । सुवानो अर्ष पवित्र आ १
तव प्रत्नेभिरध्वभि—रव्यो वारे परि प्रियः । सहस्रधारो यात् तना २
चरुर्न यस्तमीङ्खये—न्दो न दानमीङ्खय । वधैर्वधस्नवीङ्खय ३
नि शुष्ममिन्दवेषां पुरुहूत जनानाम् । यो अस्माँ आदिदेशति ४
शतं न इन्द ऊतिभिः सहस्रं वा शुचीनाम् । पवस्व मंहयद्रयिः ५ ३५५

॥ ५२ ॥ (ऋ. ९ । ५३ । १—४) (३५६—३८७) अवत्सारः काश्यपः ।

उत् ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः । नुदस्व याः परिस्पृधः १
अया निजघ्निरोजसा रथसङ्गे धने हिते । स्तवा अबिभ्युषा हृदा २
अस्य व्रतानि नाधृषे पवमानस्य दूढ्या । रुज यस्त्वा पृतन्यति ३
तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम् । इन्दुमिन्द्राय मत्सरम् ४

॥ ५३ ॥ (ऋ. ९ । ५४ । १—४)

अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः । पयः सहस्रसामृषिम् १ ३६०
अयं सूर्य इवोपदृ—गयं सरांसि धावति । सप्त प्रवत आ दिवम् २
अयं विश्वानि तिष्ठति पुनानो भुवनोपरि । सोमो देवो न सूर्यः ३
परि णो देववीतये वाजाँ अर्षसि गोमतः । पुनान इन्दविन्द्रयुः ४

॥ ५४ ॥ (ऋ. ९ । ५५ । १—४)

यवंयवं नो अन्धसा पुष्टंपुष्टं परि स्रव । सोम विश्वा च सौभगा १
इन्दो यथा तव स्तवो यथा ते जातमन्धसः । नि बर्हिषि प्रिये सदः २ ३६५
उत नो गोविदश्ववित् पवस्व सोमान्धसा । मक्षूतमेभिरहभिः ३
यो जिनाति न जीयते हन्ति शत्रुमभीत्य । स पवस्व सहस्रजित् ४

॥ ५५ ॥ (ऋ. ९ । ५६ । १—४)

परि सोम ऋतं बृह—दाशुः पवित्रे अर्षति । विघ्नन् रक्षांसि देवयुः १
यत् सोमो वाजमर्षति शतं धारा अपस्युवः । इन्द्रस्य सख्यमाविशन् २
अभि त्वा योषणो दश जारं न कन्यानूषत । मृज्यसे सोम सातये ३ ३७०
त्वमिन्द्राय विष्णवे स्वादुरिन्दो परि स्रव । नॄन्स्तोतॄन् पाह्यंहसः ४ ३७१

॥ ५६ ॥ (ऋ. ९ । ५७ । १—४)

प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः । अच्छा वाजं सहस्रिणम् १
अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति । हरिस्तुञ्जान आयुधा २
स मर्मृजान आयुभि-रिभो राजेव सुव्रतः । श्येनो न वंसु षीदति ३
स नो विश्वा दिवो वसू-तो पृथिव्या अधि । पुनान इन्दवा भर ४ ३७५

॥ ५७ ॥ (ऋ. ९ । ५८ । १—४)

तरत् स मन्दी धावति धारा सुतस्यान्धसः । तरत् स मन्दी धावति १
उस्रा वेद वसूनां मर्तस्य देव्यवसः । तरत् स मन्दी धावति २
ध्वस्रयोः पुरुषन्त्यो-रा सहस्राणि दद्महे । तरत् स मन्दी धावति ३
आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे । तरत् स मन्दी धावति ४

॥ ५८ ॥ (ऋ. ९ । ५९ । १—४)

पवस्व गोजिदश्वजिद् विश्वजित् सोम रण्यजित् । प्रजावद् रत्नमा भर १ ३८०
पवस्वाद्भ्यो अदाभ्यः पवस्वौषधीभ्यः । पवस्व धिषणाभ्यः २
त्वं सोम पवमानो विश्वानि दुरिता तर । कविः सीद नि बर्हिषि ३
पवमान स्वर्विदो जायमानोऽभवो महान् । इन्दो विश्वाँ अभीदसि ४

॥ ५९ ॥ (ऋ. ९ । ६० । १—४) गायत्री, ३ पुरउष्णिक् ।

प्र गायत्रेण गायत पवमानं विचर्षणिम् । इन्दुं सहस्रचक्षसम् १
तं त्वा सहस्रचक्षस-मथो सहस्रभर्णसम् । अति वारमपाविषुः २ ३८५
अति वारान् पवमानो असिष्यदत् कलशाँ अभि धावति । इन्द्रस्य हार्द्याविशन् ३
इन्द्रस्य सोम राधसे शं पवस्व विचर्षणे । प्रजावद् रेत आ भर ४ ३८७

॥ ६० ॥ (ऋ. ९ । ६१ । १—३०) (३८८—४१७) अमहीयुराङ्गिरसः ।

अया वीती परि स्रव यस्त इन्दो मदेष्वा । अवाहन् नवतीर्नव १
पुरः सद्य इत्थाधिये दिवोदासाय शम्बरम् । अध त्यं तुर्वशं यदुम् २
परि णो अश्वमश्वविद् गोमदिन्दो हिरण्यवत् । क्षरा सहस्रिणीरिषः ३ ३९०
पवमानस्य ते वयं पवित्रमभ्युन्दतः । सखित्वमा वृणीमहे ४
ये ते पवित्रमूर्मयो ऽभिक्षरन्ति धारया । तेभिर्नः सोम मृळय ५
स नः पुनान आ भर रयिं वीरवतीमिषम् । ईशानः सोम विश्वतः ६
एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् । समादित्येभिरख्यत ७ ३९४

समिन्द्रेणोत वायुना सुत एति पवित्र आ । सं सूर्यस्य रश्मिभिः ८ ३९५
स नो भगाय वायवे पूष्णे पवस्व मधुमान् । चारुर्मित्रे वरुणे च ९
उच्चा ते जातमन्धसो दिवि षद्भूम्या ददे । उग्रं शर्म महि श्रवः १०
एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् । सिषासन्तो वनामहे ११
स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः । वरिवोवित् परि स्रव १२
उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् । इन्दुं देवा अयासिषुः १३ ४००
तमिद् वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव । य इन्द्रस्य हृदंसनिः १४
अर्षा णः सोम शं गवे धुक्षस्व पिप्युषीमिषम् । वर्धा समुद्रमुक्थ्यम् १५
पवमानो अजीजनद् दिवश्चित्रं न तन्यतुम् । ज्योतिर्वैश्वानरं बृहत् १६
पवमानस्य ते रसो मदो राजन्नदुच्छुनः । वि वारमव्यमर्षति १७
पवमान रसस्तव दक्षो वि राजति द्युमान् । ज्योतिर्विश्वं स्वर्दृशे १८ ४०५
यस्ते मदो वरेण्य–स्तेना पवस्वान्धसा । देवावीरघशंसहा १९
जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे । गोषा उ अश्वसा असि २०
संमिश्लो अरुषो भव सूपस्थाभिर्न धेनुभिः । सीदञ्छ्येनो न योनिमा २१
स पवस्व य आविथे–न्द्रं वृत्राय हन्तवे । वव्रिवांसं महीरपः २२
सुवीरासो वयं धना जयेम सोम मीढ्वः । पुनानो वर्ध नो गिरः २३ ४१०
त्वोतासस्तवावसा स्याम वन्वन्त आमुरः । सोम व्रतेषु जागृहि २४
अपघ्नन् पवते मृधो ऽप सोमो अराव्णः । गच्छन्निन्द्रस्य निष्कृतम् २५
महो नो राय आ भर पवमान जही मृधः । रास्वेन्दो वीरवद् यशः २६
न त्वा शतं चन ह्रुतो राधो दित्सन्तमा मिनन् । यत् पुनानो मखस्यसे २७
पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने । विश्वा अप द्विषो जहि २८ ४१५
अस्य ते सख्ये वयं तवेन्दो द्युम्न उत्तमे । सासह्याम पृतन्यतः २९
या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे । रक्षा समस्य नो निदः ३० ४१७

॥ ३१ ॥ (ऋ. ९ । ६२ । १-३०) (४१८-४७) जमदग्निर्भार्गवः ।

एते असृग्रमिन्दव–स्तिरः पवित्रमाशवः । विश्वान्यभि सौभगा १
विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः । तना कृण्वन्तो अर्वते २
कृण्वन्तो वरिवो गवे ऽभ्यर्षन्ति सुष्टुतिम् । इळामस्मभ्यं संयतम् ३ ४२०
असाव्यंशुर्मदाया–ऽप्सु दक्षो गिरिष्ठाः । श्येनो न योनिमासदत् ४ ४२१

शुभ्रमन्धो देववात—मप्सु धूतो नृभिः सुतः । स्वदन्ति गावः पयोभिः ५

आदीमश्वं न हेतारो ऽशूशुभन्नमृताय । मध्वो रसं सधमादे ६

यास्ते धारा मधुश्चुतो ऽसृग्रमिन्द ऊतये । ताभिः पवित्रमासदः ७

सो अर्षेन्द्राय पीतये तिरो रोमाण्यव्यया । सीदन् योनावनेष्वा ८ ४२

त्वमिन्दो परि स्रव स्वादिष्ठो अङ्गिरोभ्यः । वरिवोविद् घृतं पयः ९

अयं विचर्षणिर्हितः पवमानः स चेतति । हिन्वान आप्यं बृहत् १०

एष वृषा वृषव्रतः पवमानो अशस्तिहा । करद् वसूनि दाशुषे ११

आ पवस्व सहस्रिणं रयिं गोमन्तमश्विनम् । पुरुश्चन्द्रं पुरुस्पृहम् १२

एष स्य परि षिच्यते मर्मृज्यमान आयुभिः । उरुगायः कविक्रतुः १३ ४३

सहस्रोतिः शतामघो विमानो रजसः कविः । इन्द्राय पवते मदः १४

गिरा जात इह स्तुत इन्दुरिन्द्राय धीयते । वियोना वसताविव १५

पवमानः सुतो नृभिः सोमो वाजमिवासरत् । चमूषु शक्मनासदम् १६

तं त्रिपृष्ठे त्रिवन्धुरे रथे युञ्जन्ति यातवे । ऋषीणां सप्त धीतिभिः १७

तं सोतारो धनस्पृत—माशुं वाजाय यातवे । हरिं हिनोत वाजिनम् १८ ४३

आविशन् कलशं सुतो विश्वा अर्षन्नभि श्रियः । शूरो न गोषु तिष्ठति १९

आ त इन्दो मदाय कं पयो दुहन्त्यायवः । देवा देवेभ्यो मधु २०

आ नः सोमं पवित्र आ सृजता मधुमत्तमम् । देवेभ्यो देवश्रुत्तमम् २१

एते सोमा असृक्षत गृणानाः श्रवसे महे । मदिन्तमस्य धारया २२

अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि । सनद्वाजः परि स्रव २३ ४४

उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः । गृणानो जमदग्निना २४

पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः । अभि विश्वानि काव्या २५

त्वं समुद्रिया अपो ऽग्रियो वाच ईरयन् । पवस्व विश्वमेजय २६

तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे । तुभ्यमर्षन्ति सिन्धवः २७

प्र ते दिवो न वृष्टयो धारा यन्त्यसश्चतः । अभि शुक्रामुपस्तिरम् २८ ४४

इन्द्रायेन्दुं पुनीतनो—ग्रं दक्षाय साधनम् । ईशानं वीतिराधसम् २९

पवमान ऋतः कविः सोमः पवित्रमासदन् । दधत् स्तोत्रे सुवीर्यम् ३० ४४

॥ ६२ ॥ (ऋ. ९ । ६३ । १-३०) (४४८ - ४७७) निध्रुविः काश्यपः ।

आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम् । अस्मे श्रवांसि धारय १
इषमूर्जं च पिन्वस इन्द्राय मत्सरिन्तमः । चमूष्वा नि षीदसि २
सुत इन्द्राय विष्णवे सोमः कलशे अक्षरत् । मधुमाँ अस्तु वायवे ३ ४५०
एते असृग्रमाशवो ऽति ह्वरांसि बभ्रवः । सोमा ऋतस्य धारया ४
इन्द्रं वर्धन्तो अप्तुरः कृण्वन्तो विश्वमार्यम् । अपघ्नन्तो अराव्णः ५
सुता अनु स्वमा रजो ऽभ्यर्षन्ति बभ्रवः । इन्द्रं गच्छन्त इन्दवः ६
अया पवस्व धारया यया सूर्यमरोचयः । हिन्वानो मानुषीरपः ७
अयुक्त सूर एतशं पवमानो मनावधि । अन्तरिक्षेण यातवे ८ ४५५
उत त्या हरितो दश सूरो अयुक्त यातवे । इन्दुरिन्द्र इति ब्रुवन् ९
परीतो वायवे सुतं गिर इन्द्राय मत्सरम् । अव्यो वारेषु सिञ्चत १०
पवमान विदा रयि—मस्मभ्यं सोम दुष्टरम् । यो दूणाशो वनुष्यता ११
अभ्यर्ष सहस्रिणं रयिं गोमन्तमश्विनम् । अभि वाजमुत श्रवः १२
सोमो देवो न सूर्यो ऽद्रिभिः पवते सुतः । दधानः कलशे रसम् १३ ४६०
एते धामान्यार्या शुक्रा ऋतस्य धारया । वाजं गोमन्तमक्षरन् १४
सुता इन्द्राय वज्रिणे सोमासो दध्याशिरः । पवित्रमत्यक्षरन् १५
प्र सोम मधुमत्तमो राये अर्ष पवित्र आ । मदो यो देववीतमः १६
तमी मृजन्त्यायवो हरिं नदीषु वाजिनम् । इन्दुमिन्द्राय मत्सरम् १७
आ पवस्व हिरण्यव—दश्वावत् सोम वीरवत् । वाजं गोमन्तमा भर १८ ४६५
परि वाजे न वाजयु—मव्यो वारेषु सिञ्चत । इन्द्राय मधुमत्तमम् १९
कविं मृजन्ति मर्ज्यं धीभिर्विप्रा अवस्यवः । वृषा कनिक्रदर्षति २०
वृषणं धीभिरप्तुरं सोममृतस्य धारया । मती विप्राः समस्वरन् २१
पवस्व देवायुष—गिन्द्रं गच्छतु ते मदः । वायुमा रोह धर्मणा २२
पवमान नि तोशसे रयिं सोम श्रवाय्यम् । प्रियः समुद्रमा विश २३ ४७०
अपघ्नन् पवसे मृधः क्रतुवित् सोम मत्सरः । नुदस्वादेवयुं जनम् २४
पवमाना असृक्षत सोमाः शुक्रास इन्दवः । अभि विश्वानि काव्या २५
पवमानास आशवः शुभ्रा असृग्रमिन्दवः । घ्नन्तो विश्वा अप द्विषः २६
पवमाना दिवस्प—र्यन्तरिक्षादसृक्षत । पृथिव्या अधि सानवि २७ ४७४

पुनानः सोम धारये-न्दो विश्वा अप स्रिधः । जहि रक्षांसि सुक्रतो २८ ४७५
अपघ्नन्त्सोम रक्षसो ऽभ्यर्ष कनिक्रदत् । द्युमन्तं शुष्ममुत्तमम् २९
अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा । इन्दो विश्वानि वार्या ३० ४७७

॥ ६३ ॥ (ऋ. ९ । ६४ । १-३०) (४७८—५०७) कश्यपो मारीचः ।

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे १
वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा मदः । सत्यं वृषन् वृषेदसि २
अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः । वि नो राये दुरो वृधि ३ ४८०
असृक्षत प्र वाजिनो गव्या सोमासो अश्वया । शुक्रासो वीरयाशवः ४
शुम्भमाना ऋतायुभि-र्मृज्यमाना गभस्त्योः । पवन्ते वारे अव्यये ५
ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा । पवन्तामान्तरिक्ष्या ६
पवमानस्य विश्ववित् प्र ते सर्गा असृक्षत । सूर्यस्येव न रश्मयः ७
केतुं कृण्वन् दिवस्परि विश्वा रूपाभ्यर्षसि । समुद्रः सोम पिन्वसे ८ ४८५
हिन्वानो वाचमिष्यसि पवमान विधर्मणि । अक्रान् देवो न सूर्यः ९
इन्दुः पविष्ट चेतनः प्रियः कवीनां मती । सृजदश्वं रथीरिव १०
ऊर्मिर्यस्ते पवित्र आ देवावीः पर्यक्षरत् । सीदन्नृतस्य योनिमा ११
स नो अर्ष पवित्र आ मदो यो देववीतमः । इन्दविन्द्राय पीतये १२
इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि १३ ४९०
पुनानो वरिवस्कृध्यू-र्जं जनाय गिर्वणः । हरे सृजान आशिरम् १४
पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् । द्युतानो वाजिभिर्यतः १५
प्र हिन्वानास इन्दवो ऽच्छा समुद्रमाशवः । धिया जूता असृक्षत १६
मर्मृजानास आयवो वृथा समुद्रमिन्दवः । अग्मन्नृतस्य योनिमा १७
परि णो याह्यस्मयु-र्विश्वा वसून्योजसा । पाहि नः शर्म वीरवत् १८ ४९५
मिमाति वह्निरेतशः पदं युजान ऋक्वभिः । प्र यत् समुद्र आहितः १९
आ यद् योनिं हिरण्यय-माशुर्ऋतस्य सीदति । जहात्यप्रचेतसः २०
अभि वेना अनूषते-यक्षन्ति प्रचेतसः । मज्जन्त्यविचेतसः २१
इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः । ऋतस्य योनिमासदम् २२
तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति वेधसः । सं त्वा मृजन्त्यायवः २३ ५००

रसं ते मित्रो अर्यमा पिबन्ति वरुणः कवे । पवमानस्य मरुतः २४
त्वं सोम विपश्चितं पुनानो वाचमिष्यसि । इन्दो सहस्रभर्णसम् २५
उतो सहस्रभर्णसं वाचं सोम मखस्युवम् । पुनान इन्दवा भर २६
पुनान इन्दवेषां पुरुहूत जनानाम् । प्रियः समुद्रमा विश २७
दविद्युतत्या रुचा परिष्टोभन्त्या कृपा । सोमाः शुक्रा गवाशिरः २८ ५०५
हिन्वानो हेतृभिर्यत आ वाजं वाज्यक्रमीत् । सीदन्तो वनुषो यथा २९
ऋधक् सोम स्वस्तये संजग्मानो दिवः कविः । पवस्व सूर्यो दृशे ३० ५०७

॥ ६४ ॥ (ऋ. ९ । ६५ । १—३०) (५०८—५३७) भृगुर्वारुणिर्जमदग्निर्भार्गवो वा ।

हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् । महामिन्दुं महीयुवः १
पवमान रुचारुचा देवो देवेभ्यस्परि । विश्वा वसून्या विश २
आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः । इषे पवस्व संयतम् ३ ५१०
वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे । पवमान स्वाध्यः ४
आ पवस्व सुवीर्यं मन्दमानः स्वायुध । इहो ष्विन्दवा गहि ५
यदद्भिः परिषिच्यसे मृज्यमानो गभस्त्योः । द्रुणा सधस्थमश्नुषे ६
प्र सोमाय व्यश्ववत् पवमानाय गायत । महे सहस्रचक्षसे ७
यस्य वर्णं मधुश्चुतं हरिं हिन्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये ८ ५१५
तस्य ते वाजिनो वयं विश्वा धनानि जिग्युषः । सखित्वमा वृणीमहे ९
वृषा पवस्व धारया मरुत्वते च मत्सरः । विश्वा दधान ओजसा १०
तं त्वा धर्तारमोण्यो३ः पवमान स्वर्दृशम् । हिन्वे वाजेषु वाजिनम् ११
अया चित्तो विपानया हरिः पवस्व धारया । युजं वाजेषु चोदय १२
आ न इन्दो महीमिषं पवस्व विश्वदर्शतः । अस्मभ्यं सोम गातुवित् १३ ५२०
आ कलशा अनूषतेन्दो धाराभिरोजसा । एन्द्रस्य पीतये विश १४
यस्य ते मद्यं रसं तीव्रं दुहन्त्यद्रिभिः । स पवस्वाभिमातिहा १५
राजा मेधाभिरीयते पवमानो मनावधि । अन्तरिक्षेण यातवे १६
आ न इन्दो शतग्विनं गवां पोषं स्वश्व्यम् । वहा भगत्तिमूतये १७
आ नः सोम सहो जुवो रूपं न वर्चसे भर । सुष्वाणो देववीतये १८ ५२५
अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् । सीदञ्छ्येनो न योनिमा १९ ५२६

अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः । सोमो अर्षति विष्णवे २०
इषं तोकाय नो दध- दस्मभ्यं सोम विश्वतः । आ पवस्व सहस्रिणम् २१
ये सोमासः परावति ये अर्वावति सुन्विरे । ये वादः शर्यणावति २२
य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् । ये वा जनेषु पञ्चसु २३ ५३०
ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम् । सुवाना देवास इन्दवः २४
पवते हर्यतो हरि- र्गृणानो जमदग्निना । हिन्वानो गोरधि त्वचि २५
प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः । श्रीणाना अप्सु मृञ्जत २६
तं त्वा सुतेष्वाभुवो हिन्विरे देवतातये । स पवस्वानया रुचा २७
आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे । पान्तमा पुरुस्पृहम् २८ ५३५
आ मन्द्रमा वरेण्य- मा विप्रमा मनीषिणम् । पान्तमा पुरुस्पृहम् २९
आ रयिमा सुचेतुन- मा सुक्रतो तनूष्वा । पान्तमा पुरुस्पृहम् ३० ५३७

॥ ६५ ॥ (ऋ. ९ । ६६ । १—३०)

(५३८-५६७) शतं वैखानसाः । १९-२१ अग्निः पवमानः । गायत्री, १८ अनुष्टुप् ।

पवस्व विश्वचर्षणे ऽभि विश्वानि काव्या । सखा सखिभ्य ईड्यः १
ताभ्यां विश्वस्य राजसि ये पवमान धामनी । प्रतीची सोम तस्थतुः २
परि धामानि यानि ते त्वं सोमासि विश्वतः । पवमान ऋतुभिः कवे ३ ५४०
पवस्व जनयन्निषो ऽभि विश्वानि वार्या । सखा सखिभ्य ऊतये ४
तव शुक्रासो अर्चयो दिवस्पृष्ठे वि तन्वते । पवित्रं सोम धामभिः ५
तवेमे सप्त सिन्धवः प्रशिषं सोम सिस्रते । तुभ्यं धावन्ति धेनवः ६
प्र सोम याहि धारया सुत इन्द्राय मत्सरः । दधानो अक्षिति श्रवः ७
समु त्वा धीभिरस्वरन् हिन्वतीः सप्त जामयः । विप्रमाजा विवस्वतः ८ ५४५
मृजन्ति त्वा समग्रुवो ऽव्ये जीरावधि ष्वणि । रेभो यदज्यसे वने ९
पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत । अर्वन्तो न श्रवस्यवः १०
अच्छा कोशं मधुश्चुत- मसृग्रं वारे अव्यये । अवावशन्त धीतयः ११
अच्छा समुद्रमिन्दवो ऽस्तं गावो न धेनवः । अग्मन्नृतस्य योनिमा १२
प्र ण इन्दो महे रण आपो अर्षन्ति सिन्धवः । यद् गोभिर्वासयिष्यसे १३ ५५०
अस्य ते सख्ये वय- मियक्षन्तस्त्वोतयः । इन्दो सखित्वमुश्मसि १४
आ पवस्व गविष्टये महे सोम नृचक्षसे । एन्द्रस्य जठरे विश १५ ५५१

महाँ असि सोम ज्येष्ठ उग्राणामिन्द्र ओजिष्ठः । युध्वा सञ्छश्वज्जिगेथ १६
य उग्रेभ्यश्चिदोजीया ञ्छूरेभ्यश्चिच्छूरतरः । भूरिदाभ्यश्चिन्मंहीयान् १७
त्वं सोम सूर एष स्तोकस्य साता तनूनाम् । वृणीमहे सख्याय वृणीमहे युज्याय ५५५
अग्न आयूंषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् १९
अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् २०
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद् रयिं मयि पोषम् २१
पवमानो अति स्रिधो ऽभ्यर्षति सुष्टुतिम् । सूरो न विश्वदर्शतः २२
स मर्मृजान आयुभिः प्रयस्वान् प्रयसे हितः । इन्दुरत्यो विचक्षणः २३ ५६०
पवमान ऋतं बृह च्छुक्रं ज्योतिरजीजनत् । कृष्णा तमांसि जङ्घनत् २४
पवमानस्य जङ्घ्नतो हरेश्चन्द्रा असृक्षत । जीरा अजिरशोचिषः २५
पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः । हरिश्चन्द्रो मरुद्गणः २६
पवमानो व्यश्नवद् रश्मिभिर्वाजसातमः । दधत् स्तोत्रे सुवीर्यम् २७
प्र सुवान इन्दुरक्षाः पवित्रमत्यव्ययम् । पुनान इन्दुरिन्द्रमा २८ ५६५
एष सोमो अधि त्वचि गवां क्रीळत्यद्रिभिः । इन्द्रं मदाय जोहुवत् २९
यस्य ते द्युम्नवत् पयः पवमानाभृतं दिवः । तेन नो मृळ जीवसे ३० ५६७

॥ ६६ ॥ (ऋ. ९ । ६७ । १—३२)

(५६८—५९९) १ - ३ भरद्वाजो बार्हस्पत्यः, ४-६ कश्यपो मारीचः, ७-९ गोतमो राहूगणः, १०-१२ अत्रिर्भौमः, १३-१५ विश्वामित्रो गाथिनः, १६—१८ जमदग्निर्भार्गवः, १९-२१ वसिष्ठो मैत्रावरुणिः, २२—३२ पवित्र आङ्गिरसो वा वसिष्ठो वा उभौ वा। पवमानः सोमः, १०—१२ पवमानः पूषा वा, २३—२७ पवमानोऽग्निः, २५ पवमानः सविता वा, २६ पवमानाग्निसवितारः, २७ विश्वे देवा वा, ३१—३२ पावमान्यध्येता । गायत्री, १६ —१८ नित्यद्विपदा गायत्री, ३० पुरउष्णिक्, २७, ३१, ३२, अनुष्टुप् ।

त्वं सोमासि धारयु र्मन्द्र ओजिष्ठो अध्वरे । पवस्व मंहयद्रयिः १
त्वं सुतो नृमादनो दधन्वान् मत्सरिन्तमः । इन्द्राय सूरिरन्धसा २
त्वं सुष्वाणो अद्रिभि रभ्यर्ष कनिक्रदत् । द्युमन्तं शुष्ममुत्तमम् ३ ५७०
इन्दुर्हिन्वानो अर्षति तिरो वाराण्यव्यया । हरिर्वाजमचिक्रदत् ४
इन्दो व्यव्यमर्षसि वि श्रवांसि वि सौभगा । वि वाजान्त्सोम गोमतः ५
आ न इन्दो शतग्विनं रयिं गोमन्तमश्विनम् । भरा सोम सहस्रिणम् ६
पवमानास इन्दव स्तिरः पवित्रमाशवः । इन्द्रं यामेभिराशत ७ ५७४

ककुहः सोम्यो रस इन्दुरिन्द्राय पूर्व्यः । आयुः पवत आयवे ८ ५७९
हिन्वन्ति सूरमुस्रयः पवमानं मधुश्चुतम् । अभि गिरा समस्वरन् ९
अविता नो अजाश्वः पूषा यामनियामनि । आ भक्षत् कन्यासु नः १०
अयं सोमः कपर्दिने घृतं न पवते मधु । आ भक्षत् कन्यासु नः ११
अयं त आघृणे सुतो घृतं न पवते शुचि । आ भक्षत् कन्यासु नः १२
वाचो जन्तुः कवीनां पवस्व सोम धारया । देवेषु रत्नधा असि १३ ५८०
आ कलशेषु धावति श्येनो वर्म वि गाहते । अभि द्रोणा कनिक्रदत् १४
परि प्र सोम ते रसो ऽसर्जि कलशे सुतः । श्येनो न तक्तो अर्षति १५
पवस्व सोम मन्दय-न्निन्द्राय मधुमत्तमः १६
असृग्रन् देववीतये वाजयन्तो रथा इव १७
ते सुतासो मदिन्तमाः शुक्रा वायुमसृक्षत १८ ५८१
ग्राव्णा तुन्नो अभिष्टुतः पवित्रं सोम गच्छसि । दधत् स्तोत्रे सुवीर्यम् १९
एष तुन्नो अभिष्टुतः पवित्रमति गाहते । रक्षोहा वारमव्ययम् २०
यदन्ति यच्च दूरके भयं विन्दति मामिह । पवमान वि तज्जहि २१
पवमानः सो अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु नः २२
यत् ते पवित्रमर्चिष्य-ग्ने विततमन्तरा । ब्रह्म तेन पुनीहि नः २३ ५९०
यत् ते पवित्रमर्चिव-दग्ने तेन पुनीहि नः । ब्रह्मसवैः पुनीहि नः २४
उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः २५
त्रिभिष्ट्वं देव सवित-र्वर्षिष्ठैः सोम धामभिः । अग्ने दक्षैः पुनीहि नः २६
पुनन्तु मां देवजनाः पुनन्तु वसवो धिया ।
विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा २७
प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिरंशुभिः । देवेभ्य उत्तमं हविः २८ ५९१
उप प्रियं पनिप्नतं युवानमाहुतीवृधम् । अगन्म बिभ्रतो नमः २९
अलाय्यस्य परशुर्ननाश त-मा पवस्व देव सोम । आखुं चिदेव देव सोम ३०
यः पावमानीरध्ये-त्यृषिभिः संभृतं रसम् ।
सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ३१ ५९८

पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम् ।
तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ३२ ५९९

॥ ६७ ॥ (ऋ. ९ । ६८ । १—१०) (६००—६०९) वत्सप्रिर्भालन्दनः । जगती, १० त्रिष्टुप् ।
प्र देवमच्छा मधुमन्त इन्दवो ऽसिष्यदन्त गाव आ न धेनवः ।
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे १ ६००
स रोरुवदभि पूर्वा अचिक्रद दुपारुहः श्रथयन्त्स्वादते हरिः ।
तिरः पवित्रं परियन्नुरु ज्रयो नि शर्याणि दधते देव आ वरम् २
वि यो ममे यम्या संयती मदः साकंवृधा पयसा पिन्वदक्षिता ।
मही अपारे रजसी विवेविद दभिव्रजन्नक्षितं पाज आ ददे ३
स मातरा विचरन् वाजयन्नपः प्र मेधिरः स्वधया पिन्वते पदम् ।
अंशुर्यवेन पिपिशे यतो नृभिः सं जामिभिर्नसते रक्षते शिरः ४
सं दक्षेण मनसा जायते कवि ऋृतस्य गर्भो निहितो यमा परः ।
यूना ह सन्ता प्रथमं वि जज्ञतु र्गुहा हितं जनिम नेममुद्यतम् ५
मन्द्रस्य रूपं विविदुर्मनीषिणः श्येनो यदन्धो अभरत् परावतः ।
तं मर्जयन्त सुवृधं नदीष्वाँ उशन्तमंशुं परियन्तमृग्मियम् ६ ६०५
त्वां मृजन्ति दश योषणः सुतं सोम ऋषिभिर्मतिभिर्धीतिभिर्हितम् ।
अव्यो वारेभिरुत देवहूतिभि र्नृभिर्यतो वाजमा दर्षि सातये ७
परिप्रयन्तं वय्यं सुषंसदं सोमं मनीषा अभ्यनूषत स्तुभः ।
यो धारया मधुमाँ ऊर्मिणा दिव इयर्ति वाचं रयिषाळमर्त्यः ८
अयं दिव इयर्ति विश्वमा रजः सोमः पुनानः कलशेषु सीदति ।
अद्भिर्गोभिर्मृज्यते अद्रिभिः सुतः पुनान इन्दुर्वरिवो विदत् प्रियम् ९
एवा नः सोम परिषिच्यमानो वयो दधच्चित्रतमं पवस्व ।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् १० ६०९

॥ ६८ ॥ (ऋ. ९।६९।१ – १०) (६१०—६१९) हिरण्यस्तूप आङ्गिरसः । जगती, ९-१०त्रिष्टुप् ।
इषुर्न धन्वन् प्रति धीयते मति र्वत्सो न मातुरुप सर्ज्यूधनि ।
उरुधारेव दुहे अग्र आय त्यस्य व्रतेष्वपि सोम इष्यते १ ६१०
उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासनि ।
पवमानः संतनिः प्रघ्नतामिव मधुमान् द्रप्सः परि वारमर्षति २ ६११

अव्ये वधूयुः पवते परि त्वचि श्रथ्नीते नप्तीरदितेर्ऋतं यते ।
हरिरक्रान् यजतः संयतो मदो नृम्णा शिशानो महिषो न शोभते ३
उक्षा मिमाति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम् ।
अत्यक्रमीदर्जुनं वारमव्यय-मत्कं न निक्तं परि सोमो अव्यत ४
अमृक्तेन रुशता वाससा हरि-रमर्त्यो निर्णिजानः परि व्यत ।
दिवस्पृष्ठं बर्हणा निर्णिजे कृतो-पस्तरणं चम्वोर्नभस्मयम् ५
सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुपः साकमीरते ।
तन्तुं ततं परि सर्गास आशवो नेन्द्रादृते पवते धाम किं चन ६ ६१५
सिन्धोरिव प्रवणे निम्न आशवो वृषच्युता मदासो गातुमाशत ।
शं नो निवेशे द्विपदे चतुष्पदे ऽस्मे वाजाः सोम तिष्ठन्तु कृष्टयः ७
आ नः पवस्व वसुमद्धिरण्यव-दश्वावद् गोमद् यवमत् सुवीर्यम् ।
यूयं हि सोम पितरो मम स्थन दिवो मूर्धानः प्रस्थिता वयस्कृतः ८
एते सोमाः पवमानास इन्द्रं रथा इव प्र ययुः सातिमच्छ ।
सुताः पवित्रमति यन्त्यव्यं हित्वी वव्रिं हरितो वृष्टिमच्छ ९
इन्दविन्द्राय बृहते पवस्व सुमृळीको अनवद्यो रिशादाः ।
भरा चन्द्राणि गृणते वसूनि देवैर्द्यावापृथिवी प्रावतं नः १० ६१९

॥ ६९ ॥ (ऋ. ९ । ७० । १-१०) (६२०—६२९) रेणुर्वैश्वामित्रः । जगती, १० त्रिष्टुप् ।

त्रिरस्मै सप्त धेनवो दुदुह्रे सत्यामाशिरं पूर्व्ये व्योमनि ।
चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत १ ६२०
स भिक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे
तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः २
ते अस्य सन्तु केतवोऽमृत्यवो ऽदाभ्यासो जनुषी उभे अनु ।
येभिर्नृम्णा च देव्या च पुनत आदिद् राजानं मनना अगृभ्णत ३
स मृज्यमानो दशभिः सुकर्मभिः प्र मध्यमासु मातृषु प्रमे सचा ।
व्रतानि पानो अमृतस्य चारुण उभे नृचक्षा अनु पश्यते विशौ ४
स मर्मृजान इन्द्रियाय धायस ओभे अन्ता रोदसी हर्षते हितः ।
वृषा शुष्मेण बाधते वि दुर्मती-रादेदिशानः शर्यहेव शुरुधः ५ ६२४

स मातरा न ददृशान उस्रियो नानददेति मरुतामिव स्वनः ।
जानन्नृतं प्रथमं यत् स्वर्णरं प्रशस्तये कमवृणीत सुक्रतुः ६ ६२५
रुवति भीमो वृषभस्तविष्यया शृङ्गे शिशानो हरिणी विचक्षणः ।
आ योनिं सोमः सुकृतं नि षीदति गव्ययी त्वग् भवति निर्णिगव्ययी ७
शुचिः पुनानस्तन्वमरेपस—मव्ये हरिर्न्यधाविष्ट सानवि ।
जुष्टो मित्राय वरुणाय वायवे त्रिधातु मधु क्रियते सुकर्मभिः ८
पवस्व सोम देववीतये वृषे—न्द्रस्य हार्दि सोमधानमा विश
पुरा नो बाधाद् दुरिताति पारय क्षेत्रविद्धि दिश आहा विपृच्छते ९
हितो न सप्तिरभि वाजमर्ष—न्द्रस्येन्दो जठरमा पवस्व
नावा न सिन्धुमति पर्षि विद्वा—ञ्छूरो न युध्यन्नव नो निदः स्पः १० ६२९

॥ ७० ॥ (ऋ. ९ । ७१ । १—९) (६३०—६३८) ऋषभो वैश्वामित्रः । जगती, ९ त्रिष्टुप् ।

आ दक्षिणा सृज्यते शुष्म्या३सदं वेति द्रुहो रक्षसः पाति जागृविः ।
हरिरोपशं कृणुते नभस्पय उपस्तिरे चम्वो३र्ब्रह्म निर्णिजे १ ६३०
प्र कृष्टिहेव शूष एति रोरुव—दसुर्यं१ वर्णं नि रिणीते अस्य तम् ।
जहाति वव्रिं पितुरेति निष्कृत—मुपप्रुतं कृणुते निर्णिजं तना २
अद्रिभिः सुतः पवते गभस्त्यो—र्वृषायते नभसा वेपते मती ।
स मोदते नसते साधते गिरा नेनिक्ते अप्सु यजते परीमणि ३
परि द्युक्षं सहसः पर्वतावृधं मध्वः सिञ्चन्ति हर्म्यस्य सक्षणिम् ।
आ यस्मिन् गावः सुहुताद ऊधनि मूर्धञ्छ्रीणन्त्यग्रियं वरीमभिः ४
समी रथं न भुरिजोरहेषत दश स्वसारो अदितेरुपस्थ आ ।
जिगादुप ज्रयति गोरपीच्यं पदं यदस्य मतुथा अजीजनन् ५
श्येनो न योनिं सदनं धिया कृतं हिरण्ययमासदं देव एषति ।
ए रिणन्ति बर्हिषि प्रियं गिरा ऽश्वो न देवाँ अप्येति यज्ञियः ६ ६३५
परा व्यक्तो अरुषो दिवः कवि—र्वृषा त्रिपृष्ठो अनविष्ट गा अभि ।
सहस्रणीतिर्यतिः परायती रेभो न पूर्वीरुषसो वि राजति ७
त्वेषं रूपं कृणुते वर्णो अस्य स यत्राशयत् समृता सेधति स्रिधः ।
अप्सा याति स्वधया दैव्यं जनं सं सुष्टुती नसते सं गोअग्रया ८ ६३७

उक्षेव यूथा परियन्नरावी—दधि त्विषीरधित सूर्यस्य ।
दिव्यः सुपर्णोऽव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः ९ ६३८

॥ ७१ ॥ (ऋ. ९ । ७२ । १—९) (६३९—६४७) हरिमन्त आङ्गिरसः । जगती ।

हरिं मृजन्त्यरुषो न युज्यते सं धेनुभिः कलशे सोमो अज्यते ।
उद् वाचमीरयति हिन्वते मती पुरुष्टुतस्य कति चित् परिप्रियः १

साकं वदन्ति बहवो मनीषिण इन्द्रस्य सोमं जठरे यदादुहुः ।
यदी मृजन्ति सुगभस्तयो नरः सनीळाभिर्दशभिः काम्यं मधु २ ६४०

अरममाणो अत्येति गा अभि सूर्यस्य प्रियं दुहितुस्तिरो रवम् ।
अन्वस्मै जोषमभरद् विनंगृसः सं द्वयीभिः स्वसृभिः क्षेति जामिभिः ३

नृधूतो अद्रिषुतो बर्हिषि प्रियः पतिर्गवां प्रदिव इन्दुर्ऋत्वियः ।
पुरंधिवान् मनुषो यज्ञसाधनः शुचिर्धिया पवते सोम इन्द्र ते ४

नृबाहुभ्यां चोदितो धारया सुतो ऽनुष्वधं पवते सोम इन्द्र ते ।
आप्राः क्रतून्त्समजैरध्वरे मती—र्वेर्न द्रुषच्चम्वो३रासदद्धरिः ५

अंशुं दुहन्ति स्तनयन्तमक्षितं कविं कवयोऽपसो मनीषिणः ।
समी गावो मतयो यन्ति संयत ऋतस्य योना सदने पुनर्भुवः ६

नाभा पृथिव्या धरुणो महो दिवो३ ऽपामूर्मौ सिन्धुष्वन्तरुक्षितः ।
इन्द्रस्य वज्रो वृषभो विभूवसुः सोमो हृदे पवते चारु मत्सरः ७ ६४५

स तू पवस्व परि पार्थिवं रजः स्तोत्रे शिक्षन्नाधून्वते च सुक्रतो ।
मा नो निर्भाग् वसुनः सादनस्पृशो रयिं पिशङ्गं बहुलं वसीमहि ८

आ तू न इन्दो शतदात्वश्व्यं सहस्रदातु पशुमद्धिरण्यवत् ।
उप मास्व बृहती रेवतीरिषो ऽधि स्तोत्रस्य पवमान नो गहि ९ ६४७

॥ ७२ ॥ (ऋ. ९ । ७३ । १-९) (६४८-६५६) पवित्र आङ्गिरसः ।

स्रक्वे द्रप्सस्य धमतः समस्वर—न्नृतस्य योना समरन्त नाभयः ।
त्रीन्त्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरन् १

सम्यक् सम्यञ्चो महिषा अहेषत सिन्धोरूर्मावधि वेना अवीविपन् ।
मधोर्धाराभिर्जनयन्तो अर्कमित् प्रियामिन्द्रस्य तन्वमवीवृधन् २ ६४९

पवित्रवन्तः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतम् ।
महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभम् ३ ६५०

सहस्रधारेऽव ते समस्वरन् दिवो नाके मधुजिह्वा असश्चतः ।
अस्य स्पशो न नि मिषन्ति भूर्णयः पदेपदे पाशिनः सन्ति सेतवः ४

पितुर्मातुरध्या ये समस्वर–न्नृचा शोचन्तः संदहन्तो अव्रतान् ।
इन्द्रद्विष्टामप धमन्ति मायया त्वचमसिक्नीं भूमनो दिवस्परि ५

प्रत्नान्मानादध्या ये समस्वर–ञ्छ्लोकयन्त्रासो रभसस्य मन्तवः ।
अपानक्षासो बधिरा अहासत ऋतस्य पन्थां न तरन्ति दुष्कृतः ६

सहस्रधारे वितते पवित्र आ वाचं पुनन्ति कवयो मनीषिणः ।
रुद्रास एषामिषिरासो अद्रुहः स्पशः स्वञ्चः सुदृशो नृचक्षसः ७

ऋतस्य गोपा न दभाय सुक्रतु–स्त्री ष पवित्रा हृद्य1न्तरा दधे ।
विद्वान्त्स विश्वा भुवनाभि पश्य–त्यवाजुष्टान् विध्यति कर्ते अव्रतान् ८ ६५५

ऋतस्य तन्तुर्विततः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया ।
धीराश्चित् तत् समिनक्षन्त आशता–ऽत्रा कर्तमव पदात्यप्रभुः ९ ६५६

॥ ७३ ॥ (ऋ. ९ । ७४ । १—९) (६५७—६६५) कक्षीवान् दैर्घतमसः । जगती, ८ त्रिष्टुप् ।

शिशुर्न जातोऽव चक्रदद् वने स्व1र्यद् वाज्यरुषः सिषासति ।
दिवो रेतसा सचते पयोवृधा तमीमहे सुमती शर्म सप्रथः १

दिवो यः स्कम्भो धरुणः स्वातत आपूर्णो अंशुः पर्येति विश्वतः
सेमे मही रोदसी यक्षदावृता समीचीने दाधार समिषः कविः २

महि प्सरः सुकृतं सोम्यं मधू–र्वी गव्यूतिरदितेर्ऋतं यते ।
ईशे यो वृष्टेरित उस्रियो वृषा ऽपां नेता य इतऊतिरृग्मियः ३

आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य नाभिरमृतं वि जायते ।
समीचीनाः सुदानवः प्रीणन्ति तं नरो हितमव मेहन्ति पेरवः ४ ६६०

अरावीदंशुः सचमान ऊर्मिणा देवाव्यं1 मनुषे पिन्वति त्वचम् ।
दधाति गर्भमदितेरुपस्थ आ येन तोकं च तनयं च धामहे ५

सहस्रधारेऽव ता असश्चत–स्तृतीये सन्तु रजसि प्रजावतीः ।
चतस्रो नाभो निहिता अवो दिवो हविर्भरन्त्यमृतं घृतश्चुतः ६ ६६१

श्वेतं रूपं कृणुते यत् सिषासति   सोमो मीढ्वाँ असुरो वेद भूमनः ।
धिया शमी सचते सेमभि प्रवद्   दिवस्कवन्धमव दर्षदुद्रिणम्   ७
अध श्वेतं कलशं गोभिरक्तं   कार्ष्मन्ना वाज्यक्रमीत् ससवान् ।
आ हिन्विरे मनसा देवयन्तः   कक्षीवते शतहिमाय गोनाम्   ८
अद्भिः सोम पपृचानस्य ते रसो   ऽव्यो वारं वि पवमान धावति ।
स मृज्यमानः कविभिर्मदिन्तम   स्वदस्वेन्द्राय पवमान पीतये   ९   ६६५

॥ ७४ ॥ (ऋ. ९ । ७५ । १-५) (६६६-६९०) कविर्भार्गवः । जगती ।

अभि प्रियाणि पवते चनोहितो   नामानि यह्वो अधि येषु वर्धते ।
आ सूर्यस्य बृहतो बृहन्नधि   रथं विष्वञ्चमरुहद् विचक्षणः   १
ऋतस्य जिह्वा पवते मधु प्रियं   वक्ता पतिर्धियो अस्या अदाभ्यः ।
दधाति पुत्रः पित्रोरपीच्यं   नाम तृतीयमधि रोचने दिवः   २
अव द्युतानः कलशाँ अचिक्रदन्   नृभिर्येमानः कोश आ हिरण्यये ।
अभीमृतस्य दोहना अनूषता-   ऽधि त्रिपृष्ठ उषसो वि राजति   ३
अद्रिभिः सुतो मतिभिश्चनोहितः   प्ररोचयन् रोदसी मातरा शुचिः ।
रोमाण्यव्या समया वि धावति   मधोर्धारा पिन्वमाना दिवेदिवे   ४
परि सोम प्र धन्वा स्वस्तये   नृभिः पुनानो अभि वासयाशिरम् ।
ये ते मदा आहनसो विहायस-   स्तेभिरिन्द्रं चोदय दातवे मघम्   ५   ६७०

॥ ७५ ॥ (ऋ. ९ । ७६ । १—५)

धर्ता दिवः पवते कृत्व्यो रसो   दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभि-   र्वृथा पाजांसि कृणुते नदीष्वा   १
शूरो न धत्त आयुधा गभस्त्योः   स्वः सिषासन् रथिरो गविष्टिषु ।
इन्द्रस्य शुष्ममीरयन्नपस्युभि-   रिन्दुर्हिन्वानो अज्यते मनीषिभिः   २
इन्द्रस्य सोम पवमान ऊर्मिणा   तविष्यमाणो जठरेष्वा विश ।
प्र णः पिन्व विद्युदभ्रेव रोदसी   धिया न वाजाँ उप मासि शश्वतः   ३
विश्वस्य राजा पवते स्वर्दृशः   ऋतस्य धीतिमृषिषाळवीवशत् ।
यः सूर्यस्यासिरेण मृज्यते   पिता मतीनामसमष्टकाव्यः   ४
वृषेव यूथा परि कोशमर्ष-   स्यपामुपस्थे वृषभः कनिक्रदत् ।
स इन्द्राय पवसे मत्सरिन्तमो   यथा जेषाम समिथे त्वोतयः   ५   ६७५

॥ ७६ ॥ (ऋ. ९ । ७७ । १—५)

एष प्र कोशे मधुमाँ अचिक्रद—दिन्द्रस्य वज्रो वपुषो वपुष्टरः ।
अभीमृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसेव धेनवः १
स पूर्व्यः पवते यं दिवस्परि श्येनो मथायदिषितस्तिरो रजः ।
स मध्व आ युवते वेविजान इत् कृशानोरस्तुर्मनसाह बिभ्युषा २
ते नः पूर्वास उपरास इन्दवो महे वाजाय धन्वन्तु गोमते ।
ईक्षेण्यासो अह्यो न चारवो ब्रह्मब्रह्म ये जुजुषुर्हविर्हविः ३
अयं नो विद्वान् वनवद् वनुष्यत इन्दुः सत्राचा मनसा पुरुष्टुतः ।
इनस्य यः सदने गर्भमादधे गवामुरुब्जमभ्यर्षति व्रजम् ४
चक्रिर्दिवः पवते कृत्व्यो रसो महाँ अदब्धो वरुणो हुरुग्यते ।
असावि मित्रो वृजनेषु यज्ञियो ऽत्यो न यूथे वृषयुः कनिक्रदत् ५ ६८०

॥ ७७ ॥ (ऋ. ९ । ७८ । १—५)

प्र राजा वाचं जनयन्नसिष्यद—दपो वसानो अभि गा इयक्षति ।
गृभ्णाति रिप्रमविरस्य तान्वा शुद्धो देवानामुप याति निष्कृतम् १
इन्द्राय सोम परि षिच्यसे नृभि—र्नृचक्षा ऊर्मिः कविरज्यसे वने ।
पूर्वीर्हि ते स्रुतयः सन्ति यातवे सहस्रमश्वा हरयश्चमूषदः २
समुद्रिया अप्सरसो मनीषिण—मासीना अन्तरभि सोममक्षरन् ।
ता ईं हिन्वन्ति हर्म्यस्य सक्षणिं याचन्ते सुम्नं पवमानमक्षितम् ३
गोजिन्नः सोमो रथजिद्धिरण्यजित् स्वर्जिदब्जित् पवते सहस्रजित् ।
यं देवासश्चक्रिरे पीतये मदं स्वादिष्ठं द्रप्समरुणं मयोभुवम् ४
एतानि सोम पवमानो अस्मयुः सत्यानि कृण्वन् द्रविणान्यर्षसि ।
जहि शत्रुमन्तिके दूरके च य उर्वीं गव्यूतिमभयं च नस्कृधि ५ ६८१

॥ ७८ ॥ (ऋ. ९ । ७९ । १—५)

अचोदसो नो धन्वन्त्विन्दवः प्र सुवानासो बृहद्दिवेषु हरयः ।
वि च नशन् न इषो अरातयो ऽर्यो नशन्त सनिषन्त नो धियः १
प्र णो धन्वन्त्विन्दवो मदच्युतो धना वा येभिरर्वतो जुनीमसि ।
तिरो मर्तस्य कस्य चित् परिह्वृतिं वयं धनानि विश्वधा भरेमहि २ ६८२

उत स्वस्या अरात्या अरिर्हि ष उतान्यस्या अरात्या वृको हि षः ।
धन्वन् न तृष्णा समरीत ताँ अभि सोम जहि पवमान दुराध्यः ३
दिवि ते नाभा परमो य आददे पृथिव्यास्ते रुरुहुः सानवि क्षिपः
अद्रयस्त्वा बप्सति गोरधि त्वच्यप्सु त्वा हस्तैर्दुदुहुर्मनीषिणः ४
एवा त इन्दो सुभ्वं सुपेशसं रसं तुञ्जन्ति प्रथमा अभिश्रियः ।
निदंनिदं पवमान नि तारिष आविस्ते शुष्मो भवतु प्रियो मदः ५ ६९०

॥ ७९ ॥ (ऋ. ९ । ८० । १—५) (६९१—७०५) वसुर्भारद्वाजः ।

सोमस्य धारा पवते नृचक्षस ऋतेन देवान् हवते दिवस्परि ।
बृहस्पते रवथेना वि दिद्युते समुद्रासो न सवनानि विव्यचुः १
यं त्वा वाजिन्नघ्न्या अभ्यनूषता ऽयोहतं योनिमा रोहसि द्युमान् ।
मघोनामायुः प्रतिरन् महि श्रव इन्द्राय सोम पवसे वृषा मदः २
एन्द्रस्य कुक्षा पवते मदिन्तम ऊर्जं वसानः श्रवसे सुमङ्गलः ।
प्रत्यङ् स विश्वा भुवनाभि पप्रथे क्रीळन् हरिरत्यः स्यन्दते वृषा ३
तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः
नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान् देवाँ आ पवस्वा सहस्रजित् ४
तं त्वा हस्तिनो मधुमन्तमद्रिभि र्दुहन्त्यप्सु वृषभं दश क्षिपः ।
इन्द्रं सोम मादयन् दैव्यं जनं सिन्धोरिवोर्मिः पवमानो अर्षसि ५ ६९५

॥ ८० ॥ (ऋ. ९ । ८१ । १—५) जगती, ५ त्रिष्टुप् ।

प्र सोमस्य पवमानस्योर्मय इन्द्रस्य यन्ति जठरं सुपेशसः ।
दध्ना यदीमुन्नीता यशसा गवां दानाय शूरमुदमन्दिषुः सुताः १
अच्छा हि सोमः कलशाँ असिष्यद दत्यो न वोळ्हा रघुवर्तनिर्वृषा ।
अथा देवानामुभयस्य जन्मनो विद्वाँ अश्नोत्यमुत इतश्च यत् २
आ नः सोम पवमानः किरा व स्विन्दो भव मघवा राधसो महः ।
शिक्षा वयोधो वसवे सु चेतुना मा नो गयमारे अस्मत् परा सिचः ३
आ नः पूषा पवमानः सुरातयो मित्रो गच्छन्तु वरुणः सजोषसः ।
बृहस्पतिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती ४
उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता ।
भगो नृशंस उर्वन्तरिक्षं विश्वे देवाः पवमानं जुषन्त ५ ७००

॥ ८१ ॥ (ऋ. ९ । ८२ । १—५) जगती ।

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवन्तमासदम् १
कविर्वेधस्या पर्येषि माहिन–मत्यो न मृष्टो अभि वाजमर्षसि ।
अपसेधन् दुरिता सोम मृळय घृतं वसानः परि यासि निर्णिजम् २
पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
स्वसार आपो अभि गा उतासरन् त्सं ग्रावभिर्नसते वीते अध्वरे ३
जायेव पत्यावधि शेव मंहसे पज्राया गर्भ शृणुहि ब्रवीमि ते ।
अन्तर्वाणीषु प्र चरा सु जीवसे ऽनिन्द्यो वृजने सोम जागृहि ४
यथा पूर्वेभ्यः शतसा अमृध्रः सहस्रसाः पर्यया वाजमिन्दो ।
एवा पवस्व सुविताय नव्यसे तव व्रतमन्वापः सचन्ते ५ ७०५

॥ ८२ ॥ (ऋ. ९।८३।१—५) (७०६—७१०) पवित्र आङ्गिरसः ।

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते शृतास इद् वहन्तस्तत् समाशत १
तपोष्पवित्रं विततं दिवस्पदे शोचन्तो अस्य तन्तवो व्यस्थिरन् ।
अवन्त्यस्य पवीतारमाशवो दिवस्पृष्ठमधि तिष्ठन्ति चेतसा २
अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ३
गन्धर्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः ।
गृभ्णाति रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशत ४
हविर्हविष्मो महि सद्म दैव्यं नभो वसानः परि यास्यध्वरम् ।
राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत् ५ ७१०

॥ ८३ ॥ (ऋ. ९ । ८४ । १-५) (७११-७१५) वाच्यः प्रजापतिः ।

पवस्व देवमादनो विचर्षणि–रप्सा इन्द्राय वरुणाय वायवे ।
कृधी नो अद्य वरिवः स्वस्तिम–दुरुक्षितौ गृणीहि दैव्यं जनम् १
आ यस्तस्थौ भुवनान्यमर्त्यो विश्वानि सोमः परि तान्यर्षति ।
कृण्वन्त्संचृतं विचृतमभिष्टय इन्दुः सिषक्त्युषसं न सूर्यः २ ७१२

आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः ।
आ विद्युता पवते धारया सुत इन्द्रं सोमो मादयन् दैव्यं जनम् ३
एष स्य सोमः पवते सहस्रजि-द्धिन्वानो वाचमिषिरामुषर्बुधम् ।
इन्दुः समुद्रमुदियर्ति वायुभि-रेन्द्रस्य हार्दि कलशेषु सीदति ४
अभि त्यं गावः पयसा पयोवृधं सोमं श्रीणन्ति मतिभिः स्वर्विदम् ।
धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः ५ ७१५

॥ ८४ ॥ (ऋ. ९ । ८५ । १—१२) (७१६—७२७) वेनो भार्गवः । जगती, ११—१२ त्रिष्टुप् ।

इन्द्राय सोम सुषुतः परि स्रवा-ऽपामीवा भवतु रक्षसा सह ।
मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः १
अस्मान्त्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः ।
जहि शत्रूँरभ्या मन्दनायतः पिबेन्द्र सोममव नो मृधो जहि २
अदब्ध इन्दो पवसे मदिन्तम आत्मेन्द्रस्य भवसि धासिरुत्तमः ।
अभि स्वरन्ति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते ३
सहस्रणीथः शतधारो अद्भुत इन्द्रायेन्दुः पवते काम्यं मधु ।
जयन् क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ४
कनिक्रदत् कलशे गोभिरज्यसे व्य१व्ययं समया वारमर्षसि ।
मर्मृज्यमानो अत्यो न सानसि-रिन्द्रस्य सोम जठरे समक्षरः ५ ७२०
स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतुनाम्ने ।
स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः ६
अत्यं मृजन्ति कलशे दश क्षिपः प्र विप्राणां मतयो वाच ईरते ।
पवमाना अभ्यर्षन्ति सुष्टुति-मेन्द्रं विशन्ति मदिरास इन्दवः ७
पवमानो अभ्यर्षा सुवीर्य-मुर्वीं गव्यूतिं महि शर्म सप्रथः ।
माकिर्नो अस्य परिषूतिरीशते-न्दो जयेम त्वया धनंधनम् ८
अधि द्यामस्थाद् वृषभो विचक्षणो ऽरूरुचद् वि दिवो रोचना कविः ।
राजा पवित्रमत्येति रोरुवद् दिवः पीयूषं दुहते नृचक्षसः ९
दिवो नाके मधुजिह्वा असश्चतो वेना दुहन्त्युक्षणं गिरिष्ठाम् ।
अप्सु द्रप्सं वावृधानं समुद्र आ सिन्धोरूर्मा मधुमन्तं पवित्र आ १० ७२५

नाके सुपर्णमुपपप्तिवांसं गिरो वेनानामकृपन्त पूर्वीः ।
शिशुं रिहन्ति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्थाम् ११
ऊर्ध्वो गन्धर्वो अधि नाके अस्थाद् विश्वा रूपा प्रतिचक्षाणो अस्य ।
भानुः शुक्रेण शोचिषा व्यद्यौत् प्रारूरुचद् रोदसी मातरा शुचिः १२ ७२७

॥ ८५ ॥ (ऋ. ९ । ८६ । १—४८)

(७२८—७७५) १—१० अकृष्टा माषाः, ११—२० सिकता निवावरी, २१—३० पृश्नयोऽजाः, ३१-४० अकृष्टामाषाद्यस्त्रयः, ४१—४५ भौमोऽत्रिः, ४६—४८ गृत्समदः शौनकः । जगती ।

प्र त आशवः पवमान धीजवो मदा अर्षन्ति रघुजा इव त्मना ।
दिव्याः सुपर्णा मधुमन्त इन्दवो मदिन्तमासः परि कोशमासते १
प्र ते मदासो मदिरास आशवो ऽसृक्षत रथ्यासो यथा पृथक् ।
धेनुर्न वत्सं पयसाभि वज्रिण मिन्द्रमिन्दवो मधुमन्त ऊर्मयः २
अत्यो न हियानो अभि वाजमर्ष स्वर्वित् कोशं दिवो अद्रिमातरम् ।
वृषा पवित्रे अधि सानो अव्यये सोमः पुनान इन्द्रियाय धायसे ३ ७३०
प्र त आश्विनीः पवमान धीजुवो दिव्या असृग्रन् पयसा धरीमणि ।
प्रान्तर्ऋषयः स्थाविरीरसृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ४
विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यन्ति केतवः ।
व्यानशिः पवसे सोम धर्मभिः पतिर्विश्वस्य भुवनस्य राजसि ५
उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।
यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति ६
यज्ञस्य केतुः पवते स्वध्वरः सोमो देवानामुप याति निष्कृतम् ।
सहस्रधारः परि कोशमर्षति वृषा पवित्रमत्येति रोरुवत् ७
राजा समुद्रं नद्यो३ वि गाहते ऽपामूर्मिं सचते सिन्धुषु श्रितः ।
अध्यस्थात् सानु पवमानो अव्ययं नाभा पृथिव्या धरुणो महो दिवः ८ ७३५
दिवो न सानु स्तनयन्नचिक्रदद् द्यौश्च यस्य पृथिवी च धर्मभिः ।
इन्द्रस्य सख्यं पवते विवेविदत् सोमः पुनानः कलशेषु सीदति ९
ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।
दधाति रत्नं स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः १० ७३७

अभिक्रन्दन् कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।
हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा ११
अग्रे सिन्धूनां पवमानो अर्ष—त्यग्रे वाचो अग्रियो गोषु गच्छति ।
अग्रे वाजस्य भजते महाधनं स्वायुधः सोतृभिः पूयते वृषा १२
अयं मतवाञ्छकुनो यथा हितो ऽव्ये ससार पवमान ऊर्मिणा ।
तव क्रत्वा रोदसी अन्तरा कवे शुचिर्धिया पवते सोम इन्द्र ते १३ ७४०
द्रापिं वसानो यजतो दिविस्पृश—मन्तरिक्षप्रा भुवनेष्वर्पितः ।
स्वर्जज्ञानो नभसाभ्यक्रमीत् प्रत्नमस्य पितरमा विवासति १४
सो अस्य विशे महि शर्म यच्छति यो अस्य धाम प्रथमं व्यानशे ।
पदं यदस्य परमे व्योमन् यतो विश्वा अभि सं याति संयतः १५
प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरम् ।
मर्य इव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा १६
प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवसनेष्वक्रमुः ।
सोमं मनीषा अभ्यनूषत स्तुभो ऽभि धेनवः पयसेमशिश्रयुः १७
आ नः सोम संयतं पिप्युषीमिष—मिन्दो पवस्व पवमानो अस्रिधम् ।
या नो दोहते त्रिरहन्नसश्चुषी क्षुमद् वाजवन्मधुमत् सुवीर्यम् १८ ७४५
वृषा मतीनां पवते विचक्षणः सोमो अह्नः प्रतरीतोषसो दिवः ।
क्राणा सिन्धूनां कलशाँ अवीवश—दिन्द्रस्य हार्द्याविशन् मनीषिभिः १९
मनीषिभिः पवते पूर्व्यः कवि—र्नृभिर्यतः परि कोशाँ अचिक्रदत् ।
त्रितस्य नाम जनयन् मधु क्षर—दिन्द्रस्य वायोः सख्याय कर्तवे २०
अयं पुनान उषसो वि रोचय—दयं सिन्धुभ्यो अभवदु लोककृत् ।
अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः २१
पवस्व सोम दिव्येषु धामसु सृजान इन्दो कलशे पवित्र आ ।
सीदन्निन्द्रस्य जठरे कनिक्रद—न्नृभिर्यतः सूर्यमारोहयो दिवि २२
अद्रिभिः सुतः पवसे पवित्र आँ इन्दविन्द्रस्य जठरेष्वाविशन् ।
त्वं नृचक्षा अभवो विचक्षण सोम गोत्रमङ्गिरोभ्योऽवृणोरप २३ ७५०

त्वां सोम पवमानं स्वाध्यो ऽनु विप्रासो अमदन्नवस्यवः ।
त्वां सुपर्ण आभरद् दिवस्परी—न्दो विश्वाभिर्मतिभिः परिष्कृतम् २४
अव्ये पुनानं परि वार ऊर्मिणा हरिं नवन्ते अभि सप्त धेनवः ।
अपामुपस्थे अध्यायवः कवि—मृतस्य योना महिषा अहेषत २५
इन्दुः पुनानो अति गाहते मृधो विश्वानि कृण्वन्त्सुपथानि यज्यवे ।
गाः कृण्वानो निर्णिजं हर्यतः कवि—रत्यो न क्रीळन् परि वारमर्षति २६
असश्चतः शतधारा अभिश्रियो हरिं नवन्तेऽव ता उदन्युवः ।
क्षिपो मृजन्ति परि गोभिरावृतं तृतीये पृष्ठे अधि रोचने दिवः २७
तवेमाः प्रजा दिव्यस्य रेतस—स्त्वं विश्वस्य भुवनस्य राजसि ।
अथेदं विश्वं पवमान ते वशे त्वमिन्दो प्रथमो धामधा असि २८ ७५५
त्वं समुद्रो असि विश्ववित् कवे तवेमाः पञ्च प्रदिशो विधर्मणि ।
त्वं द्यां च पृथिवीं चाति जभ्रिषे तव ज्योतींषि पवमान सूर्यः २९
त्वं पवित्रे रजसो विधर्मणि देवेभ्यः सोम पवमान पूयसे ।
त्वामुशिजः प्रथमा अगृभ्णत तुभ्येमा विश्वा भुवनानि येमिरे ३०
प्र रेभ एत्यति वारमव्ययं वृषा वनेष्वव चक्रदद्धरिः
सं धीतयो वावशाना अनूषत शिशुं रिहन्ति मतयः पनिप्नतम् ३१
स सूर्यस्य रश्मिभिः परि व्यत तन्तुं तन्वानस्त्रिवृतं यथा विदे ।
नयन्नृतस्य प्रशिषो नवीयसीः पतिर्जनीनामुप याति निष्कृतम् ३२
राजा सिन्धूनां पवते पतिर्दिव ऋतस्य याति पथिभिः कनिक्रदत् ।
सहस्रधारः परि षिच्यते हरिः पुनानो वाचं जनयन्नुपावसुः ३३ ७६०
पवमान मह्यर्णो वि धावसि सूरो न चित्रो अव्ययानि पव्यया ।
गभस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्याय धन्वसि ३४
इषमूर्जं पवमानाभ्यर्षसि श्येनो न वंसु कलशेषु सीदसि ।
इन्द्राय मद्वा मद्यो मदः सुतो दिवो विष्टम्भ उपमो विचक्षणः ३५
सप्त स्वसारो अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपश्चितम् ।
अपां गन्धर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे ३६
ईशान इमा भुवनानि वीयसे युजान इन्दो हरितः सुपर्ण्यः ।
तास्ते क्षरन्तु मधुमद् घृतं पय—स्तव व्रते सोम तिष्ठन्तु कृष्टयः ३७ ७६४

त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद्धिरण्यवद् वयं स्याम भुवनेषु जीवसे ३८ ७६५
गोवित् पवस्व वसुविद्धिरण्यविद् रेतोधा इन्दो भुवनेष्वर्पितः ।
त्वं सुवीरो असि सोम विश्ववित् तं त्वा विप्रा उप गिरेम आसते ३९
उन्मध्व ऊर्मिर्वनना अतिष्ठिप—दपो वसानो महिषो वि गाहते ।
राजा पवित्ररथो वाजमारुहत् सहस्रभृष्टिर्जयति श्रवो बृहत् ४०
स भन्दना उदियर्ति प्रजावती—र्विश्वायुर्विश्वाः सुभरा अहर्दिवि ।
ब्रह्म प्रजावद् रयिमश्वपस्त्यं पीत इन्दविन्द्रमस्मभ्यं याचतात् ४१
सो अग्रे अह्नां हरिर्हर्यतो मदः प्र चेतसा चेतयते अनु द्युभिः ।
द्वा जना यातयन्नन्तरीयते नरा च शंसं दैव्यं च धर्तरि ४२
अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते ४३ ७७०
विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति ।
अहिर्न जूर्णामति सर्पति त्वच—मत्यो न क्रीळन्नसरद् वृषा हरिः ४४
अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।
हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ४५
असर्जि स्कम्भो दिव उद्यतो मदः परि त्रिधातुर्भुवनान्यर्षति ।
अंशुं रिहन्ति मतयः पनिप्नतं गिरा यदि निर्णिजमृग्मिणो ययुः ४६
प्र ते धारा अत्यण्वानि मेष्यः पुनानस्य संयतो यन्ति रंहयः ।
यद् गोभिरिन्दो चम्वोः समज्यस आ सुवानः सोम कलशेषु सीदसि ४७
पवस्व सोम क्रतुविन्न उक्थ्यो ऽव्यो वारे परि धाव मधु प्रियम् ।
जहि विश्वान् रक्षस इन्दो अत्रिणो बृहद् वदेम विदथे सुवीराः ४८ ७७५

॥ ८६ ॥ (ऋ. ९।८७।१-९) (७७६—७९९) उशना काव्यः। त्रिष्टुप्।

प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
अश्वं न त्वा वाजिनं मर्जयन्तो ऽच्छा बर्ही रशनाभिर्नयन्ति १
स्वायुधः पवते देव इन्दु—रशस्तिहा वृजनं रक्षमाणः ।
पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः २ ७७७

ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन ।
स चिद् विवेद निहितं यदासामपीच्यं गुह्यं नाम गोनाम् ३
एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णे परि पवित्रे अक्षाः ।
सहस्रसाः शतसा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ४
एते सोमा अभि गव्या सहस्रा महे वाजायामृताय श्रवांसि ।
पवित्रेभिः पवमाना असृग्रञ्छ्रवस्यवो न पृतनाजो अत्याः ५ ७८०
परि हि ष्मा पुरुहूतो जनानां विश्वासरद् भोजना पूयमानः ।
अथा भर श्येनभृत प्रयांसि रयिं तुञ्जानो अभि वाजमर्ष ६
एष सुवानः परि सोमः पवित्रे सर्गो न सृष्टो अदधावदर्वा ।
तिग्मे शिशानो महिषो न शृङ्गे गा गव्यन्नभि शूरो न सत्वा ७
एषा ययौ परमादन्तरद्रेः कूचित् सतीरूर्वे गा विवेद ।
दिवो न विद्युत् स्तनयन्त्यभ्रैः सोमस्य ते पवत इन्द्र धारा ८
उत स्म राशिं परि यासि गोनामिन्द्रेण सोम सरथं पुनानः ।
पूर्वीरिषो बृहतीर्जीरदानो शिक्षा शचीवस्तव ता उपष्टुत् ९

॥ ८७ ॥ (ऋ. ९ । ८८ । १—८)

अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि ।
त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् १ ७८१
स ईं रथो न भुरिषाळयोजि महः पुरूणि सातये वसूनि ।
आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त २
वायुर्न यो नियुत्वाँ इष्टयामा नासत्येव हव आ शंभविष्ठः ।
विश्ववारो द्रविणोदा इव त्मन् पूषेव धीजवनोऽसि सोम ३
इन्द्रो न यो महा कर्माणि चक्रिर्हन्ता वृत्राणामसि सोम पूर्भित् ।
पैद्वो न हि त्वमहिनाम्नां हन्ता विश्वस्यासि सोम दस्योः ४
अग्निर्न यो वन आ सृज्यमानो वृथा पाजांसि कृणुते नदीषु ।
जनो न युध्वा महत उपब्दिरियर्ति सोमः पवमान ऊर्मिम् ५
एते सोमा अति वाराण्यव्या दिव्या न कोशासो अभ्रवर्षाः ।
वृथा समुद्रं सिन्धवो न नीचीः सुतासो अभि कलशाँ असृग्रन् ६ ७९०

शुष्मी शर्धो न मारुतं पवस्वाऽनभिशस्ता दिव्या यथा विट्।
आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः ७
राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ८

॥ ८८ ॥ (ऋ. ९ । ८९ । १—७)

प्रो स्य वह्निः पथ्याभिरस्यान् दिवो न वृष्टिः पवमानो अक्षाः।
सहस्रधारो असदन्न्यस्मे मातुरुपस्थे वन आ च सोमः १
राजा सिन्धूनामवसिष्ट वास ऋतस्य नावमारुहद् रजिष्ठाम्।
अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर्जाम् २
सिंहं नसन्त मध्वो अयासं हरिमरुषं दिवो अस्य पतिम्।
शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा ३ ७९५
मधुपृष्ठं घोरमयासमश्वं रथे युञ्जन्त्युरुचक्र ऋष्वम्।
स्वसार ईं जामयो मर्जयन्ति सनाभयो वाजिनमूर्जयन्ति ४
चतस्र ईं घृतदुहः सचन्ते समाने अन्तर्धरुणे निषत्ताः।
ता ईमर्षन्ति नमसा पुनानास्ता ईं विश्वतः परि षन्ति पूर्वीः ५
विष्टम्भो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य।
असत् त उत्सो गृणते नियुत्वान् मध्वो अंशुः पवत इन्द्रियाय ६
वन्वन्नवातो अभि देववीतिमिन्द्राय सोम वृत्रहा पवस्व।
शग्धि महः पुरुश्चन्द्रस्य रायः सुवीर्यस्य पतयः स्याम ७ ७९९

॥ ८९ ॥ (ऋ. ९ । ९० । १—६) (८००—८०५) वसिष्ठो मैत्रावरुणिः।

प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिष्यन्नयासीत्।
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः १ ८००
अभि त्रिपृष्ठं वृषणं वयोधामाङ्गूषाणामवावशन्त वाणीः।
वना वसानो वरुणो न सिन्धून् वि रत्नधा दयते वार्याणि २
शूरग्रामः सर्ववीरः सहावाञ्जेता पवस्व सनिता धनानि।
तिग्मायुधः क्षिप्रधन्वा समत्स्वषाळ्हः साह्वान् पृतनासु शत्रून् ३
उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरंधी।
अपः सिषासन्नुषसः स्वर्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ४ ८०३

मत्सि सोम वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णुम् ।
मत्सि शर्धो मारुतं मत्सि देवान् मत्सि महामिन्द्रमिन्दो मदाय ५
एवा राजेव क्रतुमाँ अमेन विश्वा घनिघ्नद् दुरिता पवस्व ।
इन्दो सूक्ताय वचसे वयो धा यूयं पात स्वस्तिभिः सदा नः ६ ८०५

॥ ९० ॥ (ऋ. ९ । ९१ । १-६) (८०६—८१७) कश्यपो मारीचः ।

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो मनीषी ।
दश स्वसारो अधि सानो अव्ये ऽजन्ति वह्निं सदनान्यच्छ १
वीती जनस्य दिव्यस्य कव्यै—रधि सुवानो नहुष्येभिरिन्दुः ।
प्र यो नृभिरमृतो मर्त्येभि—र्मर्मृजानोऽविभिर्गोभिरद्भिः २
वृषा वृष्णे रोरुवदंशुरस्मै पवमानो रुशदीर्ते पयो गोः ।
सहस्रमृक्वा पथिभिर्वचोवि—दध्वस्मभिः सूरो अण्वं वि याति ३
रुजा दृळ्हा चिद् रक्षसः सदांसि पुनान इन्द ऊर्णुहि वि वाजान् ।
वृश्चोपरिष्टात् तुजता वधेन ये अन्ति दूरादुपनायमेषाम् ४
स प्रत्नवन्नव्यसे विश्ववार सूक्ताय पथः कृणुहि प्राचः ।
ये दुष्षहासो वनुषा बृहन्त—स्ताँस्ते अश्याम पुरुकृत् पुरुक्षो ५ ८१०
एवा पुनानो अपः स्वर्गा अस्मभ्यं तोका तनयानि भूरि ।
शं नः क्षेत्रमुरु ज्योतींषि सोम ज्योङ्नः सूर्यं दृशये रिरीहि ६

॥ ९१ ॥ (ऋ. ९ । ९२ । १—६)

परि सुवानो हरिरंशुः पवित्रे रथो न सर्जि सनये हियानः ।
आपच्छ्लोकमिन्द्रियं पूयमानः प्रति देवाँ अजुषत प्रयोभिः १
अच्छा नृचक्षा असरत् पवित्रे नाम दधानः कविरस्य योनौ ।
सीदन् होतेव सदने चमूषू—पेमग्मन्नृषयः सप्त विप्राः २
प्र सुमेधा गातुविद् विश्वदेवः सोमः पुनानः सद एति नित्यम् ।
भुवद् विश्वेषु काव्येषु रन्ता ऽनु जनान् यतते पञ्च धीरः ३
तव त्ये सोम पवमान निण्ये विश्वे देवास्त्रय एकादशासः ।
दश स्वधाभिरधि सानो अव्ये मृजन्ति त्वा नद्यः सप्त यह्वीः ४ ८१५
तन्नु सत्यं पवमानस्यास्तु यत्र विश्वे कारवः संनसन्त ।
ज्योतिर्यदह्ने अकृणोदु लोकं प्रावन्मनुं दस्यवे करभीकम् ५ ८१६

परि सद्मेव पशुमान्ति होता राजा न सत्यः समितीरियानः ।
सोमः पुनानः कलशाँ अयासीत् सीदन् मृगो न महिषो वनेषु ६ ८१७

॥ ९२ ॥ (ऋ. ९ । ९३ । १-५) (८१८-८२२) नोधा गौतमः ।

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी १
सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।
मर्यो न योषामभि निष्कृतं य न्त्सं गच्छते कलश उस्रियाभिः २
उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः ।
मूर्धानं गावः पयसा चमू ष्वभि श्रीणन्ति वसुभिर्न निक्तैः ३ ८२०
स नो देवेभिः पवमान रदे न्दो रयिमश्विनं वावशानः ।
रथिरायतामुशती पुरंधि रस्मद्र्यगा दावने वसूनाम् ४
नू नो रयिमुप मास्व नृवन्तं पुनानो वाताप्यं विश्वश्चन्द्रम् ।
प्र वन्दितुरिन्दो तार्यायुः प्रातर्मक्षू धियावसुर्जगम्यात् ५ ८२२

॥ ९३ ॥ (ऋ. ९ । ९४ । १—५) (८२३-८२७) कण्वो घोरः ।

अधि यदस्मिन् वाजिनीव शुभः स्पर्धन्ते धियः सूर्ये न विशः ।
अपो वृणानः पवते कवीयन् व्रजं न पशुवर्धनाय मन्म १
द्विता व्यूर्ण्वन्नमृतस्य धाम स्वर्विदे भुवनानि प्रथन्त ।
धियः पिन्वानाः स्वसरे न गाव ऋतायन्तीरभि वावश्र इन्दुम् २
परि यत् कविः काव्या भरते शूरो न रथो भुवनानि विश्वा ।
देवेषु यशो मर्ताय भूषन् दक्षाय रायः पुरुभूषु नव्यः ३ ८२५
श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति ।
श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या समिथा मितद्रौ ४
इषमूर्जमभ्यर्षाश्वं गा मुरु ज्योतिः कृणुहि मत्सि देवान् ।
विश्वानि हि सुषहा तानि तुभ्यं पवमान बाधसे सोम शत्रून् ५ ८२७

॥ ९४ ॥ (ऋ. ९ । ९५ । १-५) (८२८—८३२) प्रस्कण्वः काण्वः ।

कनिक्रन्ति हरिरा सृज्यमानः सीदन् वनस्य जठरे पुनानः ।
नृभिर्यतः कृणुते निर्णिजं गा अतो मतीर्जनयत स्वधाभिः १ ८२८

*

हरिः सृजानः पथ्यामृतस्ये—यर्ति वाचमरितेव नावम् ।
देवो देवानां गुह्यानि नामा—ऽऽविष्कृणोति बर्हिषि प्रवाचे २
अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यन्तीरुप च यन्ति सं चा ऽऽ च विशन्त्युशतीरुशन्तम् ३ ८३०
तं मर्मृजानं महिषं न सानां—वंशुं दुहन्त्युक्षणं गिरिष्ठाम् ।
तं वावशानं मतयः सचन्ते त्रितो बिभर्ति वरुणं समुद्रे ४
इष्यन् वाचमुपवक्तेव होतुः पुनान इन्दो वि ष्या मनीषाम्
इन्द्रश्च यत् क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ५ ८३१

॥ ९५ ॥ (ऋ. ९ । ९६ । १—२४) (८३२—८५६) दैवोदासिः प्रतर्दनः ।

प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।
भद्रान् कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते १
समस्य हरिं हरयो मृजन्त्य—श्वहयैरनिशितं नमोभिः ।
आ तिष्ठति रथमिन्द्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ २
स नो देव देवताते पवस्व महे सोम प्सरस इन्द्रपानः ।
कृण्वन्नपो वर्षयन् द्यामुतेमा—मुरोरा नो वरिवस्या पुनानः ३ ८३५
अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृहते ।
तदुशन्ति विश्व इमे सखाय—स्तदहं वश्मि पवमान सोम ४
सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ५
ब्रह्मा देवानां पदवीः कवीना—मृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ६
प्रावीविपद्वाच ऊर्मिं न सिन्धु—र्गिरः सोमः पवमानो मनीषाः ।
अन्तः पश्यन् वृजनेमावरा—ण्या तिष्ठति वृषभो गोषु जानन् ७
स मत्सरः पृत्सु वन्वन्नवातः सहस्ररेता अभि वाजमर्ष ।
इन्द्रायेन्दो पवमानो मनी—ष्यंशोरूर्मिमीरय गा इषण्यन् ८ ८४०
परि प्रियः कलशे देववात इन्द्राय सोमो रण्यो मदाय ।
सहस्रधारः शतवाज इन्दु—र्वाजी न सप्तिः समना जिगाति ९ ८४१

स पूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ ।
अभिशस्तिपा भुवनस्य राजा विदद् गातुं ब्रह्मणे पूयमानः १०
त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः
वन्वन्नवातः परिधीँरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ११
यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्धविष्मान् ।
एवा पवस्व द्रविणं दधान इन्द्रे सं तिष्ठ जनयायुधानि १२
पवस्व सोम मधुमाँ ऋतावा ऽपो वसानो अधि सानो अव्ये ।
अव द्रोणानि घृतवान्ति सीद मदिन्तमो मत्सर इन्द्रपानः १३ ८४५
वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर्देववीतौ ।
सं सिन्धुभिः कलशे वावशानः समुस्रियाभिः प्रतिरन् न आयुः १४
एष स्य सोमो मतिभिः पुनानो ऽत्यो न वाजी तरतीदरातीः ।
पयो न दुग्धमदितेरिषिर—मुर्विव गातुः सुयमो न वोळ्हा १५
स्वायुधः सोतृभिः पूयमानो ऽभ्यर्ष गुह्यं चारु नाम ।
अभि वाजं सप्तिरिव श्रवस्या ऽभि वायुमभि गा देव सोम १६
शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति वह्निं मरुतो गणेन ।
कविर्गीर्भिः काव्येना कविः सन् त्सोमः पवित्रमत्येति रेभन् १७
ऋषिमना य ऋषिकृत् स्वर्षाः सहस्रणीथः पदवीः कवीनाम् ।
तृतीयं धाम महिषः सिषासन् त्सोमो विराजमनु राजति ष्टुप् १८ ८५०
चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् ।
अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति १९
मर्यो न शुभ्रस्तन्वं मृजानो ऽत्यो न सृत्वा सनये धनानाम् ।
वृषेव यूथा परि कोशमर्षन् कनिक्रदच्चम्वोऽऽरा विवेश २०
पवस्वेन्दो पवमानो महोभिः कनिक्रदत् परि वाराण्यर्ष ।
क्रीळंश्चम्वोऽऽरा विश पूयमान इन्द्रं ते रसो मदिरो ममत्तु २१
प्रास्य धारा बृहतीरसृग्र—न्नक्तो गोभिः कलशाँ आ विवेश ।
साम कृण्वन्त्सामन्यो विपश्चित् क्रन्दन्नेत्यभि सख्युर्न जामिम् २२
अपघ्नन्नेषि पवमान शत्रून् प्रियां न जारो अभिगीत इन्दुः ।
सीदन् वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता २३ ८५५

आ ते रुचः पवमानस्य सोम योषेव यन्ति सुदुघाः सुधाराः ।
हरिरानीतः पुरुवारो अप्स्व—चिक्रदत् कलशे देवयूनाम् २४ ८५६

॥ ९६ ॥ (ऋ. ९ । ९७ । १—५८)

(८५७—९१४) १—३ मैत्रावरुणिर्वसिष्ठः, ४-६ वासिष्ठ इन्द्रप्रमतिः, ७—९वासिष्ठो वृषगणः, १०—१२ वासिष्ठो मन्युः,१३-१५ वासिष्ठ उपमन्युः, १६-१८ वासिष्ठो व्याघ्रपाद्, १९-२१ वासिष्ठः शक्तिः, २२—२४ वासिष्ठः कर्णश्रुद्, २५—२७ वासिष्ठो मृळीकः, २८—३० वासिष्ठो वसुक्रः, ३१—४४ पराशरः शाक्त्यः, ४५—५८ कुत्स आङ्गिरसः।

अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
सुतः पवित्रं पर्येति रेभन् मितेव सद्म पशुमान्ति होता १
भद्रा वस्त्रा समन्या३ वसानो महान् कविर्निवचनानि शंसन् ।
आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ २
समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।
अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ३
प्र गायताभ्यर्चाम देवान् त्सोमं हिनोत महते धनाय ।
स्वादुः पवाते अति वारमव्य—मा सीदाति कलशं देवयुर्नः ४ ८६०
इन्दुर्देवानामुप सख्यमायन् त्सहस्रधारः पवते मदाय ।
नृभिः स्तवानो अनु धाम पूर्व—मगन्निन्द्रं महते सौभगाय ५
स्तोत्रे राये हरिरर्षा पुनान इन्द्रं मदो गच्छतु ते भराय ।
देवैर्याहि सरथं राधो अच्छा यूयं पात स्वस्तिभिः सदा नः ६
प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ७
प्र हंसासस्तृपलं मन्युमच्छा—मादस्तं वृषगणा अयासुः ।
आङ्गूष्यं१ पवमानं सखायो दुर्मर्षं साकं प्र वदन्ति वाणम् ८
स रंहत उरुगायस्य जूतिं वृथा क्रीळन्तं मिमते न गावः ।
परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर्ददृशे नक्तमृज्रः ९ ८६५
इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन् मदाय ।
हन्ति रक्षो बाधते पर्यराती—र्वरिवः कृण्वन् वृजनस्य राजा १०
अध धारया मध्वा पृचान—स्तिरो रोम पवते अद्रिदुग्धः ।
इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ११ ८६७

अभि प्रियाणि पवते पुनानो देवो देवान्त्स्वेन रसेन पृञ्चन् ।
इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये १२
वृषा शोणो अभिकनिक्रदद् गा नदयन्नेति पृथिवीमुत द्याम् ।
इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचेतयन्नर्षति वाचमेमाम् १३
रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुम् ।
पवमानः संतनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः १४ ८७०
एवा पवस्व मदिरो मदायो-दग्राभस्य नमयन् वधस्नैः ।
परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः १५
जुष्टी न इन्दो सुपथा सुगान्युरौ पवस्व वरिवांसि कृण्वन् ।
घनेव विष्वग् दुरितानि विघ्नन्नधि ष्णुना धन्व सानो अव्ये १६
वृष्टिं नो अर्ष दिव्यां जिगत्नुमिळावतीं शंगयीं जीरदानुम् ।
स्तुकेव वीता धन्वा विचिन्वन् बन्धूँरिमाँ अवराँ इन्दो वायून् १७
ग्रन्थिं न वि ष्य ग्रथितं पुनान ऋजुं च गातुं वृजिनं च सोम ।
अत्यो न क्रदो हरिरा सृजानो मर्यो देव धन्व पस्त्यावान् १८
जुष्टो मदाय देवतात इन्दो परि ष्णुना धन्व सानो अव्ये ।
सहस्रधारः सुरभिरदब्धः परि स्रव वाजसातौ नृषह्ये १९ ८७५
अरश्मानो येऽरथा अयुक्ता अत्यासो न ससृजानास आजौ ।
एते शुक्रासो धन्वन्ति सोमा देवासस्ताँ उप याता पिबध्यै २०
एवा न इन्दो अभि देववीतिं परि स्रव नभो अर्णश्चमूषु ।
सोमो अस्मभ्यं काम्यं बृहन्तं रयिं ददातु वीरवन्तमुग्रम् २१
तक्षद् यदी मनसो वेनतो वाग् ज्येष्ठस्य वा धर्मणि क्षोरनीके ।
आदीमायन् वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम् २२
प्र दानुदो दिव्यो दानुपिन्व ऋतमृताय पवते सुमेधाः ।
धर्मा भुवद् वृजन्यस्य राजा प्र रश्मिभिर्दशभिर्भारि भूम २३
पवित्रेभिः पवमानो नृचक्षा राजा देवानामुत मर्त्यानाम् ।
द्विता भुवद् रयिपती रयीणामृतं भरत् सुभृतं चार्विन्दुः २४ ८८०
अर्वाँ इव श्रवसे सातिमच्छेन्द्रस्य वायोरभि वीतिमर्ष ।
स नः सहस्रा बृहतीरिषो दा भवा सोम द्रविणोवित् पुनानः २५ ८८१

देवाव्यो नः परिषिच्यमानाः क्षयं सुवीरं धन्वन्तु सोमाः ।
आयज्यवः सुमतिं विश्ववारा होतारो न दिवियजो मन्द्रतमाः २६
एवा देव देवताते पवस्व महे सोम प्सरसे देवपानः ।
महश्चिद्धि ष्मसि हिताः समर्ये कृधि सुष्ठाने रोदसी पुनानः २७
अश्वो न क्रदो वृषभिर्युजानः सिंहो न भीमो मनसो जवीयान् ।
अर्वाचीनैः पथिभिर्ये रजिष्ठा आ पवस्व सौमनसं न इन्दो २८
शतं धारा देवजाता असृग्रन् त्सहस्रमेनाः कवयो मृजन्ति ।
इन्दो सनित्रं दिव आ पवस्व पुरएतासि महतो धनस्य २९ ८८९
दिवो न सर्गा असमृग्रमह्नां राजा न मित्रं प्र मिनाति धीरः ।
पितुर्न पुत्रः क्रतुभिर्यतान आ पवस्व विशे अस्या अजीतिम् ३०
प्र ते धारा मधुमतीरसृग्रन् वारान् यत् पूतो अत्येष्यव्यान् ।
पवमान पवसे धाम गोनां जज्ञानः सूर्यमपिन्वो अर्कैः ३१
कनिक्रदुदनु पन्थामृतस्य शुक्रो वि भास्यमृतस्य धाम ।
स इन्द्राय पवसे मत्सरवान् हिन्वानो वाचं मतिभिः कवीनाम् ३२
दिव्यः सुपर्णोऽव चक्षि सोम पिन्वन् धाराः कर्मणा देववीतौ ।
एन्दो विश कलशं सोमधानं क्रन्दन्निहि सूर्यस्योप रश्मिम् ३३
तिस्रो वाच ईरयति प्र वह्नि—ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ३४ ८९०
सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।
सोमः सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते ३५
एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
इन्द्रमा विश बृहता रवेण वर्धया वाचं जनया पुरंधिम् ३६
आ जागृविर्विप्र ऋता मतीनां सोमः पुनानो असदच्चमूषु ।
सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ३७
स पुनान उप सूरे न धातो—भे अप्रा रोदसी वि ष आवः ।
प्रिया चिद् यस्य प्रियसास ऊती स तू धनं कारिणे न प्र यंसत् ३८
स वर्धिता वर्धनः पूयमानः सोमो मीढ्वाँ अभि नो ज्योतिषावीत् ।
येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमुष्णन् ३९ ८९१

अक्रान्त्समुद्रः प्रथमे विधर्म—ञ्जनयन् प्रजा भुवनस्य राजा।
वृषा पवित्रे अधि सानो अव्ये　बृहत् सोमो वावृधे सुवान इन्दुः　४०
महत् तत् सोमो महिषश्चकारा—ऽपां यद् गर्भोऽवृणीत देवान्।
अदधादिन्द्रे पवमान ओजो　ऽजनयत् सूर्ये ज्योतिरिन्दुः　४१
मत्सि वायुमिष्टये राधसे च　मत्सि मित्रावरुणा पूयमानः।
मत्सि शर्धो मारुतं मत्सि देवान्　मत्सि द्यावापृथिवी देव सोम　४२
ऋजुः पवस्व वृजिनस्य हन्ता　ऽपामीवां बाधमानो मृधश्च।
अभिश्रीणन् पयः पयसाभि गोना—मिन्द्रस्य त्वं तव वयं सखायः　४३
मध्वः सूदं पवस्व वस्व उत्सं　वीरं च न आ पवस्वा भगं च।
स्वदस्वेन्द्राय पवमान इन्दो　रयिं च न आ पवस्वा समुद्रात्　४४　९००
सोमः सुतो धारयात्यो न हित्वा　सिन्धुर्न निम्नमभि वाज्यक्षाः।
आ योनिं वन्यमसदत् पुनानः　समिन्दुर्गोभिरसरत् समद्भिः　४५
एष स्य ते पवत इन्द्र सोम—श्चमूषु धीर उशते तवस्वान्।
स्वर्चक्षा रथिरः सत्यशुष्मः　कामो न यो देवयतामसर्जि　४६
एष प्रत्नेन वयसा पुनान—स्तिरो वर्पांसि दुहितुर्दधानः।
वसानः शर्म त्रिवरूथमप्सु　होतेव याति समनेषु रेभन्　४७
नू नस्त्वं रथिरो देव सोम　परि स्रव चम्वोः पूयमानः।
अप्सु स्वादिष्ठो मधुमाँ ऋतावा　देवो न यः सविता सत्यमन्मा　४८
अभि वायुं वीत्यर्षा गृणानो३　ऽभि मित्रावरुणा पूयमानः।
अभी नरं धीजवनं रथेष्ठा—मभीन्द्रं वृषणं वज्रबाहुम्　४९　९०५
अभि वस्त्रा सुवसनान्यर्षा—ऽभि धेनूः सुदुघाः पूयमानः।
अभि चन्द्रा भर्तवे नो हिरण्या　ऽभ्यश्वान् रथिनो देव सोम　५०
अभी नो अर्ष दिव्या वसू—न्यभि विश्वा पार्थिवा पूयमानः
अभि येन द्रविणमश्नवामा—ऽभ्यार्षेयं जमदग्निवन्नः　५१
अया पवा पवस्वैना वसूनि　माँश्चत्व इन्दो सरसि प्र धन्व।
ब्रध्नश्चिदत्र वातो न जूतः　पुरुमेधश्चित् तकवे नरं दात्　५२
उत न एना पवया पवस्वा—ऽधि श्रुते श्रवाय्यस्य तीर्थे।
षष्टिं सहस्रा नैगुतो वसूनि　वृक्षं न पक्वं धूनवद् रणाय　५३　९०९

महीमे अस्य वृषनाम शूषे माँश्चत्वे वा पृशने वा वधत्रे ।
अस्वापयन्निगुतः स्नेहयच्चा ऽपामित्राँ अपाचितो अचेतः ५४ ११०
सं त्री पवित्रा विततान्येष्य न्वेकं धावसि पूयमानः ।
असि भगो असि दात्रस्य दाता ऽसि मघवा मघवद्भ्य इन्दो ५५
एष विश्ववित् पवते मनीषी सोमो विश्वस्य भुवनस्य राजा ।
द्रप्साँ ईरयन् विदथेष्विन्दु र्वि वारमव्यं समयाति याति ५६
इन्दुं रिहन्ति महिषा अदब्धाः पदे रेभन्ति कवयो न गृध्राः ।
हिन्वन्ति धीरा दशभिः क्षिपाभिः समञ्जते रूपमपां रसेन ५७
त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
तन्नो मित्रो वरुणो मामहन्ता मदितिः सिन्धुः पृथिवी उत द्यौः ५८ ११४

॥ ९७ ॥ (ऋ. ९ । ९८ । १-१२)

(९१५-९२६) अम्बरीषो वार्षागिरः, ऋजिश्वा भारद्वाजश्च । अनुष्टुप्, ११ बृहती ।

अभि नो वाजसातमं रयिमर्ष पुरुस्पृहम् । इन्दो सहस्रभर्णसं तुविद्युम्नं विभ्वासहम् १ ९१५
परि ष्य सुवानो अव्ययं रथे न वर्माव्यत । इन्दुरभि द्रुणा हितो हियानो धाराभिरक्षाः २
परि ष्य सुवानो अक्षा इन्दुरव्ये मदच्युतः । धारा य ऊर्ध्वो अध्वरे भ्राजा नैति गव्ययुः ३
स हि त्वं देव शश्वते वसु मर्ताय दाशुषे । इन्दो सहस्रिणं रयिं शतात्मानं विवाससि ४
वयं ते अस्य वृत्रहन् वसो वस्वः पुरुस्पृहः । नि नेदिष्ठतमा इषः स्याम सुम्नस्याध्रिगो ५
द्विर्यं पञ्च स्वयशसं स्वसारो अद्रिसंहतम् । प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त्यूर्मिणम् ६ ९२०
परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण । यो देवान् विश्वाँ इत् परि मदेन सह गच्छति ७
अस्य वो ह्यवसा पान्तो दक्षसाधनम् । यः सूरिषु श्रवो बृहद् दधे स्वर्ण हर्यतः ८
स वां यज्ञेषु मानवी इन्दुर्जनिष्ट रोदसी । देवो देवी गिरिष्ठा अस्रेधन् तं तुविष्वणि ९
इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे । नरे च दक्षिणावते देवाय सदनासदे १०
ते प्रत्नासो व्युष्टिषु सोमाः पवित्रे अक्षरन् । अपप्रोथन्तः सनुतर्हुरश्चितः प्रातस्ताँ अप्रचेतसः ११ ९२५
तं सखायः पुरोरुचं यूयं वयं च सूरयः । अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम् १२ ९२६

॥ ९८ ॥ (ऋ. ९ । ९९ । १-८) (९२७-९३४) रेभसूनू काश्यपौ । अनुष्टुप्, १ बृहती ।

आ हर्यताय धृष्णवे धनुस्तन्वन्ति पौंस्यम् । शुक्रां वयन्त्यसुराय निर्णिजं विपामग्रे महीयुवः १
अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहते । यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे २
तमस्य मर्जयामसि मदो य इन्द्रपातमः । यं गाव आसभिर्दधुः पुरा नूनं च सूरयः ३
तं गाथया पुराण्या पुनानमभ्यनूषत । उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ४ ९३०

तमुक्षमाणमव्यये वारे पुनन्ति धर्णसिम् । दूतं न पूर्वचित्तय आ शासते मनीषिणः ५
स पुनानो मदिन्तमः सोमश्चमूषु सीदति । पशौ न रेत आदधत् पतिर्वचस्यते धियः ६
स मृज्यते सुकर्मभि— र्देवो देवेभ्यः सुतः । विदे यदासु संददि— र्महीरपो वि गाहते ७
सुत इन्दो पवित्र आ नृभिर्यतो वि नीयसे । इन्द्राय मत्सरिन्तम— श्चमूष्वा नि षीदसि ८ ९३४

॥ ९९ ॥ (ऋ. ९ । १०० । १—९) (९३५—९४३) रेभसूनू काश्यपौ । अनुष्टुप् ।

अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम् । वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः १ ९३५
पुनान इन्दवा भर सोम द्विबर्हसं रयिम् । त्वं वसूनि पुष्यसि विश्वानि दाशुषो गृहे २
त्वं धियं मनोयुजं सृजा वृष्टिं न तन्यतुः । त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि ३
परि ते जिग्युषो यथा धारा सुतस्य धावति । रंहमाणा व्यव्ययं वारं वाजीव सानसिः ४
क्रत्वे दक्षाय नः कवे पवस्व सोम धारया । इन्द्राय पातवे सुतो मित्राय वरुणाय च ५
पवस्व वाजसातमः पवित्रे धारया सुतः । इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ६ ९४०
त्वां रिहन्ति मातरो हरिं पवित्रे अद्रुहः । वत्सं जातं न धेनवः पवमान विधर्मणि ७
पवमान महि श्रव— श्चित्रेभिर्यासि रश्मिभिः । शर्धन् तमांसि जिघ्नसे विश्वानि दाशुषो गृहे ८
त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे । प्रति द्रापिममुञ्चथाः पवमान महित्वना ९ ९४३

॥ १०० ॥ (ऋ. ९ । १०१ । १—१६)

(९४४—९५९) १—३ अन्धीगुः श्यावाश्विः, ४-६ ययातिर्नाहुषः, ७-९ नहुषो मानवः, १०—१२ मनुः सांवरणः, १३-१६ वैश्वामित्रो वाच्यो वा प्रजापतिः । अनुष्टुप्, १—३ गायत्री ।

पुरोजिती वो अन्धसः सुताय मादयित्नवे । अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् १
यो धारया पावकया परिप्रस्यन्दते सुतः । इन्दुरश्वो न कृत्व्यः २ ९४५
तं दुरोषमभी नरः सोमं विश्वाच्या धिया । यज्ञं हिन्वन्त्यद्रिभिः ३
सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः । पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ४
इन्दुरिन्द्राय पवत इति देवासो अब्रुवन् । वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ५
सहस्रधारः पवते समुद्रो वाचमीङ्खयः । सोमः पती रयीणां सखेन्द्रस्य दिवेदिवे ६
अयं पूषा रयिर्भगः सोमः पुनानो अर्षति । पतिर्विश्वस्य भूमनो व्यख्यद् रोदसी उभे ७ ९५०
समु प्रिया अनूषत गावो मदाय घृष्वयः । सोमासः कृण्वते पथः पवमानास इन्दवः ८
य ओजिष्ठस्तमा भर पवमान श्रवाय्यम् । यः पञ्च चर्षणीरभि रयिं येन वनामहै ९
सोमाः पवन्त इन्दवो ऽस्मभ्यं गातुवित्तमाः । मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः १०
सुष्वाणासो व्यद्रिभि— श्चिताना गोरधि त्वचि । इषमस्मभ्यमभितः समस्वरन् वसुविदः ११ ९५४

एते पूता विपश्चितः सोमासो दध्याशिरः । सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते १२ ९५५
प्र सुन्वानस्यान्धसो मर्तो न वृत तद् वचः । अप श्वानमराधसं हता मखं न भृगवः १३
आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः । सरज्जारो न योषणां वरो न योनिमासदम् १४
स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी । हरिः पवित्रे अव्यत वेधा न योनिमासदम् १५
अव्यो वारेभिः पवते सोमो गव्ये अधि त्वचि । कनिक्रदद् वृषा हरि-रिन्द्रस्याभ्येति निष्कृतम् ९५९

॥ १०१ ॥ (ऋ. ९ । १०२ । १—८) (९६०—९६७) त्रित आप्त्यः। उष्णिक् ।

क्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम् । विश्वा परि प्रिया भुवदध द्विता १ ९६०
उप त्रितस्य पाष्योरभक्त यद् गुहा पदम् । यज्ञस्य सप्त धामभिरध प्रियम् २
त्रीणि त्रितस्य धारया पृष्ठेष्वेरया रयिम् । मिमीते अस्य योजना वि सुक्रतुः ३
जज्ञानं सप्त मातरो वेधामशासत श्रिये । अयं ध्रुवो रयीणां चिकेत यत् ४
अस्य व्रते सजोषसो विश्वे देवासो अद्रुहः । स्पार्हा भवन्ति रन्तयो जुषन्त यत् ५
यमी गर्भमृतावृधो दृशे चारुमजीजनन् । कविं मंहिष्ठमध्वरे पुरुस्पृहम् ६ ९६५
समीचीने अभि त्मना यह्वी ऋतस्य मातरा । तन्वाना यज्ञमानुषग् यदञ्जते ७
क्रत्वा शुक्रेभिरक्षभि-ऋणोरप व्रजं दिवः । हिन्वन्नृतस्य दीधितिं प्राध्वरे ८ ९६७

॥ १०२ ॥ (ऋ. ९ । १०३ । १—६) (९६८—९७३) द्वित आप्त्यः ।

प्र पुनानाय वेधसे सोमाय वच उद्यतम् । भृतिं न भरा मतिभिर्जुजोषते १
परि वाराण्यव्यया गोभिरञ्जानो अर्षति । त्री षधस्था पुनानः कृणुते हरिः २
परि कोशं मधुश्चुत-मव्यये वारे अर्षति । अभि वाणीर्ऋषीणां सप्त नूषत ३ ९७०
परि णेता मतीनां विश्वदेवो अदाभ्यः । सोमः पुनानश्चम्वोर्विशद्धरिः ४
परि दैवीरनु स्वधा इन्द्रेण याहि सरथम् । पुनानो वाघद् वाघद्भिरमर्त्यः ५
परि सप्तिर्न वाजयु-र्देवो देवेभ्यः सुतः । व्यानशिः पवमानो वि धावति ६ ९७३

॥१०३॥ (ऋ. ९।१०४।१-६) (९७४—९८५) पर्वतनारदौ काण्वौ, काश्यपौ शिखण्डिन्यावप्सरसौ वा ।

सखाय आ नि षीदत पुनानाय प्र गायत । शिशुं न यज्ञैः परि भूषत श्रिये १
समी वत्सं न मातृभिः सृजता गयसाधनम् । देवाव्यं मदमभि द्विशवसम् २ ९७५
पुनाता दक्षसाधनं यथा शर्धाय वीतये । यथा मित्राय वरुणाय शंतमः ३
अस्मभ्यं त्वा वसुविद-मभि वाणीरनूषत । गोभिष्टे वर्णमभि वासयामसि ४
स नो मदानां पत इन्दो देवप्सरा असि । सखेव सख्ये गातुवित्तमो भव ५
सनेमि कृध्यस्मदा रक्षसं कं चिदत्रिणम् । अपादेवं द्वयुमंहो युयोधि नः ६ ९७९

॥ १०४ ॥ (ऋ. ९ । १०५ । १—६)

तं वः सखायो मदाय पुनानमभि गायत । शिशुं न यज्ञैः स्वदयन्त गूर्तिभिः १ ९८०
सं वत्स इव मातृभि रिन्दुर्हिन्वानो अज्यते । देवावीर्मदो मतिभिः परिष्कृतः २
अयं दक्षाय साधनो ऽयं शर्धाय वीतये । अयं देवेभ्यो मधुमत्तमः सुतः ३
गोमन्न इन्दो अश्ववत् सुतः सुदक्ष धन्व । शुचिं ते वर्णमधि गोषु दीधरम् ४
स नो हरीणां पत इन्दो देवप्सरस्तमः । सखेव सख्ये नर्यो रुचे भव ५
सनेमि त्वमस्मदाँ अदेवं कं चिदत्रिणम् । साह्वाँ इन्दो परि बाधो अप द्वयुम् ६ ९८५

॥१०५॥(ऋ. ९।१०६।१-१४) (९८६-९९९)१-३,१०-१४अग्निश्चाक्षुषः,४-६चक्षुर्मानवः ७-९मनुराप्सवः ।

इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः । श्रुष्टी जातास इन्दवः स्वर्विदः १
अयं भराय सानसि रिन्द्राय पवते सुतः । सोमो जैत्रस्य चेतति यथा विदे २
अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णीत सानसिम् । वज्रं च वृषणं भरत् समप्सुजित् ३
प्र धन्वा सोम जागृवि रिन्द्रायेन्दो परि स्रव । द्युमन्तं शुष्ममा भरा स्वर्विदम् ४
इन्द्राय वृषणं मदं पवस्व विश्वदर्शतः । सहस्रयामा पथिकृद् विचक्षणः ५ ९९०
अस्मभ्यं गातुवित्तमो देवेभ्यो मधुमत्तमः । सहस्रं याहि पथिभिः कनिक्रदत् ६
पवस्व देववीतय इन्दो धाराभिरोजसा । आ कलशं मधुमान्त्सोम नः सदः ७
तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः । त्वां देवासो अमृताय कं पपुः ८
आ नः सुतास इन्दवः पुनाना धावता रयिम् । वृष्टिद्यावो रीत्यापः स्वर्विदः ९
सोमः पुनान ऊर्मिणा ऽव्यो वारं वि धावति । अग्रे वाचः पवमानः कनिक्रदत् १० ९९५
धीभिर्हिन्वन्ति वाजिनं वने क्रीळन्तमत्यविम् । अभि त्रिपृष्ठं मतयः समस्वरन् ११
असर्जि कलशाँ अभि मीळ्हे सप्तिर्न वाजयुः । पुनानो वाचं जनयन्नसिष्यदत् १२
पवते हर्यतो हरि रति ह्वरांसि रंह्या । अभ्यर्षन्त्स्तोतृभ्यो वीरवद् यशः १३
अया पवस्व देवयु र्मधोर्धारा असृक्षत । रेभन् पवित्रं पर्येषि विश्वतः १४ ९९९

॥ १०६ ॥ (ऋ. ९।१०७।१—२६)

(१०००—१०२५) सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः, २ कश्यपो मारीचः, ३ गोतमो राहूगणः, ४ भौमोऽत्रिः, ५ विश्वामित्रो गाथिनः, ६ जमदग्निर्भार्गवः, ७ मैत्रावरुणिर्वसिष्ठः) । प्रगाथः =(१, ४, ६, ८—१०, १२, १४, १७ बृहती; २, ५, ७, ११, १३, १५, १८ सतोबृहती); ३, १६ द्विपदा विराट्; १९—२६ प्रगाथः = विषमा बृहती, समा सतोबृहती) ।

परीतो षिञ्चता सुतं सोमो य उत्तमं हविः ।
दधन्वाँ यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः १ १०००

नूनं पुनानोऽविभिः परि स्रवा—ऽदब्धः सुरभिंतरः ।
सुते चित् त्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरम् २
परि सुवानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ३
पुनानः सोम धारया ऽपो वसानो अर्षसि ।
आ रत्नधा योनिमृतस्य सीद—स्युत्सो देव हिरण्ययः ४
दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् ।
आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धूतो विचक्षणः ५
पुनानः सोम जागृवि—रव्यो वारे परि प्रियः ।
त्वं विप्रो अभवोऽङ्गिरस्तमो मध्वा यज्ञं मिमिक्ष नः ६ १००५
सोमो मीढ्वान् पवते गातुवित्तम ऋषिर्विप्रो विचक्षणः ।
त्वं कविरभवो देववीतम आ सूर्यं रोहयो दिवि ७
सोम उ षुवाणः सोतृभि—रधि ष्णुभिरवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ८
अनूपे गोमान् गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।
समुद्रं न संवरणान्यग्मन् मन्दी मदाय तोशते ९
आ सोम सुवानो अद्रिभि—स्तिरो वाराण्यव्यया ।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दधिषे १०
स मामृजे तिरो अण्वानि मेष्यो मीळ्हे सप्तिर्न वाजयुः ।
अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर्ऋक्वभिः ११ १०१०
प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृवि—रच्छा कोशं मधुश्चुतम् १२
आ हर्यतो अर्जुने अत्के अव्यत प्रियः सूनुर्न मर्ज्यः ।
तमीं हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः १३
अभि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपि मनीषिणो मत्सरासः स्वर्विदः १४
तरत् समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
अर्षन्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् १५
नृभिर्येमानो हर्यतो विचक्षणो राजा देवः समुद्रियः १६ १०१५

इन्द्राय पवते मदः　सोमो मरुत्वते सुतः ।
सहस्रधारो अत्यव्यमर्षति　तमी मृजन्त्यायवः　१७
पुनानश्चमू जनयन् मतिं कविः　सोमो देवेषु रण्यति ।
अपो वसानः परि गोभिरुत्तरः　सीदन् वनेष्वव्यत　१८
तवाहं सोम रारण　सख्य इन्दो दिवेदिवे ।
पुरूणि बभ्रो नि चरन्ति मामव　परिधीँरति ताँ इहि　१९
उताहं नक्तमुत सोम ते दिवा　सख्याय बभ्र ऊधनि ।
घृणा तपन्तमति सूर्यं परः　शकुना इव पप्तिम　२०
मृज्यमानः सुहस्त्य　समुद्रे वाचमिन्वसि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहं　पवमानाभ्यर्षसि　२१　१०२०
मृजानो वारे पवमानो अव्यये　वृषाव चक्रदो वने ।
देवानां सोम पवमान निष्कृतं　गोभिरञ्जानो अर्षसि　२२
पवस्व वाजसातये　ऽभि विश्वानि काव्या ।
त्वं समुद्रं प्रथमो वि धारयो　देवेभ्यः सोम मत्सरः　२३
स तू पवस्व परि पार्थिवं रजो　दिव्या च सोम धर्मभिः ।
त्वां विप्रासो मतिभिर्विचक्षण　शुभ्रं हिन्वन्ति धीतिभिः　२४
पवमाना असृक्षत　पवित्रमति धारया ।
मरुत्वन्तो मत्सरा इन्द्रिया हया　मेधामभि प्रयांसि च　२५
अपो वसानः परि कोशमर्षती—न्दुर्हियानः सोतृभिः ।
जनयञ्ज्योतिर्मन्दना अवीवशद्　गाः कृण्वानो न निर्णिजम्　२६　१०२५

॥ १०७ ॥ (ऋ. ९ । १०८ । १—१६)

(१०२६—१०४१) १—२ गौरिवीतिः शाक्त्यः, ३, १४-१६ शक्तिर्वासिष्ठ , ४-५ ऊरुराङ्गिरसः, ६—७ ऋजिश्वा भारद्वाजः, ८-९ ऊर्ध्वसद्मा आङ्गिरसः, १०—११ कृतयशा आङ्गिरसः, १२—१३ ऋणंचयो राजर्षिः । काकुभः प्रगाथः = (विषमा ककुप्, समा सतोबृहती), १३ यवमध्या गायत्री ।

पवस्व मधुमत्तम　इन्द्राय सोम क्रतुवित्तमो मदः । महि द्युक्षतमो मदः　१
यस्य ते पीत्वा वृषभो वृषायते　ऽस्य पीता स्वर्विदः ।
स सुप्रकेतो अभ्यक्रमीदिषो　ऽच्छा वाजं नैतशः　२
त्वं ह्य१ङ्ग दैव्या　पवमान जनिमानि द्युमत्तमः । अमृतत्वाय घोषयः　३　१०२८

येना नवग्वो दुध्यङ्ङपोर्णुते येन विप्रास आपिरे ।
देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्यानशुः ४
एष स्य धारया सुतो ऽव्यो वारेभिः पवते मदिन्तमः । क्रीळन्नूर्मिरपामिव ५ १०३०
य उस्रिया अप्या अन्तरश्मनो निर्गा अकृन्तदोजसा ।
अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ६
आ सोता परि षिञ्चता ऽश्वं न स्तोममप्तुरं रजस्तुरम् । वनक्रक्षमुदप्रुतम् ७
सहस्रधारं वृषभं पयोवृधं प्रियं देवाय जन्मने ।
ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ८
अभि द्युम्नं बृहद् यश इषस्पते दिदीहि देव देवयुः । वि कोशं मध्यमं युव ९
आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः ।
वृष्टिं दिवः पवस्व रीतिमपां जिन्वा गविष्टये धियः १० १०३५
एतमु त्यं मदच्युतं सहस्रधारं वृषभं दिवो दुहुः । विश्वा वसूनि बिभ्रतम् ११
वृषा वि जज्ञे जनयन्नमर्त्यः प्रतपञ्ज्योतिषा तमः ।
स सुष्टुतः कविभिर्निर्णिजं दधे त्रिधात्वस्य दंससा १२
स सुन्वे यो वसूनां यो रायामानेता य इळानाम् । सोमो यः सुक्षितीनाम् १३
यस्य न इन्द्रः पिबाद् यस्य मरुतो यस्य वार्यमणा भगः ।
आ येन मित्रावरुणा करामह एन्द्रमवसे महे १४
इन्द्राय सोम पातवे नृभिर्यतः स्वायुधो मदिन्तमः । पवस्व मधुमत्तमः १५ १०४०
इन्द्रस्य हार्दि सोमधानमा विश समुद्रमिव सिन्धवः ।
जुष्टो मित्राय वरुणाय वायवे दिवो विष्टम्भ उत्तमः १६ १०४१

॥ १०८ ॥ (ऋ. ९ । १०९ । १—२२) (१०४२-१०६३) अग्नयो धिष्ण्या ऐश्वरयः । द्विपदा विराट् ।

परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय १
इन्द्रस्ते सोम सुतस्य पेयाः क्रत्वे दक्षाय विश्वे च देवाः ॥१॥ २
एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ३
पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥२॥ ४ १०४५
शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजायै ५
दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन् वाजी पवस्व ॥३॥ ६
पवस्व सोम द्युम्नी सुधारो महामवीनामनु पूर्व्यः ७ १०४८

नृभिर्येमानो जज्ञानः पूतः क्षरद् विश्वानि मन्द्रः स्वर्वित् ॥४॥ ८
इन्दुः पुनानः प्रजामुराणः करद् विश्वानि द्रविणानि नः ९ १०५०
पवस्व सोम क्रत्वे दक्षायाऽश्वो न निक्तो वाजी धनाय ॥५॥१०
तं ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ११
शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ॥६॥१२
इन्दुः पविष्ट चारुर्मदायाऽपामुपस्थे कविर्भगाय १३
बिभर्ति चार्विन्द्रस्य नाम येन विश्वानि वृत्रा जघान ॥७॥१४ १०५५
पिबन्त्यस्य विश्वे देवासो गोभिः श्रीतस्य नृभिः सुतस्य १५
प्र सुवानो अक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यम् ॥८॥१६
स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः १७
प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः ॥९॥१८
असर्जि वाजी तिरः पवित्रमिन्द्राय सोमः सहस्रधारः १९ १०६०
अञ्जन्त्येनं मध्वो रसेनेन्द्राय वृष्ण इन्दुं मदाय ॥१०॥२०
देवेभ्यस्त्वा वृथा पाजसेऽपो वसानं हरिं मृजन्ति २१
इन्दुरिन्द्राय तोशते नि तोशते श्रीणन्नुग्रो रिणन्नपः ॥११॥२२ १०६३

॥ १०९ ॥ (ऋ. ९ । ११० । १—१२)

(१०६४ – १०७५) त्र्यरुणस्त्रैवृष्णः, त्रसदस्युः पौरुकुत्स्यः। १—३ पिपीलिकमध्या अनुष्टुप्, ४-९ ऊर्ध्वबृहती, १०-१२ विराट्।

पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
द्विषस्तरध्या ऋणया न ईयसे १
अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।
वाजाँ अभि पवमान प्र गाहसे २ १०६५
अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः ।
गोजीरया रंहमाणः पुरंध्या ३
अजीजनो अमृत मर्त्येष्वाँ ऋतस्य धर्मन्नमृतस्य चारुणः ।
सदासरो वाजमच्छा सनिष्यदत् ४
अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम् ।
शर्याभिर्न भरमाणो गभस्त्योः ५ १०६८

आर्द्रां के चित् पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत ।
वारं न देवः सविता व्यूर्णुते ६

त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः ।
स त्वं नो वीर वीर्याय चोदय ७ १०७०

दिवः पीयूषं पूर्व्यं यदुक्थ्यं महो गाहाद् दिव आ निरधुक्षत ।
इन्द्रमभि जायमानं समस्वरन् ८

अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना ।
यूथे न निःष्ठा वृषभो वि तिष्ठसे ९

सोमः पुनानो अव्यये वारे शिशुर्न क्रीळन् पवमानो अक्षाः ।
सहस्रधारः शतवाज इन्दुः १०

एष पुनानो मधुमाँ ऋतावे–न्द्रायेन्दुः पवते स्वादुरूर्मिः ।
वाजसनिर्वरिवोविद् वयोधाः ११

स पवस्व सहमानः पृतन्यून् त्सेधन् रक्षांस्यप दुर्गहाणि ।
स्वायुधः सासह्वान्त्सोम शत्रून् १२ १०७५

॥ ११० ॥ (ऋ. ९ । १११ । १–३) (१०७६–१०७८) अनानतः पारुच्छेपिः । अत्यष्टिः ।

अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः सूरो न स्वयुग्वभिः ।
धारा सुतस्य रोचते पुनानो अरुषो हरिः ।
विश्वा यद् रूपा परियात्यृक्वभिः सप्तास्येभिर्ऋक्वभिः १

त्वं त्यत् पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे ।
परावतो न साम तद् यत्रा रणन्ति धीतयः ।
त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे २

पूर्वामनु प्रदिशं याति चेकितत् सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः ।
अग्मन्नुक्थानि पौंस्ये–न्द्रं जैत्राय हर्षयन् ।
वज्रश्च यद् भवथो अनपच्युता समत्स्वनपच्युता ३ १०७८

॥ १११ ॥ (ऋ. ९ । ११२ । १-४) (१०७९—१०८२) शिशुराङ्गिरसः । पङ्क्तिः ।

नानानं वा उ नो धियो वि व्रतानि जनानाम् ।
तक्षा रिष्टं रुतं भिषग् ब्रह्मा सुन्वन्तमिच्छती–न्द्रायेन्दो परि स्रव १ १०७९

जरतीभिरोषधीभिः पर्णेभिः शकुनानाम् ।
कार्मारो अश्मभिर्द्युभि--र्हिरण्यवन्तमिच्छती--न्द्रायेन्दो परि स्रव　२　१०८०
कारुरहं ततो भिष--गुपलप्रक्षिणी नना ।
नानाधियो वसूयवो ऽनु गा इव तस्थिमे--न्द्रायेन्दो परि स्रव　३
अश्वो वोळ्हा सुखं रथं हसनामुपमन्त्रिणः ।
शेपो रोमण्वन्तौ भेदौ वारिन्मण्डूक इच्छती--न्द्रायेन्दो परि स्रव　४　१०८२
॥ ११२ ॥ (ऋ. ९ । ११३ । १—११) (१०८३-१०९३) कश्यपो मारीचः ।
शर्यणावति सोम--मिन्द्रः पिबतु वृत्रहा ।
बलं दधान आत्मनि करिष्यन् वीर्यं मह--दिन्द्रायेन्दो परि स्रव　१
आ पवस्व दिशां पत आर्जीकात् सोम मीढ्वः ।
ऋतवाकेन सत्येन श्रद्धया तपसा सुत इन्द्रायेन्दो परि स्रव　२
पर्जन्यवृद्धं महिषं तं सूर्यस्य दुहिताभरत् ।
तं गन्धर्वाः प्रत्यगृभ्णन् तं सोमे रसमादधु--रिन्द्रायेन्दो परि स्रव　३　१०८५
ऋतं वदन्नृतद्युम्न सत्यं वदन्त्सत्यकर्मन् ।
श्रद्धां वदन्त्सोम राजन् धात्रा सोम परिष्कृत इन्द्रायेन्दो परि स्रव　४
सत्यमुग्रस्य बृहतः सं स्रवन्ति संस्रवाः ।
सं यन्ति रसिनो रसाः पुनानो ब्रह्मणा हर इन्द्रायेन्दो परि स्रव　५
यत्र ब्रह्मा पवमान छन्दस्यां३ वाचं वदन् ।
ग्राव्णा सोमे महीयते सोमेनानन्दं जनय--न्निन्द्रायेन्दो परि स्रव　६
यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम् ।
तस्मिन् मां धेहि पवमाना--ऽमृते लोके अक्षित इन्द्रायेन्दो परि स्रव　७
यत्र राजा वैवस्वतो यत्रावरोधनं दिवः ।
यत्रामूर्यह्वतीराप--स्तत्र माममृतं कृधी--न्द्रायेन्दो परि स्रव　८　१०९०
यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ।
लोका यत्र ज्योतिष्मन्त--स्तत्र माममृतं कृधी--न्द्रायेन्दो परि स्रव　९
यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपम् ।
स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधी--न्द्रायेन्दो परि स्रव　१०
यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।
कामस्य यत्राप्ताः कामा--स्तत्र माममृतं कृधी--न्द्रायेन्दो परि स्रव　११　१०९३

॥ ११३ ॥ (ऋ. ९ । ११४ । १-४)

य इन्दोः पवमानस्या॒ऽनु धामान्यक्रमीत् ।
तमाहुः सुप्रजा इति यस्ते सोमाविधन्मन इन्द्रायेन्दो परि स्रव १
ऋषे मन्त्रकृतां स्तोमैः कश्यपोद्वर्धयन् गिरः ।
सोमं नमस्य राजानं यो जज्ञे वीरुधां पति॒रिन्द्रायेन्दो परि स्रव २ १०९५
सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः ।
देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष न इन्द्रायेन्दो परि स्रव ३
यत् ते राजञ्छृतं हवि॒स्तेन सोमाभि रक्ष नः ।
अरातीवा मा नस्तारी॒न्मो च नः किं चनाममा॒दिन्द्रायेन्दो परि स्रव ४ १०९७

॥ ११४ ॥ (ऋ. १ । ४३ । ७--९)

(१०९८—११००) कण्वो घौरः । गायत्री, ९ अनुष्टुप् ।

अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम् । महि श्रवस्तुविनृम्णम् ७
मा नः सोमपरिबाधो मारातयो जुहुरन्त । आ न इन्दो वाजे भज ८
यास्ते प्रजा अमृतस्य परस्मिन् धामन्नृतस्य ।
मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः ९ ११००

॥ ११५ ॥ (ऋ. १ । ९१ । १--२३)

(११०१---११२३) गोतमो राहूगणः । त्रिष्टुप्; ५—१६ गायत्री; १७ उष्णिक् ।

त्वं सोम प्र चिकितो मनीषा त्वं रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः १
त्वं सोम क्रतुभिः सुक्रतुर्भू॒स्त्वं दक्षैः सुदक्षो विश्ववेदाः ।
त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः २
राज्ञो नु ते वरुणस्य व्रतानि बृहद् गभीरं तव सोम धाम ।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ३
या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
तेभिर्नो विश्वैः सुमना अहेळन् राजन्त्सोम प्रति हव्या गृभाय ४
त्वं सोमासि सत्पति॒स्त्वं राजोत वृत्रहा । त्वं भद्रो असि क्रतुः ५ ११०५
त्वं च सोम नो वशो जीवातुं न मरामहे । प्रियस्तोत्रो वनस्पतिः ६ ११०६

त्वं सोम महे भगं त्वं यून ऋतायते । दक्षं दधासि जीवसे ७
त्वं नः सोम विश्वतो रक्षा राजन्नघायतः । न रिष्येत् त्वावतः सखा ८
सोम यास्ते मयोभुव ऊतयः सन्ति दाशुषे । ताभिर्नोऽविता भव ९
इमं यज्ञमिदं वचो जुजुषाण उपागहि । सोम त्वं नो वृधे भव १० ११२०
सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः । सुमृळीको न आ विश ११
गयस्फानो अमीवहा वसुवित् पुष्टिवर्धनः । सुमित्रः सोम नो भव १२
सोम रारन्धि नो हृदि गावो न यवसेष्वा । मर्य इव स्व ओक्ये १३
यः सोम सख्ये तव रारणद् देव मर्त्यः । तं दक्षः सचते कविः १४
उरुष्या णो अभिशस्तेः सोम नि पाह्यंहसः । सखा सुशेव एधि नः १५ ११२५
आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे १६
आ प्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः । भवा नः सुश्रवस्तमः सखा वृधे १७
सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व १८
या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् ।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान् १९
सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै २० ११२०
अषाळ्हं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम २१
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमा ततन्थोर्व१न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ २२
देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ २३ ११२३

॥ ११६ ॥ (ऋ. ३ । ६२ । १३—१५)

(११२४—११२६) गाथिनो विश्वामित्रः । गायत्री ।

सोमो जिगाति गातुविद् देवानामेति निष्कृतम् । ऋतस्य योनिमासदम् १३
सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे । अनमीवा इषस्करत् १४ ११२५
अस्माकमायुर्वर्धयन्नभिमातीः सहमानः । सोमः सधस्थमासदत् १५ ११२६

॥ ११७ ॥ (ऋ. ६ । ४७ । १—५)

(११२७--११३१) गर्गो भारद्वाजः । त्रिष्टुप् ।

स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम् ।
उतो न्व१स्य पपिवांसमिन्द्रं न कश्चन सहत आहवेषु १
अयं स्वादुरिह मदिष्ठ आस यस्येन्द्रो वृत्रहत्ये ममाद ।
पुरूणि यश्च्यौत्ना शम्बरस्य वि नवतिं नव च देह्यो३ हन् २
अयं मे पीत उदियर्ति वाच—मयं मनीषामुशतीमजीगः ।
अयं षळुर्वीरमिमीत धीरो न याभ्यो भुवनं कच्चनारे ३
अयं स यो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः ।
अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्व१न्तरिक्षम् ४ ११३०
अयं विदच्चित्रदृशीकमर्णः शुक्रसद्मनामुषसामनीके ।
अयं महान् महता स्कम्भने—नोद् द्यामस्तभ्नाद् वृषभो मरुत्वान् ५ ११३१

॥ ११८ ॥ (ऋ. ७ । १०४ । ९, १२-१३)

(११३२—११३४) मैत्रावरुणिर्वसिष्ठः ।

ये पाकशंसं विहरन्त एवै—र्ये वा भद्रं दूषयन्ति स्वधाभिः ।
अहये वा तान् प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे ९
सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते ।
तयोर्यत् सत्यं यतरदृजीय—स्तदित् सोमोऽवति हन्त्यासत् १२
न वा उ सोमो वृजिनं हिनोति न क्षत्रियं मिथुया धारयन्तम् ।
हन्ति रक्षो हन्त्यासद् वदन्त—मुभाविन्द्रस्य प्रसितौ शयाते १३ ११३४

॥ ११९ ॥ (ऋ. ८ । ४८ । १—१५)

(११३५—११४९) प्रगाथो घौरः काण्वः । त्रिष्टुप्, ५ जगती ।

स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य ।
विश्वे यं देवा उत मर्त्यासो मधु ब्रुवन्तो अभि संचरन्ति १ ११३५
अन्तश्च प्रागा अदितिर्भवास्य—वयाता हरसो दैव्यस्य ।
इन्दविन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः २
अपाम सोमममृता अभूमा—गन्म ज्योतिरविदाम देवान् ।
किं नूनमस्मान् कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ३ ११३७

शं नो॑ भव हृ॒द आ पी॒त इ॑न्दो पि॒तेव॑ सोम सू॒नवे॑ सु॒शेवः॑ ।
सखे॑व॒ सख्य॑ उरुशंस॒ धीरः॒ प्र ण॒ आयु॑र्जी॒वसे॑ सोम तारीः ४
इ॒मे मा॑ पी॒ता य॒शस॑ उरु॒ष्यवो॒ रथं॒ न गावः॒ सम॑नाह॒ पर्व॑सु ।
ते मा॑ रक्षन्तु वि॒स्रस॑श्च॒रित्रा॑दु॒त मा॒ स्रामा॑द् यवय॒न्त्विन्द॑वः ५
अ॒ग्निं न मा॑ मथि॒तं सं दि॑दीपः॒ प्र च॑क्षय कृणु॒हि वस्य॑सो नः ।
अथा॒ हि ते॒ मद॒ आ सो॑म॒ मन्ये॑ रे॒वाँ इ॑व॒ प्र च॑रा पु॒ष्टिमच्छ॑ ६ ११४०
इ॒षि॒रेण॑ ते॒ मन॑सा सु॒तस्य॑ भक्षी॒महि॒ पित्र्य॑स्येव रा॒यः ।
सोम॑ राजन्॒ प्र ण॒ आयूं॑षि तारी॒रहा॑नीव॒ सूर्यो॑ वास॒राणि॑ ७
सोम॑ राजन् मृ॒ळया॑ नः स्व॒स्ति तव॑ स्मसि व्र॒त्या॒३॒॑स्तस्य॑ विद्धि ।
अल॑र्ति॒ दक्ष॑ उ॒त म॒न्युरि॑न्दो॒ मा नो॑ अ॒र्यो अ॑नुका॒मं परा॑ दाः ८ ११४१
त्वं हि न॑स्त॒न्वः॑ सोम गो॒पा गात्रे॑गात्रे निष॒सत्था॑ नृ॒चक्षाः॑ ।
यत् ते॑ व॒यं प्र॑मि॒नाम॑ व्र॒तानि॒ स नो॑ मृळ सुष॒खा दे॑व॒ वस्यः॑ ९
ऋ॒दू॒दरे॑ण॒ सख्या॑ सचेय॒ यो मा॒ न रिष्ये॑द्धर्यश्व पी॒तः ।
अ॒यं यः सोमो॒ न्यधा॑य्य॒स्मे तस्मा॒ इन्द्रं॑ प्र॒तिर॑मे॒म्यायुः॑ १०
अप॒ त्या अ॑स्थु॒रनि॑रा॒ अमी॑वा॒ निर॑त्रसन् तमि॒षीची॒रभै॑षुः ।
आ सोमो॑ अ॒स्माँ अ॑रुहद् विहा॑या॒ अग॑न्म॒ यत्र॑ प्रति॒रन्त॒ आयुः॑ ११ ११४५
यो न॒ इन्दुः॑ पितरो हृ॒त्सु पी॒तोऽम॑र्त्यो॒ मर्त्याँ॑ आवि॒वेश॑ ।
तस्मै॒ सोमा॑य ह॒विषा॑ विधेम मृ॒ळीके॑ अस्य सुम॒तौ स्या॑म १२
त्वं सो॑म पि॒तृभिः॑ संविदा॒नोऽनु॒ द्यावा॑पृथि॒वी आ त॑तन्थ ।
तस्मै॑ त इन्दो ह॒विषा॑ विधेम व॒यं स्या॑म॒ पत॑यो र॒यीणा॑म् १३
त्राता॑रो देवा॒ अधि॑ वोचता नो॒ मा नो॑ नि॒द्रा ई॑शत॒ मोत जल्पिः॑ ।
व॒यं सोम॑स्य वि॒श्वह॑ प्रि॒यासः॑ सु॒वीरा॑सो वि॒दथ॒मा व॑देम १४
त्वं नः॑ सोम वि॒श्वतो॑ वयो॒धास्त्वं॑ स्व॒र्विदा वि॑शा नृ॒चक्षाः॑ ।
त्वं न॑ इन्द ऊ॒तिभिः॑ स॒जोषाः॑ पा॒हि प॒श्चाता॑दु॒त वा॑ पु॒रस्ता॑त् १५ ११४९

॥ १२० ॥ (ऋ. ८ । ७९ । १—९)

(११५०—११५८) कृत्नुर्भार्गवः । गायत्री, ९ अनुष्टुप् ।

अ॒यं कृ॒त्नुरगृ॑भीतो विश्व॒जिदु॒द्भिदित् सोमः॑ । ऋषि॒र्विप्रः॒ काव्ये॑न १ ११५०
अ॒भ्यू॑र्णोति॒ यन्न॒ग्नं भि॒षक्ति॒ विश्वं॒ यत् तु॒रम् । प्रेम॒न्धः ख्य॒न्निः श्रो॒णो भू॑त् २ ११५१

त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः। उरु यन्तासि वरूथम् ३
त्वं चित्ती तव दक्षै--र्दिव आ पृथिव्या ऋजीषिन् । यावीरघस्य चिद् द्वेषः ४
अर्थिनो यन्ति चेदर्थं गच्छानिद् ददुषो रातिम् । ववृज्युस्तृष्यतः कामम् ५
विदद् यत् पूर्व्यं नष्ट--मुदीमृतायुमीरयत् । प्रेमायुस्तारीदतीर्णम् ६ ११५५
सुशेवो नो मृळयाकु--रदृप्तक्रतुरवातः । भवा नः सोम शं हृदे ७
मा नः सोम सं वीविजो मा वि बीभिषथा राजन् । मा नो हार्दि त्विषा वधीः ८
अव यत् स्वे सधस्थे देवानां दुर्मतीरीक्षे ।
राजन्नप द्विषः सेध मीढ्वो अप स्रिधः सेध ९ ११५८

॥ १२१ ॥ (ऋ. ८ । १०१ । १४)
(११५९) जमदग्निर्भार्गवः । त्रिष्टुप् ।

प्रजा ह तिस्रो अत्यायमीयु--र्न्यन्या अर्कमभितो विविश्रे ।
बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आ विवेश १ ११५९

॥ १२२ ॥ (ऋ. १० । २५ । १-११)
(११६०-११७०) ऐन्द्रो विमदः, प्राजापत्यो वा, वासुक्रो वसुकृद्वा । आस्तारपङ्क्तिः।

भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् ।
अधा ते सख्ये अन्धसो वि वो मदे रणन् गावो न यवसे विवक्षसे १ ११६०
हृदिस्पृशस्त आसते विश्वेषु सोम धामसु ।
अधा कामा इमे मम वि वो मदे वि तिष्ठन्ते वसूयवो विवक्षसे २
उत व्रतानि सोम ते प्राहं मिनामि पाक्या ।
अधा पितेव सूनवे वि वो मदे मृळा नो अभि चिद् वधाद् विवक्षसे ३
समु प्र यन्ति धीतयः सर्गासोऽवताँ इव ।
क्रतुं नः सोम जीवसे वि वो मदे धारया चमसाँ इव विवक्षसे ४
तव त्ये सोम शक्तिभि--र्निकामासो व्यृण्विरे ।
गृत्सस्य धीरास्तवसो वि वो मदे व्रजं गोमन्तमश्विनं विवक्षसे ५
पशुं नः सोम रक्षसि पुरुत्रा विष्ठितं जगत् ।
समाकृणोषि जीवसे वि वो मदे विश्वा संपश्यन् भुवना विवक्षसे ६ ११६५
त्वं नः सोम विश्वतो गोपा अदाभ्यो भव ।
सेध राजन्नप स्रिधो वि वो मदे मा नो दुःशंस ईशता विवक्षसे ७ ११६६

त्वं नः सोम सुक्रतु--र्वयोधेयाय जागृहि ।
क्षेत्रवित्तरो मनुषो वि वो मदे द्रुहो नः पाह्यंहसो विवक्षसे ८
त्वं नो वृत्रहन्तमे--न्द्रस्येन्दो शिवः सखा ।
यत् सीं हवन्ते समिथे वि वो मदे युध्यमानास्तोकसातौ विवक्षसे ९
अयं घ स तुरो मद इन्द्रस्य वर्धत प्रियः ।
अयं कक्षीवतो महो वि वो मदे मतिं विप्रस्य वर्धयद् विवक्षसे १०
अयं विप्राय दाशुषे वाजाँ इयर्ति गोमतः ।
अयं सप्तभ्य आ वरं वि वो मदे प्रान्धं श्रोणं च तारिषद् विवक्षसे ११ ११७०

॥ १२३ ॥ (ऋ. १० । ८५ । १-५)

(११७१--११७५) सूर्या सावित्री ऋषिका । अनुष्टुप् ।

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः ।
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः १
सोमेनादित्या बलिनः सोमेन पृथिवी मही ।
अथो नक्षत्राणामेषा--मुपस्थे सोम आहितः २
सोमं मन्यते पपिवान् यत् संपिषन्त्योषधिम् ।
सोमं यं ब्रह्माणो विदु--र्न तस्याश्नाति कश्चन ३
आच्छद् विधानैर्गुपितो बार्हतैः सोम रक्षितः ।
ग्राव्णामिच्छृण्वन् तिष्ठसि न ते अश्नाति पार्थिवः ४
यत् त्वा देव प्रपिबन्ति तत आ प्यायसे पुनः ।
वायुः सोमस्य रक्षिता समानां मास आकृतिः ५ ११७५

॥ १२४ ॥ (अथर्व० ३ । ५ । १-८)

(११७६--११८३) अथर्वा । अनुष्टुप्, १ पुरोऽनुष्टुप्त्रिष्टुप्; ४ त्रिष्टुप्, ८ विराडुरोबृहती ।

आयमगन् पर्णमणिर्बली बलेन प्रमृणन्त्सपत्नान् ।
ओजो देवानां पय ओषधीनां वर्चसा मा जिन्वत्वप्रयावन् १
मयि क्षत्रं पर्णमणे मयि धारयताद् रयिम् ।
अहं राष्ट्रस्याभीवर्गे निजो भूयासमुत्तमः २
यं निदधुर्वनस्पतौ गुह्यं देवाः प्रियं मणिम् ।
तमस्मभ्यं सहायुषा देवा ददतु भर्तवे ३ ११७८

सोमस्य पर्णः सह उग्रमाग—न्निन्द्रेण दत्तो वरुणेन शिष्टः ।
तं प्रियासं बहु रोचमानो दीर्घायुत्वाय शतशारदाय ४
आ मारुक्षत् पर्णमणि—र्मह्या अरिष्टतातये ।
यथाहमुत्तरोऽसा—न्यर्यम्ण उत संविदः ५ ११८०
ये धीवानो रथकाराः कर्मारा ये मनीषिणः ।
उपस्तीन् पर्ण मह्यं त्वं सर्वान् कृण्वभितो जनान् ६
ये राजानो राजकृतः सूता ग्रामण्यश्च ये ।
उपस्तीन् पर्ण मह्यं त्वं सर्वान् कृण्वभितो जनान् ७
पर्णोऽसि तनूपानः सयोनिर्वीरो वीरेण मया ।
संवत्सरस्य तेजसा तेन बध्नामि त्वा मणे ८ ११८३

॥ १२५ ॥ (अथर्व० ५ । २४ । ७) अतिशक्करी ।

सोमो वीरुधामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ७ ११८४

॥ १२६ ॥ (अथर्व० ६ । ६ । २—३) अनुष्टुप् ।

यो नः सोम सुशंसिनो दुःशंस आदिदेशति ।
वज्रेणास्य मुखे जहि स संपिष्टो अपायति २ ११८५
यो नः सोमाभिदासति सनाभिर्यश्च निष्ट्यः ।
अप तस्य बलं तिर महीव द्यौर्वधत्मना ४ ११८६

॥ १२७ ॥ (अथर्व० ५ । ३ । ७) (११८७) बृहद्दिवोऽथर्वा । त्रिष्टुप् ।

तिस्रो देवीर्महि नः शर्म यच्छत प्रजायै नस्तन्वे३ यच्च पुष्टम् ।
मा हास्महि प्रजया मा तनूभि—र्मा रधाम द्विषते सोम राजन् ७ ११८७

॥ १२८ ॥ (अथर्व० ४ । ४० । ४) (११८८) शुक्रः । त्रिष्टुप् ।

ये उत्तरतो जुह्वति जातवेद उदीच्या दिशोऽभिदासन्त्यस्मान् ।
सोममृत्वा ते पराञ्चो व्यथन्तां प्रत्यगेनान् प्रतिसरेण हन्मि ४ ११८८

॥ १२९ ॥ (अथर्व० ५ । २६ । १०) (११८९ ब्रह्मा । द्विपदा प्राजापत्या बृहती ।

सोमो युनक्तु बहुधा पयां—स्यस्मिन् यज्ञे सुयुजः स्वाहा १० ११८९

॥ १३० ॥ (अथर्व० ६ । ८९ । १) (११९०) अथर्वा । अनुष्टुप् ।

इदं यत् प्रेण्यः शिरो दत्तं सोमेन वृष्ण्यम् ।
ततः परि प्रजातेन हार्दिं ते शोचयामसि १ ११९०

॥ १३१ ॥ (११९१-११९३) (वा० यजु० ४ । २६ उत्तरार्धं , २४ २७)

रास्वेयत् सोमा भूयो भर देवो नः सविता वसोर्दाता वस्वदात् २६

एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय
ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोनामानां साम्राज्यं गच्छेति
मे सोमाय ब्रूतादास्माकोऽसि शुक्रस्ते ग्रह्यो विचितस्त्वा वि चिन्वन्तु २४

मित्रो न एहि सुमित्रध इन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तं स्योनः स्योनम् ।
स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्
रक्षध्वं मा वो दभन् २७ ११९३

॥ १३२ ॥ (११९४) (वा० यजु० ५ । ७)

अंशुरंशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे ।
आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व ।
आप्याययास्मान्त्सखीन्त्सन्न्या मेधया स्वस्ति ते देव सोम सुत्यामशीय ।
एष्टा रायः प्रेषे भगाय ऋतमृतवादिभ्यो नमो द्यावापृथिवीभ्याम् ७ ११९४

॥ १३३ ॥ (११९५—१२००) (वा० यजु० ६ । २५-२६, ३२-३३, ३५-३६)

हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा ।
ऊर्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छ २५ ११९५
सोम राजन् विश्वास्त्वं प्रजा उपावरोह विश्वास्त्वां प्रजा उपावरोहन्तु ।
शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः ।
श्रोता ग्रावाणो विदुषो न यज्ञं शृणोतु देवः सविता हवं मे स्वाहा २६
इन्द्राय त्वा वसुमते रुद्रवत इन्द्राय त्वादित्यवत इन्द्राय त्वाभिमातिघ्ने ।
श्येनाय त्वा सोमभृतेऽग्नये त्वा रायस्पोषदे ३२
यत् ते सोम दिवि ज्योतिर्यत् पृथिव्यां यदुरावन्तरिक्षे ।
तेनास्मै यजमानायोरु राये कृध्यधि दात्रे वोचः ३३
मा भेर्मा संविक्था ऊर्जं धत्स्व धिषणे वीड्वी सती वीडयेथामूर्जं दधाथाम् ।
पाप्मा हतो न सोमः ३५ ११९९

*

प्रागपागुदगधराक् सर्वतस्त्वा दिश आधावन्तु ।
अम्ब निष्पर समरीर्विदाम् ३६ ११००

॥ १३४ ॥ (११०१) (वा० यजु० ७ । १४)

अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम ।
सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः १४ ११०१

॥ १३५ ॥ (११०२—११०८) (वा० य० ८ । १, ९, २५-२६, ४८—५०)

उपयामगृहीतोऽस्यादित्येभ्यस्त्वा ।
विष्ण उरुगायैष ते सोमस्तꣳ रक्षस्व मा त्वा दभन् १

उपयामगृहीतोऽसि बृहस्पतिसुतस्य देव सोम त
इन्दोरिन्द्रियावतः पत्नीवतो ग्रहाँ२ ऋध्यासम् ।
अहं परस्तादहमवस्ताद् यदन्तरिक्षं तदु मे पिताभूत् ।
अहꣳ सूर्यमुभयतो ददर्शाऽहं देवानां परमं गुहा यत् ९

समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः ।
यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत् स्वाहा २५

देवीराप एष वो गर्भस्तꣳ सुप्रीतꣳ सुभृतं बिभृत ।
देव सोमैष ते लोकस्तस्मिञ्छं च वक्ष्व परि च वक्ष्व २६ ११०५

वेशीनां त्वा पत्मन्नाधूनोमि कुकूननानां त्वा पत्मन्नाधूनोमि भन्दनानां त्वा
पत्मन्नाधूनोमि मदिन्तमानां त्वा पत्मन्नाधूनोमि मधुन्तमानां त्वा पत्मन्नाधूनोमि
शुक्रं त्वा शुक्र आधूनोम्यह्नो रूपे सूर्यस्य रश्मिषु ४८

ककुभꣳ रूपं वृषभस्य रोचते बृहच्छुक्रः शुक्रस्य पुरोगाः सोमः सोमस्य पुरोगाः ।
यत् ते सोमादाभ्यं नाम जागृवि तस्मै त्वा गृह्णामि तस्मै ते सोम सोमाय स्वाहा ॥४९

उशिक् त्वं देव सोमाग्नेः प्रियं पाथोऽपीहि वशी त्वं देव सोमेन्द्रस्य प्रियं पाथोऽपी-
ह्यस्मत्सखा त्वं देव सोम विश्वेषां देवानां प्रियं पाथोऽपीहि ५० ११०८

॥ १३६ ॥ (११०९) (वा० य० १९ । ७२)

सोमो राजामृतꣳ सुत ऋजीषेणाजहान्मृत्युम् ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु७२ ११०९

॥ १३७ ॥ (१२१०) (वा० य० २० । १९)

समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः ।
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि
यं च वयं द्विष्मः १९ १२१०

॥ १३८ ॥ (१२११-१२१४) (साम० १३००-१३०३)

पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः ।
ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितम् ॥ ३ ॥ १३००
पावमानीर्दधन्तु न इमं लोकमथो अमुम् ।
कामान्त्समर्धयन्तु नो देवीर्देवैः समाहृताः ॥ ४ ॥ १३०१
येन देवाः पवित्रेणाऽऽत्मानं पुनते सदा ।
तेन सहस्रधारेण पावमानीः पुनन्तु नः ॥ ५ ॥ १३०२
पावमानीः स्वस्त्ययनीस्ताभिर्गच्छति नान्दनम् ।
पुण्याँश्च भक्षान् भक्षयत्यमृतत्वं च गच्छति ॥ ६ ॥ १३०३ १२१४

॥ १३९ ॥ (ऋ. १० । १२४ । ६) (१२१५) अग्नि-वरुण-सोमाः । त्रिष्टुप् ।

इदं स्वरिदमिदास वाममयं प्रकाश उर्वन्तरिक्षम् ।
हनाव वृत्रं निरेहि सोम हविष्ट्वा सन्तं हविषा यजाम ६ १२१५

सोमसहचारी देवगणः ।

(१) सूर्यरोदसीमित्रवरुणरुद्रेंद्राग्न्यर्यमभगसोमाः ।

॥ १४० ॥ (ऋ. १ । १३६ । ६) (१२१६) परुच्छेपो दैवोदासिः । अत्यष्टिः ।

नमो दिवे बृहते रोदसीभ्यां मित्राय वोचं वरुणाय मीळ्हुषे सुमृळीकाय मीळ्हुषे ।
इन्द्रमग्निमुप स्तुहि द्युक्षमर्यमणं भगम् ।
ज्योग् जीवन्तः प्रजया सचेमहि सोमस्योती सचेमहि ६ १२१६

(२) सोमापूषणौ, ६ (अन्त्योऽर्धर्चस्य) अदितिः।

॥ १४१ ॥ (ऋ. २।४०।१-६)

(१११७-११२२) गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः। त्रिष्टुप्।

सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः।
जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् १

इमौ देवौ जायमानौ जुषन्ते मौ तमांसि गूहतामजुष्टा।
आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु २

सोमापूषणा रजसो विमानं सप्तचक्रं रथमविश्वमिन्वम्।
विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पञ्चरश्मिम् ३

दिव्य१न्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यन्तरिक्षे।
तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं वि ष्यतां नाभिमस्मे ४ ११२०

विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण एति।
सोमापूषणाववतं धियं मे युवाभ्यां विश्वाः पृतना जयेम ५

धियं पूषा जिन्वतु विश्वमिन्वो रयिं सोमो रयिपतिर्दधातु।
अवतु देव्यदितिरनर्वा बृहद् वदेम विदथे सुवीराः ६ ११२२

(३) सोमारुद्रौ।

॥ १४२ ॥ (ऋ. ६।७४।१—४)

(११२३-२६) भरद्वाजो बार्हस्पत्यः। त्रिष्टुप्।

सोमारुद्रा धारयेथामसुर्य१ प्र वामिष्टयोऽरमश्नुवन्तु।
दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे १

सोमारुद्रा वि वृहतं विषूची ममीवा या नो गयमाविवेश।
आरे बाधेथां निर्ऋतिं पराचै रस्मे भद्रा सौश्रवसानि सन्तु २

सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम्।
अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ३ ११२५

तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः।
प्र नो मुञ्चतं वरुणस्य पाशाद् गोपायतं नः सुमनस्यमाना ४ ११२६

(४) ब्राह्मण-पितृ-सोम-द्यावापृथिवी-पूषाणः।

॥ १४३ ॥ (ऋ. ६ । ७५ । १०)

(१२२७) पायुर्भारद्वाजः । जगती।

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत १० १२२७

(५) वर्म-सोम-वरुणाः।

॥ १४४ ॥ (१२२८) (ऋ० ६ । ७५ । १८) पायुर्भारद्वाजः । त्रिष्टुप्।

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु १८ १२२८

(६) अग्नींद्रमित्रावरुणाश्विभगपूषब्रह्मणस्पतिसोमरुद्राः।

॥ १४५ ॥ (ऋ० ७ । ४१ । १)

(१२२९) मैत्रावरुणिर्वसिष्ठः । जगती।

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम १ १२२९

(७) अङ्गिरःपित्रथर्वभृगुसोमाः।

॥ १४६ ॥ (ऋ. १० । १४ । ६)

(१२३०) वैवस्वतो यमः । त्रिष्टुप्।

अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियाना-मपि भद्रे सौमनसे स्याम ६ १२३०

(८) आपः सोमो वा।

॥ १४७ ॥ (ऋ. १० । १७ । ११-१३)

(१२३१-१२३३) देवश्रवा यामायनः । त्रिष्टुप् १३ अनुष्टुप्, पुरस्ताद्बृहती वा।

द्रप्सश्चस्कन्द प्रथमाँ अनु द्यू-निमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ११ १२३१

यस्ते द्रप्सः स्कन्दति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थात् ।
अध्वर्योर्वा परि वा यः पवित्रात् तं ते जुहोमि मनसा वषट्कृतम् १२
यस्ते द्रप्सः स्कन्नो यस्ते अंशुरवश्च यः परः स्रुचा ।
अयं देवो बृहस्पतिः सं तं सिञ्चतु राधसे १३ १२३३

(९) अग्नीषोमौ ।

१४८ ॥ (ऋ० १० । १९ । १ उत्तरार्धः)
(१२३४) मथितो यामायनः, भृगुर्वारुणिर्वा, भार्गवश्च्यवनो वा । अनुष्टुप् ।
अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिम् । १ १२३४

॥ १४९ ॥ (अथर्व. २ । ३६ । ३)
(१२३५) पतिवेदनः । त्रिष्टुप् ।
इयमग्ने नारी पतिं विदेष्ट सोमो हि राजा सुभगां कृणोति ।
सुवाना पुत्रान् महिषी भवाति गत्वा पतिं सुभगा वि राजतु २ १२३५

(१०) निर्ऋतिसोमौ ।

॥ १५० ॥ (ऋ १० । ५९ । ४)
(१२३६) बन्धुः श्रुतबन्धुर्विप्रबन्धुर्गौपायनाः । त्रिष्टुप् ।
मो षु णः सोम मृत्यवे परा दाः पश्येम नु सूर्यमुच्चरन्तम् ।
द्युभिर्हितो जरिमा सू नो अस्तु परातरं सु निर्ऋतिर्जिहीताम् ३ १२३६

(११) पृथिवीद्यव्यन्तरिक्षसोमपूषपथ्यास्वस्तयः ।

॥ १५१ ॥ ऋ. १० । ५९ । ७)
(१२३७) बन्धुः श्रुतबन्धुर्विप्रबन्धुर्गौपायनाः । त्रिष्टुप् ।
पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम् ।
पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां या स्वस्तिः ७ १२३७

(१२) सोमार्कौ ।

॥ १५२ ॥ (ऋ १० । ८५ । १८)
(१२३८) सूर्या सावित्री ऋषिका । जगती ।
पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परि यातो अध्वरम् ।
विश्वान्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः १८ १२३८

(१३) सोम-वरुण-बृहस्पति-अनुमति-मघवत्-धातृ-विधातारः ।

॥ १५३ ॥ (ऋ. १० । १६७ । ३)

(१२३९) विश्वामित्र-जमदग्नी । जगती ।

सोमस्य राज्ञो वरुणस्य धर्मणि बृहस्पतेरनुमत्या उ शर्मणि ।
तवाहमद्य मघवन्नुपस्तुतौ धातर्विधातः कलशाँ अभक्षयम् ३ १२३९

(१४) बृहस्पतिः, अग्नीषोमौ च ।

॥ १५४ ॥ (अथर्व० १ । ८ । १-२)

(१२४०-१२४१) चातनः । अनुष्टुप् ।

इदं हविर्यातुधानान् नदी फेनमिवा वहत् ।
य इदं स्त्री पुमानक—रिह स स्तुवतां जनः १ १२४०

अयं स्तुवान आगम—दिमं स्म प्रति हर्यत ।
बृहस्पते वशे लब्ध्वा ऽग्नीषोमा वि विध्यतम् २ १२४१

(१५) अग्निः, आपः, ओषधयः, सोमः ।

॥ १५५ ॥ (अथर्व० २ । १० । २)

(१२४२) भृग्वङ्गिराः । सप्तपदाष्टिः ।

शं ते अग्निः सहाद्भिरस्तु शं सोमः सहौषधीभिः ।
एवाहं त्वां क्षेत्रिया—न्निर्ऋत्या जामिशंसाद् द्रुहो मुञ्चामि वरुणस्य पाशात् ।
अनागसं ब्रह्मणा त्वा कृणोमि शिवे ते द्यावापृथिवी उभे स्ताम् ॥२॥ १२४२

(१६) सोमः, अर्यमा, धाता ।

॥ १५६ ॥ (अथर्व० १।३६।२)

(१२४३) पतिवेदनः । अनुष्टुप् ।

सोमजुष्टं ब्रह्मजुष्ट—मर्यम्णा संभृतं भगम् ।
धातुर्देवस्य सत्येन कृणोमि पतिवेदनम् २ १२४३

(१७) वरुणः, सोमः, इन्द्रः ।

॥ १५७ ॥ (अथर्व० ३।३।३)

(१२४४-१२६०) अथर्वा । चतुष्पदा भुरिक्पङ्क्तिः ।

अ॒प्सस्त्वा राजा॒ वरु॑णो ह्वयतु॒ सोम॑स्त्वा ह्वयतु॒ पर्व॑तेभ्यः ।
इन्द्र॑स्त्वा ह्वयतु वि॒ड्भ्य आ॒भ्यः श्ये॒नो भू॒त्वा विश॒ आ प॑ते॒माः ३ १२४४

(१८) सोमः, सविता, आदित्यः, अग्निः ।

॥ १५८ ॥

(१२४५) (अथर्व० ३ । ८ । ३) त्रिष्टुप् ।

हु॒वे सोमं॑ सवि॒तारं॒ नमो॑भि॒र्विश्वा॑नादि॒त्याँ अ॒हमु॑त्तर॒त्वे ।
अ॒यम॒ग्निर्दी॑दायद् दी॒र्घमे॒व स॑जा॒तैरि॒द्धोऽप्र॑तिब्रु॒वद्भिः ३ १२४५

(१९) सोमः, स्वजः, अशनिः ।

॥ १५९ ॥

(१२४६) (अथर्व० ३।२७।४) पञ्चपदा ककुम्मतीगर्भाऽष्टिः ।

उदी॑ची॒ दिक् सोमोऽधि॑पतिः स्व॒जो र॑क्षि॒ताश॒निरिष॑वः ।
तेभ्यो॒ नमोऽधि॑पतिभ्यो॒ नमो॑ रक्षि॒तृभ्यो॒ नम॒ इषु॑भ्यो॒ नम॑ एभ्यो अस्तु ।
यो॒३॑स्मान् द्वेष्टि॒ यं व॒यं द्वि॒ष्मस्तं वो॒ जम्भे॑ दध्मः ४ १२४६

(२०) आपः, सोमः ।

॥ १६० ॥ (१२४७) (अथर्व० ४ । ४ । ५) अनुष्टुप् ।

अ॒पां रसः॑ प्रथम॒जो ऽथो॒ व॒न॒स्पती॑नाम् ।
उ॒त सोम॑स्य॒ भ्राता॒ऽस्यु॒ताशर्म॑सि॒ वृष्ण्य॑म् ५ १२४७

(२१) सोमः, वनस्पतिः ।

॥ १६१ ॥ (१२४८-१२४९) (अथर्व० ६ । २ । १-२) परोष्णिक् ।

इन्द्रा॑य॒ सोम॑मृत्विजः सु॒नोता॒ च॑ धावत ।
स्तो॒तुर्यो॒ वचः॑ शृ॒णव॒द्धवं॑ च मे १
आ यं वि॒शन्तीन्द॑वो॒ वयो॒ न वृ॒क्षमन्ध॑सः ।
विर॑प्शि॒न् वि मृधो॑ जहि र॒क्षस्विनीः॑ २ १२४९

(२२) द्यावापृथिवी, ग्रावा, सोमः, सरस्वती, अग्निः।

॥१६२॥ (१२५०) (अथर्व० ६।३।२) जगती।

पातां नो द्यावापृथिवी अभिष्टये पातु ग्रावा पातु सोमो नो अंहसः।
पातु नो देवी सुभगा सरस्वती पात्वग्निः शिवा ये अस्य पायवः २ १२५०

(२३) सोमः, अदितिः।

॥१६३॥ (१२५१-१२५२) (अथर्व० ६।७।१-२) १ निचृत्, २ गायत्री।

येन सोमादितिः पथा मित्रा वा यन्त्यद्रुहः।
तेना नोऽवसा गहि १
येन सोम साहन्त्यासुरान् रन्धयासि नः।
तेना नो अधि वोचत २ १२५२

(२४) द्यावापृथिवी, सोमः, सविता, अन्तरिक्षं, सप्तऋषयः।

॥१६४॥ (१२५३) (अथर्व० ६।४०।१) जगती।

अभयं द्यावापृथिवी इहास्तु नोऽभयं सोमः सविता नः कृणोतु।
अभयं नोऽस्तूर्वन्तरिक्षं सप्तऋषीणां च हविषाभयं नो अस्तु १ १२५३

(२५) अग्निः, इन्द्रः, सोमः।

॥ १६५ ॥ (१२५४) (अथर्व० ६।५८।३)। अनुष्टुप्।

यशा इन्द्रो यशा अग्निर्यशाः सोमो अजायत।
यशा विश्वस्य भूतस्याऽहमस्मि यशस्तमः ३ १२५४

(२६) सविता, सोमः, वरुणः।

॥ १६६ ॥ (१२५५) (अथर्व० ६।६८।३) अतिजगतीगर्भा त्रिष्टुप्।

येनावपत् सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्
तेन ब्रह्माणो वपतेदमस्य गोमानश्ववानयमस्तु प्रजावान् ३ १२५५

(२७) सांमनस्यम्, वरुणसोमोऽग्निबृहस्पतिवसवः।

॥१६७॥ (१२५६—१२५७) (अथर्व० ६।७३।१—२) १ भुरिक् २ त्रिष्टुप्।

एह यातु वरुणः सोमो अग्नि—र्बृहस्पतिर्वसुभिरेह यातु।
अस्य श्रियमुपसंयात सर्व उग्रस्य चेत्तुः संमनसः सजाताः १
यो वः शुष्मो हृदयेष्वन्तरा—ऽऽकूतिर्या वो मनसि प्रविष्टा।
तान्त्सीवयामि हविषा घृतेन मयि सजाता रमतिर्वो अस्तु २ १२५७

(२८) इन्द्रः, सोमः, सविता च।

॥१६८॥ (१२५८—१२६०) (अथर्व० ६।९९।१-३) अनुष्टुप्, ३ भुरिग्बृहती।

अभि त्वेन्द्र वरिमतः पुरा त्वांहूरणाद्धुवे।
ह्वयाम्युग्रं चेत्तारं पुरुणामानमेकजम् १
यो अद्य सेन्यो वधो जिघांसन्न उदीरते।
इन्द्रस्य तत्र बाहू समन्तं परि दद्मः २
परि दद्म इन्द्रस्य बाहू समन्तं त्रातुस्त्रायतां नः।
देव सवितः सोम राजन् त्सुमनसं मा कृणु स्वस्तये ३ १२६०

(२९) द्यौः, पृथिवी, शुक्रः, सोमः, अग्निः, वायुः, सविता।

॥१६९॥ (१२६१) (अथर्व० ६।५३।१) बृहच्छन्दकुब्गर्भः। जगती।

द्यौश्च म इदं पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणया पिपर्तु।
अनु स्वधा चिकितां सोमो अग्नि—र्वायुर्नः पातु सविता भगश्च १ १२६१

सोमदेवता-पुनरुक्त-मन्त्रभागाः।

ऋग्वेदस्य नवमं मण्डलम्।

[१] ९।१।१ (मधुच्छन्दा वैश्वामित्रः। पवमानः सोमः)

पवस्व सोम धारया।

इन्द्राय पातवे सुतः।

(२११)९।२९।४ (नृमेध आङ्गिरसः। पवमानः सोमः)

पवस्व...।

(२२६)९।३०।३ (बिन्दुराङ्गिरसः। पवमानः सोमः)

पवस्व...।

(५८०)९।६७।१३ (विश्वामित्रो गाथिनः। पवमानः सोमः)

पवस्व...।

(९३९)९।१००।५ (रेभसूनू काश्यपौ। पवमानः सोमः)

इन्द्राय...।

[३]९।१।३ =(अग्निः ११६३)८।१०३।७

पर्षि राधो मघोनाम्।

[४]९।१।४ (मधुच्छन्दा वैश्वामित्रः। पवमानः सोमः)

अभ्यर्ष...।

अभि वाजमुत श्रवः।

(४३)९।६।३(असितः काश्यपो देवलो वा। पवमानः सोमः)

अभि...अर्ष।

अभि...।

(३५०)९।५१।५ (उचथ्य आङ्गिरसः। पवमानः सोमः)

अभ्यर्ष...।

अभि...।

(४५९)९।६३।१२ (निध्रुविः काश्यपः। पवमानः सोमः)

अभ्यर्ष...। अभि...।

[१०]९।१।१० (मधुच्छन्दा वैश्वामित्रः। पवमानः सोमः)

अस्येदिन्द्रो मदेष्वा।

(९८८)९।१०६।३ (अग्निश्चाक्षुषः। पवमानः सोमः)

[११]९।२।१ (मेधातिथिः काण्वः। पवमानः सोमः)

पवस्व देववीरति।

(२६१)९।३६।२ (प्रभूवसुराङ्गिरसः। पवमानः सोमः)

[,,]९।२।१ = (इन्द्र. १०८५) १।१७६।१

(अगस्त्यो मैत्रावरुणिः। इन्द्रः)

इन्द्रमिन्दो वृषा विश।

[१३]९।२।३ (मेधातिथिः काण्वः। पवमानः सोमः)

धारा सुतस्य वेधसः।

(१३१)९।१६।७ (असितः काश्यपो देवलो वा।
पवमानः सोमः)

[१४]९।२।४ (मेधातिथिः काण्वः। पवमानः सोमः)

आपो अर्षन्ति सिन्धवः।

यद्गोभिर्वासयिष्यसे।

(५५०)९।६६।१३ (शतं वैखानसाः। पवमानः सोमः)

[१६]९।२।६ अचिक्रदद् वृषा हरिः।

(९५९)९।१०१।१६ कनिक्रदद् वृषा हरिः।

[,,]९।२।६ सं सूर्येण रोचते।

८।९।१८ (शशकर्णः काण्वः। अश्विनौ)

[१७]९।२।७ (मेधातिथिः काण्वः। पवमानः सोमः)

मर्मृज्यन्ते अपस्युवः।

याभिर्मदाय शुम्भसे।

(२७४)९।३८।३ (रहूगण आङ्गिरसः। पवमानः सोमः)

मर्मृ...।

...शुम्भते।

[१९]९।२।९ =(इन्द्रः २४३) ८।६।१

पर्जन्यो वृष्टिमाँ इव।

[२०]९।२।१० असयश्वसा वाजसा उत।

६।५३।१० (भरद्वाजो बार्हस्पत्यः। पूषा)

धियमश्वसां वाजसामुत।

[,,] ९।२।१० आत्मा यज्ञस्य पूर्व्यः।

(अग्निः ५२०) ३।११।३ केतुर्यज्ञस्य पूर्व्यः।

[२१] ९।३।१ (शुनःशेप आजीगर्तिः, स देवरातः कृत्रिमो
वैश्वामित्रः। पवमानः सोमः)

अभि द्रोणान्यासदम् ।

(२२७) ९।३०।४ (बिन्दुराङ्गिरसः । पवमानः सोमः)

[२६] ९।३।६ = (अग्निः ७५१) ४।१५।३

दधद्रत्नानि दाशुषे ।

[२७] ९।३।७ (शुनःशेप आजीगर्तिः, स देवरातः कृत्रिमो वैश्वामित्रः । पवमानः सोमः)

पवमानः कनिक्रदत् ।

(२११) ९।२३।८ (असितः काश्यपो देवलो वा । पवमानः सोमः)

[२८] ९।३।८ व्यासर**त्तिरो रजांस्यस्पृतः ।**

(इन्द्रः ६८७) ८।८२।९ पर्यासर**त्तिरो रजांस्यस्पृतम् ।**

[२९] ९।३।९ (शुनःशेप आजीगर्तिः, स देवरातः कृत्रिमो वैश्वामित्रः । पवमानः सोमः)

एष प्रत्नेन जन्मना **देवो देवेभ्यः सुतः ।**

(२९७) ९।४२।२ (मेध्यातिथिः काण्वः । पवमानः सोमः)

एष प्रत्नेन मन्मना **देवो देवेभ्यस्परि ।**

(९३३)९।९९।७ (रेभसूनू काश्यपौ । पवमानः सोमः)

देवो देवेभ्यः सुतः ।

(९७३)९।१०३।६ (त्रित आप्त्यः । पवमानः सोमः)

देवो देवेभ्यः सुतः ।

[३०]९।३।१० (शुनःशेप आजीगर्तिः, स देवरातः कृत्रिमो वैश्वामित्रः । पवमानः सोमः)

धारया पवते सुतः ।

(२९७)९।४२।२ (मेध्यातिथिः काण्वः । पवमानः सोमः)

[३१]९।४।१ (हिरण्यस्तूप आङ्गिरसः । पवमानः सोमः)

सना...पवमान महि श्रवः ।

(७६)९।१।९ (असितः काश्यपो देवलो वा । पवमानः सोमः)

पवमान... ।

सना...।

(९४१)९।१००।८ (रेभसूनू काश्यपौ । पवमानः सोमः)

पवमान... ।

[३१-४०]९।४।१-१० **अथा नो वस्यसस्कृधि ।**

[३२]९।४।२ **सना** ज्योतिः **सना स्वः ।**

(७६)९।१।९ **सना** मेधं **सना स्वः ।**

[,,]९।४।२ = (इन्द्रः ६५८) ८।७८।८

विश्वा च सोम सौभगा ।

[३३]९।४।३ सना **दक्षमुत क्रतुम् ।**

(११६०)१०।२५।१ मनो **दक्षमुत क्रतुम् ।**

[३४]९।४।४ = (९)९।१।९ **सोममिन्द्राय पातवे ।**

[३५-३६]९।४।५-६ **तव क्रत्वा तवोतिभिः ।**

[३७]९।४।७ (हिरण्यस्तूप आङ्गिरसः । पवमानः सोमः)

सोम द्विबर्हसं रयिम् ।

(२८९)९।४०।६ (बृहन्मतिराङ्गिरसः । पवमानः सोमः)

(९३६)९।१००।२ (रेभसूनू काश्यपौ । पवमानः सोमः)

[३९]९।४।९ (हिरण्यस्तूप आङ्गिरसः । पवमानः सोमः)

पवमान विधर्मणि ।

(४८६)९।६४।९ (काश्यपो मारीचः । पवमानः सोमः)

(९४१)९।१००।७ (रेभसूनू काश्यपौ । पवमानः सोमः)

(अग्निः१९८३ ९।५।३ रयिर्**वि राजति द्युमान् ।**

(४०५)९।६१।१८ दक्षो **वि राजति द्युमान् ।**

(अग्निः१९८४)९।५।४ = (अग्निः१९३४)१।१८८।४

(अग्निः१९८८)९।५।८ = (अग्निः१९७०)५।५।७

[४२-४३]९।६।२-३ **अभि त्यं** मद्यं (३पूर्व्यं) **मदम् ।**

[४३]९।६।३ = (४)९।१।४ **अभि वाजमुत श्रवः ।**

[,,]९।६।३ (असितः काश्यपो देवलो वा । पवमानः सोमः)

सुवानो अर्ष पवित्र आ ।

(३५१)९।५२।१ (उचथ्य आङ्गिरसः । पवमानः सोमः)

[४४]९।६।४ (असितः काश्यपो देवलो वा । पवमानः सोमः)

आपो न प्रवतासरन् ।

पुनाना इन्द्रमाशत ।

(१८८)९।२४।२ (असितः काश्यपो देवलो वा । पवमानः सोमः)

आपो न प्रवता यतीः ।

पुनाना... ।

[४५]९।६।५ (असितः काश्यपो देवलो वा । पवमानः सोमः)

वने क्रीळन्तमत्यविम् ।

(३१८)९।४५।५ (अयास्य आङ्गिरसः । पवमानः सोमः)

अस्वरन् वने ।

(९९६)९।१०६।११ (अग्निश्चाक्षुषः । पवमानः सोमः)

वने... ।

अस्वरन्... ।

[४७]९।६।७ (असितः काश्यपो देवलो वा । पवमानः सोमः)

इन्द्राय पवते सुतः ।

(४३१)९।६१।१४ (जमदग्निर्भार्गवः । पवमानः सोमः)
...मदः ।
(९८७)९।१०६।१ (अग्निश्चाक्षुषः । पवमानः सोमः)
(१०१६)९।१०७।१७ (सप्तर्षयः । पवमानः सोमः)
...मदः ।
[५१]९।७।१ (असितः काश्यपो देवलो वा । पवमानः सोमः)
महीरपो वि गाहते ।
(९३३)९।९९।७ (रेभसूनू काश्यपौ । पवमानः सोमः)
[५२]९।७।३ (असितः काश्यपो देवलो वा । पवमानः सोमः)
वृषाव चक्रदद् वने ।
(१०२१)९।१०७।२२ (सप्तर्षयः । पवमानः सोमः)
...चक्रदो वने ।
[५३]९।७।४ (असितः काश्यपो देवलो वा । पवमानः सोमः)
नृम्णा वसानो अर्षति ।
स्वर्वाजी सिषासति ।
(४४०)९।६२।२३ (जमदग्निर्भार्गवः । पवमानः सोमः)
नृम्णा पुनानो अर्षसि ।
(६५७)९।७४।१ (कक्षीवान्दैर्घतमसः । पवमानः सोमः)
स्वर्यद्वाज्यरुषः सिषासति ।
[५५]९।७।६ (असितः काश्यपो देवलो वा । पवमानः सोमः)
अव्यो वारे परि प्रियो ।
(३४३)९।५०।३ (उचथ्य आङ्गिरसः । पवमानः सोमः)
...प्रियम् ।
(३५१)९।५२।२ (उचथ्य आङ्गिरसः । पवमानः सोमः)
(१००५)९।१०७।६ (सप्तर्षयः । पवमानः सोमः)
[६१]९।८।३ (असितः काश्यपो देवलो वा । पवमानः सोमः)
इन्द्रस्य सोम राधसे पुनानो ।
(३८७)९।६०।४ (अवत्सारः काश्यपः । पवमानः सोमः)
राधसे...पवस्व ।
[,,]९।८।३=(११२४)३।६२।१३ ऋतस्य योनिमासदम् ।
[६७]९।८।९ = ७।९६।६ (वसिष्ठो मैत्रावरुणिः । सरस्वान्)
[७६]९।९।९ = (३१)९।४।१ भक्षीमहि प्रजामिषम् ।
[,,]९।९।९ = (३१)९।४।२
[७७]९।१०।१ (असितः काश्यपो देवलो वा । पवमानः सोमः)
अर्वन्तो न श्रवस्यवः ।
(५४७)९।६६।१० (शतं वैखानसाः । पवमानः सोमः)
[७८]९।१०।२ (असितः काश्यपो देवलो वा । पवमानः सोमः)
दधन्विरे गभस्त्योः ।

(११०)९।१३।७ (असितः काश्यपो देवलो वा । पवमानः सोमः)
[९३]९।११।८ (असितः काश्यपो देवलो वा । पवमानः सोमः)
इन्द्राय सोम पातवे ...परि षिच्यसे ।
(९२४)९।९८।१० (अम्बरीषो वार्षागिरः, ऋजिश्वा भारद्वाजश्च । पवमानः सोमः)
(१०४०)९।१०८।१५ (शक्तिर्वासिष्ठः। पवमानः सोमः)
[,,]९।११।८ मनश्चिन्मनसस्पतिः ।
(९१२)९।९८।१ विश्वविन्मनसस्पतिः
९५]९।१२।१ (असितः काश्यपो देवलो वा । पवमानः सोमः)
इन्द्राय मधुमत्तमाः ।
(४३०)९।६३।१९ (निध्रुविः काश्यपः । पवमानः सोमः)
...मधुमत्तमम् ।
(५८३)९।६७।१६ (जमदग्निर्भार्गवः । पवमानः सोमः)
...मधुमत्तमः ।
[९६]९।१२।२ = (इन्द्रः२०८४)६।४५।२५
=(इन्द्रः१३७७)३।४१।५
गावो वत्सं न मातरः ।
(इन्द्रः२०८७)६।४५।२८ वत्सं गावो न धेनवः ।
[,,]९।१२।२ = (इन्द्रः८०)१।१६।३=(इन्द्रः१३८५)३।४२।४
= (इन्द्रः४०८)८।१७।१५ = (इन्द्रः२४०१)८।९२।५
= (इन्द्रः९८६)८।९७।११
इन्द्रं सोमस्य पीतये ।
[१००]९।१२।६ (असितः काश्यपो देवलो वा। पवमानः सोमः)
प्र वाचमिन्दुरिष्यति ।
(२५७)९।३५।४ (प्रभूवसुराङ्गिरसः । पवमानः सोमः)
प्र वाजमिन्दुरिष्यति ।
[,,]९।१२।६(इन्द्रः४३७)८।३४।१३
समुद्रस्याधि विष्टपि (०पः) ।
[१०१]९।१२।७ = (११०६)१।९१।६
नित्य (प्रिय०) स्तोत्रो वनस्पतिः ।
[१०२]९।१२।८(असितः काश्यपो देवलो वा। पवमानः सोमः)
सोमो हिन्वानो अर्षति ।
विप्रस्य धारया कविः ।
(३०९)९।४४।२ (अयास्य आङ्गिरसः । पवमानः सोमः)
सोमो हिन्वे परावति । विप्रस्य... ।
[१०४]९।१३।१(असितः काश्यपो देवलो वा। पवमानः सोमः)
सोमः पुनानो अर्षति ।

(२१७)९।२८।६ (प्रियमेध आङ्गिरसः ।
पवमानः सोमः)
(३००)९।४२।५ (मेध्यातिथिः काण्वः । पवमानः सोमः)
(९५०)९।१०१।७ (नहुषो मानवः । पवमानः सोमः)
[१०५]९।१३।२ **सुष्वाणं देववीतये ।**
(५९५)९।६५।१८ **सुष्वाणो देववीतये ।**
[१०६]९।१३।३ (असितः काश्यपो देवलो वा ।
पवमानः सोमः)
पवन्ते वाजसातये सोमाः सहस्रपाजसः।
(२९८)९।४२।३ (मेध्यातिथिः काण्वः । पवमानः सोमः)
पवन्ते वाजसातये ।
सोमाः... ।
(३०७)९।४३।६ (मेध्यातिथिः काण्वः । पवमानः सोमः)
पवस्व वाजसातये ।
(९४०)९।१००।६ (रेभसूनू काश्यपौ । पवमानः सोमः)
पवस्व वाजसातमः ।
(१०२२)९।१०७।२३ (सप्तर्षयः । पवमानः सोमः)
पवस्व वाजसातये ।
[१०७]९।१३।४ (असितः काश्यपो देवलो वा । पवमानः सोमः)
पवस्व बृहतीरिषः । ...सुवीर्यम् ।
(३०१)९।४२।६ (मेध्यातिथिः काण्वः । पवमानः सोमः)
पवस्व... ।
[११०]९।१३।७ = (इन्द्रः २०८४) ६।४५।२५
= (इन्द्रः१३७७) ३।४१।५
अभि (इन्द्र) **वत्सं न** धेनवः (मातरः) ।
[,,]९।१३।७ = (७८) ९।१०।२ **दधन्विरे गभस्त्योः ।**
[१११]९।१३।८ = (९७) ९।३।७
पवमान(०नः) कनिक्रदत् ।
[,,]९।१३।८ (असितः काश्यपो देवलो वा ।
पवमानः सोमः)
विश्वा अप द्विषो जहि ।
(३८९)९।६१।२८ (अमहीयुराङ्गिरसः । पवमानः सोमः)
[११२]९।१३।९ (असितः काश्यपो देवलो वा ।
पवमानः सोमः)
अपघ्नन्तो अराव्णः ।
योनावृतस्य सीदत ।

(४५२)९।६३।५ (निध्रुविः काश्यपः । पवमानः सोमः)
अपघ्नन्तो अराव्णः ।
(१८३)९।३९।६ (बृहन्मतिराङ्गिरसः । पवमानः सोमः)
योनावृतस्य सीदत ।
[११५]९।१४।३ = (इन्द्रः२३१४)८।६९।११
विश्वे देवा अमत्सत ।
[११७]९।१४।५ (असितः काश्यपो देवलो वा। पवमानः सोमः)
गाः कृण्वानो न निर्णिजम् ।
(७५३)९।८६।२६ (पृश्नियोऽजाः । पवमानः सोमः)
गाः कृण्वानो निर्णिजं न ।
(१०२५)९।१०७।२६ (सप्तर्षयः । पवमानः सोमः)
गाः कृण्वानो न निर्णिजम् ।
[१२१]९।१५।१ (असितः काश्यपो देवलो वा। पवमानः सोमः)
गच्छन्निन्द्रस्य निष्कृतम् ।
(४१२)९।६१।२५ (अमहीयुराङ्गिरसः । पवमानः सोमः)
[१२३]९।१५।३ **एष** हितो **वि नीयते ।**
(२०८)९।२७।३ **एष** नृभिर्वि **नीयते ।**
[१२७]९।१५।७(असितः काश्यपो देवलो वा। पवमानः सोमः)
एतं मृजन्ति मर्ज्यम् ।
(३२५)९।४६।६ (अयास्य आङ्गिरसः । पवमानः सोमः)
[१२८]९।१५।८(असितः काश्यपो देवलो वा। पवमानः सोमः)
एतमु त्यं दश क्षिपो मृजन्ति ।
(३९४)९।६१।७ (अमहीयुराङ्गिरसः । पवमानः सोमः)
[१३१]९।१६।३=१।२८।९ (शुनः शेप आजिगर्तिः। प्रजापतिः
हरिश्चन्द्रः चर्म सोमो वा)
सोमं पवित्र आ सृज ।
[,,]९।१६।३ (असितः काश्यपो देवलो वा । पवमानः सोमः)
सोमं पवित्र आ सृज ।
पुनीहीन्द्राय पातवे ।
(३४६)९।५१।१ (उचथ्य आङ्गिरसः । पवमानः सोमः)
सोमं... ।
पुनीही...।
[१३२]९।१६।४ (असितः काश्यपो देवलो वा। पवमानः सोमः)
सोमः पवित्रे अर्षति ।
(१३९)९।१७।३(असितः काश्यपो देवलो वा। पवमानः सोमः)
सोमः... । विघ्नन् रक्षांसि देवयुः ।

(१६६) ९।३७।१ (रहूगण आङ्गिरसः। पवमानः सोमः)
सोमः—।
विप्र—।
[१३४] ९।१६।६ (असितः काश्यपो देवलो वा। पवमानः सोमः)
विश्वा अर्षन्नभि श्रियः।
शूरो न गोषु तिष्ठति।
(४३६) ९।६२।१९ (जमदग्निर्भार्गवः। पवमानः सोमः)
[१३५] ९।१६।७ = (१३) ९।२।३ **धारा सुतस्य वेधसः।**
[१३६] ९।१६।८ (असितः काश्यपो देवलो वा। पवमानः सोमः)
त्वं सोम विपश्चितं......पुनान।
अव्यो वारं वि धावसि।
(५०१) ९।६४।२५ (कश्यपो मारीचः। पवमानः सोमः)
त्वं सोम विपश्चितं पुनानो।
(११२) ९।२८।१ (प्रियमेध आङ्गिरसः। पवमानः सोमः)
अव्यो वारं वि धावति।
(९९५) ९।१०६।१० (अग्निश्चाक्षुषः। पवमानः सोमः)
पुनान......अव्यो वारं वि धावति।
(६६५) ९।७४।९ (कक्षीवान्दैर्घतमसः। पवमानः सोमः)
अव्यो वारं वि पवमान धावति।
[१३७] ९।१७।१ (असितः काश्यपो देवलो वा। पवमानः सोमः)
सोमा असृग्रमाशवः।
(१८०) ९।२३।१ (असितःकाश्यपो देवलो वा। पवमानः सोमः)
[१३९] ९।१७।३ = (१३२) ९।१६।४ **सोमः पवित्र अर्षति।**
["] ९।१७।३ (असितः काश्यपो देवलो वा। पवमानः सोमः)
सोमः पवित्रे अर्षति।
विघ्नन् रक्षांसि देवयुः।
(१६६) ९।३७।१ (रहूगण आङ्गिरसः। पवमानः सोमः)
(३६८) ९।५६।१ (अवत्सारः काश्यपः। पवमानः सोमः)
आशुः **पवित्रे अर्षति।**
विघ्नन्—।
[१४०] ९।१७।४ (असितः काश्यपो देवलो वा। पवमानः सोमः)
आ कलशेषु धावति पवित्रे परि षिच्यते।
(५८१) ९।६७।१४ (विश्वामित्रो गाथिनः। पवमानः सोमः)
— धावति।
(१९९) ९।४२।४ (मेध्यातिथिः काण्वः। पवमानः सोमः)
पवित्रे परि षिच्यते।
[१४३] ९।१७।७ (असितः काश्यपो देवलो वा। पवमानः सोमः)
धीभिर्विप्रा अवस्यवः।
मृजन्ति......।

(४६७) ९।६३।२० (निध्रुविः काश्यपः। पवमानः सोमः)
मृजन्ति......धीभिर्विप्रा अवस्यवः।
[१४४] ९।१७।८ = १।१३७।१ (परुच्छेपो दैवोदासिः। मित्रावरुणौ)
चारुऋताय पीतये।
[१४५-५१] ९।१८।१-७ **मदेषु सर्वधा असि।**
[१४९] ९।१८।५ = (इन्द्रः १४६४) ३।५३।१२
(विश्वामित्रो गाथिनः। इन्द्रः)
य इमे रोदसी मही (उभे)।
[१५२] ९।१९।१ **तन्नः** पुनान **आ भर।**
(अग्निः १०) १।१२।११ स नः स्तवान **आ भर।**
[१५३] ९।१९।२ = ५।७१।२ (बाहुवृक्त आत्रेयः। मित्रावरुणौ)
ईशाना पिप्यतं धियः।
[१५५] ९।१९।४ (असितः काश्यपो देवलो वा। पवमानः सोमः)
अवावशन्त धीतयो।
(५४८) ९।६६।११ (शतं वैखानसाः। पवमानः सोमः)
[१५७] ९।१९।६ (असितः काश्यपो देवलो वा। पवमानः सोमः)
पवमान विदा रयिम्।
(३०५) ९।४३।४ (मेध्यातिथिः काण्वः। पवमानः सोमः)
(४५८) ९।६३।११ (निध्रुविः काश्यपः। पवमानः सोमः)
[१५९] ९।२०।१ (असितः काश्यपो देवलो वा। पवमानः सोमः)
अव्यो वारेभिरर्षति।
(२७२) ९।३८।१ (रहूगण आङ्गिरसः। पवमानः सोमः)
[१६४] ९।२०।६ (असितः काश्यपो देवलो वा। पवमानः सोमः)
मृज्यमानो गभस्त्योः।
सोमश्चमूषु सीदति।
(२६३) ९।३६।४ (प्रभूवसुराङ्गिरसः। पवमानः सोमः)
मृज्यमानो—।
(४८१) ९।६४।५ (कश्यपो मारीचः। पवमानः सोमः)
मृज्यमाना गभस्त्योः।
(५१३) ९।६५।६ (भृगुर्वारुणिर्जमदग्निर्भार्गवो वा। पवमानः सोमः)
(९३१) ९।९९।६ (रेभसूनू काश्यपौ। पवमानः सोमः
सोमश्चमूषु सीदति।
[१६५] ९।२०।७ (असितः काश्यपो देवलो वा। पवमानः सोमः)
पवित्रं सोम गच्छसि।
दधत् स्तोत्रे सुवीर्यम्।
(५८६ ९।६७।१९ (वसिष्ठो मैत्रावरुणिः। पवमानः सोमः)
(४४७) ९।६२।३० (जमदग्निर्भार्गवः। पवमानः सोमः)
सोमः पवित्रम्।
दधत्—।

(५६४ ९।६६।२७ (शतं वैखानसाः । पवमानः सोमः)
वृषन्...... ।
[१६६] ९।२२।१ (असितः काश्यपो देवलो वा । पवमानः सोमः)
मत्सरासः स्वर्विदः ।
(१०१३) ९।१०७।१४ (सप्तर्षयः । पवमानः सोमः)
[१७५] ९।२२।३ (असितः काश्यपो देवलो वा । पवमानः सोमः)
एते पूता विपश्चितः सोमासो दध्याशिरः ।
(९५५) ९।१०१।१२ (मनुः सांवरणः । पवमानः सोमः)
["] ९।२२।३=(इन्द्र १८)१।५।५=(इन्द्रः२२३८ ७।३२।४
= १।१३७।२ (परुच्छेपो दैवोदासिः । मित्रावरुणौ)
= ५।५१।७ (स्वस्त्यात्रेयः । विश्वे देवाः)
सोमासो दध्याशिरः ।
[१८०] ९।२३।१ = (१३७)९।१७।१ सोमा असृग्रमाशवः ।
["] ९।२३।१ (असितः काश्यपो देवलो वा । पवमानः सोमः)
अभि विश्वानि काव्या ।
(४४२) ९।६२।२५ (जमदग्निर्भार्गवः । पवमानः सोमः)
(७२) ९।६३।२५ (निध्रुविः काश्यपः । पवमानः सोमः)
(५३८) ९।६६।१ (शतं वैखानसाः । पवमानः सोमः)
[१८३] ९।२३।४ (असितः काश्यपो देवलो वा । पवमानः सोमः)
अभि सोमास आयवः पवन्ते मद्यं मदम् ।
अभि कोशं मधुश्चुतम् ।
(१०१३) ९।१०७।१४ (सप्तर्षयः । पवमानः सोमः)
अभि सोमास...... ।
(२६१) ९।३६।२ (प्रभूवसुराङ्गिरसः । पवमानः सोमः)
अभि कोशं मधुश्चुतम् ।
[१८४] ९।२३।५ सोमो अर्षति धर्णसिः ।
(२६७ ९।३७।२=(२७७)९।३८।६ हरिरर्षति... ।
[१८५] ९।२३।६ = (इंद्रः२३४४) ८।९५।९
इन्द्रो (शुद्धो) वाजं सिषासति ।
[१८६] ९।२३।७ = (इन्द्रः२४०२) ८।९२।६
अस्य पीत्वा मदानां ।
[१८७] ९।२४।१ (असितः काश्यपो देवलो वा । पवमानः सोमः)
प्र.........पवमानास इन्दवः ।
श्रीणाना अप्सु मृञ्जत ।
(५७४ ९।६७।७ गोतमो राहूगणः । पवमानः सोमः)
पवमानास इन्दवः ।
(९५१) ९।१०१।८ (नहुषो मानवः । पवमानः सोमः)
पवमानास इन्दवः ।
(५३३) ९।६५।२६ (भृगुर्वारुणिर्जमदग्निर्भार्गवो वा । पवमानः सोमः)

प्र......... ।
श्रीणाना अप्सु मृञ्जत ।
[१८८] ९।२४।२=(इन्द्रः२७६)८।६।३४=(इन्द्रः३१८)८।१३।८
आपो न प्रवता यतीः ।
["] ९।२४।२ = (४४ ९।६।४ पुनाना इन्द्रमाशत ।
[१८९] ९।२४।३ (असितः काश्यपो देवलो वा । पवमानः सोमः)
नृभिर्यतो वि नीयसे ।
(९३४) ९।९९।८ (रेभसूनू काश्यपौ । पवमानः सोमः)
[१९१] ९।२४।५=(इन्द्र २४११)८।९२।२५ अरमिन्द्रस्य धाम्ने ।
[१९२] ९।२४।६ = (अग्निः १९१०) १।१४२।३
शुचिः पावको अद्भुतः ।
[१९३] ९।२४।७=(१९२)९।२४।६ शुचिः पावक उच्यते ।
["] ९।२४।७ (असितः काश्यपो देवलो वा । पवमानः सोमः)
देवावीरघशंसहा ।
(२१७) ९।२८।६ (प्रियमेध आङ्गिरसः । पवमानः सोमः)
(४०६) ९।६१।१९ (अमहीयुराङ्गिरसः । पवमानः सोमः)
[१९५] ९।२५।२ (दृळहच्युत आगस्त्यः । पवमानः सोमः)
अभि योनिं कनिक्रदत् ।
(२६७) ९।३७।२ (रहूगण आङ्गिरसः । पवमानः सोमः)
[१९६] ९।२५।३ (दृळहच्युत आगस्त्यः । पवमानः सोमः)
शोभते......योनावधि ।
वृत्रहा देववीतमः ।
(२१४) ९।२८।३ (प्रियमेध आङ्गिरसः । पवमानः सोमः)
शुभायतेऽधि योनौ ।
वृत्रहा देववीतमः ।
[१९७] ९।२५।४=७।५५।१ (वसिष्ठो मैत्रावरुणिः । वास्तोष्पतिः)
विश्वा रूपाण्याविशन् ।
["] ९।२५।४ (दृळहच्युत आगस्त्यः । पवमानः सोमः)
पुनानो याति हर्यतः ।
(३०४) ९।४३।३ (मेध्यातिथिः काण्वः । पवमानः सोमः)
पुनानो याति हर्यतः ।
[१९९] ९।२५।६ (दृळहच्युत आगस्त्यः । पवमानः सोमः)
=(३४४ ९।५०।४ (उचथ्य आङ्गिरसः। पवमानः सोमः)
आ पवस्व मदिन्तम पवित्रं धारया कवे ।
अर्कस्य योनिमासदम् ।
[२०४] ९।२६।५ (इध्मवाहो दार्ढच्युतः । पवमानः सोमः)
हरिं हिन्वन्त्यद्रिभिः ।
(२१८) ९।३०।५ (बिन्दुराङ्गिरसः पवमानः सोमः)
(२३७) ९।३२।२ (श्यावाश्व आत्रेयः । पवमानः सोमः)

(२७३) ९।३८।१ (रहूगण आङ्गिरसः। पवमानः सोमः)
(२८३) ९।३९।६ बृहन्मतिराङ्गिरसः। पवमानः सोमः)
(३४३) ९।५०।३ (उचथ्य आङ्गिरसः। पवमानः सोमः)
(५१५) ९।६५।८ (भृगुर्वारुणिर्जमदग्निर्भार्गवो वा। पवमानः सोमः)
[२०५] ९।२६।६ (इध्मवाहो दार्ढच्युतः। पवमानः सोमः)
तं......हिन्वन्ति।
......इन्द्वविन्द्राय मत्सरम्।
(३५१) ९।५३।४(अवत्सारः काश्यपः। पवमानः सोमः)
तं हिन्वन्ति......।
इन्दुमिन्द्राय मत्सरम्।
(४६४) ९।६३।१७ (निध्रुविः काश्यपः। पवमानः सोमः)
इन्दुमिन्द्राय मत्सरम्।
[२०८] ९।२७।३=(१२३) ९।१५।३ एष नृभि(र्हितो) र्वि नीयते।
[२११] ९।२७।६ (नृमेध आङ्गिरसः। पवमानः सोमः)
पुनान इन्दुरिन्द्रमा।
(५६५) ९।६६।१८ (शतं वैखानसाः। पवमानः सोमः)
[२१२] ९।२८।१ = (१३६) ९।१६।८ अत्यो वार वि धावति।
[२१३] ९।२८।२ = (१९) ९।३।१ सोमो (देवो) देवेभ्यः सुतः।
[२१४] ९।२८।३ = (१९६) ९।२५।३ वृत्रहा देववीतमः।
[२१५] ९।२८।४ (प्रियमेध आङ्गिरसः। पवमान सोमः)
अभि द्रोणानि धावति।
(२७१) ९।३७।६ (रहूगण आङ्गिरसः। पवमानः सोमः)
[२१६] ९।२८।५ (प्रियमेध आङ्गिरसः। पवमान सोमः)
पवमानो विचर्षणिः।
(३८४) ९।६०।१ (अवत्सारः काश्यपः। पवमानः सोमः)
पवमानं विचर्षणिम्।
[२१७] ९।२८।६ = (१०४) ९।१३।१ सोमः पुनानो अर्षति।
["] ९।२८।६ = (१९३) ९।२४।७ देवावीरघशंसहा।
[२२०] ९।२९।३ (नृमेध आङ्गिरसः। पवमानः सोम)
पुनानाय प्रभूवसो।
वर्धा समुद्रमुक्थ्यम्।
(२५१) ९।३५।६ (प्रभूवसुराङ्गिरसः। पवमानः सोमः)
पुनानस्य प्रभूवसोः।
(४०१) ९।६१।१५ (अमहीयुराङ्गिरसः। पवमानः सोमः)
वर्धा समुद्रमुक्थ्यम्।
[२२१] ९।२९।४ = (१) ९।१।१ पवस्व सोम धारया।
[२२३] ९।२९।६ (नृमेध आङ्गिरसः। पवमानः सोमः)
द्युमन्तं शुष्ममा भर।
(९८९) ९।१०६।४ (चक्षुर्मानवः। पवमानः सोमः)

द्युमन्तं शुष्ममा भरा स्वर्विदम्।
[२२४] ९।३०।१ (बिन्दुराङ्गिरसः। पवमानः सोमः)
पुनानो वाचमिष्यति।
(५०१) ९।६४।१५ (कश्यपो मारीचः। पवमानः सोमः)
पुनानो वाचमिष्यसि।
[२२५] ९।३०।२ (बिन्दुराङ्गिरसः। पवमानः सोमः)
इन्दुर्हियानः सोतृभिः।
(१०१५) ९।१०७।२६ (सप्तर्षयः पवमानः सोमः)
[२२६] ९।३०।३ = (१) ९।१।१ पवस्व सोम धारया।
[२२७] ९।३०।४ (बिन्दुराङ्गिरसः। पवमानः सोमः)
पवमानो अभिष्यदत्।
(३४८) ९।४९।५ (कविर्भार्गवः। पवमानः सोमः)
["] ९।३०।४ = (११) ९।२।१ अभि द्रोणान्यासदम्।
[२२८] ९।३०।५ = (२०५) ९।२६।५
["] (बिन्दुराङ्गिरसः। पवमानः सोमः)
इन्द्वविन्द्राय पीतये।
(३१४) ९।४५।१ (अयास्य आंगिरसः। पवमानः सोमः)
(३४५) ९।५०।५ (उचथ्य आंगिरसः। पवमानः सोमः)
(४८९) ९।६४।१२ (कश्यपो मारीचः। पवमानः सोमः)
[२२९] ९।३०।६ (बिन्दुरांगिरसः। पवमानः सोमः)
सुनोता मधुमत्तमं सोममिन्द्राय वज्रिणे।
(३४७) ९।५१।१ (उचथ्य आंगिरसः। पवमानः सोमः)
सोममिन्द्राय वज्रिणे।
सुनोता मधुमत्तमम्।
(इन्द्रः १२४२) ७।३२।८ सुनोता सोमपाव्ने।
सोममिन्द्राय वज्रिणे।
[२३२] ९।३१।३ (गोतमो राहूगणः। पवमानः सोमः)
तुभ्यं ... तुभ्यमर्षन्ति सिन्धवः।
(४४४) ९।६२।२७ (जमदग्निर्भार्गव। पवमानः सोमः)
तुभ्येमा ... ...।
तुभ्यमर्षन्ति सिन्धवः।
[२३३] ९।३१।४ = (१११६) १।९१।१६
[२३५] ९।३१।६ (गोतमो राहूगणः। पवमानः सोमः)
इन्दो सखित्वमुश्मसि।
(५५१) ९।६६। ४ (शतं वैखानसाः। पवमानः सोमः)
[२३७] ९।३२।२ = (२०४) ९।२६।५
["] ९।३२।२ (श्यावाश्व आत्रेयः। पवमानः सोमः)
(२७३) ९।३८।१ (रहूगण आंगिरसः। पवमानः सोमः)
एतं (९।३२।२ आदौ) त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः।

इन्दुमिन्द्राय पीतये ।

(३०३) ९।४३।२ (मेध्यातिथिः काण्वः । पवमानः सोमः)

इन्दु—— ।

(५१५) ९।६५।१८ (भृगुर्वारुणिर्जमदग्निर्भार्गवो वा । पवमानः सोमः)

हरिं हिन्वन्त्यद्रिभिः ।

इन्दुमिन्द्राय... ।

[२३०] ९।३२।४ = (अग्निः १०७६) ६।१६।३५

सीदन्नृतस्य योनिमा ।

[२४०] ९।३२।५ अभि गावो अनूषत ।

(२४६) ९।३३।५ अभि ब्रह्मीरनूषत ।

[२४१] ९।३२।६ = (इन्द्रः २०९८) ६।४६।९

मघवद्भ्यश्च मह्यं च ।

[२४३] ९।३३।२ (त्रित आप्त्यः । पवमानः सोमः)

शुक्रा ऋतस्य धारया ।

वाजं गोमन्तमक्षरन् ।

(४६१) ९।६३।१४ (निध्रुविः काश्यपः । पवमानः सोमः)

[२४४] ९।३३।३ = (इन्द्रः ३२३२) ५।५१।७ (स्वस्त्यात्रेयः । इन्द्रवायू)

सुता इन्द्राय वायवे ।

["] ९।३३।३ = ८।४१।१ (नाभाकः काण्वः । वरुणः)

वरुणाय मरुद्भ्यः ।

[२४६] ९।३३।५ = (२४०) ९।३२।५

["] ९।३३।५ = (अग्निः १९२४) १।१४२।७

= (अग्निः १९६९) ५।५।६

= १०।५९।८ (बन्धुः श्रुतबन्धुः० । द्यावापृथिवी)

[२४७] ९।३३।६ (त्रित आप्त्यः । पवमानः सोमः)

रायः ... अस्मभ्यं सोम विश्वतः ।

आ पवस्व सहस्रिणः ।

(२८६) ९।४०।३ (बृहन्मतिराङ्गिरसः । पवमानः सोमः)

रयिं ... अस्मभ्यं ... ।

आ पवस्व सहस्रिणम् ।

(४२९) ९।६१।१२ (जमदग्निर्भार्गवः । पवमानः सोमः)

आ पवस्व सहस्रिणं रयिम् ।

(४४८) ९।६३।१ (निध्रुविः काश्यपः । पवमानः सोमः)

आ पवस्व सहस्रिणं रयिम् ।

(५२८) ९।६५।२१ (भृगुर्वारुणिर्जमदग्निर्भार्गवो वा । पवमानः सोमः)

अस्मभ्यं सोम विश्वतः ।

आ पवस्व सहस्रिणम् ।

[२४८] ९।३४।१ (त्रित आप्त्यः । पवमानः सोमः)

इन्दुर्हिन्वानो अर्षति ।

(५७१) ९।६७।४ (कश्यपो मारीचः । पवमानः सोमः)

[२४९] ९।३४।२ = (इन्द्रः ३२३२) ५।५१।७ (स्वस्त्यात्रेयः । इन्द्रवायू)

["] ९।३४।२ = ८।४१।१ (नाभाकः काण्वः । वरुणः)

[२५०] ९।३४।३ सुन्वन्ति सोममद्रिभिः ।

(इन्द्रः १०३) ८।१।१७ सोता हि सोममद्रिभिः ।

[२५५] ९।३५।१ इन्दो समुद्रमीङ्खय ।

(३५३) ९।५२।४ इन्दो न दानमीङ्खय ।

["] ९।३५।१ (प्रभूवसुराङ्गिरसः । पवमानः सोमः)

समुद्रमीङ्खय पवस्व विश्वमेजय ।

(४४३) ९।६२।२६ (जमदग्निर्भार्गवः । पवमानः सोमः)

समुद्रिया......ईरयन् ।

पवस्व विश्वमेजय ।

[२५६] = ९।३५।३ (अग्निः ४०१) १।८।६ अभि ष्याम पृतन्यतः ।

[२५७] ९।३५।४ = (१००) ९।११।६

प्र वाज (॰च) मिन्दुरिष्यति ।

[२५९] ९।३५।६ = (२२०) ९।२९।३

[२६१] ९।३६।१ = (११) ९।१।१ पवस्व देववीरति ।

["] ९।३६।२ = (१८३) ९।२३।४ अभि कोशं मधुश्चुतम् ।

[२६३] ९।३६।४ (प्रभूवसुराङ्गिरसः । पवमानः सोमः)

शुम्भमान ऋतायुभिर्मृज्यमानो गभस्त्योः ।

पवते वारे अव्यये ।

(४८२) ९।६४।५ (कश्यपो मारीचः । पवमानः सोमः)

शुम्भमानो ऋतायुभिर्मृज्यमाना गभस्त्योः ।

पवन्ते वारे अव्यये ।

["] ९।३६।४ = (१६४) ९।२०।६ मृज्यमानो गभस्त्योः ।

[२६४] ९।३६।५ (प्रभूवसुराङ्गिरसः । पवमानः सोमः)

स विश्वा दाशुषे वसु सोमो दिव्यानि पार्थिवा ।

पवतामान्तरिक्ष्या ।

(४८३) ९।६४।६ (कश्यपो मारीचः । पवमानः सोमः)

ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा ।

पवन्तामान्तरिक्ष्या ।

[२६६] ९।३७।१ = (१३२) ९।१६।४ = (१३९) ९।१७।३

सोमः पवित्रे अर्षति ।

[२६७] ९।३७।२ (रहूगण आङ्गिरसः । पवमानः सोमः)

हरिरर्षति धर्णसिः ।
अभि योनिं कनिक्रदत् ।
(१७७) ९।३८।६ (रहूगण आङ्गिरसः। पवमानः सोमः)
हरि— ।
क्रन्दन् योनिमभि ।
[२६७] ९।३७।२ = (१९५) ९।२५।२
[२६८] ९।३७।३ (रहूगण आङ्गिरसः । पवमानः सोमः)
पवमानो वि धावति ।
(९७३) ९।१०३।६ (त्रित आप्त्यः । पवमानः सोमः)
व्यानशिः पवमानो— ।
[२७०] ९।३७।५ (रहूगण आङ्गिरसः । पवमानः सोमः)
सोमो वाजमिवासरत् ।
(४३३) ९।६२।१६ (जमदग्निर्भार्गवः । पवमानः सोमः)
[२७१] ९।३७।६ = (२१५)९।२८।४ अभि द्रोणानि धावति ।
[२७२] ९।३८।१ = (१५९) ९।२०।१ अत्यो वारेभिरर्षति ।
["] ९।३८।१ गच्छन् वाजं सहस्रिणम् ।
(३७२) ९।५७।१ अच्छा वाजं सहस्रिणम् ।
[२७३] ९।३८।२ = (२३७) ९।३३।२
["] ९।३८।२ = (२०४) ९।२६।५
[२७४] ९।३८।३ = (१७) ९।२।७
[२७५] ९।३८।४ (रहूगण आङ्गिरसः । पवमानः सोमः)
श्येनो न विक्षु सीदति ।
(३७४) ९।५७।३ (अवत्सारः काश्यपः । पवमानः सोमः)
श्येनो न वंसु षीदति ।
(७६२) ९।८६।३५
(अकृष्टामाषादयस्त्रयः । पवमानः सोमः)
श्येनो न वंसु कलशेषु सीदसि ।
[२८०] ९।३९।३ (बृहन्मतिराङ्गिरसः । पवमानः सोमः)
सुत एति पवित्र आ ।
(३१०) ९।४४।३ (अयास्य आङ्गिरसः । पवमानः सोमः)
(३९५) ९।६१।८ (अमहीयुराङ्गिरसः । पवमानः सोम)
[२८३] ९।३९।६ = (२०४) ९।२६।५
["] ९।३९।६ = (१११) ९।१३।९
[२८६] ९।४०।३ = (२४७) ९।३३।६
[२८७] ९।४०।४ विदाः सहस्रिणीरिषः ।
(३९०) ९।६१।३ क्षरा सहस्रिणीरिषः ।
[२८८] ९।४०।५ = (अग्निः २०) १।१२।११
स नः पुमान (स्तवान) आ भर ।
[२८९] ९।४०।६ (बृहन्मतिराङ्गिरसः । पवमानः सोमः)
पुनान इन्दवा भर सोम द्विबर्हसं रयिम् ।

(३७५) ९।५७।४ (अवत्सारः काश्यपः । पवमानः सोमः)
पुनान इन्दवा भर ।
(५०३) ९।६४।२६ (कश्यपो मारीचः । पवमानः सोमः)
पुनान इन्दवा भर ।
(९३६) ९।१००।२ (रेभसूनू काश्यपौ । पवमानः सोमः)
["] ९।४०।६ = (३७) ९।४।७
सोम द्विबर्हसं रयिम् ।
[२९१] ९।४१।२ साह्वांसो दस्युमव्रतम् ।
(इन्द्रः १०८१) १।१७५।३ सहावान् दस्युमव्रतम् ।
[२९३] ९।४१।४ (मेध्यातिथिः काण्वः । पवमानः सोमः)
पवस्व मंहयद्रयिः ... गोमदिन्दो हिरण्यवत् ।
अश्वावद्वाजवत् सुतः ।
(३९०) ९।६१।३ (अमहीयुराङ्गिरसः । पवमानः सोमः)
गोमदिन्दो हिरण्यवत् । ... सहस्रिणीरिषः ।
(३०१) ९।४२।६ (मेध्यातिथिः काण्वः । पवमानः सोमः)
गोमन्नः सोम......अश्वावद्वाजवत् सुतः ।
पवस्व बृहतीरिषः ।
[२९७] ९।४२।१ = (२९--३०) ९।३।९--१०
[२९८] ९।४२।३ = (१०६) ९।१३।३
पवन्ते वाजसातये सोमाः सहस्रपाजसः ।
[२९९] ९।४२।४ = (१४०) ९।१७।४
पवित्रे परि षिच्यते ।
[३००] ९।४२।५ (मेध्यातिथिः काण्वः । पवमानः सोमः)
अभि विश्वानि वार्या ।
(५४१) ९।६६।४ (शतं वैखानसाः । पवमानः सोमः)
पवस्व......अभि विश्वानि वार्या ।
["] ९।४२।५ = (१०४) ९।१३।१
[३०१] ९।४२।६ = (२९३)९।४१।४ अश्वावद् वाजवत् सुतः ।
["] ९।४२।६ = (१०७) ९।१३।४ पवस्व बृहतीरिषः ।
[३०३] ९।४३।२ = (२३७) ९।३२।२
["] ९।४३।३ = (३०४) ९।२५।४
[३०५] ९।४३।४ = (१५७) ९।१९।६
["] ९।४३।४ (मेध्यातिथिः काण्वः । पवमानः सोमः)
पवमान विदा रयिमस्मभ्यं सोम सुश्रियम् ।
(४५८) ९।६३।११ (निध्रुविः काश्यपः । पवमानः सोमः)
.... सोम दुष्टरम् ।
["] ९।४३।४ इन्दो सहस्रवर्चसम् ।
(५०२) ९।६४।२५ = (९१५) ९।९८।१ इन्दो सहस्रभर्णसम् ।
[३०७] ९।४३।६ = (१०६) ९।१३।३
["] ९।४३।६ = (अग्निः ८५८) ५।१३।५

(इन्द्रः २३७५)८।९८।१२ = (अग्निः ११८१)८।२३।११
[३०८] ९।४४।१ प्र ण इन्दो महे तने ।
(५५०) ९।६६।१३......महे रणे ।
[३०९] ९।४४।२ = (१०२) ९।१२।८ विप्रस्य धारया कविः ।
[३१०] ९।४४।३ = (२८०) ९।३९।३
[३११] ९।४४।५ (अयास्य आङ्गिरसः । पवमानः सोमः)
स नो भगाय वायवे ।
(३९६) ९।६१।९ (अमहीयुराङ्गिरसः । पवमानः सोमः)
[३१४] ९।४५।१ = (२२८) ९।३०।५
[३१५] ९।४५।२ = (इन्द्र ७) १।४।४
देवान् (यन्ते) सखिभ्य आ वरम् ।
[३१६] ९।४५।३ (अयास्य आङ्गिरसः । पवमानः सोमः)
वि नो राये दुरो वृधि ।
(४८०) ९।६४।३ (कश्यपो मारीचः । पवमानः सोमः)
[३१७] ९।४५।४ (अग्निः१४७१) ८।१०२।९
[३१८] ९।४५।५ = (४५) ९।६।५
[३१९] ९।४५।६ (अयास्य आङ्गिरसः । पवमानः सोमः)
तया पवस्व धारया यया ।
(३३७) ९।४९।२ (कविर्भार्गवः । पवमानः सोमः)
[३२०] ९।४६।१ (अयास्य आङ्गिरसः । पवमानः सोमः)
असृग्रन् देववीतये ।
(५८४) ९।६७।१७ (जमदग्निर्भार्गवः । पवमानः सोमः)
[३२१]९।४६।३ = (इन्द्रः८३)१।१६।६एते इमे सोमास इन्दवः ।
[३२४] ९।४६।५ (अयास्य आङ्गिरसः । पवमानः सोमः)
पवस्व.........महः ।
अस्मभ्यं सोम गातुवित् ।
(५२०) ९।६५।१३ (भृगुर्वारुणिर्जमदग्निर्भार्गवो वा । पवमानः सोमः)
महीमु.........पवस्व ।
अस्मभ्यं ।
[३२५] ९।४६।६ = (१२७) ९।१५।७ एतं मृजन्ति मर्ज्यम् ।
[३३७] ९।४९।२ = (३१९) ९।४५।६
[३४०] ९।४९।५ = (१२७) ९।३०।४
[३४३] ९।५०।३ = (५५) ९।७।६
["] ९।५०।३ = (२०४) ९।२६।५
["] ९।५०।३ (उचथ्य आंगिरसः । पवमानः सोमः)
हिन्वन्ति ... ।
पवमानं मधुश्चुतम् ।
(५७६) ९।६७।९ (गोतमो राहूगणः । पवमानः सोमः)
[३४४] ९।५०।४ = (१९९) ९।२५।६
[३४५] ९।५०।५ (उचथ्य आंगिरसः । पवमानः सोमः)
स पवस्व मदिन्तम ।
(९३२) ९।९९।६ (रेभसूनू काश्यपौ । पवमानः सोमः)
स पुनानो मदिन्तमः ।
["] ९।५०।५ = (२२८) ९।३०।५
[३४६] ९।५१।१ = (१३१) ९।१६।३ = १।२८।९
(शुनःशेप आजीगर्तिः । प्रजापतिः हरिश्चन्द्रः चर्म सोमो वा)
[३४७] ९।५१।१ = (२२९) ९ ३०।६
= (इन्द्रः २२४१) ७।३२।८
[३४८] ९।५१।३ (उचथ्य आंगिरसः । पवमानः सोमः)
पवमानस्य मरुतः ।
(५०१) ९।६४।२४ (कश्यपो मारीचः । पवमानः सोमः)
[३५०] ९।५१।५ = (४) ९।१।४
[३५१] ९।५२।१ = (४३) ९।६।३
[३५२] ९।५२।२ = (५५) ९।७।६
[३५३] ९।५२।३ = (२५५) ९।३५।२
[३५४] ९।५२।४ (उचथ्य आंगिरसः । पवमानः सोमः)
इन्दवेषां पुरुहूत जनानाम् ।
यो अस्माँ आदिदेशति ।
(५०४) ९।६४।२७ (कश्यपो मारीचः । पवमानः सोमः)
एषां पुरुहूत जनानाम् ।
(इन्द्रः २७८६) १०।१३४।२ (मान्धाता यौवनाश्वः। इन्द्रः)
यो अस्माँ आदिदेशति ।
[३५५] ९।५२।५ (उचथ्य आंगिरसः । पवमानः सोमः)
पवस्व मंहयद्रयिः ।
(५६८) ९।६७।१ (भरद्वाजो बार्हस्पत्यः । पवमानः सोमः)
[३५९] ९।५३।४ = (४६४) ९।६३।१७
हरिं नदीषु वाजिनम् । इन्दुमिन्द्राय मत्सरम् ।
["] ९।५३ ४ = (२०५) ९।२६।६
३६१] ९।५४।३ (अवत्सारः काश्यपः । पवमानः सोमः)
सोमो देवो न सूर्यः ।
(४६०) ९।६३।१३ (निध्रुविः काश्यपः । पवमानः सोमः)
[३६४] ९।५५।१ = (३१) ९।४।२ = (इन्द्रः ६५८) ८।७८।८
[३६८] ९।५६।१ = (१३१) ९।१६।४
["] ९।५६।१ = (१३९) ९।१७ ३
[३७१] ९।५६।४ = (९८९) ९।१०६।४
= (इन्द्रः १७८५) ८।९१।३
[३७२] ९।५७।१ (अवत्सारः काश्यपः । पवमानः सोमः)

प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः ।
(५६५) ९।६२।२८ (जमदग्निर्भार्गवः । पवमानः सोमः)
प्र ते दिवो न वृष्टयो धारा यन्त्यसश्चतः ।
[३७४] ९।५७।३ (अवत्सारः काश्यपः । पवमानः सोमः)
स मर्मृजान आयुभिः ।
(५६०) ९।६६।२३ (शतं वैखानसाः । पवमानः सोमः)
["] ९।५७।३ = (२७५) ९।३८।४
[३७५] ९।५९।४ = (२८९) ९।४०।६
[३७६ ७९] ९।५८।१, १-४ **तरत् स मन्दी धावति ।**
[३८४] ९।६०।१ = (११६) ९।२८।५
[३८५] ९।६०।२ अथो **सहस्रभर्णसम् ।**
(५०३) ९।६४।२६ उतो **सहस्रभर्णसम् ।**
[३८६] ९।६०।३ (अवत्सारः काश्यपः । पवमानः सोमः)
कलशाँ......। इन्द्रस्य हार्द्याविशन् ।
(७४६) ९।८६।१९ (सिकता निवारी । पवमानः सोमः)
कलशाँ......इन्द्रस्य हार्द्याविशन् मनीषिभिः ।
[३८८] ९।६१।१ = (इन्द्रः ९४९) १।८४।१३
[३९०] ९।६१।३ = (२८७)९।४०।४ = (२९३) ९।४१।४
[३९१] ९।६१।४ (अमहीयुराङ्गिरसः । पवमानः सोमः)
सखित्वमा वृणीमहे ।
आ वोऽर्वाचः सुविताय रोदस्यो—र्महे ववृत्यामवसे सुवृक्तिभिः १
वव्रासो न ये स्वजाः स्वतवस इषं स्वरभिजायन्त धूतयः ।
सहस्रियासो अपां नोर्मय आसा गावो वन्द्यासो नोक्षणः २
सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते ।
एषामंसेषु रम्भिणीव रारभे हस्तेषु खादिश्च कृतिश्च सं दधे ३ १८५
अव स्वयुक्ता दिव आ वृथा ययु—रमर्त्याः कशया चोदत त्मना ।
अरेणवस्तुविजाता अचुच्यवु—र्दृळ्हानि चिन्मरुतो भ्राजदृष्टयः ४ १८६

को वोऽन्तर्मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया ।
धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्यो३ नैतशः ५
क्व स्विदस्य रजसो महस्परं क्वावरं मरुतो यस्मिन्नायय ।
यच्च्यावयथ विथुरेव संहितं व्यद्रिणा पतथ त्वेषमर्णवम् ६
सातिर्न वोऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिष्वती ।
भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जञ्जती ७
प्रति ष्टोभन्ति सिन्धवः पविभ्यो यदभ्रियां वाचमुदीरयन्ति ।
अव स्मयन्त विद्युतः पृथिव्यां यदी घृतं मरुतः प्रुष्णुवन्ति ८ १९०
असूत पृश्निर्महते रणाय त्वेषमयासां मरुतामनीकम् ।
ते सप्सरासोऽजनयन्ताभ्व मादित् स्वधामिषिरां पर्यपश्यन् ९
एष वः स्तोमो मरुत इयं गी र्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् १०

॥ १७ ॥ (ऋ० १।१७१।१-२) त्रिष्टुप् ।

प्रति व एना नमसाहमेमि सूक्तेन भिक्षे सुमतिं तुराणाम् ।
रराणता मरुतो वेद्याभि र्नि हेळो धत्त वि मुचध्वमश्वान् १
एष वः स्तोमो मरुतो नमस्वान् हृदा तष्टो मनसा धायि देवाः ।
उपेमा यात मनसा जुषाणा यूयं हि ष्ठा नमस इद् वृधासः २

॥ १८ ॥ (१।१७२।१-३) गायत्री ।

चित्रो वोऽस्तु याम श्चित्र ऊती सुदानवः । मरुतो अहिभानवः १ १९५
आरे सा वः सुदानवो मरुत ऋञ्जती शरुः । आरे अश्मा यमस्यथ २
तृणस्कन्दस्य नु विशः परि वृङ्क्त सुदानवः । ऊर्ध्वान् नः कर्त जीवसे ३

॥ १९ ॥ (ऋ० २।३०।११)

(१९८-२१३) गृत्समदः (आङ्गिरसः शौनहोत्रः पश्चाद् भार्गवः) शौनकः । जगती ।

तं वः शर्धं मारुतं सुम्नयुर्गिरो प ब्रुवे नमसा दैव्यं जनम् ।
यथा रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे ११

॥ २० ॥ (ऋ० २।३४।१-१५) जगती; १५ त्रिष्टुप् ।

धारावरा मरुतो धृष्ण्वोजसो मृगा न भीमास्तविषीभिरर्चिनः ।
अग्नयो न शुशुचाना ऋजीषिणो भृमिं धमन्तो अप गा अवृण्वत १ १९९

द्यावो न स्तृभिश्चितयन्त खादिनो व्य1भ्रिया न द्युतयन्त वृष्टयः ।
रुद्रो यद् वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊधनि २ २००
उक्षन्ते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस्तुरयन्त आशुभिः ।
हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः ३
पृक्षे ता विश्वा भुवना ववक्षिरे मित्राय वा सदमा जीरदानवः ।
पृषदश्वासो अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः ४
इन्धन्वभिर्धेनुभी रप्शदूधभि-रध्वस्मभिः पथिभिर्भ्राजदृष्टयः ।
आ हंसासो न स्वसराणि गन्तन मधोर्मदाय मरुतः समन्यवः ५
आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गन्तन ।
अश्वामिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे वाजपेशसम् ६
तं नो दात मरुतो वाजिनं रथ आपानं ब्रह्म चितयद् दिवेदिवे ।
इषं स्तोतृभ्यो वृजनेषु कारवे सनिं मेधामरिष्टं दुष्टरं सहः ७ २०५
यद् युञ्जते मरुतो रुक्मवक्षसो ऽश्वान् रथेषु भग आ सुदानवः ।
धेनुर्न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषम् ८
यो नो मरुतो वृकताति मर्त्यो रिपुर्दधे वसवो रक्षता रिषः ।
वर्तयत तपुषा चक्रियाभि त-मव रुद्रा अशसो हन्तना वधः ९
चित्रं तद् वो मरुतो याम चेकिते पृश्न्या यदूधरप्यापयो दुहुः ।
यद् वा निदे नवमानस्य रुद्रिया-स्त्रितं जराय जुरतामदाभ्याः १०
तान् वो महो मरुत एवयाव्नो विष्णोरेषस्य प्रभृथे हवामहे ।
हिरण्यवर्णान् ककुहान् यतस्रुचो ब्रह्मण्यन्तः शंस्यं राध ईमहे ११
ते दशग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वन्तूषसो व्युष्टिषु ।
उषा न रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा १२ २१०
ते क्षोणीभिररुणेभिर्नाञ्जिभी रुद्रा ऋतस्य सदनेषु वावृधुः ।
निमेघमाना अत्येन पाजसा सुश्चन्द्रं वर्णं दधिरे सुपेशसम् १३
ताँ इयानो महि वरूथमूतय उप घेदेना नमसा गृणीमसि ।
त्रितो न यान् पञ्च होतॄनभिष्टय आववर्तदवराञ्चक्रियावसे १४
यया रध्रं पारयथात्यंहो यया निदो मुञ्चथ वन्दितारम् ।
अर्वाची सा मरुतो या व ऊति-रो षु वाश्रेव सुमतिर्जिगातु १५ २१३

॥ २१ ॥ (ऋ० ३।२६।४-६)

(२१४-२१६) गाथिनो विश्वामित्रः । जगती ।

प्र यन्तु वाजास्तविषीभिरग्नयः शुभे संमिश्लाः पृषतीरयुक्षत ।
बृहदुक्षो मरुतो विश्ववेदसः प्र वेपयन्ति पर्वताँ अदाभ्याः ४
अग्निश्रियो मरुतो विश्वकृष्टय आ त्वेषमुग्रमव ईमहे वयम् ।
ते स्वानिनो रुद्रिया वर्षनिर्णिजः सिंहा न हेषक्रतवः सुदानवः ५ २१५
व्रातंव्रातं गणंगणं सुशस्तिभि- रग्नेर्भामं मरुतामोज ईमहे ।
पृषदश्वासो अनवभ्रराधसो गन्तारो यज्ञं विदथेषु धीराः ६ २१६

॥ २२ ॥ (ऋ० ५।५२।१-१७)

(२१७-२१७) श्यावाश्व आत्रेयः । अनुष्टुप् ; ६,१६,१७ पङ्क्तिः ।

प्र श्यावाश्व धृष्णुया ऽर्चा मरुद्भिर्ऋक्वभिः ।
ये अद्रोघमनुष्वधं श्रवो मदन्ति यज्ञियाः १
ते हि स्थिरस्य शवसः सखायः सन्ति धृष्णुया ।
ते यामन्ना धृषद्विन- स्त्मना पान्ति शश्वतः २
ते स्पन्द्रासो नोक्षणो ऽति ष्कन्दन्ति शर्वरीः ।
मरुतामधा महो दिवि क्षमा च मन्महे ३
मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया ।
विश्वे ये मानुषा युगा पान्ति मर्त्यं रिषः ४ २२०
अर्हन्तो ये सुदानवो नरो असामिशवसः ।
प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा मरुद्भ्यः ५
आ रुक्मैरा युधा नर ऋष्वा ऋष्टीरसृक्षत ।
अन्वेनाँ अह विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः ६
ये वावृधन्त पार्थिवा य उरावन्तरिक्ष आ ।
वृजने वा नदीनां सधस्थे वा महो दिवः ७
शर्धो मारुतमुच्छंस सत्यशवसमृभ्वसम् ।
उत स्म ते शुभे नरः प्र स्पन्द्रा युजत त्मना ८
उत स्म ते परुष्ण्या- मूर्णा वसत शुन्ध्यवः ।
उत पव्या रथाना- मद्रिं भिन्दन्त्योजसा ९ २२५
आपथयो विपथयो ऽन्तस्पथा अनुपथाः ।
एतेभिर्मह्यं नामभि- र्यज्ञं विष्टार ओहते १० २२६

अधा नरो न्योहते ऽधा नियुत ओहते ।
अधा पारावता इति चित्रा रूपाणि दर्श्या ११
छन्दःस्तुभः कुभन्यव उत्समा कीरिणो नृतुः ।
ते मे के चिन्न तायव ऊमा आसन् दृशि त्विषे १२
य ऋष्वा ऋष्टिविद्युतः कवयः सन्ति वेधसः ।
तमृषे मारुतं गणं नमस्या रमया गिरा १३
अच्छ ऋषे मारुतं गणं दाना मित्रं न योषणा ।
दिवो वा धृष्णव ओजसा स्तुता धीभिरिषण्यत १४ २३०
नू मन्वान एषां देवाँ अच्छा न वक्षणा ।
दाना सचेत सूरिभि-र्यामश्रुतेभिरञ्जिभिः १५
प्र ये मे बन्ध्वेषे गां वोचन्त सूरयः पृश्निं वोचन्त मातरम् ।
अधा पितरमिष्मिणं रुद्रं वोचन्त शिक्वसः १६
सप्त मे सप्त शाकिन एकमेका शता ददुः ।
यमुनायामधि श्रुत-मुद् राधो गव्यं मृजे नि राधो अश्व्यं मृजे १७

॥ २३ ॥ (ऋ० ५।५३।१-१६)

(१,५,१०-११,१५ककुप्; २ बृहती; ३ अनुष्टुप्, ४ पुरउष्णिक्; ६,७,९,१३,१४,१६ सतो बृहती; ८,१२ गायत्री)।

को वेद जानमेषां को वा पुरा सुम्नेष्वास मरुताम् ।
यद् युयुज्रे किलास्यः १
ऐतान् रथेषु तस्थुषः कः शुश्राव कथा ययुः ।
कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः सह २ २३५
ते म आहुर्य आययु-रुप द्युभिर्विभिर्मदे ।
नरो मर्या अरेपस इमान् पश्यन्निति ष्टुहि ३
ये अञ्जिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मेषु खादिषु ।
श्राया रथेषु धन्वसु ४
युष्माकं स्मा रथाँ अनु मुदे दधे मरुतो जीरदानवः ।
वृष्टी द्यावो यतीरिव ५
आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।
वि पर्जन्यं सृजन्ति रोदसी अनु धन्वना यन्ति वृष्टयः ६ २३९

ततृवाना: सिन्धव: क्षोदसा रज: प्र सस्रुर्धेनवो यथा ।
स्यन्ना अश्वा इवाध्वनो विमोचने वि यद् वर्तन्त एन्य: ७ १४०
आ यात मरुतो दिव आन्तरिक्षादमादुत ।
माव स्थात परावत: ८
मा वो रसानितभा कुभा क्रुमु—र्मा व: सिन्धुर्नि रीरमत् ।
मा व: परि ष्ठात् सरयु: पुरीषिण्य—स्मे इत् सुम्नमस्तु व: ९
तं व: शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनाम् ।
अनु प्र यन्ति वृष्टय: १०
शर्धंशर्धं व एषां व्रातंव्रातं गणंगणं सुशस्तिभि: ।
अनु क्रामेम धीतिभि: ११
कस्मा अद्य सुजाताय रातहव्याय प्र ययु: ।
एना यामेन मरुत: १२ १४५
येन तोकाय तनयाय धान्यं बीजं वहध्वे अक्षितम् ।
अस्मभ्यं तद् धत्तन यद् व ईमहे राधो विश्वायु सौभगम् १३
अतीयाम निदस्तिर: स्वस्तिभि—र्हित्वावद्यमरातीः ।
वृष्ट्वी शं योराप उस्रि भेषजं स्याम मरुत: सह १४
सुदेव: समहासति सुवीरो नरो मरुत: स मर्त्य: ।
यं त्रायध्वे स्याम ते १५
स्तुहि भोजान्त्स्तुवतो अस्य यामनि रणन् गावो न यवसे ।
यत: पूर्वाँ इव सखीँरनु ह्वय गिरा गृणीहि कामिन: १६

॥ २४ ॥ (ऋ० ५।५४।१-१५) जगती, १४ त्रिष्टुप् ।

प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा पर्वतच्युते ।
घर्मस्तुभे दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णमर्चत १ १५०
प्र वो मरुतस्तविषा उदन्यवो वयोवृधो अश्वयुज परिज्रय: ।
सं विद्युता दधति वाशति त्रित: स्वरन्त्यापोऽवना परिज्रय: २
विद्युन्महसो नरो अश्मदिद्यवो वातत्विषो मरुत: पर्वतच्युत: ।
अब्दया चिन्मुहुरा ह्रादुनीवृत: स्तनयदमा रभसा उदोजस: ३
व्यक्तून् रुद्रा व्यहानि शिक्वसो व्यन्तरिक्षं वि रजांसि धूतय: ।
वि यदज्राँ अजथ नाव ईं यथा वि दुर्गाणि मरुतो नाह रिष्यथ ४ १५१

तद् वीर्यं वो मरुतो महित्वनं दीर्घं ततान सूर्यो न योजनम् ।
एता न यामे अगृभीतशोचिषो ऽनश्वदां यन्न्ययातना गिरिम् ५
अभ्राजि शर्धो मरुतो यदर्णसं मोषथा वृक्षं कपनेव वेधसः ।
अध स्मा नो अरमतिं सजोषस श्चक्षुरिव यन्तमनु नेषथा सुगम् ६ २५५
न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति ।
नास्य राय उप दस्यन्ति नोतय ऋषिं वा यं राजानं वा सुषूदथ ७
नियुत्वन्तो ग्रामजितो यथा नरो ऽर्यमणो न मरुतः कबन्धिनः ।
पिन्वन्त्युत्सं यदिनासो अस्वरन् व्युन्दन्ति पृथिवीं मध्वो अन्धसा ८
प्रवत्वतीयं पृथिवी मरुद्भ्यः प्रवत्वती द्यौर्भवति प्रयद्भ्यः ।
प्रवत्वतीः पथ्या अन्तरिक्ष्याः प्रवत्वन्तः पर्वता जीरदानवः ९
यन्मरुतः सभरसः स्वर्णरः सूर्य उदिते मदथा दिवो नरः ।
न वोऽश्वाः श्रथयन्ताह सिस्रतः सद्यो अस्याध्वनः पारमश्नुथ १०
अंसेषु व ऋष्टयः पत्सु खादयो वक्षःसु रुक्मा मरुतो रथे शुभः ।
अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययीः ११ २६०
तं नाकमर्यो अगृभीतशोचिषं रुशत् पिप्पलं मरुतो वि धूनुथ ।
समच्यन्त वृजनातित्विषन्त यत् स्वरन्ति घोषं विततमृतायवः १२
युष्मादत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो३ वयस्वतः ।
न यो युच्छति तिष्यो३ यथा दिवो३ ऽस्मे रारन्त मरुतः सहस्रिणम् १३
यूयं रयिं मरुतः स्पार्हवीरं यूयमृषिमवथ सामविप्रम् ।
यूयमर्वन्तं भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमन्तम् १४
तद् वो यामि द्रविणं सद्यऊतयो येना स्व१र्ण ततनाम नॄँरभि ।
इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः १५

॥ २५ ॥ (ऋ० ५।५५।१-१०) जगती, १० त्रिष्टुप् ।

प्रयज्यवो मरुतो भ्राजदृष्टयो बृहद् वयो दधिरे रुक्मवक्षसः ।
ईयन्ते अश्वैः सुयमेभिराशुभिः शुभं यातामनु रथा अवृत्सत १ २६५
स्वयं दधिध्वे तविषीं यथा विद बृहन्महान्त उर्विया वि राजथ ।
उतान्तरिक्षं ममिरे व्योजसा शुभं यातामनु रथा अवृत्सत २
साकं जाताः सुभ्वः साकमुक्षिताः श्रिये चिदा प्रतरं वावृधुर्नरः ।
विरोकिणः सूर्यस्येव रश्मयः शुभं यातामनु रथा अवृत्सत ३ २६७

आभूषेण्यं वो मरुतो महित्वनं विदृक्षेण्यं सूर्यस्येव चक्षणम् ।
उतो अस्माँ अमृतत्वे दधातन शुभं यातामनु रथा अवृत्सत ४
उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।
न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत ५
यदश्वान् धूर्षु पृषतीरयुग्ध्वं हिरण्ययान् प्रत्यत्काँ अमुग्ध्वम् ।
विश्वा इत् स्पृधो मरुतो व्यस्यथ शुभं यातामनु रथा अवृत्सत ६ १७०
न पर्वता न नद्यो वरन्त वो यत्राचिध्वं मरुतो गच्छथेदु तत् ।
उत द्यावापृथिवी याथना परि शुभं यातामनु रथा अवृत्सत ७
यत् पूर्व्यं मरुतो यच्च नूतनं यदुद्यते वसवो यच्च शस्यते ।
विश्वस्य तस्य भवथा नवेदसः शुभं यातामनु रथा अवृत्सत ८
मृळत नो मरुतो मा वधिष्टना—ऽस्मभ्यं शर्म बहुलं वि यन्तन ।
अधि स्तोत्रस्य सख्यस्य गातन शुभं यातामनु रथा अवृत्सत ९
यूयमस्मान् नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणानाः ।
जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणाम् १०

॥ २६ ॥ (ऋ० ५।५६।१-९) बृहती; ३, ७ सतो बृहती ।

अग्ने शर्धन्तमा गणं पिष्टं रुक्मेभिरञ्जिभिः ।
विशो अद्य मरुतामव ह्वये दिवश्चित् रोचनादधि १ १७५
यथा चिन्मन्यसे हृदा तदिन्मे जग्मुराशसः ।
ये ते नेदिष्ठं हवनान्यागमन् तान् वर्ध भीमसंदृशः २
मीळ्हुष्मतीव पृथिवी पराहता मदन्त्येत्यस्मदा ।
ऋक्षो न वो मरुतः शिमीवाँ अमो दुध्रो गौरिव भीमयुः ३
नि ये रिणन्त्योजसा वृथा गावो न दुर्धुरः ।
अश्मानं चित् स्वर्यं पर्वतं गिरिं प्र च्यावयन्ति यामभिः ४
उत तिष्ठ नूनमेषां स्तोमैः समुक्षितानाम् ।
मरुतां पुरुतममपूर्व्यं गवां सर्गमिव ह्वये ५
युङ्ग्ध्वं ह्यरुषी रथे युङ्ग्ध्वं रथेषु रोहितः ।
युङ्ग्ध्वं हरी अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ६ १८०
उत स्य वाज्यरुषस्तुविष्वणि—रिह स्म धायि दर्शतः ।
मा वो यामेषु मरुतश्चिरं करत् प्र तं रथेषु चोदत ७ १८१

रथं नु मारुतं वयं श्रवस्युमा हुवामहे ।
आ यस्मिन् तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी ८
तं वः शर्धं रथेशुभं त्वेषं पनस्युमा हुवे ।
यस्मिन्त्सुजाता सुभगा महीयते सचा मरुत्सु मीळ्हुषी ९

॥ २७ ॥ (ऋ० ५।५७।१-८) जगती, ७-८ त्रिष्टुप् ।

आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुविताय गन्तन ।
इयं वो अस्मत् प्रति हर्यते मति-स्तृष्णजे न दिव उत्सा उदन्यवे १
वाशीमन्त ऋष्टिमन्तो मनीषिणः सुधन्वान इषुमन्तो निषङ्गिणः ।
स्वश्वाः स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभम् २ २८५
धूनुथ द्यां पर्वतान् दाशुषे वसु नि वो वना जिहते यामनो भिया ।
कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृषतीरयुग्ध्वम् ३
वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृशः सुपेशसः ।
पिशङ्गाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ४
पुरुद्रप्सा अञ्जिमन्तः सुदानव-स्त्वेषसंदृशो अनवभ्रराधसः ।
सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे ५
ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितम् ।
नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु पिपिशे ६
गोमदश्वावद् रथवत् सुवीरं चन्द्रवद् राधो मरुतो ददा नः ।
प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोऽवसो दैव्यस्य ७ २९०
हये नरो मरुतो मृळता न-स्तुवीमघासो अमृता ऋतज्ञाः ।
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ८

॥ २८ ॥ (ऋ० ५।५८।१-८) त्रिष्टुप् ।

तमु नूनं तविषीमन्तमेषां स्तुषे गणं मारुतं नव्यसीनाम् ।
य आश्वश्वा अमवद् वहन्त उतेशिरे अमृतस्य स्वराजः १
त्वेषं गणं तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारम् ।
मयोभुवो ये अमिता महित्वा वन्दस्व विप्र तुविराधसो नॄन् २
आ वो यन्तूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनन्ति ।
अयं यो अग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः ३
यूयं राजानमिर्यं जनाय विभ्वतष्टं जनयथा यजत्राः ।
युष्मदेति मुष्टिहा बाहुजूतो युष्मत् सदश्वो मरुतः सुवीरः ४ २९५

अरा इवेदचरमा अहेव प्रप्र जायन्ते अकवा महोभिः ।
पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः ५
यत् प्रायासिष्ट पृषतीभिरश्वै—र्वीळुपविभिर्मरुतो रथेभिः ।
क्षोदन्त आपो रिणते वना—न्यवोस्रियो वृषभः क्रन्दतु द्यौः ६
प्रथिष्ट यामन् पृथिवी चिदेषां भर्तेव गर्भं स्वमिच्छवो धुः ।
वातान् ह्यश्वान् धुर्यायुयुज्रे वर्षं स्वेदं चक्रिरे रुद्रियासः ७
हये नरो मरुतो मृळता न—स्तुवीमघासो अमृता ऋतज्ञाः ।
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ८

॥ २९ ॥ (ऋ० ५।५९।१-८) जगती, ८ त्रिष्टुप् ।

प्र वः स्पळक्रन्त्सुवितायं दावने ऽर्चा दिवे प्र पृथिव्या ऋतं भरे ।
उक्षन्ते अश्वान् तरुषन्त आ रजो ऽनु स्वं भानुं श्रथयन्ते अर्णवैः १ ३००
अमादेषां भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती ।
दूरेदृशो ये चितयन्त एमभि—रन्तर्महे विदथे येतिरे नरः २
गवामिव श्रियसे शृङ्गमुत्तमं सूर्यो न चक्षू रजसो विसर्जने ।
अत्या इव सुभ्व१श्चारवः स्थन मर्या इव श्रियसे चेतथा नरः ३
को वो महान्ति महतामुदश्नवत् कस्काव्या मरुतः को ह पौंस्या ।
यूयं ह भूमिं किरणं न रेजथ प्र यद् भरध्वे सुवितायं दावने ४
अश्वा इवेदरुषासः सबन्धवः शूरा इव प्रयुधः प्रोत युयुधुः ।
मर्या इव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्र मिनन्ति वृष्टिभिः ५
ते अज्येष्ठा अकनिष्ठास उद्भिदो ऽमध्यमासो महसा वि वावृधुः ।
सुजातासो जनुषा पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन ६ ३०५
वयो न ये श्रेणीः पप्तुरोजसा ऽन्तान् दिवो बृहतः सानुनस्परि ।
अश्वास एषामुभये यथा विदुः प्र पर्वतस्य नभनूँरचुच्यवुः ७
मिमातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतन्ताम् ।
आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः ८

॥ ३० ॥ ऋ० ५।६१।१-४;११-१६) गायत्री, ३ निचृत्

के ष्ठा नरः श्रेष्ठतमा य एकएक आयय । परमस्याः परावतः १
क्व१ वोऽश्वाः क्वा३भीशवः कथं शेक कथा यय । पृष्ठे सदो नसोर्यमः २
जघने चोद एषां वि सक्थानि नरो यमुः । पुत्रकृथे न जनयः ३ ३१०

परा वीरास एतन   मर्यासो भद्रजानयः   । अग्नितपो यथासथ   ४
य ईं वहन्त आशुभिः   पिबन्तो मदिरं मधु   । अत्र श्रवांसि दधिरे   ११
येषां श्रियाधि रोदसी   विभ्राजन्ते रथेष्वा   । दिवि रुक्म इवोपरि   १२
युवा स मारुतो गण—स्त्वेषरथो अनेद्यः   । शुभंयावाप्रतिष्कुतः   १३
को वेद नूनमेषां   यत्रा मदन्ति धूतयः   । ऋतजाता अरेपसः   १४   ३१५
यूयं मर्तं विपन्यवः   प्रणेतारं इत्था धिया   । श्रोतारो यामहूतिषु   १५
ते नो वसूनि काम्या   पुरुश्चन्द्रा रिशादसः   । आ यज्ञियासो ववृत्तन १६   ३१७

॥ ३१ ॥ (ऋ० ५।८७।१-९)

(३१८-३२६) एवयामरुदात्रेय । अतिजगती ।

प्र वो महे मतयो यन्तु विष्णवे   मरुत्वते गिरिजा एवयामरुत् ।
प्र शर्धाय प्रयज्यवे सुखादये   तवसे भन्ददिष्टये   धुनिव्रताय शवसे   १
प्र ये जाता महिना ये च नु स्वयं   प्र विद्मना ब्रुवत एवयामरुत् ।
क्रत्वा तद् वो मरुतो नाधृषे शवो   दाना मह्ना तदेषा—मधृष्टासो नाद्रयः   २
प्र ये दिवो बृहतः शृण्विरे गिरा   सुशुक्वानः सुभ्व एवयामरुत् ।
न येषामिरी सधस्थ ईष्ट आँ   अग्नयो न स्वविद्युतः   प्र स्पन्द्रासो धुनीनाम्   ३   ३२०
स चक्रमे महतो निरुरुक्रमः   समानस्मात् सदस एवयामरुत् ।
यदायुक्त त्मना स्वादधि ष्णुभि—र्विष्पर्धसो विमहसो जिगाति शेवृधो नृभिः   ४
स्वनो न वोऽमवान् रेजयद् वृषा   त्वेषो ययिस्तविष एवयामरुत् ।
येना सहन्त ऋञ्जत स्वरोचिषः   स्थारश्मानो हिरण्ययाः   स्वायुधास इष्मिणः   ५
अपारो वो महिमा वृद्धशवस—स्त्वेषं शवोऽवत्वेवयामरुत् ।
स्थातारो हि प्रसितौ संदृशि स्थन   ते न उरुष्यता निदः   शुशुक्वांसो नाग्नयः   ६
ते रुद्रासः सुमखा अग्नयो यथा   तुविद्युम्ना अवन्त्वेवयामरुत् ।
दीर्घं पृथु पप्रथे सद्म पार्थिवं   येषामज्मेष्वा महः   शर्धांस्यद्भुतैनसाम्   ७
अद्वेषो नो मरुतो गातुमेतन   श्रोता हवं जरितुरेवयामरुत् ।
विष्णोर्महः समन्यवो युयोतन   स्मद् रथ्यो३ न दंसना   ऽप द्वेषांसि सनुतः   ८   ३२५
गन्ता नो यज्ञं यज्ञियाः सुशमि   श्रोता हवमरक्ष एवयामरुत् ।
ज्येष्ठासो न पर्वतासो व्योमनि   यूयं तस्य प्रचेतसः   स्यात दुर्धर्तवो निदः   ९   ३२६

॥ ३२ ॥ (ऋ० ६।४८।११-१५,२०-२१)

• (३२७-३३३) शंयुर्बार्हस्पत्यः (तृणपाणि); [१३-१५ लिङ्गोक्ता वा]। ११ ककुप्, १२ सतो बृहती, १३ पुरउष्णिक्, १४ बृहती, १५ अतिजगती, २० बृहती, २१ महाबृहती यवमध्या।

आ सखायः सबर्दुघां धेनुमजध्वमुप नव्यसा वचः । सृजध्वमनपस्फुराम् ११
या शर्धाय मारुताय स्वभानवे श्रवोऽमृत्यु धुक्षत ।
या मृळीके मरुतां तुराणां या सुम्नैरेवयावरी १२
भरद्वाजायाव धुक्षत द्विता । धेनुं च विश्वदोहस मिषं च विश्वभोजसम् १३
तं व इन्द्रं न सुक्रतुं वरुणमिव मायिनम् ।
अर्यमणं न मन्द्रं सृप्रभोजसं विष्णुं न स्तुष आदिशे १४ ३३०
त्वेषं शर्धो न मारुतं तुविष्वण्यनर्वाणं पूषणं सं यथा शता ।
सं सहस्रा कारिषच्चर्षणिभ्य आँ आविर्गूळ्हा वसू करत् सुवेदा नो वसू करत् १५
वामी वामस्य धूतयः प्रणीतिरस्तु सूनृता ।
देवस्य वा मरुतो मर्त्यस्य वेजानस्य प्रयज्यवः २०
सद्यश्चिद् यस्य चर्कृतिः परि द्यां देवो नैति सूर्यः ।
त्वेषं शवो दधिरे नाम यज्ञियं मरुतो वृत्रहं शवो ज्येष्ठं वृत्रहं शवः २१ ३३३

॥ ३३ ॥ (ऋ० ६।६६।१-११)

(३३४-३४४) बार्हस्पत्यो भरद्वाजः । त्रिष्टुप् ।

वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानम् ।
मर्तेष्वन्यद् दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः १
ये अग्नयो न शोशुचन्निधाना द्विर्यत् त्रिर्मरुतो वावृधन्त ।
अरेणवो हिरण्ययास एषां साकं नृम्णैः पौंस्येभिश्च भूवन् २ ३३५
रुद्रस्य ये मीळ्हुषः सन्ति पुत्रा याँश्चो नु दाधृविर्भरध्यै ।
विदे हि माता महो मही षा सेत् पृश्निः सुभ्वे गर्भमाधात् ३
न य ईषन्ते जनुषोऽया न्वन्तः सन्तोऽवद्यानि पुनानाः ।
निर्यद् दुह्रे शुचयोऽनु जोषमनु श्रिया तन्वमुक्षमाणाः ४
मक्षू न येषु दोहसे चिदया आ नाम धृष्णु मारुतं दधानाः ।
न ये स्तौना अयासो मह्ना नू चित् सुदानुरव यासदुग्रान् ५
त इदुग्राः शवसा धृष्णुषेणा उभे युजन्त रोदसी सुमेके ।
अध स्मैषु रोदसी स्वशोचिरामवत्सु तस्थौ न रोकः ६ ३३९

अनेनो वो मरुतो यामो अस्त्व--नश्वश्चिद् यमजत्यरथीः ।
अनवसो अनभीशू रजस्तू--र्वि रोदसी पथ्या याति साधन् ७ ३४०
नास्य वर्ता न तरुता न्वस्ति मरुतो यमवथ वाजसातौ ।
तोके वा गोषु तनये यमप्सु स व्रजं दर्ता पार्ये अध द्योः ८
प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम् ।
ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः ९
त्विषीमन्तो अध्वरस्येव दिद्युत् तृषुच्यवसो जुह्वो३ नाग्नेः ।
अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः १०
तं वृधन्तं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे ।
दिवः शर्धाय शुचयो मनीषा गिरयो नाप उग्रा अस्पृध्रन् ११ ३४४

॥ ३४ ॥ (ऋ० ७।५६।१-२५)

(३४५-३९४) मैत्रावरुणिर्वसिष्ठः । त्रिष्टुप्, १-११ द्विपदा विराट् ।

क ईं व्यक्ता नरः सनीळा रुद्रस्य मर्या अधा स्वश्वाः १ ३४५
नकिर्ह्येषां जनूंषि वेद ते अङ्ग विद्रे मिथो जनित्रम् २
अभि स्वपूभिर्मिथो वपन्त वातस्वनसः श्येना अस्पृध्रन् ३
एतानि धीरो निण्या चिकेत पृश्निर्यदूधो मही जभार ४
सा विट् सुवीरा मरुद्भिरस्तु सनात् सहन्ती पुष्यन्ती नृम्णम् ५
यामं येष्ठाः शुभा शोभिष्ठाः श्रिया संमिश्ला ओजोभिरुग्राः ६ ३५०
उग्रं व ओजः स्थिरा शवांस्य--धा मरुद्भिर्गणस्तुविष्मान् ७
शुभ्रो वः शुष्मः क्रुध्मी मनांसि धुनिर्मुनिरिव शर्धस्य धृष्णोः ८
सनेम्यस्मद् युयोत दिद्युं मा वो दुर्मतिरिह प्रणङ्नः ९
प्रिया वो नाम हुवे तुराणा--मा यत् तृपन्मरुतो वावशानाः १०
स्वायुधास इष्मिणः सुनिष्का उत स्वयं तन्व१ः शुम्भमानाः ११ ३५५
शुची वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः ।
ऋतेन सत्यमृतसाप आय--ञ्छुचिजन्मानः शुचयः पावकाः १२
अंसेष्वा मरुतः खादयो वो वक्षःसु रुक्मा उपशिश्रियाणाः ।
वि विद्युतो न वृष्टिभी रुचाना अनु स्वधामायुधैर्यच्छमानाः १३
प्र बुध्न्या व ईरते महांसि प्र नामानि प्रयज्यवस्तिरध्वम् ।
सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वम् १४ ३५८

यदि स्तुतस्य मरुतो अधीथे—त्था विप्रस्य वाजिनो हवीमन् ।
मक्षू रायः सुवीर्यस्य दात नू चिद् यमन्य आदभदरावा १५
अत्यासो न ये मरुतः स्वञ्चो यक्षदृशो न शुभयन्त मर्याः ।
ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीळिनः पयोधाः १६ ३६०
दशस्यन्तो नो मरुतो मृळन्तु वरिवस्यन्तो रोदसी सुमेके ।
आरे गोहा नृहा वधो वो अस्तु सुम्नेभिरस्मे वसवो नमध्वम् १७
आ वो होता जोहवीति सत्तः सत्राचीं रातिं मरुतो गृणानः ।
य ईवतो वृषणो अस्ति गोपाः सो अद्वयावी हवते व उक्थैः १८
इमे तुरं मरुतो रामयन्ती—मे सहः सहस आ नमन्ति ।
इमे शंसं वनुष्यतो नि पान्ति गुरु द्वेषो अररुषे दधन्ति १९
इमे रध्रं चिन्मरुतो जुनन्ति भृमिं चिद् यथा वसवो जुषन्त ।
अप बाधध्वं वृषणस्तमांसि धत्त विश्वं तनयं तोकमस्मे २०
मा वो दात्रान्मरुतो निरराम मा पश्चाद् दघ्म रथ्यो विभागे ।
आ नः स्पार्हे भजतना वसव्ये३ यदीं सुजातं वृषणो वो अस्ति २१ ३६५
सं यद्धनन्त मन्युभिर्जनासः शूरा यह्वीष्वोषधीषु विक्षु ।
अध स्मा नो मरुतो रुद्रियास—स्त्रातारो भूत पृतनास्वर्यः २२
भूरि चक्र मरुतः पित्र्याण्यु—क्थानि या वः शस्यन्ते पुरा चित् ।
मरुद्भिरुग्रः पृतनासु साळ्हा मरुद्भिरित् सनिता वाजमर्वा २३
अस्मे वीरो मरुतः शुष्म्यस्तु जनानां यो असुरो विधर्ता ।
अपो येन सुक्षितये तरेमा—ऽध स्वमोको अभि वः स्याम २४
तन्न इन्द्रो वरुणो मित्रो अग्नि—राप ओषधीर्वनिनो जुषन्त ।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः २५

॥ ३५ ॥ (ऋ० ७।५७।१-७) त्रिष्टुप् ।

मध्वो वो नाम मारुतं यजत्राः प्र यज्ञेषु शवसा मदन्ति ।
ये रेजयन्ति रोदसी चिदुर्वी पिन्वन्त्युत्सं यदयासुरुग्राः १ ३७०
निचेतारो हि मरुतो गृणन्तं प्रणेतारो यजमानस्य मन्म ।
अस्माकमद्य विदथेषु बर्हि—रा वीतये सदत पिप्रियाणाः २
नैतावदन्ये मरुतो यथेमे भ्राजन्ते रुक्मैरायुधैस्तनूभिः ।
आ रोदसी विश्वपिशः पिशानाः समानमञ्ज्यञ्जते शुभे कम् ३ ३७१

ऋधक् सा वो मरुतो दिद्युदस्तु यद् व आगः पुरुषता कराम ।
मा वस्तस्यामपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा ४
कृते चिदत्र मरुतो रणन्ताऽनवद्यासः शुचयः पावकाः ।
प्र णोऽवत सुमतिभिर्यजत्राः प्र वाजेभिस्तिरत पुष्यसे नः ५
उत स्तुतासो मरुतो व्यन्तु विश्वेभिर्नामभिर्नरो हवींषि ।
ददात नो अमृतस्य प्रजायै जिगृत रायः सूनृता मघानि ६ ३७५
आ स्तुतासो मरुतो विश्व ऊती अच्छा सूरीन्त्सर्वताता जिगात ।
ये नस्त्मना शतिनो वर्धयन्ति यूयं पात स्वस्तिभिः सदा नः ७

॥ ३६ ॥ (ऋ० ७।५८।१-६)

प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुविष्मान् ।
उत क्षोदन्ति रोदसी महित्वा नक्षन्ते नाकं निर्ऋतेरवंशात् १
जनूश्चिद् वो मरुतस्त्वेष्येण भीमासस्तुविमन्यवोऽयासः ।
प्र ये महोभिरोजसोत सन्ति विश्वो वो यामन् भयते स्वर्दृक् २
बृहद् वयो मघवद्भ्यो दधात जुजोषन्निन्मरुतः सुष्टुतिं नः ।
गतो नाध्वा वि तिराति जन्तुं प्र णः स्पार्हाभिरूतिभिस्तिरेत ३
युष्मोतो विप्रो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्री ।
युष्मोतः सम्राळुत हन्ति वृत्रं प्र तद् वो अस्तु धूतयो देष्णम् ४ ३८०
ताँ आ रुद्रस्य मीळ्हुषो विवासे कुविन्नंसन्ते मरुतः पुनर्नः ।
यत् सस्वर्ता जिहीळिरे यदाविरव तदेन ईमहे तुराणाम् ५
प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषन्त ।
आराच्चिद् द्वेषो वृषणो युयोत यूयं पात स्वस्तिभिः सदा नः ६

॥ ३७ ॥ (७।५९।१-१२)

(प्रगाथः= (विषमा बृहती, समा सतोबृहती), ७-८ त्रिष्टुप्, ९-१२ गायत्री ।)

यं त्रायध्व इदमिदं देवासो यं च नयथ ।
तस्मा अग्ने वरुण मित्रार्यमन् मरुतः शर्म यच्छत १
युष्माकं देवा अवसाहनि प्रिय ईजानस्तरति द्विषः ।
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति २
नहि वश्चरमं चन वसिष्ठः परिमंसते ।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबत कामिनः ३ ३८१

नहि व ऊतिः पृतनासु मर्धति यस्मा अराध्वं नरः ।
अभि व आवर्त् सुमतिर्नवीयसी तूयं यात पिपीषवः ४
ओ षु घृष्विराधसो यातनान्धांसि पीतये ।
इमा वो हव्या मरुतो ररे हि कं मो ष्व१न्यत्र गन्तन ५
आ च नो बर्हिः सदताविता च नः स्पार्हाणि दातवे वसु ।
अस्रेधन्तो मरुतः सोम्ये मधौ स्वाहेह मादयाध्वै ६
सस्वश्चिद्धि तन्व१ः शुम्भमाना आ हंसासो नीलपृष्ठा अपप्तन् ।
विश्वं शर्धो अभितो मा नि षेद नरो न रण्वाः सवने मदन्तः ७
यो नो मरुतो अभि दुर्हृणायु-स्तिरश्चित्तानि वसवो जिघांसति ।
द्रुहः पाशान् प्रति स मुचीष्ट तपिष्ठेन हन्मना हन्तना तम् ८ ३९०
सान्तपना इदं हवि-र्मरुतस्तज्जुजुष्टन । युष्माकोती रिशादसः ९
गृहमेधास आ गत मरुतो माप भूतन । युष्माकोती सुदानवः १०
इहेह वः स्वतवसः कवयः सूर्यत्वचः । यज्ञं मरुत आ वृणे ११

॥ ३८ ॥ (ऋ० ७।१०४।१८) जगती ।

वि तिष्ठध्वं मरुतो विक्ष्वि१च्छत गृभायत रक्षसः सं पिनष्टन ।
वयो ये भूत्वी पतयन्ति नक्तभि-र्ये वा रिपो दधिरे देवे अध्वरे १८ ३९४

॥ ३९ ॥ (ऋ० ८।९४।१-१२)

(३९५-४०६) बिन्दुः पूतदक्षो वा आङ्गिरसः । गायत्री ।

गौर्धयति मरुतां श्रवस्युर्माता मघोनाम् । युक्ता वह्नी रथानाम् १ ३९५
यस्या देवा उपस्थे व्रता विश्वे धारयन्ते । सूर्यामासा दृशे कम् २
तत् सु नो विश्वे अर्य आ सदा गृणन्ति कारवः । मरुतः सोमपीतये ३
अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः । उत स्वराजो अश्विना ४
पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः । त्रिषधस्थस्य जावतः ५
उतो न्वस्य जोषमाँ इन्द्रः सुतस्य गोमतः । प्रातर्होतेव मत्सति ६ ४००
कदत्विषन्त सूरय-स्तिर आप इव स्रिधः । अर्षन्ति पूतदक्षसः ७
कद्वो अद्य महानां देवानामवो वृणे । त्मना च दस्मवर्चसाम् ८
आ ये विश्वा पार्थिवानि पप्रथन् रोचना दिवः । मरुतः सोमपीतये ९
त्यान् नु पूतदक्षसो दिवो वो मरुतो हुवे । अस्य सोमस्य पीतये १०
त्यान् नु ये वि रोदसी तस्तभुर्मरुतो हुवे । अस्य सोमस्य पीतये ११ ४०५
त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे । अस्य सोमस्य पीतये १२ ४०६

॥ ४० ॥ (ऋ० १०।७७।१-८)

(४०७-४१२) स्यूमरश्मिर्भार्गवः । त्रिष्टुप्, ५ जगती ।

अभ्रप्रुषो न वाचा प्रुषा वसु　हविष्मन्तो न यज्ञा विजानुषः
सुमारुतं न ब्रह्माणमर्हसे　गणमस्तोष्येषां न शोभसे　१
श्रिये मर्यासो अञ्जीँरकृण्वत　सुमारुतं न पूर्वीरति क्षपः ।
दिवस्पुत्रास एता न येतिर　आदित्यासस्ते अक्रा न वावृधुः　२
प्र ये दिवः पृथिव्या न बर्हणा　त्मना रिरिच्रे अभ्रान्न सूर्यः ।
पाजस्वन्तो न वीराः पनस्यवो　रिशादसो न मर्या अभिद्यवः　३
युष्माकं बुध्ने अपां न यामनि　विथुर्यति न मही श्रथर्यति ।
विश्वप्सुर्यज्ञो अर्वागयं सु वः　प्रयस्वन्तो न सत्राच आ गत　४　४१०
यूयं धूर्षु प्रयुजो न रश्मिभि--र्ज्योतिष्मन्तो न भासा व्युष्टिषु ।
श्येनासो न स्वयशसो रिशादसः　प्रवासो न प्रसितासः परिप्रुषः　५
प्र यद् वहध्वे मरुतः पराकाद्　यूयं महः संवरणस्य वस्वः ।
विदानासो वसवो राध्यस्या--ऽऽराच्चिद् द्वेषः सनुतर्युयोत　६
य उदृचि यज्ञे अध्वरेष्ठा　मरुद्भ्यो न मानुषो ददाशत् ।
रेवत् स वयो दधते सुवीरं　स देवानामपि गोपीथे अस्तु　७
ते हि यज्ञेषु यज्ञियास ऊमा　आदित्येन नाम्ना शंभविष्ठाः ।
ते नोऽवन्तु रथतूर्मनीषां　महश्च यामन्नध्वरे चकानाः　८

॥ ४१ ॥ (ऋ० १०।७८।१-८) त्रिष्टुप्, २,५-६ जगती ।

विप्रासो न मन्मभिः स्वाध्यो　देवाव्यो न यज्ञैः स्वप्नसः ।
राजानो न चित्राः सुसंदृशः　क्षितीनां न मर्या अरेपसः　१　४१५
अग्निर्न ये भ्राजसा रुक्मवक्षसो　वातासो न स्वयुजः सद्यऊतयः ।
प्रज्ञातारो न ज्येष्ठाः सुनीतयः　सुशर्माणो न सोमा ऋतं यते　२
वातासो न ये धुनयो जिगत्नवो　ऽग्नीनां न जिह्वा विरोकिणः ।
वर्मण्वन्तो न योधाः शिमीवन्तः　पितॄणां न शंसाः सुरातयः　३
रथानां न येऽराः सनाभयो　जिगीवांसो न शूरा अभिद्यवः ।
वरेयवो न मर्या घृतप्रुषो　ऽभिस्वर्तारो अर्कं न सुष्टुभः　४
अश्वासो न ये ज्येष्ठास आशवो　दिधिषवो न रथ्यः सुदानवः ।
आपो न निम्नैरुदभिर्जिगत्नवो　विश्वरूपा अङ्गिरसो न सामभिः　५　४१९

ग्रावाणो न सूरयः सिन्धुमातर आदर्दिरासो अद्रयो न विश्वहा ।
शिशूला न क्रीळयः सुमातरो महाग्रामो न यामन्नुत त्विषा ६ ४२०
उषसां न केतवोऽध्वरश्रियः शुभंयवो नाञ्जिभिर्व्यश्वितन् ।
सिन्धवो न ययियो भ्राजदृष्टयः परावतो न योजनानि ममिरे ७
सुभागान्नो देवाः कृणुता सुरत्ना–नस्मान्त्स्तोतॄन् मरुतो वावृधानाः ।
अधि स्तोत्रस्य सख्यस्य गात सनाद्धि वो रत्नधेयानि सन्ति ८ ४२१

॥ ४१ ॥ (य० ३।४४)

प्रघासिनो हवामहे मरुतश्च रिशादसः । करम्भेण सजोषसः ४४ ४२३

॥ ४३ ॥ (य० ७।३६)

उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ।
उपयामगृहीतोऽसि मरुतां त्वौजसे ३६ ४२४

॥ ४४ ॥ (४२५-४२७) (य० १७।८४-८६)

ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास एतन ।
मितासश्च सम्मितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन् ८४ ४२५
स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च । क्रीडी च शाकी चोज्जेषी ८५
इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् ।
एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ८६ ४२७

॥ ४५ ॥ (य० २५।२०)

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह २० ४२८

॥ ४६ ॥ (साम० ३५६) श्यावाश्व आत्रेयः । अनुष्टुप् ।

यदी वहन्त्याशवो भ्राजमाना रथेष्वा । पिबन्तो मदिरं मधु तत्र श्रवांसि कृण्वते ५ ४२९

॥ ४७ ॥ (अथर्व० १।२६।३-४)

(४३०-४३३) ब्रह्मा । ३ गायत्री, ४ एकावसाना पादनिचृत् ।

यूयं नः प्रवतो नपा–न्मरुतः सूर्यत्वचसः । शर्म यच्छाथ सप्रथाः ३ ४३०
सुषूदत मृडत मृडया नस्तनूभ्यो मयस्तोकेभ्यस्कृधि ४

॥ ४८ ॥ (अथर्व० ५।२६।५) द्विपदार्षी उष्णिक् ।

छन्दांसि यज्ञे मरुतः स्वाहा मातेव पुत्रं पिपृतेह युक्ताः ५ ४३१

॥ ४९ ॥ (अथर्व० १३।१।३) जगती ।

यूयमुग्रा मरुतः पृश्निमातर इन्द्रेण युजा प्र मृणीत शत्रून् ।
आ वो रोहितः शृणवत् सुदानव – स्त्रिषप्तासो मरुतः स्वादुसंमुदः ३ ४३३

॥ ५० ॥ (अथर्व० ३।१।२)
(४३४-४३६) अथर्वा । विराड्गर्भा भुरिक् ।

यूयमुग्रा मरुत ईदृशे स्थाभि प्रेत मृणत सहध्वम् ।
अमीमृणन् वसवो नाथिता इमे अग्निर्ह्येषां दूतः प्रत्येतु विद्वान् २

॥ ५१ ॥ (अथर्व० ३।२।६) त्रिष्टुप् ।

असौ या सेना मरुतः परेषा – मस्मानैत्यभ्योजसा स्पर्धमाना ।
तां विध्यत तमसापव्रतेन यथैषामन्यो अन्यं न जानात् ६ ४३५

॥ ५२ ॥ (अथर्व० ५।२४।६) चतुष्पदातिशक्वरी ।

मरुतः पर्वतानामधिपतयस्ते मावन्तु । अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां
प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ६ ४३६

॥ ५३ ॥ (अथर्व० ४।१३।४) (४३७-४३९) शंतातिः । अनुष्टुप् ।

त्रायन्तामिमं देवा – स्त्रायन्तां मरुतां गणाः । त्रायन्तां विश्वा भूतानि यथायमरपा असत् ४

॥ ५४ ॥ (अथर्व० ६।२२।२-३) २ चतुष्पदा भुरिग्जगती, ३ त्रिष्टुप् ।

पयस्वतीः कृणुथाप ओषधीः शिवा यदेजथा मरुतो रुक्मवक्षसः ।
ऊर्जं च तत्र सुमतिं च पिन्वत यत्रा नरो मरुतः सिञ्चथा मधु २
उदप्रुतो मरुतस्ताँ इयर्त वृष्टिर्या विश्वा निवतस्पृणाति ।
एजाति ग्लहा कन्येव तुन्नै – रुं तुन्दाना पत्येव जाया ३ ४३९

॥ ५५ ॥ (अथर्व० ४।२७।१-७) (४४०-४४६) १-७ मृगारः । त्रिष्टुप् ।

मरुतां मन्वे अधि मे ब्रुवन्तु प्रेमं वाजं वाजसाते अवन्तु ।
आशूनिव सुयमानह्व ऊतये ते नो मुञ्चन्त्वंहसः १ ४४०
उत्समक्षितं व्यचन्ति ये सदा य आसिञ्चन्ति रसमोषधीषु ।
पुरो दधे मरुतः पृश्निमातॄं – स्ते नो मुञ्चन्त्वंहसः २
पयो धेनूनां रसमोषधीनां जवमर्वतां कवयो य इन्वथ ।
शग्मा भवन्तु मरुतो नः स्योना – स्ते नो मुञ्चन्त्वंहसः ३
अपः समुद्राद् दिवमुद्वहन्ति दिवस्पृथिवीमभि ये सृजन्ति ।
ये अद्भिरीशाना मरुतश्चरन्ति ते नो मुञ्चन्त्वंहसः ४
ये कीलालेन तर्पयन्ति ये घृतेन ये वा वयो मेदसा संसृजन्ति ।
ये अद्भिरीशाना मरुतो वर्षयन्ति ते नो मुञ्चन्त्वंहसः ५ ४४४

यदीदिदं मरुतो मारुतेन यदि देवा दैव्येनेदृगार ।
यूयमीशिध्वे वसवस्तस्य निष्कृते—स्ते नो मुञ्चन्त्वंहसः ६
तिग्ममनीकं विदितं सहस्व—न्मारुतं शर्धः पृतनासूग्रम् ।
स्तौमि मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वंहसः ७ ४४६

॥ ५६ ॥ (अथर्व० ७।७७[८२]।३)(४४७) अङ्गिराः । जगती ।

संवत्सरीणा मरुतः स्वर्का उरुक्षयाः सगणा मानुषासः ।
ते अस्मत् पाशान् प्र मुञ्चन्त्वेनसः सांतपना मत्सरा मादयिष्णवः ३ ४४७

मरुत्सहचारी देवगणः ।

(१) मरुद्रुद्रविष्णवः ।

॥ ५७ ॥ (ऋ० ५।३।३) (४४८) वसुश्रुत आत्रेयः । त्रिष्टुप् ।

तव श्रिये मरुतो मर्जयन्त रुद्र यत् ते जनिम चारु चित्रम् ।
पदं यद् विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनाम् ३ ४४८

(२) मरुतोऽग्नामरुतौ वा ।

॥ ५८ ॥ (ऋ० ५।६०।१-८)
(४४९-४५६) श्यावाश्व आत्रेयः । त्रिष्टुप्, ७-८ जगती ।

ईळे अग्निं स्ववसं नमोभि—रिह प्रसत्तो वि चयत् कृतं नः ।
रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्याम् १
आ ये तस्थुः पृषतीषु श्रुतासु सुखेषु रुद्रा मरुतो रथेषु ।
वना चिदुग्रा जिहते नि वो भिया पृथिवी चिद् रेजते पर्वतश्चित् २ ४५०
पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित् सानु रेजत स्वने वः ।
यत् क्रीळथ मरुत ऋष्टिमन्त आप इव सध्र्यञ्चो धवध्वे ३
वरा इवेद् रैवतासो हिरण्यै—रभि स्वधाभिस्तन्वः पिपिश्रे ।
श्रिये श्रेयांसस्तवसो रथेषु सत्रा महांसि चक्रिरे तनूषु ४
अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय ।
युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः ५
यदुत्तमे मरुतो मध्यमे वा यद् वावमे सुभगासो दिवि ष्ठ ।
अतो नो रुद्रा उत वा न्व१स्या—ऽग्ने वित्ताद्धविषो यद् यजाम ६
अग्निश्च यन्मरुतो विश्ववेदसो दिवो वहध्व उत्तरादधि ष्णुभिः ।
ते मन्दसाना धुनयो रिशादसो वामं धत्त यजमानाय सुन्वते ७ ४५५

अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिः सोमं पिब मन्दसानो गणश्रिभिः ।
पावकेभिर्विश्वमिन्वेभिरायुभि- र्वैश्वानर प्रदिवा केतुना सजूः ८ ५५६

(३) सोमः मरुतः ।

॥ ५९ ॥ (अथर्व० १।२०।१) अथर्वा । त्रिष्टुप् ।

अदारसृद् भवतु देव सोमा- ऽस्मिन् यज्ञे मरुतो मृडता नः ।
मा नो विददभिभा मो अशस्ति- र्मा नो विदद् वृजिना द्वेष्या या १ ४५७

(४) मरुत्पर्जन्यौ ।

॥ ६० ॥ (अथर्व० ४।१५।४) विराट् पुरस्ताद्बृहती ।

गणास्त्वोप गायन्तु मारुताः पर्जन्य घोषिणः पृथक् ।
सर्गा वर्षस्य वर्षतो वर्षन्तु पृथिवीमनु ४ ४५८

(५) मरुत आपः ।

॥ ६१ ॥ (४५९-४६४) (अथर्व ४।१५।५-१०)
(५ विराड् जगती, ७ अनुष्टुप्, ६, ८ त्रिष्टुप्, ९ पथ्या पंक्तिः, १० भुरिक् ।)

उदीरयत मरुतः समुद्रत- स्त्वेषो अर्को नभ उत्पातयाथ ।
महऋषभस्य नदतो नभस्वतो वाश्रा आपः पृथिवीं तर्पयन्तु ५
अभि क्रन्द स्तनयार्दयोदधिं भूमिं पर्जन्य पयसा समङ्ग्धि ।
त्वया सृष्टं बहुलमैतु वर्ष- माशारैषी कृशगुरेत्वस्तम् ६ ४६०
सं वोऽवन्तु सुदानव उत्सा अजगरा उत ।
मरुद्भिः प्रच्युता मेघा वर्षन्तु पृथिवीमनु ७
आशामाशां वि द्योततां वाता वान्तु दिशोदिशः ।
मरुद्भिः प्रच्युता मेघाः सं यन्तु पृथिवीमनु ८
आपो विद्युदभ्रं वर्षं सं वोऽवन्तु सुदानव उत्सा अजगरा उत ।
मरुद्भिः प्रच्युता मेघाः प्रावन्तु पृथिवीमनु ९
अपामग्निस्तनूभिः संविदानो य ओषधीनामधिपा बभूव ।
स नो वर्षं वनुतां जातवेदाः प्राणं प्रजाभ्यो अमृतं दिवस्परि १० ४६४

मरुद्देवता-पुनरुक्त-मन्त्रभागाः।

ऋग्वेदस्य प्रथमं मण्डलम्।

[४] १।६।९ (मधुच्छन्दा वैश्वामित्रः। मरुतः)
दिवो वा रोचनादधि।
१।४९।१ (प्रस्कण्वः काण्वः। उषा)
दिवश्चिद् रोचनादधि।
(२७५) ५।५६।१ (श्यावाश्व आत्रेयः। मरुतः)
८।८।७ (सध्वंसः काण्वः। अश्विनौ)
दिवश्चिद् रोचनादध्या।
[५] १।१५।२ (मेधातिथिः काण्वः। मरुतः)
यूयं हि ष्ठा सुदानवः।
६।५१।१५ (ऋजिश्वा भारद्वाजः। विश्वेदेवाः)
(५७) ८।७।१२ (पुनर्वत्सः काण्वः। मरुतः)
८।८३।९ (कुसीदी काण्वः। विश्वे देवाः)
[९] १।३७।४ (कण्वो घौरः। मरुतः)
प्र व ...।
देवत्तं ब्रह्म गायत।
(इन्द्रः २०६) ८।३२।२७ (मेधातिथिः काण्वः। इन्द्रः)
प्र व ...।
देवत्तं ब्रह्म गायत।
[३,१०] १।३७।१,५ क्रीळं वः शर्धो(५ क्रीळं यच्छर्धो)मारुतम्
[१३] १।३७।८ (कण्वो घौरः। मरुतः)
भिया यामेषु रेजते।
(८६) ८।२०।५ (सोभरिः काण्वः। मरुतः)
भूमिर्यामेषु रेजते।
[१६] १।३७।११ (कण्वो घौरः। मरुतः)
प्र च्यावयन्ति यामभिः।
(२७८) ५।५६।४ (श्यावाश्व आत्रेयः। मरुतः)
[१७] १।३७।१२ (कण्वो घौरः। मरुतः)
मरुतो यद्ध वो बलं।
(५६) ८।७।११ (पुनर्वत्सः काण्वः। मरुतः)
... वो दिवः।
[२१] १।३८।१ (कण्वो घौरः। मरुतः)
कद्ध नूनं कधप्रियः।
(७६) ८।७।३१ (पुनर्वत्सः काण्वः। मरुतः)
[४०] १।३९।५ (कण्वो घौरः मरुतः)
प्र वेपयन्ति पर्वतान्।
प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा।
५।२६।९ (वसूयव आत्रेयाः। विश्वे देवाः)
एदं मरुतो।
देवासः सर्वया विशा।
(४९) ८।७।४ (पुनर्वत्सः काण्वः। मरुतः)
वपन्ति मरुतो मिहं प्र वेपयन्ति पर्वतान्।
[४२] १।३९।६ (कण्वो घौरः। मरुतः)
उपो रथेषु पृषतीरयुग्ध्वं।
(१२७) १।८५।५ (गोतमो राहूगणः। मरुतः)
प्र यद् रथेषु पृषतीरयुग्ध्वं।
[ ] १।३९।६ (कण्वो घौरः। मरुतः)
उपो रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः।
(७३) ८।७।२८ (पुनर्वत्सः काण्वः। मरुतः)
यदेषां पृषती रथे प्रष्टिर्वहति रोहितः।
[४२] १।३९।७ भद्रा अवो वृणीमहे।
१।४२।५ (कण्वो घौरः। पूषा)
पूषन्नवो वृणीमहे।
[११२] १।६४।४ (नोधा गौतमः। मरुतः)
वक्षःसु रुक्माँ अधि येतिरे शुभे।
(२६०) ५।५४।११ (श्यावाश्व आत्रेयः। मरुतः)
वक्षःसु रुक्मा मरुतो रथे शुभः।
[११३] १।६४।६ उत्सं दुहन्ति स्तनयन्तमक्षितम्।
९।७२।६ (हरिमन्त आङ्गिरसः। पवमानः सोमः)
अंशुं दुहन्ति—।
[११९] (नोधा गौतमः। मरुतः)
रुद्रस्य सूनुं हवसा गृणीमसि।
रजस्तुरं तवसं मारुतं।
(३४४) ६।६६।११ (भरद्वाजो बार्हस्पत्यः। मरुतः)
तं वृधन्तं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे।
[१२०] १।६४।१३ (नोधा गौतमः। मरुतः)
नरस्थां व ऊती मरुतो यमावत।
(२६५) १।१६६।८ (अगस्त्यो मैत्रावरुणिः। मरुतः)
पूर्भी रक्षता मरुतो यमावत।

[१२०] १।६४।१३ (नोधा गौतमः। मरुतः)
मरुतो...... ।
अर्वद्भिर्वाजं भरते धना नृभिः।
२।२६।३ (गृत्समदः शौनकः। ब्रह्मणस्पतिः)
स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः।
(इन्द्रः १८०७) १०।१४७।४ (सुवेदाः शैरीषिः। इन्द्रः)
स इन्... ।
मक्षू स वाजं भरते धना नृभिः।
[१२४] १।८५।२ त उक्षितासो महिमानमाशत।
(इन्द्रः ३२०३) ८।५९ (वाल० ११)।२
(सुपर्णः काण्वः। इन्द्रावरुणौ)
इन्द्रावरुणा महिमानमाशत।
[१२७] १।८५।५ प्र यद् रथेषु पृषतीरयुग्ध्वं।
(४१) १।३९।६ (कण्वो घौरः। मरुतः)
उपो रथेषु पृषतीरयुग्ध्वं।
[१३०] १।८५।८ (गोतमो राहूगणः। मरुतः)
भयन्ते विश्वा भुवना मरुद्भ्यो।
(१६१) १।१६६।४ (अगस्त्यो मैत्रावरुणिः। मरुतः)
... भुवनानि हर्म्या।
[१३१] १।८५।९ अहन् वृत्रं निरपामौब्जदर्णवम्।
(इन्द्रः ८०९) १।५६।५ (सव्य आङ्गिरसः। इन्द्रः)
[१३७] १।८६।३ स गन्ता गोमति व्रजे।
(इन्द्रः २२४४) ७।३२।१० गमत्स गोमति व्रजे।
(इन्द्रः १८९५) ८।४६।९ (वशोऽश्व्यः। इन्द्रः)
(इन्द्रः ५०९) ८।५१ (वाल० ३)।५ गमेम गोमति व्रजे
[१३८] १।८६।४ (गोतमो राहूगणः। मरुतः)
सुतः सोमो दिविष्टिषु।
उक्थं मदश्च शस्यते।
(इन्द्रः ६३६) ८।७६।९ (कुरुसुतिः काण्वः। इन्द्रः)
सुतं सोमं दिविष्टिषु।
[इन्द्रः ३३१७] ४।४९।१ [वामदेवो गौतमः। इन्द्राबृहस्पती]
उक्थं मदश्च शस्यते।
[१३९] १।८६।५ [गोतमो राहूगणः। मरुतः]
विश्वा यश्चर्षणीरभि।
[अग्निः ६९६] ४।७।४ [वामदेवो गौतमः। अग्निः]
[अग्निः ९०३] ५।२३।१ [द्युम्नो विश्वचर्षणिरात्रेयः। अग्निः]
[१४८] १।८७।४ [गोतमो राहूगणः। मरुतः]
असि सत्य ऋणयावानेद्यो।
२।२३।११ [गृत्समदः शौनकः। ब्रह्मणस्पतिः]
...ऋणया ब्रह्मणस्पत।
[१९१] १।१६८।९ [अगस्त्यो मैत्रावरुणिः। मरुतः]
आदित् स्वधामिषिरां पर्यपश्यन्।
१०।१५७।५ [भुवन आप्त्यः साधनो वा भौवनः। विश्वे देवाः]
[१९२] १।१६८।१०= [इन्द्रः ३२६४] १।१६५।१५
=[१७२] १।१६६।१५=[१८२] १।१६७।११
[अगस्त्यो मैत्रावरुणिः। मरुत्वानिन्द्रः]
एष वः स्तोमो०.....कारोः।
एषा यासीष्ट०.....जीरदानुम्॥

ऋग्वेदस्य द्वितीयं मण्डलम्।

[१९८] २।३०।११ तं वः शर्धं मारुतं।
(२४३) ५।५३।१० तं वः शर्धं रथानां।
[२०१] २।३४।४ (गृत्समदः शौनकः। मरुतः)
पृषदश्वासो अनवभ्रराधसः।
(२१६) ३।२६।६ (गाथिनो विश्वामित्रः। मरुतः)

ऋग्वेदस्य तृतीयं मण्डलम्।

[२१६] ३।२६।६ = (२०१) २।३४।४

ऋग्वेदस्य पञ्चमं मण्डलम्।

[२३०] ५।५२।४ [श्यावाश्व आत्रेयः। मरुतः]
वो......स्तोमं यज्ञं च धृष्णुया।
[अग्निः१०६३] ६।१६।२२ [भरद्वाजो बार्हस्पत्यः। अग्निः]
वः ...... स्तोमं यज्ञं च धृष्णुया।
[२४३] ५।५३।१० त्वेषं गणं मारुतं नव्यसीनाम्।
[२९२] ५।५८।१ स्तुषे गणं ...।
[२४९] ५।५३।१६ [श्यावाश्व आत्रेयः। मरुतः]
रणन् गावो न यवसे।

१०।२५।१ [विमद ऐन्द्रः प्राजापत्यो वा वसुकृद्वा वासुकः। सोमः]

रणन् गावो न यवसे विवक्षसे ।

[२६०] ५।५४।११ [श्यावाश्व आत्रेयः । मरुतः]

विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययीः ।

[२७०] ८।७।२५ [पुनर्वत्सः काण्वः । मरुतः]

विद्युद्धस्ता......शिप्राः शीर्षन् हिरण्ययीः ।

[२६५ ७३] ५।५५।१-९ शुभं यातामनु रथा अवृत्सत ।

[२६७] ५।५५।३ विरोकिण **सूर्यस्येव रश्मयः ।**

(अग्निः १६५४) १०।९१।४ (अरुणो वैतहव्यः । अग्निः)

अरेपसः **सूर्यस्येव रश्मयः ।**

[२७३] ५।५५।९ (श्यावाश्व आत्रेयः । मरुतः)

अस्मभ्यं शर्म बहुलं वि यन्तन ।

अधि स्तोत्रस्य सख्यस्य गातन ।

६।५१।५ (ऋजिश्वा भारद्वाजः । विश्वे देवाः)

अस्मभ्यं शर्म बहुल वि यन्त ।

(४२२) १०।७८।८ (स्यूमरश्मिर्भार्गव । मरुतः)

अधि स्तोत्रस्य सख्यस्य गात ।

[२७४] ५।५५।१०=४।५०।६ [वामदेवो गौतमः । बृहस्पतिः]

वयं स्याम पतयो रयीणाम् ।

[२७५] ५।५६।१=१।४९।१ [प्रस्कण्वः काण्वः । उषा]

दिवश्चिद् रोचनादधि ।

[२७८] ५।५६।४=[१६] १।३७।११

प्र च्यावयन्ति यामभिः ।

[२८०] ५।५६।६ युङ्ग्ध्वं **ह्यरुषी रथे ।**

१।१४।१२ [मेधातिथिः काण्वः । विश्वे देवाः]

युक्ष्वा **ह्यरुषी रथे ।**

["] ५।५६।६ [श्यावाश्व आत्रेयः । मरुतः]

रथे... ।

आजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे ।

१।१३४।३ [परुच्छेपो दैवोदासिः । वायुः]

[२९०] ५।५७।७ [श्यावाश्व आत्रेयः । मरुतः]

भक्षीय वो ऽवसो दैव्यस्य ।

[इन्द्रः १५५३] ४।२१।१० [वामदेवो गौतमः । इन्द्रः]

भक्षीय ते **ऽवसो दैव्यस्य ।**

[२९१] ५।५७।८=[२९९] ५।५८।८ श्यावाश्व आत्रेयः । मरुतः]

हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः।

सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः।

[२९२] ५।५८।१=[२४३] ५।५३।१०

[३१९] ५।८७।२ (एवयामरुदात्रेयः । मरुतः)

दाना मह्ना तदेषाम् ।

(९५) ८।२०।१४ (सोभरिः काण्वः । मरुतः)

[३२२] ५।८७।५ (एवयामरुदात्रेयः । मरुतः)

स्वायुधास इष्मिणः ।

(३५५) ७।५६।११ (वसिष्ठो मैत्रावरुणिः । मरुतः)

स्वायुधास इष्मिणः सुनिष्का ।

ऋग्वेदस्य षष्ठं मण्डलम् ।

[३३४] ६।६६।१ (बार्हस्पत्यो भरद्वाजः । मरुतः)

शुक्रं दुदुहे पृश्निरूधः ।

(अग्निः ६७१) ४।३।१० (वामदेवो गौतमः । अग्निः)

[३४१] ६।६६।८ **नास्य वर्ता न तरुता न्वस्ति ।**

१।४०।८ (कण्वो घौरः । ब्रह्मणस्पतिः)

नास्य वर्ता न तरुता महाधने ।

["] ६।६६।८ **मरुतो यमवथ वाजसातौ ।**

१०।३५।१४ (लुशो धानाकः । विश्वे देवाः)

यं देवासो**ऽवथ वाजसातौ ।**

१०।६३।१४ (गयः प्लातः । विश्वे देवाः)

["] ६।६६।८ **तोके वा गोषु तनये यमप्सु ।**

(इन्द्रः १९४१) ६।२५।४ (भरद्वाजो बार्हस्पत्यः । इन्द्रः)

......**यदप्सु ।**

[३४४] ६।६६।११=(११९) १।६४।१२

ऋग्वेदस्य सप्तमं मण्डलम् ।

[३५५] ७।५६।११=(३२२) ५।८७।५

[३६७] ७।५६।२३ **इन्द्रः सनिता वाजमर्वा ।**

(इन्द्रः २०१७) ६।३३।२ (शुनहोत्रो भारद्वाजः । इन्द्रः)

[३६९] ७।५६।२५=७।३४।२५ **यूयं पात स्वस्तिभिः सदा नः।**

["] ७।५६।२५ **आप ओषधीर्वनिनो** जुषन्त ।

१०।६६।९ (वसुकर्णो वासुकः । विश्वे देवाः)

आप ओषधीर्वनिनानि यज्ञिया ।

७।३४।२५ (वसिष्ठो मैत्रावरुणिः । विश्वे देवाः)

[३७३] ७।५७।४ (वसिष्ठो मैत्रावरुणिः । मरुतः)

यद्व आगः पुरुषता कराम ।

अस्मे वो अस्तु सुमतिश्चनिष्ठा ।

१०।१५।६ (शङ्खो यामायनः । पितरः)
यद्व...... ।
७।७०।५ (वसिष्ठो मैत्रावरुणिः । अश्विनौ)
अस्मे वामस्तु सुमतिश्चनिष्ठा ।
[३७६] ७।५७।७ आ स्तुतासो मरुतो विश्व ऊती ।
५।४३।१० (अत्रिर्भौमः । विश्वे देवाः)
विश्वे गन्त मरुतो विश्व ऊती ।
[३७९] ७।५८।३ (वसिष्ठो मैत्रावरुणिः । मरुतः)
प्र णः स्पार्हाभिरूतिभिस्तिरेत ।
(इन्द्रः ३१९४) ७।८४।३ (वसिष्ठो मैत्रावरुणिः । इन्द्रावरुणौ)
... रेतम् ।
[३८०] ७।५८।६ आराच्चिद् द्वेषो वृषणो युयोत ।
(इन्द्रः २१११) ६।४७।१३ (गर्गो भारद्वाजः । इन्द्रः)
आराच्चिद् द्वेषः सनुत युयोतु ।
[३८४] ७।५९।२ युष्माकं देवा अवसाहनि ।
१।११०।७ (कुत्स आंगिरसः । ऋभवः)
["] ७।५९।२ (वसिष्ठो मैत्रावरुणिः । मरुतः)
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ।
८।२७।१६ (मनुर्वैवस्वतः । विश्वे देवाः)

ऋग्वेदस्याष्टमं मण्डलम् ।

[४६] ८।७।१ प्र यद् वस्त्रिष्टुभमिषं ।
(इन्द्रः २३०४) ८।६९।१ (प्रियमेध आंगिरसः । इन्द्रः)
प्रप्र वस्त्रिष्टुभमिषं ।
[४७] ८।७।२ यदङ्ग तविषीयवो ।
(इन्द्रः २६८ ८।६।२६ (वत्सः काण्वः । इन्द्रः)
यदङ्ग तविषीयस ।
[४७.५९] ८।७।२,१४ यामं शुभ्रा अचिध्वम् ।
[४८] ८।७।३ (पुनर्वत्सः काण्वः । मरुतः)
धुक्षन्त पिप्युषीमिषम् ।
(इन्द्रः ३४५) ८।१३।२५ (नारदः काण्वः । इन्द्रः)
धुक्षस्व पिप्युषीमिषमवा च नः ।
(इन्द्रः ५३७) ८।५४(वाल० ६)।७ (मातरिश्वा काण्वः । इन्द्रः)
धुक्षस्व पिप्युषीमिषम् ।
९।६१।१५ अमहीयुराङ्गिरसः । पवमानः सोमः)
धुक्षस्व पिप्युषीमिषम् ।
[४९] ८।७।४ = (४०) १।३९।५
प्र वेपयन्ति पर्वतान् ।
[५३,८१] ८।७।८,३६ ते भानुभिर्वि तस्थिरे ।
[५५] ८।७।१० (पुनर्वत्सः काण्वः । मरुतः)
दुदुह्रे वज्रिणे मधु ।
(इन्द्रः २३०९) ८।६९।६ (प्रियमेध आंगिरसः । इन्द्रः)
[५६] ८।७।११ = (१७) १।३७।१२
मरुतो यद्ध वो दिवः [बलं] ।
[५७] ८।७।१२ = (५) १।१५।२
यूयं हि ष्ठा सुदानवो [०व] ।
[५८] ८।७।१३ पुरुक्षुं विश्वधायसम् ।
८।५।१५ (ब्रह्मातिथिः काण्वः । अश्विनौ)

[६०] ८।७।१५ (पुनर्वत्सः काण्वः । मरुतः)
एषां सुम्न भिक्षेत मर्त्यः ।
८।१८।१ (इरिम्बिठिः काण्वः । आदित्याः)
[६५] ८।७।२० (पुनर्वत्सः काण्वः । मरुतः)
ब्रह्मा को वः सपर्यति ।
(इन्द्रः ५९५) ८।६४।७ प्रगाथः काण्वः । इन्द्रः)
ब्रह्मा कस्त सपर्यति ।
[६७] ८।७।२२ (पुनर्वत्सः काण्वः । मरुतः)
सम् ... सं क्षोणी समु सूर्यम् । सम् ... ।
(इन्द्रः ५२४) ८।५२ (वाल० ४)।१०
(आयुः काण्वः । इन्द्रः)
सम् ... सं क्षोणी समु सूर्यम् ।
सम् ... सम् ।
[६८] ८।७।२३ = (इन्द्रः २५५) ८।६।१३
वि वृत्रं पर्वशो ययुः (रुजन् ।
[७०] ८।७।२५ = २६०) ५।५४।११
[७१] ८।७।२६ = (इन्द्रः १०१९) १।१३०।९
उशना यत् परावतः ।
[७३] ८।७।२८ = (४१) १।३९।६
[७६] ८।७।३१ = (२१) १।३८।१
[८०] ८।७।३५ (पुनर्वत्सः काण्वः । मरुतः)
वहन्त्यन्तरिक्षेण पततः ।
१।२५।७ (शुनःशेप आजीगर्तिः । वरुणः)
पदमन्तरिक्षेण पतताम् ।
[८६] ८।२०।५ = (१३) १।३७।८
भूमि (भिया) यामेषु रेजते ।

[८९] ८।२०।८ (सोभरिः काण्वः । मरुतः)
रथे कोशे हिरण्यये ।
८।२२।९ (सोभरिः काण्वः । अश्विनौ)
रथे कोशे हिरण्यये वृषण्वसू ।
[९५] ८।२०।१४ = (३१९) ५।८७।२
[१०७] ८।२०।२६ (सोभरिः काण्वः । मरुतः)
तेना नो अधि वोचत ।
८।६७।६ (मत्स्यः साम्मदः मान्यो मैत्रावरुणिः बहवो वा मत्स्या जालनद्धाः । आदित्याः)
["] ८।२०।२६ इष्कर्ता विहुतं पुनः ।
(इन्द्रः ९८) ८।१।१२ (मेधातिथि–मेध्यातिथी काण्वौ । इन्द्रः)
[३९७] ८।९४।३ तत् सु नो विश्वे अर्य आ सदा गृणन्ति कारवः ।
६।४५।३३ (शंयुर्बार्हस्पत्यः । बृबुस्तक्षा)

["] ८।९४।३ मरुतः सोमपीतये ।
१।२३।१० (मेधातिथिः काण्वः । विश्वे देवाः)
[३९८] ८।९४।४ आस्ति सोमो अयं सुतः ।
(इन्द्रः १७६६) ५।४०।२ वृषा सोमो अयं सुतः ।
[४०२] ८।९४।८ = १।३८।१०
[४०३] ८।९४।९= १।२३।१०(मेधातिथिः काण्वः । विश्वे देवाः)
[४०४-६] ८।९४।१०-१२ अस्य सोमस्य पीतये ।
= १।२२।१ (मेधातिथिः काण्वः । अश्विनौ)
(इन्द्रः ३२१३) १।२३।२ (मेधातिथिः काण्वः । इन्द्रवायू)
(इन्द्रः ३३२१)४।४९।५(वामदेवो गौतमः । इन्द्राबृहस्पती)
(इन्द्रः ३०५५)६।५९।१०(बार्हस्पत्यो भरद्वाजः । इन्द्राग्नी)
(इन्द्रः ६३३) ८।७६।६ (कुरुसुतिः काण्वः । इन्द्रः)
५।७१।३ (बाहुवृक्त आत्रेयः । मित्रावरुणौ)

ऋग्वेदस्य दशमं मण्डलम् ।

[४१२] १०।७७।६ = (इन्द्रः २१११) ६।४७।१३
(गर्गो भारद्वाजः । इन्द्रः)
[४१४] १०।७७।८ ते हि यज्ञेषु यज्ञियास ऊमाः ।
७।३९।४ (वसिष्ठो मैत्रावरुणिः । विश्वे देवाः)
[४२२] १०।७८।८ = (२७३) ५।५५।९

दैवत-संहितान्तर्गत

मरुद्देवता-मन्त्राणां उपमासूची।

अग्नयः न इधानाः ६,६६,२; ३३५ मरुतः शोशुचन्।
अग्नयः न २,३४,१; १९९ शोशुचानाः।
" " ५,८७,३; ३२० स्वविद्युतः।
" " ५,८७,६; ३२३ शुशुक्वासः।
अग्निः न १०,७८,२; ४१६ भ्राजसा रुक्मवक्षसः।
अग्नीनां न जिह्वा १०,७८,३; ४१७ विरोकिणः।
अग्नितपः यथा ५,६१,४; ३११ [तद्वत् प्रदीप्ताः]।
अङ्गिरसः न १०,७८,५; ४१९ सामभिः विश्वरूपाः।
अत्यम् न १,६४.६; ११३ वाजिनं मिहे वि नयन्ति।
अत्यासः न ७,५६,१६; ३६० स्वश्वः।
अत्याः इव ५,५९ ३; ५०२ सुभ्वः चारवः।
अत्यान् इव वाजिषु २,३४,३; २०१ अश्वान् उक्षन्ते।
अदितेः इव व्रतम् १,१६६,१२; १६९ दीर्घं दात्रम्।
अद्र्यः न ५,८७,२; ३१९ अधृष्टासः।
" " आदर्दिरासः १०,७८ ६; ४२० विश्वहा।
अध्वरस्य इव ६,६६,१०; ३४३ मरुतः दिद्युत्।
अन्तम् न १,३७,६;११ सीम् धूनुथ।
अपः न १,६४,१; १०८ मनसा गिरः समञ्जे।
आपः इव ८,९६,७; ४०१ सूरयः तिरः इषन्त।
" " ५,६०,३; ४५१ सध्न्यञ्चः धवध्वे।
" " न १०,७८,५; ४१९ निम्नैः उद्भिः जिगत्नवः।
अपां न ऊर्मयः १,१६८,२; १८४ सहस्रियासः मरुतः।
अपां न यामनि १०,७७,४; ४१० युष्माकं बुध्ने मही न।
अभ्रप्रुषः न १०,७७,१; ४०७ वाचा वसुप्रुषा।
अभ्रात् न सूर्यः १०,७७,३; ४०९ त्मना प्र रिरिच्रे।
आश्रियाः न २,३४,२; २०० वृष्टयः वि द्युतयन्त।
अमतिः न १,६४,९; ११६ [तेजः] रथेषु आ तस्थौ।
अराः इव ५,५८,५; २९६ अचरमाः।
अराणां न चरमः ८,२०,१४; ९५ एषां दाना मह्ना।
अर्कम् न अभिस्वर्तारः १०,७८,४; ४१८ सुष्टुभः।
अर्णः न ८,२०,१३; ९४ सप्रथः त्वेषम्।
" " १,१६७,९; १८० मरुतः द्वेषः परि स्तुः।
अर्यमणम् न ६,४८,१४; ३३० मन्द्रम्।
अर्यमणः न ५,५४,८; २५७ [दीप्ताः]।

अश्वाः इव ५,५९,५; ३०४ [शीघ्रगन्तारः]।
अश्वासः न १०,७८,५; ४१९ ज्येष्ठासः आशवः।
अश्वाः इव अध्वनः ५,५३,७; २४० क्षोदसा रजः प्र सस्रुः।
अश्वाम् इव ऊधनि २,३४,६; २०४ धेनुं पिन्वत।
असुर्यां इव १,१६८,७; १८९ रातिः जञ्जती।
अहा इव ५,५८,५; २९६ अचरमाः।
आयून् इव अथ० ४,२७,१; ४४१ सुयमान् अह्व ऊतये।
